Shreemad Bhagvatam

अथ

दशम स्कंधे - पूर्वार्धम्

Dasham Skandhe - Poorvardham

B No. 1

भा० द० पू० श्रीकृष्णायनमः ॥ विश्वसर्गविसर्गादिनवलक्षणलक्षितं ॥ श्रीकृष्णाख्यंपरंधामजगद्धामनमामितत् ॥ १ ॥ द
१ शमेदशमंलक्ष्यमाश्रिताश्रयविग्रहं ॥ क्रीडद्यदुकुलांभोधौपरानंदमुदीर्य्यते ॥ २ ॥ दशमेकृष्णसत्कीर्त्तिर्वित्ता
नायानुवर्ण्यते ॥ धर्म्मग्लानिनिमित्तस्तुनिरोधोदुष्टभूभुजां ॥ ३ ॥ प्राकृतादिश्चतुर्द्धायोनिरोधःसतुवर्णितः ॥ तत्रात्र
संगतःसृष्टिसंहारादिनिरूपणैः ॥ ४ ॥ कृतानुवृत्तिरध्यायाद्दशमेकृष्णकीर्त्तये ॥ आदौचतुर्भिरध्यायैर्ब्रह्मप्रार्थन
यावनेः ॥ भारंहर्तुंहरेर्जन्मसप्रसंगंनिरूप्यते ॥ ५ ॥ गोकुलेमथुरायांचद्वारवत्यांततःक्रमात् ॥ कृष्णलीलात्रिधा

राजोवाच ॥ कथितोवंशविस्तारोभवतासोमसूर्य्ययोः ॥ राज्ञांचोभयवंश्यानांचरितंपरमाद्भुतं ॥ १ ॥

त१
प्रोक्तास्तेद्वादशस्वन्तेकथा ॥ ६ ॥ सपंचत्रिंशताध्यायैरिहवृंदावनादिषु ॥ गोकुलेवसतोलीलावर्ण्यतेसुरदु
दुष्करा ॥ ७ ॥ एकेनयमुनावारिण्यक्रूरेणकृतास्तुतिः ॥ ८ ॥ एकादशभिराख्यातालीलामधुपुरेकृता ॥ शे
षैर्द्वारवतीलीलातन्निर्माणादिवर्ण्यते ॥ ९ ॥ एवंनवतिरध्यायाद्दशमेविशदाकथाः ॥ तत्रतुप्रथमेकंसःस
मृत्युंदेवकीसुतात् ॥ श्रुत्वाभीतोवधीत्तस्याःषड्गर्भानितिवर्ण्यते ॥ १० ॥ कृष्णावतारचरितश्रवणामृतनिर्वृतः
उक्तोनुवादेनोत्सुकाज्ज्ञातुंपृच्छतितत्सुनः ॥ कथितोवंशविस्तारइति ॥ १ ॥ ॥ ।

१

च २

भा॰ द॰ पू॰ न केवलं पांडवानेवात्रातुं ॥ इदं मम शरीरमपि योरक्षितवानित्याह ॥ द्रौण्यस्त्रविप्लुष्टमिति ॥ द्रौणेरस्त्रस्याग्नेर्ब्रह्मास्त्रेण दग्ध-
॥ २ ॥ मिदं मच्छरीरं ॥ कुरूणां पांडवानां च संतानस्य निदानं ॥ मम मातुः कुक्षौ प्रविष्टो धृतचक्रो यो जुगोपेति ॥ ६ ॥ अखिलदेहभाजां सर्व-
प्राणिनां ॥ अंतर्बहिश्च पुरुषरूपेण कालरूपेण च ॥ अत्राभिप्रायेणेव वक्तृवचनं ॥ मृत्युं संसारं ॥ उत अपि अमृतमपि प्रयच्छतो
वीर्याणि वदस्व ब्रूहि ॥ अयं भावः ॥ अंतर्यामिरूपेणांतर्दृष्टीनां मुक्तिं ॥ बहिर्दृष्टीनां च कालरूपेण मृत्युं ददातीति यतः अतोऽंतर्ह

द्रौण्यस्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवानां ॥ जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणं ग-
तायाः ॥ ६ ॥ वीर्याणि तस्याखिलदेहभाजामंतर्बहिः पूरुषकालरूपैः ॥ प्रयच्छतो मृत्युमुतामृतं च मा-
यामनुष्यस्य वदस्व विद्वन् ॥ ७ ॥ ८ ॥ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया ॥ देवक्या गर्भसंबंधः कु-
तो देहांतरं विना ॥ ८ ॥ कस्मान्मुकुंदो भगवान्पितुर्गेहाद्व्रजं गतः ॥ क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतां
पतिः ॥ ९ ॥

ध्यातव्वीर्याण्येव श्रोतव्यानीति ॥ ७ ॥ ८ ॥ ननु बलं गदं सारणं च दुर्मदं विपुलं ध्रुवं ॥ वसुदेवस्तु रोहिण्यां कृतादीनुदपाद-
यदिति रोहिण्यास्तनयो रामः प्रोक्तः ॥ वसुदेवस्तु देवक्यामष्टौ पुत्रानजीजनत् ॥ कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः ॥
ऋजुं संमर्दनं भद्रं संकर्षणमहीश्वरं ॥ अष्टमस्तु तयोरासीत्स्वयमेव हरिः किलेति ॥ पुनरेव देवकागर्भसंबंधस्तस्यैवोक्तः ॥
सकुतो घटत इत्याक्षेपः ॥ ८ ॥ कस्मादिति भगवतः कंसभयशंकासंभवादित्यर्थः ॥ ९ ॥ ॥ ॥ २ ॥

उक्तंच। नृदेहमाद्यंसुलभंसुदुर्लभं प्लवंसुकल्पंगुरुकर्णधारं। मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिंनतरेत्सआत्महा॥ प्राकृतैःसं
स्कृतैश्चैवगद्यपद्याक्षरैस्तथा। देशभाषादिभिःशिष्यंबोधयेत्सगुरुःस्मृतः॥ २

अंशेनेतिप्रतीत्यभिप्रायेणोक्तं॥ २॥ ननुकानिजातोगतःपितृगृहाद्व्रजमेधितार्थइत्यादिनासत्यं॥ पुनर्विस्तरेणवदेत्याह॥ अव
तीर्येति॥ ३॥ अत्रलोकेत्रिविधाजनाः॥ मुक्तामुमुक्षवोविषयिणश्च॥ तेषांमध्येऽत्रनकस्याप्यलंप्रत्ययइत्याह॥ निवृत्तत
र्षैरिति॥ गततृष्णैर्मुक्तैरित्यर्थः॥ मुमुक्षूणामयमेवोपायइत्याह॥ भवौषधादिति विषयिणांपरमोविषयोऽयमेवेत्याशयेनाह

यदोश्चधर्मशीलस्यनितरांमुनिसत्तम॥ तत्रांशेनावतीर्णस्यविष्णोर्वीर्याणिशंसनः॥ २॥ अवतीर्ययदोर्वंशेभ
गवान्भूतभावनः॥ कृतवान्यानिविश्वात्मातानिनोवदविस्तरात्॥ ३॥ निवृत्ततर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रम
नोभिरामात्॥ कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येतविनापशुघ्नात्॥ ४॥ पितामहामेसमरेऽमरंजयै
र्देवव्रताद्यातिरथैस्तिमिंगिलैः॥ दुरत्ययंकौरवसैन्यसागरंकृत्वातरन्वत्सपदंस्मयत्प्लवाः॥ ५॥

श्रोत्रमनोभिरामादिति॥ अपगतानांसुकृत्यस्मात्॥ नमात्मानंहन्तीत्यपशुघ्नः॥ तस्मात्॥ पशुघातिनइतिवा॥ ४॥ किंच
अस्मत्कुलदैवतंश्रीकृष्णः॥ अतस्तत्कथैवनित्यंश्रोतव्येत्याशयेनाह॥ पितामहाइति॥ अमरान्जयंतीतियेतैः॥ देवव्रतो
भीष्मः तदाद्यैरतिरथैः॥ तिमिंगिलतुल्यैः॥ दुरत्ययंकौरवसैन्यसागरं॥ वत्सपदमिवाल्पंकृत्वा॥ तुच्छीकृत्यातरन्स्म॥ यत्
यःश्रीकृष्णएवप्लवोयेषांते॥ तस्यवीर्याणिवदस्वेतितृतीयश्लोकगतेनान्वयः॥ ५॥ स्य ३

भा०द०प्र० विभोरंतिके उपस्थितासती ॥१६॥१७॥१८॥ पौरुषीं पुरुषस्य भगवतो गां वाचं ॥ मे मत्तः आशु शृणुत माचिरं ॥ अविलंबितं त

३ गौर्भूत्वाश्रुमुखी खिन्ना क्रंदंती करुणं विभोः ॥ उपस्थितांतिके तस्मै व्यसनं स्वमवोचत ॥१६॥ ब्रह्मा तदुप
धार्य्याथ सह देवैस्तया सह ॥ जगाम सत्रिनयनस्तीरं क्षीरपयोनिधेः ॥१७॥ तत्र गत्वा जगन्नाथं देवदेवं
वृषाकपिं ॥ पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥१८॥ गिरं समाधौ गगने समीरितां निशम्य वेधास्त्रि
दशानुवाच ह ॥ गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव माचिरं ॥१९॥ पुरैव पुंसावधृतो ध
राज्वरो भवद्भिरंशैर्यदुषूपजन्यतां ॥ स यावदुर्व्या भरमीश्वरेश्वरः स्वकालशक्त्या क्षपयंश्चरेद्भुवि ॥२०॥
वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः ॥ जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः ॥२१॥ वासुदेवकला
नंतः सहस्रवदनः स्वराट् ॥ अग्रतो भविता देवो हरेः प्रियचिकीर्षया ॥२२॥ विष्णोर्माया भगवती यया
संमोहितं जगत् ॥ आदिष्टा प्रभुणांशेन कार्य्यार्थे संभविष्यति ॥२३॥ श्रीशुक उवाच ॥ इत्यादिश्यामरग
णान्प्रजापतिपतिर्विभुः ॥ आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ ॥२४॥

थैव विधीयतां चेति ॥१९॥ विज्ञापनात्पुरैव पुंसा ईश्वरेण ॥ अवधृतो ज्ञातः ॥ धरायाः ज्वरस्तापः ॥२०॥२१॥२२॥ देवकीगर्भसंकर्ष ॥३॥
णं ॥ यशोदा मोहनादि कार्य्यार्थे यशोदायां संभविष्यति ॥२३॥२४॥

मातुर्भ्रातरं कंसं तस्मात्तद्धानर्हं ॥ अद्धा साक्षात्कंसमादवधीत् ॥ ८ ॥ ९ ॥ १० ॥ ननु त्वं क्षुत्तृड्भ्यां पीडितस्तव कुतः श्रवणावकाश
स्तत्राह नैषेति ॥ त्यक्तोदकस्यापि मम जीवनं हरिकथापाननिमित्तं ॥ तदुपरमे सद्य एव जीवितं न स्यादित्यर्थः ॥ ११ ॥ एवं साधुवा

व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः ॥ भ्रातरं चावधीत्कंसं मातुरद्धातदर्हणं ॥ ८ ॥ देहं मानुषमाश्रित्य
कति वर्षाणि वृष्णिभिः ॥ यदुपुर्यां सहावात्सीत्पत्न्यः कत्यभवन्प्रभोः ॥ ९ ॥ एतदन्यच्च सर्वं मे मुने कृष्णवि
चेष्टितं ॥ वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं ॥ १० ॥ नैषातिदुःसहा क्षुन्मां त्यक्तोदमपि बाधते ॥ पिबन्तं त्व
न्मुखांभोजच्युतं हरिकथामृतं ॥ ११ ॥ सूत उवाच ॥ एवं निशम्य भृगुनंदन साधुवादं वैयासकिः स भगवा
नथ विष्णुरातं ॥ प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः ॥ १२ ॥ श्रीशुक उवा
च ॥ सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम ॥ वासुदेवकथायां ते यज्जाता नैष्ठिकी रतिः ॥ १३ ॥ वासुदेवक
थाप्रश्नः पुरुषांस्त्रीन्पुनाति हि ॥ वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा ॥ १४ ॥ भूमिर्दृप्तनृपव्याजदैत्या
नीकशतायुतैः ॥ आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ ॥ १५ ॥

दं समीचीनं प्रश्नं ॥ भागवतप्रधानः भागवतेषु श्रेष्ठः ॥ १२ ॥ व्यवसिता कृतनिश्चया ॥ यतः यतो बुद्धेः ॥ १३ ॥ १४ ॥ तत्र तावत्प्रथमं भगवद
वतारकारणमाह ॥ भूमिरित्यादिभिः नवभिः श्लोकैः ॥ दृप्तनृपव्याजा ये दैत्यास्तेषामनीकशतानामयुतैर्भूरिभारस्तेन

नृशंसं क्रूरं ॥ महाभाग इत्ययं भावः स्वजन्मनि हर्षेण देवैस्तैरानकदुंदुभिघोषेणास्य स्माराद्विभगवदवतारेण शरूपप्रतिकारस्तत्रासं
भवतीति परिसांत्वयन् स्तुत्या कृपाविषत्वेनोपपत्तिभिश्च साममार्गेण संबोधयन् ॥३३॥ चेत्सुकः ॥ सा मभेदाभ्यां संबोधयन्
तत्र साम पंचविधं ॥ भेदो द्विविधः ॥ तदुक्तं ॥ संबंधलाभोपकृतिर्ह्यभेदगुणकीर्तनं ॥ सामपंचविधं भेदो दृष्टादृष्टभयं वचरे
ति ॥ तत्र श्लाघनीयगुण इति गुणकीर्तनं ॥ भगिनीति संबंधः [illegible] कथयन् ॥ भवानिति स्त्रीवधनिवृत्त्या यशोलाभं दर्शयति उद्वा
हपर्वणीति संतानवृद्ध्या उपकारं दर्शयति ॥३४॥ मरणभयेन हन्मीति चेत्तथापि मरणस्यापरिहरणीयत्वाद्देहांतरस्याव^
मं देहांतरं प्राप्य पश्चात्स्वं वपुस्त्यजति ॥३६॥

य २ तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं ॥ वसुदेवो महाभाग उवाच परिसांत्वयन् ॥३३॥ ॥वसुदेव उवाच॥
श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः ॥ स कथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ॥३४॥ मृत्युर्जन्मवतां वी
र देहेन सह जायते ॥ अद्य वाब्दशतांते वा मृत्युर्वै प्राणिनां ध्रुवः ॥३५॥ देहे पंचत्वमापन्ने देही कर्मानु
गोवशः ॥ देहांतरमनुप्राप्य प्राक्तनं त्यजते वपुः ॥३६॥

श्यंभावित्वात्तत्रापि च भोगप्रेमास्पदत्वाद्दीनामविशेषात् ॥ तद्द्वेषेण पापाचरणमयुक्तमित्यभिप्रेत्याह ॥ मृत्युर्ज
न्मवतामित्यादिना ॥ देहेन सह इति ॥ विधात्रा ललाटे लिखितत्वादिति ॥ तथापि कालविलंबार्थं हन्मीति चेत्तत्राह ॥ अ
द्य वेति ॥ अवश्यंभाविमरणे विलंबमात्राय पापाचरणमयुक्तमिति भावः ॥३५॥ किंच ॥ अस्मिन्देहे गते यदि देहांतरं न
स्यात्तदा युज्येत पापेनापि तत्पालनं न तु तदस्तीत्याह ॥ देहे पंचत्वमापन्न इति ॥ आपन्नप्राये कर्मवशादयत्नतः एव प्रथ

श्री

भोजेंद्रवंधनागारेष्ववतारायप्रस्तावकथामाह॥ शूरसेनइत्यादिनायावदध्यायसमाप्ति॥ मथुरांआवसन्॥ मथुरायांव
सन्॥ विषयान्॥ देशान्॥ २५॥ २६॥ सूर्य्ययानवोढया॥ प्रयाणे॥ प्रयाणार्थे॥ २७॥ रश्मीन् प्रग्रहान्॥ जग्राह॥ अग्रहीत्॥ २८

शूरसेनोयदुपतिर्मथुरामावसन्पुरीं॥ माथुरान्शूरसेनांश्चविषयान्वुभुजेपुरा॥ २५॥ राजधानी
ततःसाभूत्सर्वयादवभूभुजां॥ मथुराभगवान्यत्रनित्यंसन्निहितोहरिः॥ २६॥ तस्यांतुकर्हिचिच्छौरिर्व
सुदेवःकृतोद्वहः॥ देवक्यासूर्य्ययासार्द्धंप्रयाणेरथमारुहत्॥ २७॥ उग्रसेनसुतःकंसस्वसुःप्रियचिकी
र्षया॥ रश्मीन्हयानांजग्राहरौक्मैरथशतैर्वृतः॥ २८॥ चतुःशतंपारिवर्हंगजानांहेममालिनां॥ अश्वा
नामयुतंसार्द्धंरथानांचत्रिषट्शतं॥ दासीनांसुकुमारीणांद्वेशतेसमलंकृते॥ दुहित्रेदेवकःप्रादाद्यानेदुहि
तृवत्सलः॥ २९॥ शंखतूर्य्यमृदंगाश्चनेदुर्दुंदुभयःसमं॥ प्रयाणप्रक्रमेतावद्वरवध्वोःसुमंगलं॥ ३०॥ पथिप्रग्र
हिणंकंसमाभाष्याहाशरीरवाक्॥ अस्यास्त्वामष्टमोगर्भोहंतायांवहसेऽवुध॥ ३१॥ इत्युक्तःसखलःपापो
भोजानांकुलपांसनः॥ भगिनींहंतुमारब्धंखड्गपाणिःकचेग्रहीत्॥ ३२॥

पारिवर्हंउपस्कारं॥ २९॥ ३०॥ आभाष्यरेरेकंसेतिसंवोध्य॥ हंताहनिष्यति॥ ३१॥ कुलपांशनः॥ कुलदूषणः॥ आरब्धःउद्युक्तः

भा०द०प्र० नन्वु विचित्रदेहहेतूनां कर्मणां कर्तृत्वाद्देहविशेषप्राप्तौ किं कारणं मनस्तत्राह यतो यत इति देहस्य पंचत्वसमये पंचसु गुणे
५ षु मायारचितेषु मायया नानादेहरूपेण रचितेषु दैवेन फलाभिमुखेन कर्मणा चोदितं नानाविकारात्मकं मनो यं यं देव दें हं
तिर्यगादिरूपं प्रति धावति धावच्च सन्तं यं यमाप अभिनिवेशेन प्राप्नं तत्र तत्रासौ देही जायते ननु मनसः कर्तृत्वात्तदेव जायतां
प्रपद्यमान न त्वकर्तात्मेत्यत आह प्रपद्यमान इति तदेवाहमिति मन्यमानस्तेन सह जायत इति ॥३९॥ ननु सत्यं भविष्यत्येवं किं तु पिंडे
हमात्रे तथाप्रतिप्रियस्य राजदेहस्य रक्षणाय हन्त्यपि क्रियत इति चेत्तत्राह ज्योतिरिति अर्कश्चंद्रादिज्योतिः उदकयुक्तेषु पा

यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु ॥ गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह ते
न जायते ॥३९॥ ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभाव्यते ॥ एवं स्वमायारचितेष्वसौ पुमान्
गुणेषु रागानुगतो विमुह्यति ॥४०॥ तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः ॥ आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै पर
तो भयम् ॥४१॥

र्थिवेषु घटादिषु यद्वा उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिंबेन स्थितं समीरस्य वायोर्वेगम नुगतं कंपादियु
क्तं प्रतीयते यथा एवं स्वाविद्यारचितेषु गुणेषु देहेष्वसौ रागानुगतः प्रविष्टो विमुह्यति अभिनिवेशं प्राप्नोति अयं भावः आत्मे
नस्तावद्देहाद्यध्यासाज्जन्मोक्तं सह तेन जायत इति ततश्चान्योन्यधर्माध्यासात् यथा देहधर्माः कार्श्यादय आत्मनि प्रतीयंते ॥६॥
एवमात्मधर्माः प्रेमास्पदत्वादयो देहादिष्वपीति राजसूकरदेहयोर्विशेषाभावात्त व्यर्थो मृत्युप्रतीकार इति ॥४०॥ एवमुक्तं संसा
रोपायमुपसंहरन्भेदमाह तस्मादिति परत इति अभिद्रुह्यमानात् न स्वबुद्धिनश्च यमो दैवी ह्यमुत्र च भयमिति भेदाद्दृष्टि

५

श्चदृष्टांतः॥व्रजन्निति॥एकेनअग्रतोनिहितेनपदातिष्ठन्भुवमवष्टभ्यदेहंविभर्त्तिपश्चादन्येनपूर्वप्रदेशात्॥उत्थाप्याग्रपुरोनिहिते
नगच्छतितद्वत्॥अत्रचस्वीकारपरित्यागौनात्यंतभिन्नविषयावितिस्पष्टंदृष्टांतांतरमाह॥यथातृणजलौकेति॥साहितृणांतर
मवष्टभ्यपूर्वतृणंत्यजति॥एवंकर्मपथेवर्त्तमानोऽन्योजीवोपि॥३७॥देहविषयावेवस्वीकारपरित्यागौदर्शयितुंदृष्टांतांतरमाह॥स्व
प्नइति॥दृष्टंराजादिदर्शनं॥श्रुतंइंद्रादिश्रवणंताभ्यामाहितसंस्कारेणमनसातदेवानुचिंतयन्॥ईदृशंजाग्रद्दृष्टश्रुतसदृशं

वि

न

व्रजंस्तिष्ठंपदैकेनयथैवैकेनगच्छति॥यथातृणजलौकैवंदेहीकर्म्मगतिंगतः॥३७॥स्वप्नेयथापश्य
तिदेहमीदृशंमनोरथेनाभिनिविष्टचेतनः॥दृष्टश्रुताभ्यांमनसानुचिंतयन्प्रपद्यतेतत्किमपिह्यपस्मृ
तिः॥३८॥

देहंराजादिरूपंकिमपिअनिरुक्तंपश्यति॥तृणांतरेचतदेवाहमितिप्रपद्यते॥तदेवाहमितिमन्यते॥ततश्चजाग्रद्दे
हादपगतस्मृतिर्भवति॥पुरुषायुषेति॥जाग्रत्येवदर्शयितुंदृष्टांतांतरमाह॥मनोरथेनेति॥अत्रापिदृष्टश्रुताभ्यामित्या
दिसर्वंयोज्यं॥तथाचवक्ष्यति॥जंतोर्वैकस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः॥जन्मत्वात्मतयापुंसःसर्वभावेनभूरिद॥विषयस्वीकृ
तिप्रादुर्भावःयथास्वप्नमनोरथौ॥स्वप्नमनोरथंचेत्थंप्राक्तनंनस्मरत्यसावित्यादि॥तद्वदत्रापिकर्मवशाद्देहांतरंप्राप्यप्राक्तनंत्यज

प्राणिनामहंसंचपुनर्दुर्वितर्क्यमिति सदृष्टान्तमाह अग्नेरिति ॥ वनेषु स्थानान्प्रदहन्वह्निः सन्निहितानपि हित्वा दूरस्था
न्परित्यज्य कदाचिद्दूरस्थानपि दहति ग्रामेरक्षान्नरा ॥ न ह्यस्य प्राण्यदृष्टव्यतिरेकेणान्यत्किंचिन्नियामकमस्ति यथा ॥ एवं ज
न्तोर्जन्ममरणे ययोरपि हेतुर्दुर्विभाव्य अचिन्त्यः ॥ ४७ ॥ यावदात्मनिदर्शनं स्वप्रज्ञावधि विचार्य ॥ ४८ ॥ तस्य विश्वासाय

अग्नेर्यथा दारुवियोगयोगयोरदृष्टतोऽन्यन्न निमित्तमस्ति ॥ एवं हि जन्तोरपि दुर्विभाव्यः शरीरसंयोग
वियोगहेतुः ॥ ४७ ॥ एवं विमृश्य तं पापं यावदात्मनिदर्शनं ॥ पूजयामास वै शौरिर्बहुमानपुरःसरं ॥ ४८ ॥
प्रसन्नवदनांभोजो नृशंसं निरपत्रपं ॥ मनसा दूयमानेन प्रहसन्निदमब्रवीत् ॥ ४९ ॥ वसुदेव उवाच ॥
न ह्यस्यास्ते भयं सौम्य यद्वा आहाशरीरिणी ॥ पुत्रान्समर्पयिष्येऽस्या यतस्ते भयमागतं ॥ ५० ॥ श्रीशुक
उवाच ॥ स्वसुर्वधान्निववृते कंसस्तद्वाक्यसारवित् ॥ वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद्गृहं ॥ ५१ ॥ अथ
कालउपावृत्ते देवकी सर्वदेवता ॥ पुत्रान्प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरम् ॥ ५२ ॥

विकसितमुखांभोजः ॥ प्रहसन्नब्रवीत् ॥ ४९ ॥ यत्तु यथा अशरीरिणी वागाह ॥ तथा हि निश्चितं ॥ अस्याः सकाशात्ते भयं ना
स्ति ॥ यतः येभ्यः पुत्रेभ्यस्ते भयमुत्थितं ॥ अष्टमो हंतेत्युक्ते अन्योन्यापेक्षया सर्वेऽप्यष्टमा भवेयुरित्यतस्तानस्याः पुत्रान्समर्प
यिष्ये ॥ ५० ॥ निवृत्ते निवृत्तः ॥ तद्वाक्यसारमुपपत्तिसहितं ॥ ५१ ॥ प्रसूतिकाले प्राप्ते सर्वः ॥ सर्वात्मा भगवानेव देवता यस्याः
सा तथा ॥ सर्वदेवमयीति वा भगवदाश्रयत्वात् ॥ ५२ ॥

पुनः साममाह ॥ एषेति ॥ पुत्रिकोपमा दारुमयीवाचेतनप्राया ॥ ४२ ॥ बोध्यमानः ॥ उपदिश्यमानः ॥ स्वयं दारुणः ॥ पुनः पुरुषादान् दैत्याननुव्रत इति ॥ ४३ ॥ आनकदुंदुभिरिति पदं महाभाग इत्यत्रोक्ताभिप्रायं ॥ प्रतिव्योढुं प्रतिकर्तुमित्यर्थः ॥ इदं वक्ष्यमाणमपत्यार्पणं ॥ अन्वपद्यत ज्ञातवान् ॥ ४४ ॥ ननु खलोपमेतत्त्रमन्येतेत्याशंक्याह ॥ स्वयमेव मृत्युरिति ॥ ४५ ॥ तस्मादुपेक्षा दोषपरिहारार्थं वक्ष्यामीत्याह ॥ प्रादायेति ॥ मृत्यवे कंसाय ॥ नन्विदमपि नैव न्याय्यमित्याशंक्याह ॥ सुता इति ॥ यस्माद्यदि सुता

एषा तवानुजा बाला कृपणा पुत्रिकोपमा ॥ हंतुं नार्हसि कल्याणीमिमां त्वं दीनवत्सलः ॥ ४२ ॥ श्रीशुक उवाच ॥ एवं स सामभिर्भेदैर्बोध्यमानोपि दारुणः ॥ न न्यवर्त्तत कौरव्य पुरुषादाननुव्रतः ॥ ४३ ॥ निर्बंधं तस्य तं ज्ञात्वा विचिंत्यानकदुंदुभिः ॥ प्राप्तं कालं प्रतिव्योढुमिदं तत्रान्वपद्यत ॥ ४४ ॥ मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिबलोदयं ॥ यद्यसौ न निवर्त्तेत नापराधोस्ति देहिनः ॥ ४५ ॥ प्रादाय मृत्यवे पुत्रान्मोचये कृपणामिमां ॥ सुता मे यदि जायेरन्मृत्युर्वा न म्रियेत चेत् ॥ विपर्ययो वा किं न स्याद्गतिर्धातुर्दुरत्यया ॥ उपस्थितो निवर्त्तेत निवर्त्तः पुनरापतेत् ॥ ४६ ॥

मे जायेरन् ॥ तदा यद्भावि तद्भवतु ॥ मीविमं तु तावद्वेदेवा ॥ तर्हि तत्र यद्ययमेव म्रियेत तदा न किंचिदन्याय्यं ॥ यदि च सुता भविष्यंति ॥ न चायं म्रियेत ॥ तदा मत्पुत्रादेवास्य मरणमस्तीति विपर्ययो वा किं न स्यात् ॥ ननु प्रौढस्य कंसस्य तव बालकात्कथं मृत्युः स्यात्तत्राह ॥ गतिरिति ॥ धातुः ॥ ईश्वरस्य ॥ त्वामष्टमो गर्भो हंतेत्युक्तवंतः ॥ अंतर इदानीमपत्यार्पणप्रतिज्ञैव मंत्रः ॥ तत्प्रासति ॥ उपस्थितो मृत्युरयं तावन्निवर्त्तेत ॥ निवृत्तः पुनः कालांतरे आपतेच्चेत्तदा नापराधो ममेत्यर्थः ॥ अथवास्य मत्पुत्रादुपस्थितो मृत्युर्यावत्पाको निवर्त्तेत ॥ तस्य पुनरनेन मंत्रेण भवेदेवेति ॥ यद्वा ॥ गतिर्धातुर्दुरत्ययेत्येतस्य प्रपंच उपस्थित इति ॥ ४६ ॥

भा०द०१० निगडैः शृंखलैः ॥ अजनो विष्णुस्तत्कथं कया ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ इति श्रीदशमे प्रथमः ॥ १ ॥ द्वितीये कंसघातायद्देवक्यागर्भे
७ गोहरिः ॥ ब्रह्मादिभिः स्तुतः सा च सांत्वितेति निरूप्यते ॥ यदुभिः सव्यरुध्यतेत्युक्तं ॥ तद्देवविरोधं प्रपंचयति ॥ तत्र यादेवकीगर्भस्था

ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति ॥ देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति ॥ देवकीं वसुदेवं च निगृह्य नि
गडैर्गृहे ॥ जातं जातमहन्पुत्रं तयोरजनशंकया ॥ ६५ ॥ मातरं पितरं भ्रातॄन्सर्वांश्च सुहृदस्तथा ॥ घ्नंति ह्यसुतृपो लु
ब्धा राजानः प्रायशो भुवि ॥ ६६ ॥ आत्मानमिह संजातं जानन्प्राग्विष्णुना हतं ॥ महासुरं कालनेमिं यदुभिः
स व्यरुध्यत ॥ ६७ ॥ उग्रसेनं च पितरं यदुभोजांधकाधिपं ॥ स्वयं निगृह्य बुभुजे शूरसेनान्महाबलः ॥ ६८ ॥
इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कंधे प्रथमोध्यायः ॥ १ ॥ श्री
शुक उवाच ॥ प्रलंबबकचाणूरतृणावर्तमहाशनैः ॥ मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः ॥ अन्यैश्चा
सुरभूपालैर्बाणभौमादिभिर्युतः ॥ यदूनां कदनं चक्रे बली मागधसंश्रयः ॥ १ ॥ ते पीडिता निविविशुः कु
रुपांचालकेकयान् ॥ साल्वान्विदर्भान्निषधान्विदेहान्कोशलानपि ॥ २ ॥

न्यत्र संचारेण भगवतः प्रवेशं वक्तुमाह ॥ प्रलंबेत्यादि सार्द्धत्रयेण ॥ महाशनो ऽघासुरः ॥ १ ॥ २ ॥ रारामरामराम ७

॥५२॥ मृत्यवे पुत्रं कथमर्पितवान् इत्यपेक्षायामाह॥ किं दुःसहमिति॥ साधूनां सत्यसंधानां पुत्रलालनसुखापेक्षा कथं
त्यक्तेति॥ अत आह॥ विदुषामिति॥ भगवानेव तत्त्वेनान्यदिति जानतामित्यर्थः॥ ननु स्वयं नीते सति कंसो बालं न हन्या
दिति मत्वा नीतवानिति किं न स्यादिति तत्रेत्याह॥ किमकार्यमिति॥ ननु देवकी कथं पुत्रं त्यक्तवती तत्राह॥ दुस्त्यजमिति

कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिः॥ अर्पयामास कृच्छ्रेण सोनृतादतिविह्वलः॥५३॥ किं दुःसहं नु
साधूनां विदुषां किमपेक्षितं॥ किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां॥५४॥ दृष्ट्वा समत्वं तच्छौरेः
सत्ये चैव व्यवस्थितिं॥ कंसस्तुष्टमना राजन्प्रहसन्निदमब्रवीत्॥५५॥ प्रतियातु कुमारोयं न ह्यस्माद
स्ति मे भयं॥ अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः किल॥५६॥ तथेति सुतमादाय ययावानकदुंदुभिः॥
नाभ्यनंदत तद्वाक्यमसतो विजितात्मनः॥५७॥ नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः॥ वृष्णयो
वसुदेवाद्या देवक्याद्या यदुस्त्रियः॥ सर्वे वै देवताप्राया उभयोरपि भारत॥ ज्ञातयो बंधुसुहृदो ये च कं
समनुव्रताः॥ एतत्कंसाय भगवान्शशंसाभ्येत्य नारदः॥ भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं॥५८॥

चित्ते धृत आत्मा हरिर्यैस्तेषां॥५४॥५५॥५६॥५७॥ कंसस्य शांतिर्देवकार्यानुगुणेन भवतीति नारदस्य प्रत्यवस्था
नं तदाह॥ नंदाद्या इत्यादित्रयेण॥ उभयोर्वसुदेवनंदकुलयोः॥ वधोद्यमं देवकृतमिति शेषः॥५८॥ ॥ ऽऽ ॥ ॥ ऽऽ

सर्वान्पुत्रादीन्कामयंते येन तेषां वरां ईश्वरीं श्रेष्ठां नियंत्रीं अर्चकानां सर्वान्कामवरान् प्रददातीत्यात्तं ॥१०॥११॥ त्वद्धिन्नामे
यं च तस्या व्यपदेशा भविष्यतीत्याह ॥ गर्भसंकर्षणादिना रामेति च वासं बोधनं करिष्यंति ॥ वयासंकृष्टेन तेन लोकस्य रमणोत्तु र
त्युत्पादनात् ॥१॥ तथेति पुनरपि ॥ ॐ मित्यादरेण प्रतिगृह्य ॥ गां पृथ्वीं ॥१३॥ विस्रंसितः विभ्रष्टः ॥ वि स्रस्त इत्यर्थः ॥ इति

अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं ॥ धूपोपहारबलिभिः सर्वकामवरप्रदां ॥१०॥ नामधेयानि
कुर्वंति स्थानानि च नरा भुवि ॥ दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥ कुमुदा चंडिका कृष्णा माधवी
कन्यकेति च ॥ मायानारायणीशानी शारदेत्यंबिकेति च ॥११॥ गर्भसंकर्षणात्तं वै प्राहुः संकर्षणं भुवि ॥ रा
मेति लोकरमणाद्बलं बलवदुच्छ्रयात् ॥१२॥ ॥श्रीशुक उवाच॥ संदिष्टैवं भगवता तथेत्योमिति तद्वचः ॥ प्र
भवतो तिगृह्य परिक्रम्य गां गता तत्तथाकरोत् ॥१३॥ गर्भे प्रणीते देवक्या रोहिणीं योगनिद्रया ॥ अहो विस्रंसितो गर्भ
इति पौरा विचुक्रुशुः ॥१४॥ भगवानपि विश्वात्मा भक्तानामभयंकरः ॥ आविवेशांशभागेन मन आनकदुंदुभेः
॥१५॥ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः ॥ दुरासदोऽतिदुर्धर्षो भूतानां संबभूव ह ॥१६॥

विचुक्रुशुः अक्रुशन्हिद्दुरित्यर्थः ॥१४॥ मनस आविवेश ॥ मनस्याविर्बभूव ॥ जीवानामिव न चरमधातुसंबंध इत्य
र्थः ॥१५॥ धाम श्रीमूर्तिः ॥१६॥ ॥ ॥ ॥८॥

अनुरुंधानाअनुवर्त्तमानाः॥३॥धामकलातदेवसप्तमोगर्भोबभूव॥किंतद्धामेत्यत आह॥यमनंतमिति॥हर्षशोकविवर्द्धनः॥
आनंदरूपत्वावतीर्णत्वाद्धर्षः॥सर्वगर्भसाधारणदृष्ट्याचशोकइति॥४॥५॥६॥ननुसागोकुलेकिमित्यात्तेऽतआह॥अ
न्याश्चेति॥नकेवलंसैवअन्यपीति विवरेषु अस्वतस्थानेषु॥७॥जठरेसंतंतनुगर्भआह्रुष्यमाणःकथंजीवेदित्यत आह म
मकंधामेति तत्ततः॥८॥किमर्थमेवंकार्यमित्यत आह॥अथेति॥अनंतरमेवेत्यर्थः॥अंशभागेनेति॥अंशैःशक्तिभिर्भज

एकेतमनुरुंधानाज्ञातयःपर्युपासते॥३॥हतेषुषट्सुबालेषुदेवक्याऔग्रसेनिना॥सप्तमोवैष्णवंधाम
यमनंतंप्रचक्षते. गर्भोबभूवदेवक्याहर्षशोकविवर्द्धनः॥४॥भगवानपिविश्वात्माविदित्वाकंसजंभयं॥य
दूनांनिजनाथानांयोगमायांसमादिशत्॥५॥गच्छदेविव्रजंभद्रेगोपगोभिरलंकृतं॥६॥रोहिणीवसुदेवस्य.
भार्यास्तेनंदगोकुले॥अन्याश्चकंससंविग्नाविवरेषुवसंतिहि॥७॥देवक्याजठरेगर्भंशेषाख्यंधाममामकं॥तत्सं
निकृष्यरोहिण्याउदरेसंनिवेशय॥८॥अथाहमंशभागेनदेवक्याःपुत्रतांशुभे॥प्राप्स्यामित्वंयशोदायांनंदपत्न्यां
भविष्यसि॥९॥

तेऽधितिष्ठतिसर्वान्॥ब्रह्मादिस्तंभपर्यंतान्नित्यंशभागस्तेनपरिपूर्णेनरूपेणेत्यर्थः॥यद्वा॥अंशैर्ज्ञानैश्वर्यबलादिभिर्भजयतियोज
यतिस्वीयानितितथा॥तेनेति॥यद्वा॥अंशेनपुरुषरूपेणमायायाभागोभजनंईक्षणंयस्यतेन॥यद्वा॥अंशेनमायायागुणवतारादि
रूपाभागाभेदायस्यतेन॥यद्वा॥अंशाएवमत्स्यादिरूपाःभजनीयाःनतुसाक्षात्स्वरूपंयस्यतेन॥यद्वा॥अंशेर्ज्ञानबलादिरूपाःभ
जनीयाःनतुसाक्षात्स्वरूपंयस्यतेन॥यद्वा॥अंशेर्ज्ञानबलादिभिर्भजनमनुवर्त्तनंभक्तेषुयस्यतेन॥सर्वथापरिपूर्णेनरूपेणेति

भा०द०प्र० ननुसंतिसामादयउपायाःनेति॥स्वयमेवाह॥अयमर्थतंत्रोदेवकार्य्यप्रधानः॥विक्रमंनविहंति॥महद्वधेपराक्रमंक
९ रिष्यत्येवेत्यर्थः॥यद्वा॥तर्हीयमिदानीमेवहन्यतामितिविचिंत्याह॥अर्थतंत्रोपिपुमानस्वविक्रमंनविहंतिननाशयत
ति॥स्त्रीवधेतन्नाशःस्यादितिभावः॥तदेवाह॥स्त्रियाइति॥गुरुमत्यागुर्विण्याः॥२०॥किंच॥सएषजीवन्नपिमृतः

किमद्यतस्मिन्करणीयमाशुमेयदर्थतंत्रोनविहंतिविक्रमं॥स्त्रियाःस्वसुर्गुरुमत्यावधोयंयशः
श्रियंहंत्यनुकालमायुः॥२०॥सएषजीवन्खलुसंपरेतोवर्त्तेतयोऽत्यंतनृशंसितेन॥देहेमृते
तंमनुजाःशपंतिगंतातमोऽधंतनुमानिनोध्रुवं॥२१॥इतिघोरतमाद्भावात्संनिवृत्तःस्वयंप्र
भुः॥आस्तेप्रतीक्षंस्तज्जन्महरेर्वैरानुबंधकृत्॥२२॥आसीनःसंविशंस्तिष्ठन्भुंजानःपर्यटन्म
हीम्॥चिंतयानोहृषीकेशमपश्यत्तन्मयंजगत्॥२३॥ब्रह्माभवश्चतत्रैत्यमुनिभिर्नारदादिभिः॥दे
वैःसानुचरैःसाकंगीर्भिर्वृषणमैडयन्॥२४॥

स्यात्॥नृशंसितेनक्रौर्य्येणयोवर्त्तेत॥तंजीवंतमेवमनुजाःशपंति॥दुर्वाक्यैर्धिक्कुर्वंति॥सचदेहेमृतेतत्तनुमा
निनःपापिनोनरकंगच्छंति॥अथवाशापप्रकारमाह॥तनुमानिनोऽस्यदेहेमृतेअयंध्रुवंअंधतमोगंतागमिष्यतीति॥२१॥ ९
२२॥संविशन्॥शयानः॥२३॥रम्यागीर्भिः॥वृषणं॥कामवर्षिणं॥ऐडयन्॥तुष्टुवुः॥२४॥

ज्ञान्मंगलं जगतो मूर्तिमन्मंगलं ॥ अच्युतांशं ॥ अच्युता ख्यातिरहिता अंशा ऐश्वर्यादयो यस्य तं ॥ यद्वा ॥ अच्युतस्य अंश
इवांशः ॥ भक्तानुग्रहार्थं परिच्छिन्नवपुरित्यर्थः ॥ समाहितं सम्यगभृतमेवाहितं ॥ वैदीक्षया अर्पितं ॥ देवी द्योत
माना शुद्धसत्त्वेत्यर्थः ॥ सर्वात्मकं ॥ सर्वस्य आत्मानं ॥ अत एवात्मभूतं ॥ स्वस्मिन्नादावेव संतं ॥ मनस्तः मनसैव दधार
धारणया ध्यानवती ॥ अत्रानुरूपं दृष्टांतमाह ॥ यथा काष्ठा ॥ प्राचीदिक् ॥ आनंदकरं चंद्रमिति ॥१७॥ सर्वजगन्निवास

ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी ॥ दधार सर्वात्मकमात्मभूतं काष्ठा यथाऽऽ
नंदकरं मनस्तः ॥१७॥ सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे ॥ भोजेंद्रगेहेऽग्निशि
खेव रुद्धा सरस्वती ज्ञानखले यथा सती ॥१८॥ तां वीक्ष्य कंसः प्रभयाजितांतरां विरोचयंतीं भवनं शुचिस्मि
ताम् ॥ आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी ॥१९॥

स्य श्रीहरेर्निवासभूता सत्यपि नितरां सर्वजनआह्लादकतया न रेजे ॥ किंतु स्वयमेवानंदमन्वभवत् ॥ यतः कंसस्य
गेहे रुद्धा ॥ अन्यैर्न दृश्यते ॥ घटादिषु रुद्धा ॥ अग्निशिखा दीप इव ॥ तथा सती शोभमाना सरस्वती ज्ञानखले ज्ञानवंचके
रुद्धा यथाऽन्येषामनुपकारिणी न राजते तद्वत् ॥१८॥ प्रभया भवनं विरोचयंती ॥ अजितः अंतरा कुक्षिमध्ये यस्याः तां
एष विरोचमानः ध्रुवं हरिरेव ॥ यत् यस्मात् ॥ ईदृशी इयं पूर्वं नासीत् ॥१९॥

ग ३

भा·द·पू·
१०

कोशावाआत्मानःस्वभावायस्यसः॥सप्तधातवःत्वचोयस्यसः॥पंचभूतानिमनोबुद्धिरहंकारश्चेत्यष्टौविटपाःसाखाविस्तारायस्य
सः॥नवद्वाराणिअक्षाणिछिद्राणियस्यसः॥दशप्राणाःछदाःपत्राणिविद्यंतेयस्यसः॥दशछदी॥द्वौजीवेश्वरौखगौयस्मि
न्सद्विखगः॥२६॥एवंरूपस्यसंसारवृक्षस्यसतःकार्यस्य॥त्वमेकस्त्वप्रसूतिःप्रकर्षेसूतिर्जन्मयस्मात्तत्त्वंकारणमित्य
र्थः॥त्वंसन्निधानं॥त्वमेवसान्निधानंसम्यग्निधीयतेयस्मिन्नितिलयस्थानं॥त्वमेवानुगृहश्च॥अनुगृह्णातीतिपालकः॥ननुब्रह्म
विष्णुरुद्राएवंभूताःप्रसिद्धाः॥कथमहमेवेतिचेत्तत्राह॥त्वन्माययेति॥संवृतंपिहितंचेतोज्ञानंयेषांतेत्वामेवनानापश्यंति येत्ववि

त्वमेकएवास्यसतःप्रसूतिस्त्वंसन्निधानंत्वमनुग्रहश्च॥त्वन्माययासंवृतचेतसस्त्वांपश्यंतिनानानविपश्चि
तोये॥२७॥विभर्षिरूपाण्यवबोधआत्माक्षेमायलोकस्यचराचरस्य॥सत्वोपपन्नानिसुखावहानिसतामभद्रा
णिमुहुःखलानां॥२८॥त्वय्यंबुजाक्षाखिलसत्वधाम्निसमाधिनावेशितचेतसैके॥त्वत्पादपोतेनमहत्कृतेनकु
र्वंतिगोवत्सपदंभवाब्धिं॥२९॥

पश्चितोविद्वांसस्तेतथानपश्यंति॥२७॥ननुदेवकीपुत्रंमांकथमेवं वर्णयथेतिचेत्तत्राह विभर्षी
तिअवबोधैकस्वरूपः॥आत्मात्वमेवरूपाणिम[illegible]विभर्षिधत्सेनतुत्वंकस्यापिपुत्रइत्यर्थः॥क्षेमायपालनाय॥सत्वोधर्मेव
त्तीनांसुखकराणि॥खलानामभद्राणिनाशकानि॥२८॥नकेवलमेतावत्भक्तानांमोक्षार्थमपीत्याह॥त्वयीति॥त्वयिसमा
धिनाआवेशितचेतसानिमित्तेन॥त्वत्पादपोतेनाश्रितेनैकेमुख्याःविवेकिनः॥महद्भिःकृतेसेवितेतयासंपादितेन॥यद्वा॥द
र्हमपिमायामयमित्यनादरंपरित्यज्येदमेवमहत्सर्वोत्कृष्टमितिमनसिकृतेनवकुमतेनेत्यर्थः॥भवाब्धिंतुच्छीकुर्वंति॥अना

प्रतिश्रुतं सत्यं कृतमिति हृष्टाः ॥ सत्यत्वेनैव प्रथमं स्तुवंति ॥ सत्यव्रतमिति ॥ सत्यं व्रतं संकल्पो यस्य तं ॥ सत्यसंकल्पमित्यर्थः ॥
सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिंस्तं ॥ त्रिसत्यं ॥ त्रिष्वपि कालेषु सृष्टेः पूर्वं प्रलयानंतरं च स्थितिसमये च सत्यं ॥ अव्यभिचा-
रिणं ॥ वर्त्तमानं ॥ न देवाकुः ॥ सत्यस्य योनिमिति ॥ सच्छब्देन पृथिव्यप्तेजांसि ॥ त्यच्छब्देन वाय्वाकाशौ ॥ एवं सच्च त्यच्च सत्यं
भूतपंचकं ॥ तत्सत्यमित्याचक्षत इति श्रुतेः ॥ तस्य योनिं कारणं ॥ अनेन पूर्ववर्त्तमानतोक्ता ॥ तथा सत्ये तस्मिन्नेव निहितं
अंतर्यामितया स्थितं ॥ अनेन स्थितिसमयेपि सत्यत्वमुक्तं ॥ तथा सत्यस्य सत्यं ॥ तस्य च सत्यस्य सत्यं पारमार्थिकं ॥ त

देवा ऊचुः ॥ सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ॥ सत्यस्य सत्यमृतसत्यनेत्रं सत्यात्मकं त्वां
शरणं प्रपन्नाः ॥ २६ ॥ एकायनोसौ द्विफलस्त्रिमूलश्चतूरसः पंचविधः षडात्मा ॥ सप्तत्वगष्टविटपो नवाक्षो दश-
च्छदी द्विखगो ह्यादिवृक्षः ॥ २७ ॥

तन्नाशेप्यवशिष्यमाणरूपं ॥ अनेन प्रलयेप्यवधित्वेन सत्यत्वेन सत्यत्वं दर्शितं ॥ एवं त्रिसत्यत्वमुपपादितं ॥ तथा ऋतसत्यनेत्रं ॥
ऋतं च सूनृता वाणी सत्यं च समदर्शनं ॥ तथा भगवता व्याख्यायमानत्वात् ॥ सत्यं च समदर्शनं ॥ ऋतं च सूनृता वाणी कविभिः परिकीर्त्तितेति
तयोर्नेत्रं ॥ नयनं साधनं ॥ नेतारं ॥ प्रवर्त्तकमिति यावत् ॥ एवं सर्वप्रकारेण सत्यात्मकं त्वां वयं शरणं प्रपन्नाः प्राप्ता इति ॥ २६ ॥ ननु भवतोपि लो-
केश्वरा अतुल्या एव किमिति मां शरणं प्रपद्यंते ॥ नैवं वाच्यं ॥ त्वमेवैकः सर्वेश्वरः ॥ सर्वस्य [illegible] कारणत्वाद्वयं तु त्वदेकशरणा एव
लोकादिरूपं द्वैतं सर्वं त्वद्व्यतिरेकेण नास्तीति वक्तुं द्वैतप्रपंचं वृक्षरूपकेण निरूपयंति ॥ एकायन इति ॥ असौ प्रपंचवृक्ष आदिवृ-
क्षः ॥ वृश्च्यत इति वृक्षः ॥ समष्टिव्यष्टिदेहरूपः ॥ कथंभूतः ॥ एकायनः ॥ एका प्रकृतिरयनमाश्रयो यस्य सः ॥ द्वे सुखदुःखे फले यस्य सः ॥
क्षुत्पिपासाजरामृत्यु सोक मोह षडूर्मयः   त्वकमांसरुधिर स्नाउमेद मज्जास्थिधातवः । नागकूर्मकृकर देवदत्त धनंजय
अन्नमय प्राणमय विज्ञानमय   प्राणापानसमान व्यान उदानः

त्रयो गुणा मूलानि यस्य सः ॥ धर्मार्थकाममोक्षाश्चत्वारो रसा
यस्य सः ॥ पंचेन्द्रियाणि विधा ज्ञानप्रकारा यस्य सः ॥ षडूर्मयः ॥

सतांस्सुखावहानि रूपाणि धारयतीत्युक्तं ॥ विभर्षि रूपाणीति ॥ तत्केन प्रकारेणस्सुखावहत्वमित्यपेक्षायामाह ॥ सत्त्वं विशुद्धमि
ति ॥ सत्त्वं वपुः श्रयत इत्यन्वयः । श्रेयउपायनं कर्मफलदातृ ॥ कथं येन वपुषा जनस्तवार्हणं पूजां समीहते करोति ॥ कैः वेदस्य क्रि
यायोगस्य तपश्च समाधिश्च तैः ॥ चतुराश्रमधर्मैरित्यर्थः ॥ वपुषाऽनाश्रयणे ह्यर्हणासंभवात् ॥ न कर्मफलसिद्धिः स्यादिति ॥ ३३ ॥
त्वय्यंबुजाक्षेत्यादिना श्लोकत्रयेण भगवद्भक्तानामेव मोक्षो नान्येषामित्युक्तं ॥ तत्र कर्मफलं भक्तिं विना मा भूत् ॥ मोक्षस्तु ज्ञा
नैकसाध्यत्वात् ॥ किं भक्त्येति ॥ सानुशयानं प्रत्याह ॥ सत्त्वं न चेदिति ॥ हे धातः ॥ इदं सत्त्वं निजं तव वपुर्न भवेत् चेत्तर्हि विज्ञानं

सत्त्वं विशुद्धं श्रयते भवान्स्थितौ शरीरिणां श्रेयउपायनं वपुः ॥ वेदक्रियायोगतपःसमाधिभिस्तवार्हणं
येन जनः समीहते ॥ ३३ ॥ सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं ॥ गुणप्रकाशैरनु
मीयते भवान्प्रकाशते यस्य च येन वा गुणः ॥ ३४ ॥

विशिष्टं अपरोक्षं ज्ञानं न भवेदित्यनुषंगः ॥ कथंभूतं ॥ अज्ञानभिदापमार्जनं ॥ अज्ञानं तत्कृतां भिदां च तयोरपमार्ज
नं निवर्तकं ॥ यद्वा ॥ अज्ञानं भिनत्तीति ॥ अज्ञानभित् विज्ञानं ॥ मार्जनं नाशं ॥ आप प्राप्तमेवेति ॥ ननु जडानां बुद्ध्यादीनां य
तः प्रकाशस्तद्द्रष्टेति ज्ञानं भवेदेव न गुणप्रकाशैः ॥ गुणावच्छिन्नैः ॥ भवान्सर्वसाक्षीरूपः केवलमनुमीयते कल्प्यते न
तु साक्षात्क्रियत इत्यर्थः ॥ अनुमानप्रकारमाह ॥ प्रकाशते यस्य च येन वा गुण इति ॥ यस्य संबंधी अयं बुद्ध्यादिर्गुणः ॥
प्रकाशते योगुणः साक्षीत्येवं ॥ येन वा बुद्ध्या देहेन बुद्ध्यधिष्ठात्रा ॥ अयं वा ह्यो गुणः प्रकाशते इत्यनुमीयत इत्यर्थः ॥ शु
द्धसत्त्ववपुषि त्वयि सेव्यमाने तु तदाकारेंतःकरणे त्वत्प्रसादेन साक्षात्कारो भवेदिति भावः ॥ ३४ ॥

ननु तेन पोतेन सर्वेपि पारं गताः । तर्हीदानीं तन्नावं का गतिस्तत्राह । स्वयमिति । अयमर्थः । हे द्युमन् स्वप्रकाश । त्वत्पादपोतसामीप्यमात्रेण भवांबुधौ वत्सपदमात्रे जाते अतस्तन्निरपेक्षाः । स्वयमेवान्येषां भीमं सुदुस्तरमपि भवार्णवं समुत्तीर्य भवत्पदांभोरुहरूपां नावमत्रैव निधाय भक्तिमार्गं संप्रदायप्रवृत्त्यर्थं । पारं याताः । ततः किं यतोऽदभ्रसौहृदाः । सर्वभूतेषु प्रीतियुक्ताः । अतस्तेऽन्येषां तरणाय निधायेति । कथं भवत्पादपोतेन तीर्णाः । अत उक्तं भवान् सदनुग्रहः । सतो भक्तान्

स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्रसौहृदाः । भवत्पदांभोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ॥ ३० ॥ येऽन्येऽरविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोऽनादृतयुष्मदंघ्रयः ॥ ३१ ॥ तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः । त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो ॥ ३२ ॥

नुगृह्णातीति ॥ ३० ॥ ननु विवेकिनां किं मद्भजनेन मुक्ता एव हि ते तत्राह । येऽन्य इति । विमुक्तमानिनः । विमुक्ता वयमिति मन्यमानाः । त्वयि अस्ते निरस्तोऽत एवासन्नो यो भावस्तस्मात् । भक्तेरभावादित्यर्थः । न विशुद्धा बुद्धिर्येषां ते तथा । यद्वा । त्वयि अस्तभावः इति छेदः । अस्तमतयः । वादेष्वाविष्टबुद्धयः । कृच्छ्रेण बहुजन्मतपसा परं पदं मोक्षसंनिहितं सत्कुलतपःश्रुतादि प्राप्याधः पतंति विघ्नैरभिभूयंते । नादृतौ युष्मदंघ्री यैस्ते ॥ ३१ ॥ त्वदीयास्तु न कदाचिदपि पतंतीत्याह ।

तथा नेति । विनायकाः विघ्नहेतवः तेषामनीकानि सेनास्तासां निपा नियंतारस्तेषां मूर्द्धसु विचरंति विघ्नानुल्लंघयंतीत्यर्थः ॥ ३२ ॥

नन्वतवजन्मना भारोपनीतइत्युक्तत्वाम मापि किं जीववत्तं सारउक्तः ॥ नहि न हीत्याह ॥ नेति ॥ तव देहे ईश अभवस्य अ संसा
[illegible] शिलस्त्वजन्मनः कारणं क्रीडां विना न तर्कयामः किंचेहे अभयाश्रय ॥ नभयमाश्रयतइति तथा तत्संबोध
नेहे नित्यमुक्तेत्यर्थः ॥ तवजन्मकारणं नास्तीति किंवक्तव्यं ॥ यतो जीवात्मन्यपि भवादयस्त्वयि विषये याः विद्यात
याकृता ॥ नपरमार्थतः सन्तीति ॥ ३७ ॥ प्रस्तुतं प्रार्थयंते ॥ मत्स्याश्वेति ॥ नोऽस्मान् त्रिभुवनं चान्यदा यथा पासि ॥ तथाद्य

न तेऽभवस्येश भवस्य कारणं विना विनोदं बत तर्कयामहे ॥ भवो निरोधः स्थितिरप्यविद्यया कृ
ता यतस्त्वय्यभयाश्रयात्मनि ॥ ३८ ॥ मत्स्याश्वकच्छपनृसिंहवराहहंसराजन्यविप्रविबुधेषु
कृतावतारः ॥ त्वं पासि नस्त्रिभुवनं च तथाधुनेश भारं भुवो हर यदूत्तम वंदनं ते ॥ ३९ ॥ दिष्ट्याम्ब ते
कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय नः ॥ माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां
भविता तवात्मजः ॥ ४० ॥ श्रीशुक उवाच ॥ इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ॥ ब्रह्मेशानौ पुरो
धाय देवाः प्रतियुर्दिवं ॥ ४१ ॥

नापि पाहीति वंदनं जुषति वदंतः सर्वे शिरोभिः प्रणमंतीति ॥ ३९ ॥ देवकीं प्रत्याहुः ॥ दिष्ट्येति ॥ नोऽस्माकं भवाय उद्भ
वाय साक्षात्परः पुमांस्ते कुक्षिंगतः ॥ अतो भयं मा भूदिति ॥ योऽस्मान् नापि स दासः अस्माकमुद्भवाय भवायते ॥ ससात्त्वतां
कुक्षिंगत इत्येतदस्मद्भाग्यं ॥ ४० ॥ यस्य रूपमनिदं सर्वप्रत्यक्षत्वं यथा यथावत्तं ॥ अस्मान्वंचयित्वा एतावि हस्था
स्पतरतिमन्यमानाः देवाः ब्रह्मेशानौ पुरोधाय पुरतः ॥ कृत्वा ययुरिति ॥ ४१ ॥

एवंतावद्भक्तानामभ्युदयाएवंगार्थरूपाणिविभक्तीत्युक्तं॥तान्यपिभजनीया[illegible]निकेवलंनतुज्ञातुंशक्यंते॥अनंतत्वात्
अतर्क्यत्वाच्च॥मनोवचसोरगोचरत्वादित्याह॥नेनामरूपेइति॥गुणाश्चजन्मानिचकर्माणिचतैः॥तेनिरूपितव्ये॥निरूप
णार्हेनभवतः॥कुतः॥अनुमेयंवर्त्मभागोयस्यतवेति॥तत्रापिहेतुः॥पूर्वोक्तस्यवुद्ध्यादेःतस्यसाक्षिणइति॥नहिसाक्षिण
स्तत्वंमनोवचोगोचरइत्यर्थः॥हेदेवदेवकुधाद्योतमान॥अथापिक्रियायांउपासनादिलक्षणायांत्वांप्रतियंति॥उपा

ननामरूपेगुणजन्मकर्मभिर्निरूपितव्येतवतस्यसाक्षिणः॥मनोवचोभ्यामनुमेयवर्त्मनो
देवक्रियायांप्रतियंत्यथापिहि॥३५॥शृण्वन्गृणन्संस्मरयंश्चचिंतयन्नामानिरूपाणिचमं
गलानिते॥क्रियासुयस्त्वच्चरणारविंदयोराविष्टचित्तोनभवायकल्पते॥३६॥दिष्ट्याहरेस्याभ
वतःपदोभुवोभारोपनीतस्तवजन्मनेशितुः॥दिष्ट्यांकितांत्वत्पदकैःसुशोभनैर्द्रक्ष्यामगांद्यां
चतवानुकंपितां॥३७॥

सकाःसाक्षात्पश्यंतिहि॥प्रसिद्धं॥३५॥तस्माद्भक्तैवमोक्षदइत्युपसंहरति
शृण्वन्निति॥अन्यानपिसंस्मारयन्॥क्रियासुदेवार्चनादिषु॥३६॥विशेषतः॥श्रीकृष्णावतारमभिनंदति॥दिष्ट्येति
दिष्ट्याभद्रंतवपदःपाभ्वतया॥ईश्वरस्यतवजन्ममात्रेणापनीतः॥एवंकिंच[illegible]
एवं॥किंचत्वत्पदकैःकोमलैःपदैःसुशोभनैःवज्रांकुशादिशुभलक्षणैःगांपृथ्वीं॥द्यांस्वर्गंचतवत्वयानुकंपि

असुरद्रुहांकंसादिव्यतिरिक्तानांसर्वप्राणिनांदेवानांचेति ॥ अजनेजायमानेआसन्नः प्रसवोयस्मिन्तस्मिन्समये ॥५॥
६ ॥७॥ तमसाउद्भूतेघनतमसीनिशीथे ॥ यथायथावत् एश्वरेणैवरूपेण ॥ ८ ॥ तमद्भुतंवालकंवसुदेवऐक्षतेतिद्विती ॥

मनांस्यासन्प्रसन्नानिसाधूनामसुरद्रुहां ॥ जायमानेऽजनेतस्मिन्नेदुर्दुंदुभयोदिवि ॥५॥
जगुःकिन्नरगंधर्वास्तुष्टुवुःसिद्धचारणाः ॥ विद्याधर्यश्चननृतुरप्सरोभिःसमंतदा ॥६॥ मुमुचुर्मुनयो
देवाःसुमनांसिमुदान्विताः ॥ मंदंमंदंजलधराजगर्जुरनुसागरं ॥७॥ निशीथेतमउद्भूतेजायमा
नेजनार्दने ॥ देवक्यांदेवरूपिण्यांविष्णुःसर्वगुहाशयः ॥ आविरासीद्यथाप्राच्यांदिशींदुरिवपु
ष्कलः ॥८॥ तमद्भुतंवालकमंबुजेक्षणंचतुर्भुजंशंखगदाद्युदायुधं ॥ श्रीवत्सलक्ष्मंगल
शोभिकौस्तुभंपीतांवरंसांद्रपयोदसौभगं ॥९॥ महार्हवैडूर्यकिरीटकुंडलत्विषा
परिष्वक्तसहस्रकुंतलं ॥ उद्दामकांच्यंगदकंकणादिभिर्विरोचमानंवसुदेवऐक्षत ॥१०॥

यश्लोकेनान्वयः ॥ अद्भुतत्वेहेतुगर्भाणिविशेषणानि ॥ अंबुजेक्षणमित्यादीनि श्रीवत्सलक्ष्माणं ॥ गलेनशोभतेगलशोभीस
कौस्तुभोयस्मिन्तं ॥ ९ ॥ परिष्वक्तसहस्रकुंतलंकिरीटकुंडलादीनांत्विषास्फुरदपरिमितकेशमित्यर्थः ॥ १० ॥ ॥

इतिदशमेद्वितीयः॥२॥तृतीयेनिजरूपेणसंभूतस्तुहरिःस्वयं॥पितृभ्यांसंस्तुतोनीतःपित्राभीतेनगोकुलं॥१॥अथे
तिमंगलार्थः॥यर्हिसर्वगुणोपेतःकालोवभूवतदादेवक्यांविष्णुराविरासीदित्यष्टमश्लोकगतेनान्वयः॥परम
शोभनत्व[illegible]मेवाह॥यर्हीत्यादिना॥अजनान्नारायणाज्जन्मयस्यप्रजापतेस्तस्यऋक्षंरोहिणीनक्षत्रं॥क

इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेगर्भगतस्यविष्णोर्ब्रह्मादिकृतास्तुतिर्द्वितीयोध्यायः
॥२॥श्रीशुकउवाच॥अथसर्वगुणोपेतःकालःपरमशोभनः॥यर्ह्येवाजनजन्मर्क्षंशांत
र्क्षग्रहतारकं॥१॥दिशःप्रसेदुर्गगनंनिर्मलोडुगणोदयं॥महीमंगलभूयिष्ठपुरग्राम
व्रजाकरा॥२॥नद्यःप्रसन्नसलिलाह्रदाजलरुहश्रियः॥द्विजालिकुलसन्नादस्तवकावनरा
जयः॥३॥ववौवायुःसुखस्पर्शःपुण्यगंधवहःशुचिः॥अग्नयश्चद्विजातीनांशांतास्तत्रसमिंधत॥४॥

यंभूतं॥शांतानिऋक्षाणिअश्विन्यादीनिग्रहाश्चतारकाश्चयस्मिंस्तत्॥यर्हीतिसर्वत्रानुषज्यते॥१॥निर्मलानामु
डुगणानामुदयोयस्मिंस्तत्तथा॥मंगलभूयिष्ठाःपुरादयोयस्यांमह्यांसा॥२॥जलरुहैःश्रीःशोभायेषांते॥द्विजालि
कुलानांसंनादोयेषुतेस्तवकायासुताः॥३॥समिंधत॥आडागमोऽत्रद्रष्टव्यः॥समैधंतेतिसम्यग्दीप्तावभूवुरित्यर्थः
॥४॥

भा-द-पू
१४

अत्र दृष्टांतः यथेति ॥ इमे विकृता भावा महदादयो यथा तथेति ॥ दृष्टांतं विवृणोति ॥ ते विकृतैः षोडशविकारैः सह सन्निपत्य मिलि
त्वा विराजं ब्रह्मांडं जनयंति ॥ सन्निपतने हेतुः यतः पृथग्भूताः संतो नानावीर्या विशिष्टकार्ये समर्था न भवंति ॥ अतः सन्निपत्येति
एवं समुत्पाद्यानुगताः प्रविष्टा इव दृश्यंते न पुनः प्रविष्टाः कुतः उत्पत्तेः प्रागेव कारणतया विद्यमानत्वान्न तेषामिह समष्टिकार्ये प्र
वेशो नैमित्तिकः प्रवेशः ॥ १५ ॥ दार्ष्टांतिकं तिदिशति ॥ एवं भवानिति ॥ ननु यद्येवमप्रच्युतस्वरूप एव कारणतया कार्येषु वर्तते तर्हि ते इंद्रिये
र्गृह्यमाणेषु मम ग्रहणं किं नास्ति तत्राह ॥ बुद्ध्यानुमेयलक्षणैरिति ॥ बुद्ध्या रूपादिविज्ञानेनानुमेयं लक्षणं स्वरूपं येषां ॥ तैर्गुणैः सह सन्नपि

यथेमे विकृता भावास्तथा ते विकृतैः सह ॥ नानावीर्याः पृथग्भूता विराजं जनयंति हि ॥ सन्निपत्य समुत्पाद्य दृश्यंते
ऽनुगता इव ॥ प्रागेव विद्यमानत्वान्न तेषामिह संभवः ॥ १५ ॥ एवं भवान् बुद्ध्यनुमेयलक्षणैर्ग्राह्यैर्गुणैः सन्नपि तद्गु
णाग्रहः ॥ अनावृतत्वाद्बहिरंतरं न ते सर्वस्य सर्वात्मन आत्मवस्तुनः ॥ १६ ॥ वर्तमानोपि तद्गुणाग्रहः ॥ तैर्गुणैः सह नग्र

ग्रहस्ये २ ह्यसेऽयं भावः ॥ नहि ग्राह्यैः सहभावमात्रं कारणं ॥ किंतु इंद्रियाणां शक्तिः ॥ सा च कार्यैकसमधिगम्या ॥ यथा कार्यमेव कल्प्यते
अतो यथा चक्षुषा रूपग्रहणे रसादिग्रहणं नास्ति ॥ तथैव विषयग्रहणे त्वद्ग्रहणमपीति ॥ अविषयत्वेन च ग्रहणानर्हत्वमुक्त
मेव ॥ सर्वबुद्धिदृग् इत्यत्र ॥ एवं तावत्प्रागेव विद्यमानत्वात्प्रवेशो नास्तीत्युक्तम् ॥ किंच परिच्छिन्नस्य नीडे पक्षिण इव प्रवेशो
भवेत् ॥ तव त्वनावृतत्वादपरिच्छिन्नत्वेन बहिरंतरभेदो नास्ति कुतः प्रवेश इत्याह ॥ अनावृतत्वादिति ॥ अनावृतत्वे हेतुः नाद
सर्वस्येति ॥ न हि सर्वरूपस्य अन्यदावरकमस्ति ॥ सर्वात्मनः ॥ नहि एकेनावृतोऽन्यस्यात्मा भवेत् ॥ आत्मवस्तुन इति ॥ आत्मनो वस्तु
नश्चेति हेतुद्वयं ॥ अतः सातत्येन गमनेऽत्यस्मात् ॥ अतति व्याप्नोतीति आत्मा ॥ नहि व्यापकस्यावरणं घटते ॥ तथा वस्तुनः परमार्थस्य वस्तु

ति ३ रिट्टेरये: १ १४

विस्मयेनोत्फुल्ले विशिष्टे लोचने यस्य सः ॥ गवामयुतमस्पृशत् मनसा दत्तवान् ॥ कंसनिग्रहीतस्य दानासंभवात् ॥ स्पृष्टे हे
तुः ॥ कृष्णावतारेति ॥ मुदा आप्लुतो व्याप्तः ॥ स्नात इति वा ॥ ११ ॥ कृतधीः सुदृढबुद्धिः सन् ॥ १२ ॥ प्रथमं पुत्रबुद्ध्या पश्यन् ततः परित्य
ज्याह ॥ अहो विदितोसीति ॥ कथं विदितोसि ॥ भवान् प्रकृतेः परः पुरुष इति ॥ ननु किमाश्चर्य्यं पुरुषस्य प्रकृतेरन्यत्वादेवेति
अत आह ॥ साक्षादिति प्रत्यक्ष इत्यर्थः ॥ नन्वेवं सन्निकृष्टप्रत्यक्षतस्तदुपलभ्यते किं चित्रमित्यत आह ॥ केवलेति केवल

स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा ॥ कृष्णावतारोत्सवसंभ्रमोऽस्पृशन्मु
दा द्विजेभ्योऽयुतमाप्लुतो गवां ॥ ११ ॥ अथैनमस्तौदवधार्य्य पूरुषं परं नतांगः कृतधीः कृतांजलिः ॥ स्व
रोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् ॥ १२ ॥ वसुदेव उवाच ॥ विदितोसि भवान् सा
क्षात् पुरुषः प्रकृतेः परः ॥ केवलानुभवानंदस्वरूपः सर्वबुद्धिदृक् ॥ १३ ॥ स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगु
णात्मकं ॥ तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे ॥ १४ ॥

श्चासावनुभवश्च आनंदश्च तदेव स्वरूपं यस्य सः ॥ किंच ॥ सर्वबुद्धिदृक् ॥ नह्येवंभूतो दृश्यो भवतीत्यर्थः ॥ १३ ॥ ननु देवकी
जठरे प्रविष्टस्य किमियमतिस्तुतिः क्रियते ॥ अत आह स एवेति ॥ स एव उक्तरूप एव त्वं न देवकीजठरे प्रविष्ट इत्यर्थः ॥ स्व २
ननु विश्वं सृष्ट्वा तदनु त्वमप्रविष्ट एवेति ॥ ननु तर्हि कथं श्रुत्योच्यते ॥ तत्सृष्ट्वा तदेवानुप्राविशदिति ॥ अत आह ॥ प्रवि
ष्ट इवेति ॥ भाव्यसे निरूप्यसे ॥ प्रत्यक्षतो वा सद्रूपेण प्रविष्ट इव लक्ष्यसे ॥ १४ ॥

१
भा०द०पू० एवंपरमेश्वरदृश्यस्य तद्व्यतिरेकेणासत्वमुक्तं॥ परमेश्वरोपादानत्वादपि तद्व्यतिरेकेणासत्वमित्या
१५ ह॥ त्वत्तोस्येति॥ नचैवं सत्यपि विकारित्वमित्याह॥ अनीहादिति अगुणत्वोदनीहत्वं॥ ततोऽविकारित्व

त्वत्तोऽस्यजन्मस्थितिसंयमान्विभो वदंत्यनीहादगुणादविक्रियात्॥ त्वयी
श्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यते गुणैः॥१८॥ ॥ ७ ॥

मित्यर्थः॥ नन्वनीहत्वे कथं कर्तृत्वं कर्तृत्वे वा कुतोऽविकारित्वं तत्राह॥ त्वयीश्वर इति॥ ब्रह्मत्वादविकारि
त्वं॥ ईश्वरत्वात्कर्तृत्वमिति॥ नन्वेतदपि विरुद्धमेवेत्याह॥ तदाश्रयत्वादिति॥ गुणैः कुर्वद्भिस्त्वयि सृष्ट्यादि
कर्तृत्वमुपचर्यते गुणाश्रयत्वात् यथा भृत्यकृतं राज्ञो इति॥१८॥

नन्वेतद्देहचतुष्टयंप्रपंचस्यावस्तुत्वेघटेतनतुनसंभवतिसत्यत्वेनप्रतीतेरित्याशंक्याह॥यइति॥आ
त्मनोदृश्येषुगुणेषुदेहादिषुस्वव्यतिरेकतः॥आत्मव्यतिरेकेण॥पृथक्सन्नयंदेहादिरितिव्यवस्यते

॥यआत्मनोदृश्यगुणेषुसन्नितिव्यवस्यतेस्वव्यतिरेकतोऽबुधः॥
॥विनानुवादंनचतन्मनीषितंसम्यग्यतस्त्यक्तमुपाददत्पुमान्॥१७॥॥

निश्चिनोतीतियः॥पुमान्सः॥अबुधः॥अविद्वान्॥व्यतिरेकादर्शनात्॥किंच॥मनीषितंविचारितंसत्तदे
हादिसर्वं॥यतःविनानुवादंवाचारंभणमात्रंविनासम्यग्नभवति॥अतोवस्तुत्वेनत्यक्तंबाधितमेवव
स्तुबुद्ध्याउपाददत्स्वीकुर्वन्नबुधइत्यर्थः॥१७॥

भा॰दे॰ प॰ त्वयिभयशंकेवनावन्नास्तीतिश्लोकचतुष्टयेनाहदेवकी॥ किंचिद्विज्ञापयितुंरूपमिति॥ यत्तत्किमपिरूपं
॥१५॥ वस्तुप्राहुर्वेदाः॥ किंतद्वस्तुतदाह॥ अव्यक्तं॥ अत्र हेतुः॥ आद्यंकारणं॥ किंपरमाणवः॥ न॥ ब्रह्म इहेतत्॥ किंप्र
धानं॥ न॥ ज्योतिः॥ चेतनं॥ किंवैशेषिकाणामिवज्ञानगुणं॥ न निर्गुणं किंमीमांसकानामिवज्ञानंपरिणामि नि४
न॥ निर्विकारं॥ किंतु घटशरावादीनामिवशक्तिविक्षेपेणपरिणामि॥ न॥ सत्तामात्रं॥ तर्हिकिंसामान्यं॥ न॥ विशेषं
तर्हिकिंकारणत्वात्सक्रियं॥ न॥ निरीहं॥ सन्निधिमात्रेणकारणं॥ एवंभूतंकिमपिकार्यकल्पयवस्तुस एव

देवक्युवाच॥ रूपंयत्तत्प्राहुरव्यक्तमाद्यंब्रह्मज्योतिर्निर्गुणंनिर्विकारम्॥ सत्तामात्रं
निर्विशेषंनिरीहं सत्वंसाक्षाद्विष्णुरध्यात्मदीपः॥२४॥

साक्षात्त्वंविष्णुरिति॥ अपरोक्षश्चेत्याह
अध्यात्मदीपइति॥ बुद्ध्यादिकरणसंहातप्रकाशकइत्यर्थः॥ अथवाऽव्यक्तं॥ नकेनापिप्रकारेणव्यज्यतइत्य
व्यक्तं॥ कथंतेनत्यत्यातावन्नव्यज्यतइत्यतआह॥ आद्यंसर्वस्यकार्यस्य आद्यं॥ अनादीत्यर्थः॥ तथाब्रह्मज्योतिर्निर्गु
णंनिर्विकारमितिचतुर्भिःपदैर्देशेनप्रकाशेनचगुणेनचविकारेणचव्याप्तिंनिराकरोति॥ तथासत्तामात्रमिति
विशेषेणनिर्विशेषमिति॥ सामान्येननिरीहमितिक्रिययाचव्याप्तिंनिराकरोति॥ अन्यत्समानं॥ एवंभूतस्यतवन भयशंकेतिभावः॥२३॥
॥१५॥

एवंभूतस्यैव तव यथा विश्वस्य स्थितिसर्गलयार्थं त्रिवर्णगुणावताराः ॥ एवमयं भूभारापनयनार्थमिति ज्ञातमित्याह न्ययंजी
सत्वमिति श्लोकद्वयेन ॥ १९ ॥ रिरक्षिषुः रक्षितुमिच्छुरवतीर्णोसि ॥ कंसेन वर्णेन ॥ अतः साधूनां रक्षणार्थं राजन्येति

सत्वं त्रिलोकस्थितये स्वमायया विभर्षि शुक्लं खलु वर्णमात्मनः ॥ सर्गाय रक्तं रजसोप
वृंहितं कृष्णं च वर्णं तमसा जनात्यये ॥ १९ ॥ त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहे
वतीर्णोऽसि ममाऽखिलेश्वर ॥ राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहे
निष्यसे चमूः ॥ २० ॥ अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर ॥
स तेऽवतारं पुरुषैः समर्पितं श्रुत्वाधुनैवाभिसरत्युदायुधः ॥ २१ ॥ श्रीशुक उवाच ॥
अथैनमात्मजं वीक्ष्य महापुरुषलक्षणं ॥ देवकी तमुपाधावत्कंसाद्भीता सुविस्मिता ॥ २२ ॥

येऽसुरकोटियूथपास्तैर्निर्व्यूह्यमाना इतस्ततश्चाल्यमानाश्चमूः सेनाः ॥ निहनिष्यसे संहरिष्यसि ॥ २० ॥ किं
तु तथापि ॥ अप्रमत्तेन त्वया भाव्यमित्याह ॥ अयं त्विति ॥ असभ्यः खलः ॥ समर्पितं कथितं ॥ अभिसरति आगमि
ष्यति ॥ २१ ॥ उपाधावत ॥ अस्तौत् ॥ २२ ॥

भवत एव हेतुर्निमित्तम्भूतात्कंसात्समुद्विज्ने बिभेमि॥ यतः अधीरधीः अधीरचित्ता॥२८॥ २९॥ मिकिमित्यप
संहरन्नवीं॥ एवंभूतेन मया पुत्रेण तव महती श्लाघा स्यादिति तत्राह॥ विश्वमिति॥ निशान्ते प्रलयावसाने यथाव
काशमसंकोचतः॥ असंभावितत्वादुपहास्यतयैव स्यादित्यर्थः॥ चतुर्भुजरूपेणाविर्भावकारणं तावद

जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन॥ समुद्विज्ने भवद्धेतोः कंसादहमधीरधीः॥
२८ उपसंहर विश्वात्मन्नदो रूपमलौकिकं॥ शंखचक्रगदापद्मश्रीया जुष्टं
त चतुर्भुजं॥२९॥ विश्वं यदेतत्स्वतनौ निशान्ते यथावकाशं पुरुषः परो भवान्॥ बिभर्ति
ग सोयं मम गर्भगोभूदहो नृलोकस्य विडंबनं तत्॥३०॥ श्रीभगवानुवाच॥ त्वमेव
पूर्वसर्गेभूः पृश्निः स्वायंभुवे सति॥ तदायं सुतपा नाम प्रजापतिरकल्मषः॥३१॥
युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः॥ सन्नियम्येंद्रियग्रामं तेपाथे परमं तपः
॥३२॥ वर्षवातातपहिमघर्मकालगुणाननु॥ सहमानौ श्वासरोधविनिर्धूतमनो
मलौ॥ शीर्णपर्णानिलाहारावुपशांतेन चेतसा॥ मत्तः कामानभीप्सन्तौ मदाराध
नमीहतुः॥३३॥ एवं वां तप्यतोर्भद्रे तपः परमदुष्करं॥ दिव्यवर्षसहस्राणि द्वादशेयुर्मदा

दाह॥ त्वमेवेत्यादि चतुर्दशभिः॥ पूर्वसर्गे प्रथमजन्मनि॥ अभूः आसीः॥ पृश्निर्नाम स्वायंभुवे मन्वन्तरे तदायं वसु

दैवः ३४ नैप्रावृत्यः केनतवनौ ३५ ३३ तप्यतोः आवरतोः
पूर्ने तामिमत्यामनोः मा बित्योः ३४

किंचमहाप्रलयेप्यवशेष्यमाणस्यकुतोभयमित्याह ॥ नष्टेलोकइति ॥ चराचरेलोकेमहाभूतेषुलीनेतेषप्या
दिभूतंसूक्ष्मंप्रविष्टेषुतस्मिन्नपिव्यक्तेअव्यक्तंप्रधानंप्राप्ते ॥ अशेषात्मकेप्रधानेसंज्ञाप्रज्ञायस्य ॥ एवंमयिलीन
मिदमस्ति ॥ पश्चादेवमुद्बोधनीयःसः ॥ अशेषसंज्ञःशेषसंज्ञइतिवा ॥ २४ ॥ किंचएवंप्रलयहेतुर्योयंकालः
एनंहेअव्यक्तबंधोप्रकृतिप्रवर्त्तक ॥ तस्यप्रलयावधिभूतस्यतेतवचेष्टांलीलांचेष्टतेविपरिवर्त्तते ॥ पुनःपु

नष्टेलोकेद्विपरार्द्धावसानेमहाभूतेष्वादिभूतंगतेषु ॥ व्यक्तेव्यक्तंकालवेगेनयातेभ
वानेकःशिष्यतेशेषसंज्ञः ॥ २४ ॥ योयंकालस्तस्यतेव्यक्तबंधोचेष्टामाहुश्चेष्टतेनेवि
श्वं ॥ निमेषादिर्वत्सरांतोमहीयांस्तंत्वेशानंक्षेमधामप्रपद्ये ॥ २५ ॥ मर्त्योमृत्युव्याल
भीतःपलायन्सर्वांल्लोकान्निर्भयंनाध्यगच्छत् ॥ त्वत्पादाब्जंप्राप्ययदृच्छयाद्यस्वस्थःशेते
मृत्युरस्मादपैति ॥ २६ ॥ सत्वंघोरादुग्रसेनात्मजान्नस्त्राहित्रस्तान्भृत्यवित्रासहा
सि ॥ रूपंचेदंपौरुषंध्यानधिष्ण्यंमाप्रत्यक्षंमांसदृशांकृषीष्टाः ॥ २७ ॥ श्रीहरिः ॥

श्लोका ३ माप्रतिष्ठे

नर्वत्सरांतस्त्वामहीयान्द्विपरार्द्धरूपः ॥ यस्यचेष्टामाहुः ॥ तंत्वाक्षेमधाम ॥ अभयस्थानंप्रपद्येशरणंव्रजे ॥ २५ ॥ क्षे
मधामत्वमेवाह ॥ मर्त्यइति ॥ लोकान्प्रति ॥ यदृच्छयाकेनापिभाग्योदयेनहेआद्य ॥ २६ ॥ प्रस्तुतविज्ञापयति ॥ सत्वमिति
भृत्यानांवित्रासंहंतीतिभृत्यवित्रासहा ॥ भृत्यविदितिवाच्छेदः ॥ पौरुषंऐश्वरं ॥ ध्यानधिष्ण्यं ॥ ध्यानास्पदं ॥
मांसदृशांमांसचक्षुषांप्रत्यक्षंमाकृथाः ॥ २७ ॥

भा० द० पू०
१७

ननुत्वयिप्रसन्नेऽपिकिमावयोः पुनःपुनर्जन्मात्यतः परं न भविष्यतीत्याह ॥ युवामिति ॥ ४३ ॥ ४४ ॥ यदि कंसादिभ्योऽपि
तर्हि मां गोकुलं नय ॥ यशोदायां जाता कन्यां मन्मायामानयेति ॥ प्रथममेव भगवता प्रचोदितो वसुदेवो यद्यागं
तुमैच्छत ॥ तदैव अजापि या योगमाया सा नन्दजायया निमित्तभूतया अजनि जाता ॥ ४५ ॥ हृतप्रत्यया यथाः स्वा

युवां मां पुत्रभावेन ब्रह्मभावेन वा सकृत् ॥ चिंतयंतौ कृतस्नेहौ यास्येथे मद्गतिं परां ॥ ४६ ॥
श्रीशुक उवाच ॥ इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया ॥ पित्रोः संपश्यतोः सद्यो बभू
व प्राकृतः शिशुः ॥ ४७ ॥ ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् ॥ यदा ब
हिर्गन्तुमियेष तर्ह्यजा या योगमायाऽजनि नंदजायया ॥ ४८ ॥ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु
पौरेष्वपि शायितेष्वथ ॥ द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ॥ ताः कृष्णवाह
वसुदेव आगते स्वयं व्यवर्यंत यथा तमो रवेः ॥ ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगाद्वारि निवा
रयन् फणैः ॥ ४९ ॥

स्वयोर्येषां ॥ अथ वा हृताः प्रत्ययो येषां ॥ जाग्रतामपि तथा भूतेषु द्वारपालेषु सत्सु ॥ बृहत्सु फ१
कपाटेषु लोहकीलकयुक्तशृंखलैः ॥ बृहद्भिः कपाटादिभिर्दुरत्यया इति वा ॥ स्वयमेव व्यवर्यंत विवृता इत्यर्थः ॥ व्यवि

यंतेलिवक्त्येगुणश्छां दसः रवेर्निमित्तात् ॥ ६६ ॥

अमुनावपुषाप्रादुर्भूतोस्मि।।वरदराट्वरदेषुश्रेष्ठइत्यर्थः।।तेनसकृद्वरेणचवारंवारमाविर्भावेकारणमुक्तं।।काम
स्यदित्सया।।दातुमिच्छया।।३५।।मादृशःमयासदृशः।।३६।।मेमत्तोपियुवांअपवर्गंनवव्राथे।।नवृतवंतौ।।३७।।वरंदत्वामयिग

तद्वांपरितुष्टोहममुनावपुषानघे।।तपसाश्रद्धयानित्यंभक्त्याचहृदिभावितः।।प्रादुरासंवरदराड्युवयोःका
मदित्सया।।३५।।व्रियतांवरइत्युक्तेमादृशोवांवृतःसुतः।।३६।।अजुष्टग्राम्यविषयावनपत्यौचदंपती।।नवव्रा
थेपवर्गंमेमोहितौममायया।।३७।।गतेमयियुवांलब्ध्वावरंमत्सदृशंसुतं।।ग्राम्यान्भोगानभुंजाथांयु
वांप्राप्तमनोरथौ।।३८।।अदृष्ट्वान्यतमंलोकेशीलौदार्यगुणैःसमं।।अहंसुतोवामभवंपृश्निगर्भइतिश्रु
तः।।३९।।तयोर्वांपुनरेवाहमदित्यामासकश्यपात्।।उपेंद्रइतिविख्यातोवामनत्वाच्चवामनः।।
४०।।तृतीयेस्मिन्भवेहंवैतेनैववपुषाथवां।।जातोभूयस्तयोरेवसत्यंमेव्याहृतंसति।।४१।।
एतद्वांदर्शितंरूपंप्राग्जन्मस्मरणायमे।।नान्यथामद्भवंज्ञानंमर्त्यलिंगेनजायते।।४२।।

तेसपि।।३८।।३९।।अदित्यांकश्यपाद्धामनत्रासेतियदुक्तं।।तदपितद्रूपयो[illegible]र्युवयोरहमेवपुनरासमि
मित्यर्थः।।४०।।४१।।प्राक्प्रथमंतावदेतद्रूपंमेजन्मेति।।स्मरणायज्ञानायेदर्शितं।।मद्भवंमद्विषयं।।अनंतरंत्वदिछ

भा० द० पू० ननुत्वयिप्रसन्नेऽपिकिमावयोःपुनःपुनर्जन्मेत्यतःपरंनभविष्यतीत्याह॥युवामिति॥४३॥४४॥यदिकंसाद्बिभेषि
१७ तर्हिमांगोकुलंनय॥यशोदायांजातांकन्यांमन्मायामानयेति॥प्रथममेवभगवताप्रचोदितोवसुदेवोयदागं
तुमैच्छत॥तदैवअजापियायोगमायासानंदजाययानिमित्तभूतयाअजनिजाता॥४५॥हृतप्रत्ययाधीःसर्वा

युवांमांपुत्रभावेनब्रह्मभावेनवासकृत॥चिंतयंतौकृतस्नेहौयास्यथेमद्गतिंपरां॥४३॥
श्रीशुकउवाच॥इत्युक्त्वासीद्धरिस्तूष्णींभगवानात्ममायया॥पित्रोःसंपश्यतोःसद्योबभू
वप्राकृतःशिशुः॥४४॥ततश्चशौरिर्भगवत्प्रचोदितःसुतंसमादायससूतिकागृहात॥यदाब
हिर्गंतुमियेषतर्ह्यजायायोगमायाजनिनंदजायया॥४५॥तयाहृतप्रत्ययसर्ववृत्तिषुद्वाःस्थेषु
पौरेष्वपिशायितेष्वथ॥द्वारस्तुसर्वाःपिहितादुरत्ययाबृहत्कपाटायसकीलशृंखलैः॥ताःकृष्णवाहे
वसुदेवआगतेस्वयंव्यवर्यंतयथातमोरवेः॥ववर्षपर्जन्यउपांशुगर्जितःशेषोऽन्वगाद्वारिनिवा
रयन्नेरीः॥४६॥

वृत्तयोयेषां॥अथवाहृताःप्रत्ययायेषां॥जाग्रतामपितथाभूतेषुद्वारपालेषुसत्सु॥रहःसु फ०१
कपाटेषुलोहकीलकेयुक्तशृंखलैः॥बृहद्भिःकपाटादिभिर्दुरत्यया इति वा॥स्वयमेवव्यवर्यंतविवृताइत्यर्थः॥व्यवि १७

भा.द.पू.
१८

कालोमृत्युः ॥३॥ ४॥ ५॥ अंग हे भ्रातः ॥ ६ ॥ दीनदीनवत् ॥ दीनादपि दीनवत् ॥ न तु तथा पुत्रस्यान्यथनीतत्वात् सा
स तल्पात्तूर्णमुत्थाय कालोयमिति विह्वलः ॥ सूतीगृहमगात्तूर्णं प्रस्खलन्मुक्तमूर्द्धजः ॥३॥ त
माह भ्रातरं देवी कृपणा करुणं सती ॥ स्नुषेयं तव कल्याण स्त्रियं मा हन्तुमर्हसि ॥४॥ बहवो हिंसि
ता भ्रातः शिशवः पावकोपमाः ॥ त्वया दैवनिसृष्टेन पुत्रिकैका प्रदीयतां ॥५॥ नन्वहं ते ह्यवरजा
दीना हतसुता प्रभो ॥ दातुमर्हसि मंदायांगेमां चरमां प्रजां ॥ ६ ॥ ॥ श्रीशुक उवाच ॥ उपगुह्यात्म
जामेवं रुदत्या दीनदीनवत् ॥ याचितस्तां विनिर्भर्त्स्य हस्तादाचिच्छिदे खलः ॥७॥ तां गृहीत्वा च
रणयोर्जातमात्रां स्वसुः सुतां ॥ अपोथयच्छिलापृष्ठे स्वार्थोन्मूलितसौहृदः ॥८॥ सा तद्धस्तात्स
मुत्पत्य सद्यो देव्यंबरं गता ॥ अदृश्यतानुजा विष्णोः सायुधाष्टमहाभुजा ॥ दिव्यस्रगंबरालेपर
त्नाभरणभूषिता ॥ धनुःशूलेषुचर्मासिशंखचक्रगदाधरा ॥९॥ सिद्धचारणगंधर्वैरप्सरःकिन्नरो
रगैः ॥ उपाहृतोरुबलिभिः स्तूयमानेदमब्रवीत् ॥१०॥ किं मया हतया मंद जातः खलु तवांतकृत् ॥ यत्र क्व वा पूर्व
शत्रुर्मा हिंसीः कृपणान्वृथा ॥११॥
त्वयोगमायेति ज्ञात्वा ॥ याचितोपि आचिच्छिदे ॥ आकृष्य जग्राह ॥ ७ ॥ अपोथयत् बलेन चिक्षेप ॥ ८ ॥ सद्य एव देवी दिव्यरूपाभू

ला ॥ ९ ॥ १० ॥ कृपणानिति अन्यान् हनिष्यतीति ज्ञात्वा वा ॥
रयति ॥ पाठांतरे मा भोः कृपणान् वृथा हिंसीः हिंसितवानसीति ॥ ११ ॥

१८

गंभीरोयस्तोयौघस्तस्यजवेनयेऊर्मयस्तैःफेनिलाफेनव्याप्ता॥भयानकैरावर्त्तैर्ज्ञातैर्व्याप्तापिश्रियःपतेः॥सीतापतेः॥४९
निद्रयाऽजया॥४८॥प्रतिमुच्यवध्वा॥पदोःपादयोःलोहनिगडैः॥आस्तेस्म॥४९॥जातंकिंचिदितिकेवलंअबुध्यतननतुपुत्रः

मघोनिवर्षत्यसकृद्यमानुजागंभीरतोयौघजवोर्मिफेनिला॥भयानकावर्त्तशताकुलानदीमार्गंददौ
सिंधुरिवश्रियःपतेः॥४९॥नंदव्रजंशौरिरुपेत्यतत्रतान्गोपान्प्रसुप्तानुपलभ्यनिद्रया॥सुतंयशो
दाशयनेनिधायतत्सुतामुपादायपुनर्गृहानगात्॥५०॥देवक्याःशयनेन्यस्यवसुदेवोथदारिकां
प्रतिमुच्यपदोर्लोहमास्तेपूर्ववदावृतः॥५१॥यशोदानंदपत्नीचजातंपरमबुध्यत॥नतल्लिं
गंपरिश्रांतानिद्रयापगतस्मृतिः॥५२॥इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेकृष्णजन्म
३ स्तुतिर्गोकुलगमनोनामतृतीयोध्यायः॥३॥श्रीशुकउवाच॥बहिरंतःपुरद्वारःसर्वाःपूर्व
वदावृताः॥ततोबालध्वनिंश्रुत्वागृहपालाःसमुत्थिताः॥१॥तेतुतूर्णमुपव्रज्यदेवक्यागर्भजन्म
तत्॥आचख्युर्भोजराजाययदुद्विग्नःप्रचेक्षते॥२॥

कन्यावेति॥योगनिद्रयाचमोहितेति॥५०॥इतिश्रीदशमेतृतीयः॥३॥चतुर्थेचंडिकावाक्यमाकर्ण्योत्तिभ
याकुलः॥दुर्मंत्रिभिर्हितंमेनेकंसोबालादिहिंसनम्॥१॥तदष्टमंजन्म॥२॥॥ ऽऽ ॥ ७ ॥ ऽऽ

भा०द०पू० १९

एवं विचार्यमाणे सति न शोकाद्यवकाशः ।। अज्ञानतः स्तु न निवर्तत इत्याह ।। यथेति ।। यथा यथावत् अनेवंविदः
एवमज्ञानतः ।। आत्मविपर्ययः देहात्मबुद्धिर्भवति ।। यतो विपर्ययाद्भेदो भवति ।। देहाहंकारेणह्यात्मनि परिछिन्ने
सति इदमहंकारास्पदं भिन्नं भवति ।। यतो भेदात् पुत्रादिदेहैर्योगवियोगश्च ।। ततश्च संसृतिः ।। सुखवैयावदज्ञानं न नि
वर्त्तत इत्यर्थः ।।१९।। एवमुक्तप्रकारेणानेतितवत्तनयाः ।। अहं तु तान्न घातितवान् ।। तथापि अज्ञानदृष्ट्या स्वतनयान्मया

यथानेवंविदो भेदो यत आत्मविपर्ययः ।। देहयोगवियोगौ च संसृतिर्न निवर्त्तते ।।१९।। तस्माद्भ
द्रे स्वतनयान्मया व्यापादितानपि ।। मानुशोच यतः सर्वः स्वकृतं विंदतेऽवशः ।।२०।। यावद्धतोऽस्मि हं
तास्मीत्यात्मानं मन्यतेऽस्वदृक् ।। तावत्तदभिमान्यज्ञो बाध्यबाधकतामियात् ।।२१।। क्षमध्वं मम दौ
रात्म्यं [illegible] साधवो दीनवत्सलाः ।। इत्युक्त्वाश्रुमुखः पादौ श्यालः स्वस्रोरथाग्रहीत् ।।२२।।

व्यापादितानपि मानुशोचेति सांत्वयति ।। तस्मादिति ।। अज्ञानाश्रयमेव कर्मवादमाह ।। यतइति ।।२०।। कथं त
र्हि ब्राह्मणादिहंतुस्तद्वधस्य च प्रायश्चित्तश्रवणं ।। अज्ञानमूलमेवेत्याह ।। यावदिति ।। अस्वदृक् देहाभिमानीति
भिमन्य २ तदभिमानी ।। तस्य देहस्य हननमात्मन्यभिमानः तस्य अर्थः ।।२१।। श्यालः कंसः स्वस्रोरिति ।। स्वसृशब्देन द्विवचनानुपपत्त्या
मिथुनलक्षणया स्वसृतत्पत्योरभिधानं लिंगसमवायेन प्राणभृत्तउपदधातीतिवत् ।। देवकीवसुदेवयोः प्रत्येकं पा
दं अग्रहीदित्यर्थः ।। श्यालशब्देन कथंचिद्वसुदेवाभिधानम् ।।२२।।

मिथुनगलद्वारा १

वद्धनामनिकेतेषुवारणस्यादिस्थानेषु॥१२॥परमविस्मितःकथंदेवीवागन्तर्जाता॥१३॥भामरे हेभगिनीभर्त्रे॥पुरुषादौरान्तसोयथा
त्वापत्यमेवदहिनस्तीतितदुक्त॥१४॥१५॥१६॥हेमहाभागेत्वत्कृतंभुजंग॥स्वारब्धकर्मभुजः स्वारब्धकर्मभोक्तनु॥किंच॥जेनत्तेवंःप्राणि
नःसहसदानासते॥किंत्वल्पकालमेव॥तदप्येकत्रनासते॥किंतुवियुज्यन्ते॥यतोदैवाधीनाः॥१७॥सहैवनासत इत्यनेनय

इतिप्रभाष्यतंदेवीमायाभगवतीभुवि॥बहुनामनिकेतेषुबहुनामावभूवह॥१२॥तयाभिहितमा
कर्ण्यकंसःपरमविस्मितः॥देवकींवसुदेवंचविमुच्यप्रश्रितोब्रवीत॥१३॥अहोभगिन्यहोभाममया
वांवतपाप्मना॥पुरुषादइवापत्यंबहवोहिंसिताःसुताः॥१४॥सत्वहंत्यक्तकारुण्यस्त्यक्तज्ञातिसु
हृत्खलः॥कांल्लोकान्वैगमिष्यामिब्रह्महेवमृतःश्वसन्॥१५॥दैवमप्यनृतंवक्तिनमर्त्याएवकेवलं
यद्विश्रंभादहंपापःस्वसुर्निहतवाञ्शिशून्॥१६॥माशोचतमहाभागावात्मजान्स्वकृतंभुजः॥जंतु
वोनसदैकत्रदैवाधीनास्सहासते॥१७॥भुविभौमानिभूतानियथायांत्यपयांतिच॥नायमात्मातथै
तेषुविपर्य्येतियथैवभूः॥१८॥

इत्तंजन्ममरणादितत्वपिदेहानामेवनात्मनइत्याह॥भुवीति॥भूतानि
देहाएवयांति॥अपयांतिच॥भवंतिनभवंतिचेत्यर्थः॥यथाभुविभौमानिघटादीनितद्वत्॥एतेषुभूतेषुजन्मा
दिभिर्विक्रियमाणेषु॥अयमपरोक्षतयाप्रत्यभिज्ञायमानः॥आत्मानविपर्य्येति॥विपर्ययंनप्राप्नोति॥एकरूप

यं१

[illegible]

भा० द० पृ० अस्यतः विधावतः सतः ॥ उत्सृज्य रणं त्यक्त्वा ॥ ३२ ॥ ३३ ॥ अन्यासक्तान्विमुखांश्चेति न हंसि न हिनस्ति ॥ ३४ ॥ ननु देवेभ्यो
२० विभेमीति चेत्तत्र ॥ क्षेमे निर्भयदेशे शूरैः ॥ संयुगादन्यत्र विकत्थनं प्रौढिवादो येषां तैः ॥ ननु हरेर्विभेमि शंभोश्चेति

अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः ॥ जिजीविषव उत्सृज्य पलायनपरा ययुः ॥ ३२ ॥ केचित्प्रां
जलयो दीना न्यस्तशस्त्रा दिवौकसः ॥ मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ॥ ३३ ॥ न त्वं विस्मृ
गत२ तशस्त्रास्त्रान्विरथान्भयसंवृतान् ॥ हंस्यन्यासक्तविमुखान्भग्नचापानयुध्यतः ॥ ३४ ॥ किं क्षेमशूरै
र्विबुधैरसंयुगविकत्थनैः ॥ रहोजुषा किं हरिणा शंभुना वा वनौकसा ॥ किमिंद्रेणाल्पवीर्येण
ब्रह्मणा वा तपस्विना ॥ ३५ ॥ तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ॥ ततस्तन्मूलखनने नि
युंक्ष्वास्माननुव्रतान् ॥ ३६ ॥ यथामयोंगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुम् ॥
यथेंद्रियग्राममुपेक्षितस्तथारिपुर्महान्बद्धबलो न चाल्यते ॥ ३७ ॥

मौत्तेत्राकूः रहोजुषेति सर्वस्याप्यंतः प्रविष्टेन ॥ क्वचिदपि बहिरदृष्टेनेत्यर्थः ॥ पुरुषप्रवेशरहितमिलावृत्तवनमो
कोयस्य तेन शंभुना ॥ ३५ ॥ यद्यप्युद्यमे देवा न किंचिदपि कर्तुमसमर्थाः ॥ तथापि नीतिरनुसर्तव्येत्याहुः ॥ तथापीति

[illegible] २०

क

आत्मसौहृदं प्रियवादादीनादर्शयन् ॥२३॥२४॥२५॥ स्वपरभेददर्शने किं भवति तदाह शोकहर्षेति ॥ भावै स्वनिमित्तैर्भूतैर्भूयः
भावान् घ्नंतं भावमीश्वरं पृथग्दृशस्तेन पश्यंति ॥ किंत्वहमेव हंता ॥ हतश्चेति मन्यंत इत्यर्थः ॥२६॥ विशुद्धं यथा भवति

मोचयामास निगडाद्विस्रब्धः कन्यकागिरा ॥ देवकीवसुदेवं च दर्शयन्नात्मसौहृदं ॥२३॥ भ्रातुः समनुत
प्तस्य क्षांतरोषा च देवकी ॥ व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह ॥२४ ॥वसुदेव उवाच ॥ एवमे
तन्महाभाग यथा वदसि देहिनां ॥ अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः ॥२५॥ शोकहर्षभ
यद्वेषलोभमोहमदान्विताः ॥ मिथो घ्नंतं न पश्यंति भावैर्भावं पृथग्दृशः ॥२६॥ कंस एवं प्रसन्ना
भ्यां विशुद्धं प्रतिभाषितः ॥ देवकीवसुदेवाभ्यामनुज्ञातो विशद्गृहं ॥२७ ॥श्रीशुक उवाच ॥ तस्यां रात्र्यां
व्यतीतायां कंस आहूय मंत्रिणः ॥ तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया ॥२८॥ आकर्ण्य भर्तुर्गदितं त
मूचुर्देवशत्रवः ॥ देवान् प्रति कृतामर्षा दैतेया नातिकोविदाः ॥२९॥ एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजा
दिषु ॥ अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ॥३०॥ किमुद्यमैः करिष्यंति देवाः समरभीरवः ॥ नि
त्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ॥३१॥

२७॥२८॥ नातिकोविदाः ॥ दृष्टमात्रमतयः ॥ न दीर्घदर्शिनः ॥२९॥ न निर्गता निर्दशाद्दिनानि येषां तान् अन्यांश्च ॥३०॥३१॥

पंचमे जातकं नंदः सूनोः कृत्वा महोत्सवं ॥ गत्वाथ मथुरां प्राप वसुदेवागमोत्सवं ॥ महामना उदारचित्तः ॥ १ ॥ नियुते द्वे लक्षे सप्त तिलप
र्वतांश्च प्रादात् ॥ कथंभूतान् रत्नौघैः रत्नसमूहैः शातकौंभांबरैः सुवर्णरसालैर्वस्त्रैश्चाहतान् ॥ ३ ॥ द्रव्याणां गोहिरण्यादीनां मध्ये केषांचिद्
नैरेव शुद्धिर्यथा तथा दानादियुक्तकर्मणा दिसंस्कारैरेव गर्भाणां शुद्धिरिति दर्शयितुं प्रतिनियतानि शोधकानि दृष्टांतत्वेनोदाहर

श्रीशुक उवाच ॥ नंदस्त्वात्मज उत्पन्ने जाताह्लादो महामनाः ॥ आहूय विप्रान् वेदज्ञान् स्नातः शु
चिरलंकृतः ॥ १ ॥ वाचयित्वा स्वस्त्ययनं जातकर्मात्मजस्य वै ॥ कारयामास विधिवत्पितृदेवार्चनं
तथा ॥ २ ॥ धेनूनां नियुते प्रादाद्विप्रेभ्यः समलंकृते ॥ तिलाद्रीन्सप्त रत्नौघशातकौंभांबरावृतान् ॥ ३ ॥
कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया ॥ शुध्यंति दानैः संतुष्ट्या द्रव्याण्यात्मात्मविद्यया ॥ ४ ॥
सौमंगल्यगिरो विप्राः सूतमागधवंदिनः ॥ गायकाश्च जगुर्नेदुर्भेर्यो दुंदुभयो मुहुः ॥ ५ ॥

ति ॥ कालेनेति ॥ कालेन भूम्यादि स्नानेन देहादि शौचेनामेध्यलिप्तादि संस्कारैर्गर्भादि ॥ तपसा इंद्रियाणि इज्यया ब्राह्मणादि ॥ दानैर्द्र
व्याणि संतुष्ट्या मनः आत्मा आत्मविद्ययेति ॥ ४ ॥ सौमंगल्यगिरः स्वस्तिवाचका विप्रा ये ते बभूवुः ॥ तत्र सूताः पौराणि
काः ॥ प्रोक्ता मागधा वंशशंसकाः ॥ वंदिनस्तु मल्लप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ ॥ ॥ ५ ॥ श्रीरामायनमः ॥

भा० द० पु०
२१

देवानां मूलं विष्णुः ॥ स च यत्र धर्मस्तत्रास्ते ॥ धर्मस्य मूलं देवादय इति ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ किंच विप्रादयो हरे
र्वै तनवो यस्मात्तस्मादयमेवोपाय इत्याह ॥ अयमिति ॥ ४२ ॥ ४३ ॥ ४४ ॥ आरात्समीपमागता मृत्युर्येषां ते ॥ ४५ ॥ स

मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः ॥ तस्य च ब्रह्मगोविप्रास्तपो यज्ञाः सदक्षिणाः ॥ ३८ ॥ तस्मा
त्सर्वात्मना राजन्ब्राह्मणान्ब्रह्मवादिनः ॥ तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ॥ ३९ ॥
विप्रा गावश्च वेदाश्च तपः सत्यं दमः शमः ॥ श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ॥ ४० ॥ स
२४ हि सर्वसुराध्यक्षो ह्यसुरद्विड्गुहाशयः ॥ तन्मूला देवताः सर्वाः सेश्वराः सचतुर्मुखाः ॥ ४१ ॥ अयं वै
तद्वधोपायो यदृषीणां विहिंसनं ॥ ४२ ॥ श्रीशुक उवाच ॥ एवं दुर्मंत्रिभिः कंसः सह संमंत्र्य
दुर्मतिः ॥ ब्रह्महिंसां हितं मेने कालपाशावृतोऽसुरः ॥ ४३ ॥ संदिश्य साधुलोकस्य कदने कदन
प्रियान् ॥ कामरूपधरान्दिक्षु दानवान्गृहमाविशत् ॥ ४४ ॥ ते वै रजःप्रकृतयस्तमसा मूढचेतसः ॥
सतां विद्वेषमाचेरुरारादागतमृत्यवः ॥ ४५ ॥ आयुः श्रियं यशो धर्मं लोकानाशिष एव च ॥ हंति
श्रेयांसि सर्वाणि पुंसो महदतिक्रमः ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे चतुर्थोऽध्या

॥ विद्वेषान्मृत्युमाप्स्यहेतुः ॥ किंतु वक्ष्यमाणानर्थकारीत्याह ॥ आयुः श्रियमिति ॥ ४६ ॥ इति दशमे चतुर्थः ॥ ४

भा० द० पू० जनैः सिंचंत्यः ॥ अजनं मुज्जगुरितिवा ॥११॥१२॥१३॥ तेभ्यः प्रादात् यथोचितं मन्यानपि अभ्यपूजयत् ॥१४॥१५॥ हरेर्निवासेन येआ

२२ ताः आशिषः प्रयुंजानाश्चिरं पाहीति बालके ॥ हरिद्राचूर्णतैलाद्भिः सिंचंत्योजनमुज्जगुः ॥११॥ अवाद्यंत
विचित्राणि वादित्राणि महोत्सवे ॥ कृष्णे विश्वेश्वरेऽनंते नंदस्य व्रजमागते ॥१२॥ गोपाः परस्परं हृष्टा द-
धिक्षीरघृतांबुभिः ॥ आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः ॥१३॥ नंदो महामनास्तेभ्यो वासोलं-
त ४ कारगोधनं ॥ सूतमागधवंदिभ्यो येन्ये विद्योपजीविनः ॥ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत्
विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च ॥१४॥ रोहिणी च महाभागा नंदगोपाभिनंदिता ॥ व्यचरद्दिव्य
वासःस्रक्कंठाभरणभूषिता ॥१५॥ तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् ॥ हरेर्निवासात्मगु-
णैः रमाक्रीडमभून्नृप ॥१६॥ गोपान् गोकुलरक्षायां निरूप्य मथुरां गतः ॥ नंदः कंसस्य वार्षिक्यं करं दातुं
कुरूद्वह ॥१७॥ वसुदेव उपश्रुत्य भ्रातरं नंदमागतं ॥ ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनं ॥१८॥ तं दृष्ट्वा सहसो-
त्थाय देहः प्राणमिवागतं ॥ प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रेमविह्वलः ॥१९॥ पूजितः सुखमासीनः पृष्ट्वा-
नामयमादृतः ॥ प्रसक्तधीः स्वात्मजयोरिदमाह विशांपते ॥२०॥

त्मनि गुणास्सैर माया ॥ आक्रीडं विहारस्थानम् ॥१६॥ वार्षिकं प्रतिवर्षं देयं ॥१७॥ भ्रातरं सखायं ॥ तदवमोचनं ॥ तस्य ॥२२॥

॥१०॥ ५॥ २४॥ [illegible]

संमृष्टानि संसिक्तानि च द्वाराणि अजिराणि अंगणानि गृहांतराणि गृहमध्यानि च यस्मिन् स तथा चित्रध्वजेषु पता
कानां स्रजं चैलपल्लवतोरणानि च तैर्भूषितः ॥५॥ हरिद्रातैलैः रूषिताः लिप्ताः विचित्रधातवश्च बर्हस्रजश्च वस्त्राणि
च कांचनमालाश्चालंकारास्तद्या विद्यंते येषां ते तथाभूता गावादयो बभूवुरित्यर्थः ॥६॥ ७॥ आकल्पा अलंकाराः

व्रजः संमृष्टसंसिक्तद्वाराजिरगृहांतरः ॥ चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ॥५॥ गावो वृषा वत्स
तरा हरिद्रातैलरूषिताः ॥ विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ॥६॥ महार्हवस्त्राभरणकंचुकोष्णी
षभूषिताः ॥ गोपाः समाययू राजन्नानोपायनपाणयः ॥७॥ गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भव
मात्मानं भूषयांचक्रुर्वस्त्राकल्पांजनादिभिः ॥८॥ नवकुंकुमकिंजल्कमुखपंकजभूतयः ॥ बलि
भिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥९॥ गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः प
थि शिखाच्युतमाल्यवर्षाः ॥ नंदालयं सवलया व्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः ॥
॥१०॥

८॥ नवं च कुंकुमकिंजल्कैर्मुखपंकजेषु भूतिः श्रीर्यासां ताः ॥९॥ सुमृष्टानि ॥ उज्ज्वलानि तानि मणिमयानि कुंडलानि
यासां ॥ निष्काः पदकानि कंठेषु यासां ताः चित्रांबराश्च ॥ शिखाभ्यश्च्युतानि माल्यवर्षाणि यासां ताः ॥ नंदालयं व्रजंतीः ॥ व्रजंत्यः
पथि विरेजुः ॥ सवलयाः ॥ कंकणभूषिताः ॥ व्यालोलैः ॥ कुंडलादिभिः शोभा यासां ताः ॥१०॥

नंदोवसुदेवंसांत्वयन्नाह॥ अहोइति॥२७॥ अदृष्टएवनिष्ठासमाप्तिर्यस्यसः॥ यद्दैवपुत्रादिसुखप्रदं अदृष्टंहीयते॥ नदे
वत्तेपुत्राद्र्योनसंभवतीत्यर्थः॥ अदृष्टपरमः॥ तथा अदृष्टमेवपरमंयस्यसः॥ यद्यपिपुत्रादयोवियुक्तास्तथापि
तानदृष्टमेवपुनःसंगमयतीत्यर्थः॥ एवमदृष्टमात्मनस्तत्वं॥ अभिचारिकारणंसुखदुःखयो र्योवेदसनमु

नन्दउवाच॥ अहोतेदेवकीपुत्राःकंसेनबहवोहताः॥ एकावशिष्टावरजाकन्या
सापिदिवंगता॥२७॥ नूनंह्यदृष्टनिष्ठोयमदृष्टपरमोजनः॥ अदृष्टमात्मनस्तत्वंयोवेद
सनमुह्यति॥२८॥ वसुदेवउवाच॥ करोवैवार्षिकोदत्तोराज्ञेदृष्टावयंचवः॥ नेहस्थेयं
बहुतिथंसंत्युत्पाताश्चगोकुले॥२९॥ श्रीशुकउवाच॥ इतिनंदादयोगोपाःप्रोक्तास्तेशौ
रिणाययुः॥ अनोभिरनडुद्युक्तैस्तमनुज्ञाप्यगोकुलं॥३०॥ इतिश्रीमद्भागवतेमहापुरा
दशमस्कंधेवसुदेवनंदसमागमेपंचमोध्यायः॥५॥

ध्यातितस्मादिष्टानीत्वयानदुःखंभावनीयं॥ मृतानामपिवियुक्तानामपिचकालांतरेदर्शनयोसंभवात्॥ अस्मा
द्दादिभिरपिकालांतरेऽपितद्वियोगसत्यपि॥ इतिनंदस्यदैवीवागेषाभाविसूचिका॥२८॥ तांतुध्यात्वावसुदेवोदुः
खत्यक्तोनरस्माह॥ करोवाइति॥ वयुष्माभिः॥२९॥ अनोभिःशकटैः॥३०॥ ॥ इतिदशमेपंचमः॥५॥ ॥

२१॥ पुनर्भवः पुनर्ज्जात इव तत्र हेतुः गर्भविशेषणं ॥ संसारचक्रे वर्त्तमान इति ॥ २२ ॥ दुर्ल्लभत्वमेवाह ॥ नैकत्रेति ॥ प्रियस्यासं-
संवासश्च प्रियसंवासः हे प्रिये इति वा ॥ स्रोतसः ओघेन नीयमानानां ॥ प्लवंतीति प्लवाः तृणकाष्ठादयस्तेषां ॥ तथा एकत्र स्थि-
तिर्नास्तीत्यर्थः ॥ कच्चिदिति पशव्यादिरूपे तस्मिन् वने ॥ निर्द्दोषगोपयोदध्यादिप्रभूतगोपिकास्तन्यादिना पुत्रक्षेमं विवक्षयाह

दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते ॥ प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत ॥ २१ ॥ दिष्ट्या
संसारचक्रेऽस्मिन् वर्त्तमानः पुनर्भवः ॥ उपलब्धो भवानद्य दुर्ल्लभं प्रियदर्शनं ॥ २२ ॥ नैकत्र
प्रियसंवासः सुहृदां चित्रकर्मणां ॥ ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा ॥ २३ ॥ कच्चित्पशव्यं नि-
रुजं भूर्य्यंबुतृणवीरुधं ॥ बृहद्वनं तदधुना यत्रास्से त्वं सुहृद्वृतः ॥ २४ ॥ भ्रातर्मम सुतः कच्चिन्मात्रा
सह भवद्व्रजे ॥ तातं भवंतं मन्वानो भवद्भ्यामुपलालितः ॥ २५ ॥ पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभा-
वितः ॥ न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते ॥ २६ ॥

स्फूर्त्तीति ॥ प्रसक्तधीः स्वात्मजयोरित्युक्तत्वात् ॥ २४ ॥
भवद्भ्यामुपलालितः सन् । कच्चिद्वर्त्तत इति शेषः ॥ २५ ॥ पुत्रादर्शनक्लेशानाह ॥ पुंस इति ॥ सुहृदो बंधून्प्रति ॥ अनु-
भावितः संपादितो यस्त्रिवर्गः स हि पुंसो विहितः युक्तः शास्त्रेष्वा प्रोक्तः ॥ न स्वमात्रपर्य्यवसितः अतस्तेषु क्लिश्य-

ति १

भा०द०१ बालग्रहः पूतना ॥ असदन्तकं बालं ददर्श ॥ असतामन्तकं दृष्ट्वा कथं न बिभेति ॥ तत्राह ॥ प्रतिच्छन्नं निजोरुतेजः सं बालं नाट्येन प्रतिच्छन्नं

प० २४ तिरोहितं निजं उरु तेजो येन तं ॥ कमिव ॥ भसि भस्मनि आहितमग्निमिवेति ॥ ७ ॥ चराचरात्मत्वाद्देवतां विबुध्य निमीलितेक्षण आस ॥

स्वयमनंतं दृष्ट्वा नाममन्तकं सा अङ्क आरोपयत् ॥ बालं मत्वा ॥ यथोरगं सुप्तमबुद्धिस्त्वासौ रज्जुधी अस्य अज्ञानतो रज्जुबुद्ध्या गृह्णाति यथा तद्व

दिति ॥ ८ ॥ ननु यशोदारोहिण्यौ तां कथं न न्यवारयेतां तत्राह ॥ तामिति ॥ वामं वल्गु जनन्या इव चेष्टितं यस्यास्तां वरस्त्रियं च सह सैव अन्तराम

वल्गुस्मितापाङ्गविसर्गवीक्षितैर्मनो हरन्तीं वनितां व्रजौकसां ॥ अमंसताम्भोजकरेण रूपिणीं गोप्यः श्रियं द्रष्टुमिवागतां पतिं ५

बालग्रहस्तत्र विचिन्वती शिशून्यदृच्छया नंदगृहेऽसदंतकम् ॥ बालं प्रतिच्छन्ननिजोरुतेजसं दद

॥२॥ ६ ॥ र्श तल्पेऽग्निमिवाहितं भसि ॥ ७ ॥ विबुध्य तां बालकमारिकाग्रहं चराचरात्मा स निमीलितेक्षणः ॥ अनंतमारोपयदंकमंतकं यथो

रगं सुप्तमबुद्धिरज्जुधीः ॥ ८ ॥ तां तीक्ष्णचित्तामतिवामचेष्टितां वीक्ष्यान्तरा कोशपरिच्छदासिवत् ॥ वरस्त्रियं तत्प्रभया ऽ

वधर्षिते निरीक्ष्यमाणे जननी ह्यतिष्ठताम् ॥ ९ ॥ तस्मिन्स्तनं दुर्जरवीर्यमुल्बणं घोरांकमादाय शिशोर्ददावथ ॥

गाढं कराभ्यां भगवान्प्रपीड्य तत्प्राणैः समं रोषसमन्वितोऽपिबत् ॥ १० ॥

बर ल्पतिय थावद्दिति ॥ ८ ॥ ननु यशोदारोहिण्यौ तां कथं न

न्यवारयेतां तत्राह ॥ तामिति ॥ वामं वल्गु जनन्या इव चेष्टितं यस्यास्तां ॥ ... एवं सह सैव ... दमध्ये वीक्ष्य ॥ अन्तःस्थितः तैक्ष्ण्यं बहिर्मार्दवं

चेद्दृष्टान्तः कोशपरिच्छदासिवत् ॥ स्तुः खड्गश्च चर्ममयः कोशः परिच्छदः आच्छादनं यस्य असेः खड्गस्य तद्वत् तत्प्रभया च धर्षिते ॥ अभिभूते

अहमस्य जननी इयं वेति मोहिते वसत्यौ ॥ जननी अन्यो निरीक्ष्यमाणे एव ॥ केवलमतिष्ठतां ॥ न तु निवारितवत्यौ ॥ ९ ॥ तस्मिन्स्या

न्दुर्जरं वीर्यं विषं यस्मिन् तं स्तनं ॥ तं श्रीकृष्णमंकमादाय ॥ तस्मै शिशवे ददौ ॥ अथ अनंतरमेव प्रपीड्य केवलं विषमपथ्यं २४

षष्टेसख्युर्गिरानंदोव्रजंगछन्नंतांपथि॥ दृष्ट्वातुराक्षसींतस्मान्नंतुश्रुत्वाचविस्मितः॥१॥२॥ कृष्णवियोगेशंकमानेराजानंप्र ५१
तिअविषयेप्युत्नासेवमरिष्यतीतिसूचयन्नाह॥ नयत्रेति॥ यत्रश्रीकृष्णस्यश्रवणादीनिनसंतितत्रैवतासांशंकाः॥ साक्षात्तस्मि
न्नेवसतिकाशंकेतिभावः॥३॥ योषित्वावेषतोवरांनारीमिवआत्मानंविधायननुनिर्लज्जानिर्विशंकाचसतीकथंपरमत्रनि
प्रविष्टा॥ अतआहकामचारिणीति॥ नहिकामचारिणीच्छिद्रंचिन्नमित्यर्थः॥४॥ तांवनितांपतिंद्रष्टुंआगतांरूपवतींश्रियमिवगो

श्रीशुकउवाच॥ नंदःपथिवचःशौरेर्नमृषेतिविचिंतयन्॥ हरिंजगामशरणमुत्पातागमशं
कितः॥१॥ कंसेनप्रहिताघोरापूतनाबालघातिनी॥ शिशूंश्चचारनिघ्नंतीपुरग्रामव्रजादिषु॥२॥
नयत्रश्रवणादीनिरक्षोघ्नानिस्वकर्मसु॥ कुर्वंतिसात्वतांभर्तुर्यातुधान्यश्चतत्रहि॥३॥ साखेचर्येकदोपे
त्यपूतनानंदगोकुलं॥ योषित्वामाययात्मानंप्राविशत्कामचारिणी॥४॥ तांकेशवंधव्यतिषक्तमल्लि
कांबृहन्नितंबस्तनकृछ्रमध्यमां॥ सुवाससंकंपितकर्णभूषणत्विषोल्लसत्कुंतलमंडिताननां॥५॥

प्योऽमंस्तेत्युत्तरश्लोकेनान्वयः॥ श्रीसाम्यार्थानिविशेषणानि केशवंधव्यतिषक्तमल्लिकांधम्मिल्लसंसक्तमल्लिकाकुसुमां॥ बृह
न्तानितंवेनस्तनाभ्यांचउभयतआक्रांतमिवकृच्छ्रंकृशंमध्यमसुदरंयस्यास्तांसुवाससंरमणीयेवाससीयस्यास्तांकंपि
तयोःकर्णभूषणयोःत्विषाउल्लसद्भिःकुंतलैर्मंडितमाननंयस्यास्तां ॥५॥ ॥श्रीकृष्णायनमोनमः॥ ॥

भा०द०१० अंधकूपाविव गभीरे अक्षिणी यस्मिन् तत् ॥ पुलिनवदारोहौ जघने ताभ्यां भीषणं कद्धासेतवइव भुजौ ऊरू अं-
२५ घ्री च यस्मिन् तत् ॥ शून्यतोयह्रदवदुदरं यस्मिन् तदिति ॥ पूर्वमेव तस्याः शब्देन भीता ॥ पुनर्दर्शनेनातित्र-
:स्व३ स्ता इत्याह ॥ पूर्वं त्विति ॥ तस्या निःस्वनितं शब्दस्तेन निर्भिन्नानि हृत्कर्णमस्तकानि येषां ते ॥१४॥१५॥१६॥ द्वादशांगेषु लला-

अंधकूपगभीराक्षं पुलिनारोहभीषणं ॥ कद्धसेतुभुजोर्वंघ्रि शून्यतोयह्रदोदरं ॥ संतत्रसुः स्म
तद्वीक्ष्य गोपा गोप्यः कलेवरं ॥ पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः ॥१६॥ बालं च तस्या
उरसि क्रीडंतमकुतोभयं ॥ गोप्यस्तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः ॥१७॥ यशोदारोहि-
णीभ्यां ताः समं बालस्य सर्वशः ॥ रक्षां विदधिरे सम्यग्गोपुच्छभ्रमणादिभिः ॥१६॥ गोमूत्रेण
स्नापयित्वा पुनर्गोरजसार्भकं ॥ रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः ॥१७॥ गोप्यः संस्पृष्ट-
सलिला अंगेषु करयोः पृथक् ॥ न्यस्यात्मन्यथ बालस्य बीजन्यासमकुर्वत ॥१८॥

टादिषु केशवादिद्वादशनामभिः ॥१७॥ अनाचांता एव प्रथममतिसंभ्रमेणैव रक्षां कृतवत्यः किंचित्स्वस्थाः पुनः सा-
त्वयैव बीजन्यासमकुर्वतेत्याह ॥ गोप्य इति संस्पृष्टसलिलाः आचांताः ॥ आत्मनि प्रथममंगेषु करयोश्च पृथक् पृथ-
क् ॥ अजाद्येकादशबीजानां मध्ये करस्थैः अंगुष्ठे त्रीणि करयोः संधिषु चत्वारि चत्वारि ॥ तथात्रं घ्राणादावेकैकस्मिन्नंगे

२५

ॐ   भार

चरणौभुजौचमुहुःक्षिपंतीनिःखिन्नानिस्वेदयुक्तानिगात्राणियस्याःसा॥१०॥रसारसांतूलानिच॥११॥व्यादायमुखं
विहृत्य॥निजरूपमास्थिता॥मरणसमयेकपरमयुक्तमतीव॥१२॥पतन्नपितस्याःदेहःषट्क्रोशमध्यवर्त्तिनोद्रुमाश्च
र्णीचकार॥१३॥ईशामात्रेणोग्रदंष्ट्रास्य॥ईशालांगलेदंड॥तत्रमारणाउग्राःदंष्ट्रायस्मिन्तत्तथाभूत॥मास्यंयस्मिन्॥तत्रस्याः

सामुंचमुंचालमितिप्रभाषिणीनिपीड्यमानाःखिलजीवमर्म्मणिविवृत्तनेत्रेचरणौभुजौमुहुः भा१
र्न्निःखिन्नगात्रात्तिपतीहरोदह॥१०॥तस्याःस्वनेनापिगभीररंहसासाद्रिर्महीद्यौश्चचचालस
ग्रहा॥२॥सादिशश्चप्रतिनेदिरेजनाःपेतुःक्षितौवज्रनिपातशंकया॥१४॥निशाचरीत्थंव्यथितस्त ७२
नावसुर्व्यादायकेशांश्चरणौभुजावपि॥प्रसार्य्यगोष्ठेनिजरूपमास्थितावज्राहतोवृत्रइवा
पतन्नृप॥१५॥पतमानोपितदेहस्त्रिगव्यूत्यंतरद्रुमान्॥चूर्णयामासराजेंद्रमहदासीत्तदद्भु
तं॥१६॥ईशामात्रोग्रदंष्ट्रास्यंगिरिकंदरनासिकं॥गंडशैलस्तनंरौद्रंप्रकीर्णारुणमूर्द्धजं॥

कलेवरंवीक्ष्यगोपाःगोप्यश्चसंतत्रसुः॥संत्रासहेतुत्वेनपुनरपिभिःपदैःविशिनष्टि॥गिरिकंदरवत्नासि
कायस्मिन्तत्त॥गिरेश्च्युतोस्थूलोपलस्तौतौविवस्त्तनौयस्मिन्तत्त॥रौद्रंघोरं॥प्रकीर्णाश्चारुणामूर्द्धजायस्मि

भा० द० ए० ॥ २३ ॥ संन्यवेशयच्च शाययामास ॥ २४ ॥ २५ ॥ विस्मयमेवाह ॥ नूनमिति ॥ वत विस्मये सांप्रतं स ऋषिस्तपःप्रभाववान् योगे
२६ श्चो ज्ञानी वा सम्बभूव ॥ यतः स एव दृष्ट इति ॥ २६ ॥ विस्मयांतरमाह ॥ दह्यमानस्येति ॥ कृष्णेन निर्भुक्तः ॥ अत एव सपद्याहतः

स्वप्नदृष्टा महोत्पाता वृद्धवालग्रहाश्च ये ॥ सर्वे नश्यंतु ते विष्णोर्नाम गृह्णतां भीरवः ॥ २३ ॥ श्रीशुक उवाच
इति प्रणयवद्धाभिर्गोपीभिः कृतरक्षणं ॥ पाययित्वा स्तनं माता संन्यवेशयदात्मजं ॥ २४ ॥ तावन्नंदादय
गोपा मथुराया व्रजं गताः ॥ विलोक्य पूतनादेहं वभूवुरतिविस्मिताः ॥ २५ ॥ नंदादय ऊचुः ॥ नूनं वत
र्षिः संजातो योगेशो वा समास सः ॥ स एव दृष्टो ह्युत्पातो यदाहानकदुंदुभिः ॥ २६ ॥ श्रीशुक उवाच ॥
कलेवरं परशुभिश्छित्वा तत्ते व्रजौकसः ॥ दूरे क्षिप्त्वावयवशो न्यदहन् काष्ठधिष्ठितं ॥ २७ ॥ दह्यमा
नस्य देहस्य धूमश्चागुरुसौरभः ॥ उत्थितः कृष्णनिर्भुक्तसपद्याहतपाप्मनः ॥ २८ ॥ पूतना लोकबाल
घ्नी राक्षसी रुधिराशना ॥ जिघांसयापि हरये स्तनं दत्वाप सद्गतिं ॥ किं पुनः श्रद्धया भक्त्या कृष्णा
य परमात्मने ॥ यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ॥ २९ ॥

पापीयस्या ॥ २९ ॥ प्रसंगात्कैमुत्यन्यायेन भक्तिवैभवमा
ह ॥ स्तनेति ॥ श्रद्धयास्तिक्येन भक्त्या प्रेम्णा रक्ताः स्निग्धास्तन्मातर इति ॥ वत्साहरणलीलाभिप्रायेण वक्ष्यति च नंगो

॥ २६ ॥

अंघ्रि अंघ्री॥ जानु जानुनी॥ भुजं भुजौ॥ कं शिरः॥१४॥ तथा दिक्षु रक्षामकुर्वन्नित्याह॥ चक्र्यग्रत इति चक्रसहितो ह-
रिस्तवाग्रतोऽस्तु॥ सहगदो गदासहितो हरिस्तव पश्चादस्तु॥ त्वत्पार्श्वयोर्धनुर्धरो मधुहा असिधरोऽजनश्च॥ शं

अव्यादजोऽंघ्रि मणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः॥ हृत्केशवस्त्वदुर ई-
श इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं॥१४॥ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पा-
र्श्वयोर्धनुरसी मधुहाजनश्च॥ कोणेषु शंख उरुगाय उपर्युपेंद्रस्तार्क्ष्यः क्षितौ हलधरः पुरुषः स-
मंतात्॥१५॥ इंद्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु॥ श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोऽवतु
पृश्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः॥१६॥ क्रीडंतं पातु गोविंदः शयानं पातु माधवः॥ व्रज-
तमव्याद्वैकुंठ आसीनं त्वां श्रियः पतिः॥ भुंजानं यज्ञभुक्पातु सर्वग्रहभयंकरः॥१७॥ डाकि-
न्यो यातुधान्यश्च कुष्मांडा येऽर्भकाग्रहाः॥ भूतप्रेतपिशाचाश्च यक्षरक्षो विनायकाः॥ कोटरा रेवती
ज्येष्ठा पूतना मातृकादयः॥ उन्मादा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः॥ ॥

खधरः उरुगायश्च तु कोणेषु क्षितौ अधस्तात्॥१५॥ एवं बहिरंगां रक्षां कृत्वा अंतरंगामकुर्वन्नित्याह॥ इंद्रियाणीति॥ आत्मा

नमस्कारस ॥२१॥२२॥

भा०द०पू० उत्तानशः शकटं योभित्त्तृणावर्त्तमधःक्षिपत्॥ दर्शयन्विश्वमास्ये च कृष्णः क्रीडति सप्तमे॥ १ ॥ कृष्णार्भकसु-
२१ धासिंधुसंप्लवानंदनिर्भरः॥ भूयस्तदेव संप्रष्टुं राजान्यदभिनंदति॥ २ ॥ येन येनेति॥ येन येन मत्स्याद्यवतारेण यानि यानि
कर्माणि करोति॥ तानि नः कर्णसुखावहानि मनःप्रीतिकराणि भवंत्येव॥ तथापि यत्‌ श्रवणं नः पुरुषमात्रस्य॥ अरतिर्मनो-
ग्लानिः तृष्णा लभ्यता विविधा तस्मात् च अपगच्छति॥ तथा च सत्त्वशुद्धिः हरौ भक्तिः हरिदासेषु सख्यानि च भवंति त-

स्य २ राजोवाच॥ येन येनावतारेण भगवान्हरिरीश्वरः॥ करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो॥
यच्छृण्वतोपै[illegible]रतिर्वितृष्णा सत्त्वं च शुद्ध्यत्यचिरेण पुंसः॥ भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव
हारं वद मन्यसे चेत्॥ १ ॥ अथान्यदपि कृष्णस्य तोकाचरितमद्भुतम्॥ मानुषं लोकमासाद्य तज्जा-
तिमनुरुंधतः॥ २ ॥ श्रीशुक उवाच॥ कदाचिदौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवे-
तयोषितां॥ वादित्रगीतद्विजमंत्रवाचकैश्चकार सूनोरभिषेचनं सती॥ ३ ॥

देवहारं हरेश्चरितं मनोहरं वा वदं अनुग्राह्यं यदि करोषीति॥ १ ॥ अत्यौत्सुक्येन पुनर्विशिनष्टि॥ अथेति॥ तोका-
चरितं॥ अनुरुंधतोऽनुकुर्वतः॥ २ ॥ उत्थाने शिशोरंगपरिवर्त्तने तन्निकरणाय कौतुकप्लवे उत्सवाभिषेके॥ न-
क्षत्रस्मिन्नेव दिने जन्मर्क्षस्यापि योगे॥ अतिमहोत्सवे॥ समवेतयोषितां मिलितपुरस्त्रीणां मध्ये वादित्रादिभिः

२१

३०॥३१॥३२॥३३॥३४॥ एतत्पूतनामोक्षणं एतावत् ॥ आर्भकं अर्भकचरितं ॥ किं तत् ॥ एतन्नामोक्षमिति ॥ ३४ ॥ अत्तुं

पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां लोकवंदितैः ॥ अंगं यस्याः समाक्रम्य भगवानपि तत्स्त
नं ॥ यातुधान्यपि सा स्वर्गमवाप जननीगतिं ॥ कृष्णभुक्तस्तनक्षीराः किमु गावोनुमातरः ॥ ३० ॥
पयांसि यासामपिबत्पुत्रस्नेहस्नुतान्यलं ॥ भगवान्देवकीपुत्रः कैवल्याद्यखिलप्रदः ॥ ता
सामविरतं कृष्णे कुर्वतीनां सुतेक्षणं ॥ न पुनः कल्पते राजन्संसारोऽज्ञानसंभवः ॥ ३१ ॥ कटधू
मस्य सौरभ्यमवघ्राय व्रजौकसः ॥ किमिदं कुत एवेति वदंतो व्रजमाययुः ॥ ३२ ॥ ते तत्र वर्णि
तं गोपैः पूतनागमनादिकं ॥ श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ॥ ३३ ॥ नंदः स्व
पुत्रमादाय प्रेत्यागतमुदारधीः ॥ मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ॥ ३४ ॥ य एतत्पूत
नामोक्षं कृष्णस्याद्भुतमर्भकं ॥ शृणुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिं ॥ ३५ ॥ इतिश्रीम
द्भागवते महापुराणे दशमस्कंधे पूतनामोक्षो नाम षष्ठोध्यायः ॥ ६ ॥
दैत्यकुलानीशः पूतनायाः शिशुछलात् ॥ स्तन्यापोशानतः प्राणैः प्राणान्कृतिमकल्पयत् ॥ १ ॥ इतिश्रीदशमे षष्ठः

नश्च दृधिरे भिद्यास्तं न जग्मुः ॥ उत अपि बालस्य तन्न संभवति ॥ एते च बालाः किं जानंतीति ॥ ९ ॥ खोद्यैः स्तकैः कृत्वा ॥ १० ॥
भगवत्प्रभावान भिज्ञं विप्रचेष्टितं विडंबयन्नाह ॥ एवं वदित्यादिना बलिभिः शाक्तैः ॥ यद्वा ॥ प्रदृष्टैः हृष्टबलिभिः सहि
तं सपरिकरं यथा एवं स्थापितं ॥ विप्राः दध्यादिभिः अर्चयामासुः ॥ कृत्वा ग्रहादि होमं विधाय ॥ १ ॥ अस्य आगुणेषु

न ते अद्दधिरे गोपा बालभाषितमित्युत ॥ अप्रमेयं बलं तस्य बालकस्य न ते विदुः ॥ ९ ॥ रुदंतं सुत
मादाय यशोदा ग्रहशंकिता ॥ कृतस्वस्त्ययनं विप्रैः स्तकैः स्तनमपाययत् ॥ १० ॥ पूर्ववत्स्थापितं गो
पैर्बलिभिः सपरिच्छदं ॥ विप्रा कृत्वार्चयां चक्रुर्दध्यक्षतकुशांबुभिः ॥ ११ ॥ येऽसूयानृतदंभेर्ष्याहिंसा
मानविवर्जिताः ॥ न तेषां सत्यशीलानामाशिषो विफलाः कृताः ॥ इति बालकमादाय सामर्ग्यजुरुपाकृतैः ॥ जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः ॥ वाचयित्वा स्वस्त्ययनं नंदगोपः स
माहितः ॥ कृत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणं ॥ १ ॥ गावः सर्वगुणोपेता वासः स्रग्रुक्म
मालिनीः ॥ आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुंजत ॥

दोषाविष्करणं ॥ ईर्ष्या असंतो तेषामाशिषः ॥ कृतास्तैः प्रयुक्ताः ॥ इत्येवमभिप्रेत्य सामर्ग्यजुर्भिरुपाकृतैः संस्कृतैः प
वित्रा ओषधयो येषु जलेषु तैः ॥ कृत्वा द्विजोत्तमैः ॥ कर्तृभिरभिषिच्य ॥ अभिषेकं कारयित्वा ॥ १२ ॥ गावः गाश्च प्रादात् ॥ अन्वयुंज

अन्नादिभिः सुपूजितैर्विप्रैः कृतमंगलं संजातनिद्रे अक्षिणी यस्य तं ॥ अशीशयत् शायितवती ॥ शकटस्याधस्तात् अरेवे ॥४॥
उदक्षिपत् ऊर्ध्वं चालितवान् ॥५॥ तदधःशयानस्य शिशोरल्पकः अनोसौ प्रवालवन्मृदुस्ताभ्यां अंघ्रिस्तेन हतं शकटं व्यवर्त्तत
विपरीतमपतत् ॥ कथं विध्वस्तानि ॥ नानारसवंति कुप्यभाजनानि ॥ ताम्ररजतातिरिक्तानि ॥ कांस्यादिमयानि यथा

नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतं स्वस्त्ययनं सुपूजितैः ॥ अन्नाद्यवासःस्रगभीष्टधेनुभिः
संजातनिद्राक्षमशीशयच्छनैः ॥४॥ औत्थानिकौत्सुक्यमना मनस्विनी समागतान् पूजयती
व्रजौकसः ॥ नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत् ॥५॥ अधःशयान
स्य शिशोरनोल्पक प्रवालमृद्वंघ्रिहतं व्यवर्त्तत ॥ विध्वस्तनानारसकुप्यभाजनं व्यत्यस्तच
क्राक्षविभिन्नकूबरं ॥६॥ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः ॥
नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्य्यगात् ॥७॥ ऊचुरव्यवसितमतीन् गोपा ॥२॥७॥
न् गोपींश्च बालकाः ॥ रुदतानेन पादेन क्षिप्तमेतन्न संशयः ॥८॥

भवति तथा ॥ चक्रे च अक्षश्च चक्राक्षाः व्यत्यस्ताः चक्राक्षाः यस्मिन् विभिन्नः कूबरो युगंधरो यस्मिन् तत् तथा
यथा भवति तथा व्यवर्त्तत ॥६॥ अद्भुतदर्शनेन आकुला बभूवुः ॥ तदेवाह ॥ कथमिति ॥ विपर्य्यगात् ॥ विपरीतमपत

च

तः २ त. व० २८

भा० द० पू० खरपवनचक्रात् ॥ पांसुवर्षे सति ॥ २६ ॥ उपारतः पांसुवर्षस्य वेगो यस्मिन् तथाभूते पवने सति ॥ तत्र तस्या रुदितमनु
२९ निशम्य गोप्यो रुरुदुः ॥ २७ ॥ वात्याचक्रे वात्यारूपधरः ॥ कृष्णं हरन् शान्तरयः ॥ कथंचिन्नभोगतः परं गन्तुं नाशक्नोदित्यर्थः

इति खरपवनचक्रपांसुवर्षे सुतपदवीमबलाऽविलक्ष्य माता ॥ अतिकरुणमनुस्मरंत्यशोचद्भुवि
पतिता मृतवत्सका यथा गौः ॥ २५ ॥ रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः ॥ रुरु
दुरनुपलभ्य नंदसूनुं पवन उपारतपांसुवर्षवेगे ॥ २६ ॥ तृणावर्तः शांतरयो वात्यारूपधरो हरन् ॥ कृष्णं
नभोगतो गंतुं नाशक्नोद्भूरिभारभृत् ॥ २७ ॥ तमश्मानं मन्यमान आत्मनो गुरुमत्तया ॥ गले गृहीत उत्
स्रष्टुं नाशक्नोदद्भुतार्भकं ॥ २८ ॥ गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः ॥ अव्यक्तरावो न्यपतत्सहबालो
व्यसुर्व्रजे ॥ २९ ॥ तमंतरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालं ॥ पुरं यथा रुद्रशरेण विद्धं स्त्रि
यो रुदंत्यो ददृशुः समेताः ॥ ३० ॥ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि लंबमानं ॥ ३१ ॥

२८ गुरुमत्तयाऽतिगौरवेण तं तथा ॥ अश्मानं ॥ अश्मवंतं ॥ पर्वतप्रायं मन्यमानस्तेनैव आत्मनो गले गृहीतत्वात्
त्यक्तुमिच्छन्नपि नाशक्नोदित्यर्थः ॥ २९ ॥ ३० ॥ ३१ ॥ तस्योरसि लंबमानं कृष्णं आदाय मात्रे परिहृत्य समर्प्य विस्मिता आ २९

र्थः

नास्तयेवंबभूवुरित्यर्थः ॥२३॥ अत्रिस्पृष्टमदुपादेन शकटंव्योम्निलीलया ॥ तृणावर्त्तपदापीडा भुव्यपातयदर्भकः ॥
श्वारोहमुत्संगं ॥२४॥ तृणावर्त्तोत्थमृत्युपरिहारायकृष्णेनैवात्मनउत्संगादुत्तारायकेतेभारमजानती उत्पातशं

विप्रामंत्रविदोयुक्तास्तैर्याः प्रोक्तास्तथाशिषः ॥ तानिष्फलाभविष्यंतिनकदाचिदपिस्फुटं ॥
॥१३॥ कदारोहमारूढंलालयंतीसुतंसती ॥ गरिमाणंशिशोर्वोढुंनसेहेगिरिकूटवत् ॥१४॥
भूमौनिधायतंगोपीविस्मिताभारपीडिता ॥ महापुरुषमादध्यौजगतामासकर्मसु ॥१५॥
दैत्योनाम्नातृणावर्त्तःकंसभृत्यःप्रचोदितः ॥ चक्रवातस्वरूपेणजहारासीनमर्भकं ॥ गोकुलंसर्वमा
वृण्वन्मुष्णंश्चक्षूंषिरेणुभिः ॥ ईरयन्सुमहाघोरशब्देनप्रदिशोदिशः ॥१६॥ मुहूर्तमभवद्गोष्ठंर
जसातमसावृतं ॥ सुतंयशोदानापश्यत्तस्मिन्न्यस्तवतीयतः ॥१७॥ नापश्यत्कश्चनात्मानंपरंचापिवि
मोहितः ॥ तृणावर्त्तविसृष्टाभिःशार्कराभिरुपद्रुतः ॥१८॥
कथ्या महापुरुषमादध्यौ श्रीकृष्णस्योदरवर्त्तिनांज
गतांभारेणपीडिताविस्मिताचसती ॥ यद्वाजगतामध्येकर्मसुत्रासमभ्यगव ॥ नतुजगदुदरंतंवेद इत्यर्थः ॥१५॥ ईरय
न् ॥ निनादयन्नित्यर्थः ॥१६॥ यतः यत्रन्यस्तवती ॥ ततस्तस्मिन्स्थानेनापश्यत् ॥१७॥१८॥ ॥ ऽऽ ॥ ऽऽ ॥

नगान्गिरीन् ॥ तद्दुहितॄर्नदीः ॥ ३५ ॥ ३६ ॥ इति श्रीदशमे सप्तमः ॥ ७ ॥ अष्टमे नामकर्मास्य बालक्रीडाकुतूहले ॥ मृ
द्भक्षणाभियोगे च विश्वरूपं निरूप्यते ॥ १ ॥ विश्वरूपादि बालस्य निशम्याशंकितः पितुः ॥ नामकरणवाक्येन
निजं तत्त्वमसूसुचत् ॥ १ ॥ २ ॥ ३ ॥ स्वल्पश्रेयस्कृपयं धनिनां गृहमागतस्तत्राह ॥ महद्विचलनमिति ॥ महतां

खं रोदसी ज्योतिरनीकमाशाः सूर्येंदुवह्निश्वसनांबुधींश्च ॥ द्वीपान्नगांस्तद्दुहितॄर्वनानि
भूतानि यानि स्थिरजंगमानि ॥ ३५ ॥ सो वीक्ष्य विश्वं सहसा राजन्संजातवेपथुः ॥ संमील्य मृग
शावाक्षी नेत्रे आसीत्सुविस्मिता ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे विश्वरूपदर्श
ने नाम सप्तमोध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ गर्गः पुरोहितो राजन्यदूनां सुमहातपाः ॥ व्रजं जगा
म नंदस्य वसुदेवप्रचोदितः ॥ १ ॥ तं दृष्ट्वा परमप्रीतः प्रत्युत्थाय कृतांजलिः ॥ आनर्चाधोक्षजधिया
प्रणिपातपुरःसरं ॥ २ ॥ सूपविष्टं कृतातिथ्यं गिरा सूनृतया मुनिं ॥ नंदयित्वाब्रवीद्ब्रह्मन्पूर्णस्य कर
वाम किं ॥ ३ ॥ महद्विचलनं नृणां गृहिणां दीनचेतसां ॥ निःश्रेयसाय भगवन्कल्पते नान्यथा क्वचित् ॥ ४ ॥

स्वाश्रमादन्यत्र विचलनं न स्वार्थं ॥ किंतु गृहिणां मंगलाय ॥ ननु तर्हि त एव महद्दर्शनार्थं किमिति नागच्छंति
तत्राह दीनचेतसां कृपणानाम् ॥ तेषामपि गृहे त्यक्तुमशक्नुवतामित्यर्थः ॥ ४ ॥ नान्यथा १ ॥ रा० ॥ ३०

विहायसागगनमार्गेणपुरुषादेननीतं॥तथापिमृत्युमुखात्प्रमुक्तंपुनर्लब्ध्वामोदंप्राप्पुरिति॥२६॥पुरुषादेन
रक्षसामाक्रुः॥दर्शयन्॥अहोवतेति॥निवृत्तिंगमितोमृत्युंप्रापितः॥कोत्रविस्मयोयुज्यतएवैतदितितेषां

तेस्वस्तिमंतंपुरुषादनीतंविहायसामृत्युमुखात्प्रमुक्तं॥गोप्यश्चगोपाःकिलनंदमुख्यालब्ध्वापुनः
प्रापुरतीवमोदं॥२६॥अहोवतात्यद्भुतमेषरक्षसावालोनिवृत्तिंगमितोभ्यगात्पुनः॥हिंस्रःस्वपा
मुचा ३ पेनविहिंसितःखलःसाधुःसमत्वेनभयाद्विमुच्यते॥२७॥किंनस्तपश्चीर्णमधोक्षजार्चनंपूर्ते
ष्टदत्तमुतभूतसौहृदं॥यत्संपरेतःपुनरेववालकोदिष्ट्यास्वबंधून्प्रणयन्नुपस्थितः॥२८॥दृ
ष्ट्वाद्भुतानिबहुशोनंदगोपोबृहद्वने॥वसुदेववचोभूयोमानयामासविस्मितः॥२९॥एक
दार्भकमादायस्वांकमारोप्यभामिनी॥प्रस्नुतंपाययामासस्तनंस्नेहपरिप्लुता॥३०॥पीतप्रा
यस्यजननीसुतस्यरुचिरस्मितं॥मुखंलालयतीराजन्जृंभतोददृशेइदं॥३१॥
वकेचिद्राक्षः॥हिंस्रइति॥२७॥नःअस्माभिःचीर्णंकृतं॥पूर्तंवापीकूपतडागादिनिर्माणं॥इष्टंपंचयज्ञाग्निहो
त्रादि॥दत्तंदानं॥यत्तयस्मात्तपआदिः॥प्रणयन्हर्षयन्॥२८॥२९॥३०॥रणावत्तोगमेहृष्टगोरवाशंकिनीप्रस्तं॥वो

धयन्दर्शयामासजंभमाणेमुखेजगत् पीतप्रा
यःस्तनोयेनतस्य॥३२॥

भा॰ द॰ पू॰
३१

ति १

नस्त्रीभवितुमर्हतीति नित्यं संचिंतयन् सामान्येन क्वचिद्दस्तीति ज्ञात्वा ॥ युवयोश्च सख्यं संचिंतयन् ॥ बहुदे भवे
दिति सं[illegible] भाव्यमत्संस्कारलिंगेन च आगताशंकः ॥ आगता आशंका यस्य सः ॥ अपि यदि हंता हनिष्यति
तर्हि तत्तदानीं महाननयः स्यादिति ॥७॥ द्विजातिसंस्कारं ॥ द्विजातीनामवश्यं कर्तव्यं संस्कारमात्रं केवलं स्व
इति

नित्यं संचिंतयन् श्रुत्वा देवक्या दारिकावचः ॥ अपि हंता गताशंकस्तर्हि तन्नोऽनयो महान् ॥७॥ नं
द उवाच ॥ अलक्षितोऽस्मिन्रहसि मामकैरपि गोव्रजे ॥ कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकं ॥८॥ श्री शु
क उवाच ॥ एवं संप्रार्थितो विप्रः स्वचिकीर्षितमेव तत् ॥ चकार नामकरणं गूढो रहसि बालयोः ॥९॥ ग
र्ग उवाच ॥ अयं हि रोहिणीपुत्रो रमयन्सुहृदो गुणैः ॥ आख्यास्यते राम इति बलाधिक्याद्बलं विदुः ॥१०॥
आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः ॥ शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥११॥ ॥ ११ ॥

स्तिवाचनपूर्वकं कुर्विति ॥८॥ ९ ॥ यदूनामपृथग्भावात् कुतश्चिद्द्वैतैर्विप्रतिपद्यमानानां यदूनामपृथग्भावात् ॥ भावो भ
वनं तस्मात् ॥ अन्योन्यस्नित्यया सर्वैकमत्यकरणादित्यर्थः ॥ सम्यक् कर्षति ॥ एकीकरोतीति संकर्षणमप्युशंति मन्यंते व
दंतीत्यर्थः ॥ गर्भसंकर्षणं तु न प्रकाशयतीति ॥१०॥ अस्य तव पुत्रस्य ॥ अतः कृष्ण इत्येकं नाम भविष्यति ॥११॥ ॥ ११ ॥ ३१

यदूनामपृथग्भावात्संकर्षणमुशंत्युत ॥ १ ॥

त्वयावालयोर्नामकरणादिकरणीयमितिवृत्तंतस्यज्ञानातिशयमाह॥ज्योतिषामयनमिति॥यदतींद्रियं
ज्ञानसाधनंज्योतिषामयनं॥तत्प्रतिपादकंज्योतिःशास्त्रमित्यर्थः॥तत्साक्षाद्भवताप्रणीतं॥येनान्योपिपुमा
न्परावरंपरंकारणंपूर्वजन्मकृतंकर्म॥अवरंकार्य्यमस्मिन्॥जन्मनिभाविफलंतद्वेद॥उक्तंचजातके॥यदुपचि
तमन्यजन्मनिशुभाशुभंतस्यकर्मणःप्राप्तिं व्यंजयतिशास्त्रमेतत्॥तमसिद्रव्याणिदीपइवेति॥श्र॥विवक्षितमाह

ज्योतिषामयनंसाक्षाद्यत्तज्ज्ञानमतींद्रियं॥प्रणीतंभवतायेनपुमान्वेदपरावरं॥५॥त्वंहिब्र
ह्मविदांश्रेष्ठःसंस्कारान्कर्तुमर्हसि॥वालयोरनयोर्नॄणांजन्मनाब्राह्मणोगुरुः॥६॥गर्गउवाच॥
यदूनामहमाचार्य्यःख्यातश्चभुविसर्वतः॥सुतंमयासंस्कृतंतेमन्यतेदेवकीसुतं॥कंसःपाप
मतिःसख्यंतवचानकदुंदुभेः॥देवक्याअष्टमोगर्भोनस्त्रीभवितुमर्हति॥८॥

त्वंहीति देवज्ञोमंत्रविच्चत्वं॥अतोनामकरणादिसंस्कारान्कर्तुमर्हसीत्यर्थः॥ननुएतद्गुरूणांकरणीयमितिचेत्त
त्राह॥नृणामिति॥६॥अत्रतुस्माहिनंनंदंप्रतिगुरुत्वमतस्तत्कार्य्यमित्यभिप्रायेणप्रत्याचक्षाणइवाह॥यदूनामिति॥भव
तुतथापित्वमत्रागतइतिकोविद्यादितिचेदतआह॥ख्यातश्चेति॥ततःकिमतआह देवक्याःसुतमिति॥कंसोम
न्यते॥मन्येत॥कृत्यायेदित्यर्थः॥ननुयदुकुमारइतिकथंविजानातु॥तेवसुदेवस्यसु तस्तत्रापिदेवक्यांजातइति
कुतोजानीयात्तत्राह॥पापमतिरित्यादि॥किंमयाहतयामंदइत्यादिदेवकीकन्यावचःश्रुत्वादेवक्याअष्टमोगर्भो॥

भा० द० ८
३२

अनुकृष्य पुनः पुनराकृष्य सरीसृपंतौ ॥ अतिशयेन चलंतौ ॥ कथं घोषाः कटिपादभूषणानि किंकिण्यः ॥ ते
षां प्रघोषेण रुचिरं यथा भवति तथा ॥ तेषां घोषाणां नादेन हृष्टमनोययोः ॥ तौ ॥ लोकमितस्ततो गच्छंतं जनं अ
नुसृत्य त्रिचतुराणि पदानि अनुगम्य मुग्धवत् ॥ प्रभीतवत् मात्रोरंतिसमीपे उपेयतुः ॥ उपजग्मतुः ॥२०॥ तद
च तन्मातरौ निजसुतौ दोर्भ्यामुपगृह्य प्रमोदं ययतुः ॥ कथंभूते घृणया कृपया स्नुवत्यौ पयः स्रवंत्यौ पयोधरैस्तयो

तावंघ्रियुग्ममनुकृष्य शरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्द्दमेषु ॥ तन्नादहृष्टमनसावनुसृत्य
लोकं मुग्धप्रभीतवदुपेयतुरंतिमात्रोः ॥२०॥ तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरा
गरुचिरावुपगृह्य दोर्भ्यां ॥ दत्वा स्तनं प्रपिबतोः स्म मुखं निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः
प्रमोदं ॥२१॥ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदवलाः प्रगृहीतपुच्छैः ॥ वत्सैरित
स्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः ॥२२॥

पंकेन अंगरागेण च रुचिरौ ॥ कथंभूतं स्तनं सुखं निरीक्ष्य मुग्धं मंदहसितं यस्मिन् ॥ अल्पा दशना च यस्मिन् तं चेतस
२१॥ यर्हि अंगनानां दर्शनीया कुमारलीला ययोः तथाभूतौ जातौ ॥ तदा अंतर्व्रजे व्रजमध्ये तदवला प्र
ज्ञोगनौ तौ प्रेक्षंत्यः ॥ प्रेक्ष्यमाणाः विसृत्य गृहकृत्यादि हसंत्यो जहृषुः ॥ हृष्टा बभूवुः ॥ कथंभूतौ ताभ्यां प्र
गृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणौ ॥२२॥ ३२

प्रागयमितिसामान्योक्त्याऽस्यायंजन्मांतरगतंनामकथयेति॥नंदोमन्यतेस्म॥अतएनंवासुदेवइतिसंप्रचक्षते॥१२॥गुणानुरूपाणिईश्वरःसर्वज्ञइत्यादीनि॥कर्मानुरूपाणिगोवर्द्धनोद्धरणइत्यादीनि॥तानिसर्वाणि॥अहमपिनवेद्मि॥जना अपिनोविदुरिति॥१३॥जातकफलमाह॥एषइति॥आधास्यत्॥आधास्यति॥१४॥अनेनरक्ष

प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः॥वासुदेवइतिश्रीमानभिज्ञाःसंप्रचक्षते॥१२॥बहूनिसंतिनामानिरूपाणिचसुतस्यते॥गुणकर्मानुरूपाणितान्यहंवेदनोजनाः॥१३॥एषवःश्रेयआधास्यद्गोपगोकुलनंदनः॥अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथ॥१४॥पुरानेनव्रजपतेसाधवोदस्युपीडिताः॥अराजकेरक्ष्यमाणाजिग्युर्दस्यून्समेधिताः॥१५॥यएतस्मिन्महाभागाःप्रीतिंकुर्वंतिमानवाः॥नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः॥१६॥तस्मान्नंदात्मजोयंतेनारायणसमोगुणैः॥श्रियाकीर्त्यानुभावेनगोपायस्वसमाहितः॥१७॥श्रीशुकउवाच॥इत्यात्मानंसमादिश्यगर्गेचस्वगृहंगते॥नंदःप्रमुदितोमेनेआत्मानंपूर्णमाशिषां॥१८॥कालेनव्रजताल्पेनगोकुलेरामकेशवौ॥जानुभ्यांसहपाणिभ्यांरिंगमाणौविजह्रतुः॥१९॥

माणाःसमेधिताश्चदस्यून्जिग्युरिति॥१५॥१६॥१७॥इति
चात्मानंप्रतिसमादिश्य॥आत्मानंनंदंकृतार्थंवा॥आशिषां॥आशीर्भिः॥१८॥बालक्रीडाचमत्कारैःकंसोरामेण

संयुतः॥परमानंदमाथतत्व्रजेनंदयशोदयोः॥भूमित्व
मेवदर्शयन्नाह॥कालेनेति॥१९॥

गा:

भा० द० पू०
३३

कल्पितैः स्तेययोगैरित्युक्तं ॥ तत्र प्रपंचयति ॥ हस्ताग्राह्य इति ॥ तुंगशिक्यस्थभांडेषु अंतर्निहिते दध्यादौ वयुनं ज्ञानं यस्य सः छिद्रं रचयति तद्वित् ॥ छिद्ररचनावित् ॥ ध्वांतयुक्ते गृहे स्वांगमेवार्थप्रदीपं रचयति ॥ विशेषतो धृतमणिगणं यर्हि यस्मिन्काले ॥ २८ ॥ रे रे चोर इत्याक्रुष्टः सन् ॥ उशाति जल्पति ॥ त्वमेव चोरः ॥ अहं गृहस्वामी ॥ इत्यादीनि धार्ष्ट्यानि ॥

हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यैश्छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ॥ ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सुव्यग्रचित्ताः ॥ २८ ॥ एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचितकृतिः सुप्रतीको यथास्ते ॥ इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत् ॥ २९ ॥ एकदा क्रीडमानास्ते रामाद्या गोपदारकाः ॥ कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ॥ ३० ॥

प्रागल्भ्यानि ॥ अथवा उशति भोकमनीये ॥ यशोदे ॥ यद्वा उशति वास्तौ स्वर्चिते गृहे मेहनादीनि ॥ पुरीषोत्सर्गादीनि कुरुते ॥ एवं स्तेयोपायैर्विरचिता कृतिः कर्म येन सः ॥ चेत् समीपे सुप्रतीकः साधुरिवास्ते ॥ सभयेन नयनेन यस्मिन् ॥ तच्च तच्छ्रीमुखं मुखं च तदालोकिनीभिर्व्याख्यातार्था ॥ प्रख्यापिता ॥ तत्कर्मजन्मफला उपालब्धुं आद्येच्छन् नैच्छत् ॥ २९ ॥ कदाचिदपराधांतरे उपालभंत ॥ तदा तु महदाश्चर्यमभूदिति कथयन्नाह ॥ एकदेति ॥ ३० ॥ प

३३

स्था २ अतिचपलौ ॥ शृंगादिभ्यो निषेद्धुं गृहेषु चित्तानि कर्माणि च कर्तुं यत्र यदा तज्जनन्यौ न शेकाते ॥ तदा अलं मनसो
ऽनवस्थामापतुरिति गृहसौख्यपराकाष्ठा दर्शिता ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ कृष्णस्य चापलं चौर्यादिलिमहैवाखिलं
सचतः ॥ प्रजल्पंत्यः समागत्य गोप्यो गोप्यैमुदं ददुः ॥ असमये अदोहनकाले ॥ क्रोशसंजातहासः ॥ स्तेयं चौ

शृंगाग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं ॥ गृह्याणि कर्तुम
पि तत्र न तज्जनन्यौ शेकात आपतुरलं मनसोऽनवस्थां ॥ २५ ॥ कालेनाल्पेन राजर्षे रामः कृष्णश्च
गोकुले ॥ अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा ॥ २६ ॥ ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबालकैः ॥
सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं ॥ २७ ॥ कृष्णस्य गोप्यो रुचिरं वीक्ष्य कौमारचापलं ॥ शृण्वंत्याः
किल तन्मातुरिति होचुः समागताः ॥ २८ ॥ वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयं स्वाद्वत्त्य
थ दधिपयः कल्पितैः स्तेययोगैः ॥ मर्कान्भोक्ष्यन्विभजति स चेन्नात्ति भांडं भिनत्ति द्रव्यालाभे सगृहकुपि भे २
तो यात्युपक्रोश्य तोकान् ॥ २९ ॥

र्योर्जितं न तु दत्तं ॥ तत्रापि स्वादु नेतरत् ॥ दधि च पयश्चात्ति ॥ किंच भोक्ष्यन् मर्कान् मर्कटान्प्रति विभज्य ददाति ॥ तेषामपि म
ध्ये तृप्तत्वेन कोपि नात्ति चेत्तर्हि भांडं भिनत्ति ॥ क्वचिद्द्रव्यालाभे सति सर्वान्गृहान्दूषयामीति कुपितो याति ॥ यद्वा सगृहहिल
स्तेभ्यः कुपितः ॥ तोकान् ॥ पर्यंकादिषु सुप्तान्बालानुपक्रोश्य रोदयित्वा याति ॥ २९ ॥ ॥

नामाह किं स्वप्न इति ॥ परितो विलोक्याह ॥ नायं स्वप्नः ॥ तर्हि किं देवस्य हरेर्माया ॥ तथा चेदन्ये किं न पश्यंति ॥ तर्हि किं
वा मदीय एव कश्चिद्बुद्धिमोहः विपर्यासः दर्पणे मुखवत् ॥ एवं तर्हि अयं हठस्यापि कथमंतः प्रतीयते ॥ अंत
र्बहिश्चैकरूपेण च कथं जगत्प्रतीयते ॥ तथा सति बिंबप्रतिबिंबयोरिव परस्परवैपरीत्येन प्रतीतिः स्यादित्याश
येनाशंक्यान्यथा वितर्कयति ॥ अथवा ममामुष्यार्भकस्यापि स्वतो यः कश्चनात्त्यात्मयोगः ॥ स्वीयमैश्वर्यं अ

किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः ॥ अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्प
त्तिक आत्मयोगः ॥ ३७ ॥ अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरंजसा ॥ यदाश्रयं
येन यतः प्रतीयते सुदुर्विभाव्यं प्रणतास्मि तत्पदं ॥ ३८ ॥ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखि
लवित्तपा सती ॥ गोप्यश्च गोपाः सह गोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ॥ ३९ ॥ ॥ ऽऽ ॥

औत्पत्तिकः स्वाभाविकः ॥ ३७ ॥ चरमपक्षमाश्रित्यायमीश्वर इति निश्चित्याह ॥ अथो इति चेतः ॥ चित्तं चित्तादिभिः
न वितर्कगोचरं ॥ जगत् यदाश्रयं यदधिष्ठानं ॥ येन करणाधिष्ठात्रा ॥ यतो बुद्धिवृत्त्यभिव्यक्तात् ॥ न त्विदम
वितर्क्यं भवतु तत्पदं ॥ कीदृक् ॥ अत आह ॥ सुदुर्विभाव्यमिति ॥ इदमचिंत्यमर्थः ॥ ३८ ॥ एवं प्रपंचप्रतीत्या नीतं तत्त्वं पु
नर्जीवसंसृतिहेतुमायाश्रयत्वेनोन्नयेत्याह ॥ अहमिति ॥ यशोदा नाम्ना अहं ॥ असौ मम पतिः ॥ अमुष्य व्रजेश्वर

स्याखिलवित्ताधिष्ठात्री अहं सत्ता जाया एषु कु सोमे
स्तो गोप्यादयश्च मदीया इतीत्थं कुमतिर्यन्मायया
सएव मे शरणमिति ॥ ४० ॥

उपालभ्यतिर्भर्त्स्य भयेन संभ्रांतप्रेक्षणे च पलनिरीक्षणे अक्षिणी यस्य तं ॥ ३१ ॥ हे अदांतात्मन् चपलगात्र रहः
कोते ॥ ३२ ॥ नाहं भक्षितवानिति ॥ नोहवाद्यं किं चिन्मया भक्ष्यते ॥ भक्षुत्वा वादा वेवं सर्वे मत्तीति भावः ॥ समक्षं प्रत्यक्षं ॥ ३३ ॥
व्यादेहि मुखं प्रसारयेति व्यादत्त प्रसारितवान् ॥ ३४ ॥ तत्र तस्मिन्मुखे विश्वं ददृशे ददर्श ॥ तत्प्रपंचयति जगज्जंगमं स्था

सा गृहीत्वा करे पुत्रमुपालभ्य हितैषिणी ॥ यशोदा भयसंभ्रांतप्रेक्षणाक्षमभाषत ॥ ३१ ॥ कस्मान्मृदमदांता
त्मन्भवान्भक्षितवान्रहः ॥ वदंति तावका ह्येते कुमारास्तेग्रजोप्ययं ॥ ३२ ॥ नाहं भक्षितवानंब सर्वे मिथ्याभि
शंसिनः ॥ यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखं ॥ ३३ ॥ यद्येवं तर्हि व्यादेहीत्युक्तः स भगवान्हरिः ॥ व्यादत्ता
व्याहतैश्वर्यः क्रीडामनुजबालकः ॥ ३४ ॥ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दिशः ॥ साद्रिद्वीपाब्धि
भूगोलं सवाय्वग्नींदुतारकं ॥ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च ॥ वैकारिकाणींद्रियाणि मनोमा
त्रा गुणास्त्रयः ॥ ३५ ॥ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदं ॥ सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानम
वाप शंकां ॥ ३६ ॥

स्नु स्थावरं ॥ खं अंतरिक्षलोकं ॥ साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूगोलं भूर्लोकं वायुः प्रवहः ॥
अग्निर्वैद्युतश्च ऽरे दुश्च तारकाश्च तत्सहितं ॥ ज्योतिश्चक्रं स्वर्लोकं ॥ वैकारिकाणि देवाः ॥ मन इति वैकारिकशब्देन गृहीतमपि
देवचैलक्षण्या पुनरुक्तं ॥ इंद्रियाणि च तैजसानि मात्रा तामसाः शब्दादयः ॥ ३५ ॥ एवमेतद्विचित्रं विश्वं ॥ सहैकदेशे वीक्ष्य शंकामा
वापेत्यन्वयः ॥ विचित्रतामाह ॥ जीवश्च गुणक्षोभकः काल प्रणामहेतुः ॥ कर्म च तत्संस्कारः आशयश्च ॥ एतैर्लिंङ्गानां च एचर

शरीरारंभे दोषः किं न ॥ तत्तद्व्रजं च सहात्मानं स्वसहितं कृ
चिदृष्ट्वा स्तनोस्तनौ च त्यविदारितास्ये शंकामवाप ३६ ॥

भा॰ द॰ पृ॰ स एवेह द्रोणो जज्ञे ॥ स च नंद इति ख्यातः सं च धरा यशोदाऽभवत् ॥ ४७ ॥ गोपगोपीनामपि वा तत्स्वभावं दस्त्येव भक्तिः तयोः
३५ पुनर्नितरामिति ॥ ४८ ॥ च स्वलीलया पुत्रभावानुकारिण्या ॥ ४९ ॥ इति श्रीदशमेऽष्टमः ॥ ८ ॥ नवमे पयउत्सिक्ते गत्वा गोपप्रय

अस्त्वित्युक्तः स भगवान् व्रजे द्रोणो महायशा ॥ जज्ञे नंद इति ख्यातो यशोदा सा धराभवत् ॥ ४७ ॥ ततो भ
क्तिर्भगवति पुत्रीभूते जनार्दने ॥ दंपत्योर्नितरामासीद्गोपगोपीषु भारत ॥ ४८ ॥ कृष्णो ब्रह्मण आदे
शं सत्यं कर्तुं व्रजे विभुः ॥ सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ॥ ४९ ॥ इति श्रीमद्भागवते महा
३५ पुराणे दशमस्कंधे बाललीलाचरित्रे विश्वदर्शनेऽष्टमोऽध्यायः ॥ ८ ॥ श्रीशुक उवाच ॥ एकदा
गृहदासीषु यशोदा नंदगेहिनी ॥ कर्मान्तरनियुक्तासु निर्ममंथ स्वयं दधि ॥ १ ॥ यानि यानीह गीता
नि तद्बालचरितानि च ॥ दधिनिर्मंथने काले स्मरंती तान्यगायत ॥ २ ॥ क्षौमं वासः पृथुकटितटे बि
भ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रूः ॥ रज्वाकर्षश्रमभुजचलत्कंकणौ कुंडले च
स्विन्नं वक्त्रं कबरविगलन्मालती निर्ममंथ ॥ ३ ॥
तत्कृतं ॥ विलोक्य भांडभंगादिकं संदाम्नाव बंधतं ॥ तेनन्दराश्रितं विश्वं दृष्ट्वा विस्मितचेतसः ॥ बंधनच्छंगुलं संत्यो
पूर्णतामन्वदर्शयत् ॥ स्वयं दधि निर्ममंथ ॥ १ ॥ तद्बाचा गायतेति च कारान्वयः ॥ २ ॥ सा सुभ्रूः दधि निर्ममंथ ॥ तत्र नद्धं कौ
चीवद्धं रज्वोराकर्षेण श्रमो ययोः तयोर्भुजयोश्चलंतौ कंकणे च ॥ केवराद्विगलंत्यो मालत्यो यस्याः सा ॥ ३ ॥ ३५

वैष्णवीं स्वीयां व्यतनोद्विस्तारितवान् ॥ ४० ॥ प्रवृद्धेन स्नेहेन कलिलं व्याप्तं हृदयं यस्याः सा पुरेवासीत् ॥ ४१ ॥ मा
यावलोद्रेकमाह ॥ त्रय्येति ॥ त्रय्या इंद्रादिरूपेण उपनिषद्भिर्ब्रह्मेति ॥ सांख्यैः पुरुष इति ॥ योगैः परमात्मेति ॥ सात्व
तैः भगवानित्युपगीयमानमाहात्म्यं यस्य तं ॥ ४२ ॥ अतिविस्मयेन पृच्छति ॥ नंद इति ॥ महोदयं महानुदय उ

इत्थं विदिततत्त्वायां गोपिकायां स ईश्वरः ॥ वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ॥ ४० ॥ सद्यो नष्ट
स्मृतिर्गोपी सारोप्यारोहमात्मजं ॥ प्रवृद्धस्नेहकलिलहृदयासीद्यथा पुरा ॥ ४१ ॥ त्रय्या चोपनिषद्भि
श्च सांख्ययोगैश्च सात्वतैः ॥ उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं ॥ ४२ ॥ राजोवाच ॥ नंदः कि
मकरोद्ब्रह्मन् श्रेय एवं महोदयं ॥ यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ॥ ४३ पितरौ नान्वविंदेतां कृ
ष्णोदारार्भकेहितं ॥ गायंत्यद्यापि कवयो यल्लोकशमलापहं ॥ ४४ ॥ श्रीशुक उवाच ॥ द्रोणो वसूनां प्रवरो
धरया सह भार्यया ॥ करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह ॥ ४५ ॥ जातयोर्नौ महादेवे भुवि विश्वेश्व
रे हरौ ॥ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ॥ ४६ ॥

द्भवो यस्य तत् ॥ ४३ ॥ ययोः प्रसन्नोः वृत्तीर्णस्तोपि तरौ वपियन्नानुविंदेतां न प्राप्नुतां ॥ कृष्णस्योदारं महत् अर्भकेहितं बाल
लीलां यच्च कवयो गायंति तत्तयोऽविंदत् स किं श्रेयोऽकरोदिति ॥ ४४ ॥ ब्रह्मण आदेशान् गोपालनादिलक्षणान् ॥ ४५

अन्वंचमाना ॥ एवं कृष्णमनुगच्छंती ॥ बृहत्योः चलंत्योः श्रोण्योः भरेणाक्रांता अतएव मंदा गतिर्यस्याः सा
विस्रंसितात् ॥ केशबंधाच्युतैः प्रसूनैरनुगमनं यस्याः सा ॥ यद्वा ॥ जवेन कंपितात्केशबंधात् पुरः पतितानि ॥ प्रसूनानि ॥ अनुपश्चात् गतिर्यस्याः सा ॥ परामृशत् ॥ धृतवती ॥ १० ॥ अंजन्म षिणी ॥ अंजंती स

अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा ॥ जवेन विस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृशत् ॥ १० ॥ कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्मषिणी स्वपाणिना ॥ उद्वीक्ष्यमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयंत्यवागुरत् ॥ ११ ॥ त्यक्त्वा यष्टिं सुतं भीतं विज्ञायार्भकवत्सला ॥ इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा ॥ १२ ॥ कृ३

वृंतः प्रसरंती ॥ मषीययोस्ते अक्षिणी स्वपाणिना कषंतं ॥ संमर्दयंतं भिषयंती ऊर्ध्वः छांदसः ॥ भीषयंती भयमुत्पादयंती ॥ अवागुरत् ॥ अभर्त्सयत् ॥ ११ ॥ अतद्वीर्यकोविदा ॥ तत्प्रभावानभिज्ञा ॥ १२ ॥ ॥ ३६

धश्चाधिश्रिते चुल्लीमारोपिते ॥ उत्सिच्यमाने श्रातितापेनोद्रिच्यमाने ॥ ५ ॥ हशाद श्मनाशिलापुत्रेण अंतरंगहमध्यंगतः रहएकांते नवनीतमभक्षयत् ॥ ६ ॥ सुस्तनेतत्र दधिमंथनस्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा ॥ ७ ॥ उलूखलांघ्रेः परिवर्त्तितस्य

तोलूखलस्योपरि माश्रयासाद्यमध्यं तीजननी हरिः ॥ गृहीत्वा दधिमंथानं न्यषेधत्प्रीतिमावहन् ॥ ८ ॥ तमंकमारुह्य मपाययत्स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखं ॥ अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधि स्रते ॥ ९ ॥ संजातकोपः स्फुरितारुणाधरं संदश्य दद्भिर्दधिमंडभाजनं ॥ भित्वामृषाश्रुर्दृशदश्मना रहो जघास हैयंगवमंतरंगतः ॥ १० ॥ उत्तार्य्य गोपी सुसृतं पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं ॥ भग्नं विलोक्य स्वसुतस्य कर्म तत् जहास तं चापि न तत्र पश्यती ॥ ११ ॥ उलूखलांघ्रेरुपरि व्यवस्थितं मर्कायकामं ददतं शिचिस्थितं ॥ हैयंगवं चौर्य्यविशंकितेक्षणं निरीक्ष्य पश्चात्सुतमागमच्छनैः ॥ १२ ॥ तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोऽवरुह्यापससार भीतवत् ॥ गोप्यन्वधावन्न यमाप योगिनां क्षमं प्र विष्टं तपसेरितं मनः ॥ १३ ॥

उलूखलस्योपरि शिचि शिक्ये चौर्य्येण विशंकितं चंचलमीक्षणं यस्य तं ॥ १२ ॥ तपसा एकाग्रेण ईरितं तदाकारतां नीतं ॥ अतएव क्षमं योग्यं प्रवेष्टुं योगिनां मनो पि यं न आपत्तं ॥ अथवा अन्वधावत्केवलं न त्वाप यतो योगिनां म

व

१७

भा॰द॰पू॰ न चैवं स्वातंत्र्यभंग इत्याह ॥ एवं संदर्शितेति सेश्वरमिदं विश्वं यस्य स्ववशे यदधीनमित्यर्थः ॥१८॥ भगवत्प्रसादमेवै

३७ पि भक्ता लभंते इदं त्वतिचित्रमिति सरोमांचितमाह ॥ नेममिति ॥ विरिंच्यः पुत्रोपि भवः स्वात्मापि श्रीर्जायापि ॥१९॥

फलितमाह ॥ नायमिति ॥ देहिनां देहाभिमानिनां ॥ तापसादीनां ॥ ज्ञानिनां निरस्ताभिमानानामपीति ॥२०॥ यशोदा

स्वमातुः स्विन्नगात्राया विस्रस्तकवरस्रजः ॥ दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबंधने ॥१७॥ एवं संद
र्शिता ह्यंग हरिणा भक्तवश्यता ॥ स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥१८॥ नेमं विरिंचो न भवो न श्री
र्प्यंगसंश्रया ॥ प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ॥१९॥ नायं सुखापो भगवान् देहिनां गोपि
कासुतः ॥ ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह ॥२०॥ कृष्णस्तु गृहकृत्येषु व्यग्रायां मा
तरि प्रभुः ॥ अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ ॥२१॥

याः कृष्णस्वबंधने प्रतिज्ञा ॥ अयं मया ह्यबंध
नीय एवेति कृष्णस्य स्वबंधनिवृत्तौ प्रतिज्ञा इयं ॥ ब्रह्मांडांतर्गतरज्ज्वापि किं मां बद्धुं शक्नोति ॥ तत्र कृष्ण इति विचा
र्य ॥ अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विज इत्यात्मनः कृतं घ्नंतं दूरीकुर्वन् ॥ ममप्रतिज्ञायास्तु मा भक्तस्ये
ति स्वबंधं स्वीकृतवान् ॥ एवं गोपीप्रतिज्ञा कथं विज्ञाता तत्राह ॥ स्विन्नगात्राया इति प्रारब्धे भक्तैर्वद्धस्यापत्न्य

३७

अंकोविदत्त्वमेवाह ॥ नचांतरिति पंचभिः ॥ वंधनंहिवहिः परिवेष्टनेन दाम्ना अंतसावयवस्यभवति तथा पूर्वापर
विभागवतोवस्तुनः ॥ पूर्वतोदामधृत्वा परिवेष्टनेनभवति ॥ नत्वेवंस्तीत्याह ॥ नचांतरिति ॥ किंच ॥ व्यापकेनव्याप्य
स्यवंधोभवति ॥ तच्चविपरीतमित्याह ॥ पूर्वापरइति ॥ किंच ॥ तद्व्यतिरिक्तस्यचाभावात् ॥ नवंधइत्याह ॥ जगच्चयइति य

नचांतर्नवहिर्यस्यनपूर्वंनापिचापरं ॥ पूर्वापरंवहिश्चांतर्जगतोयोजगच्चयः ॥ तंमत्वात्मजम
व्यक्तंमर्त्यलिंगमधोक्षजं ॥ गोपिकोलूखलेदाम्नाववंधप्राकृतंयथा ॥१३॥ तद्दामवध्यमानस्य
स्वार्भकस्यकृतागसः ॥ द्व्यंगुलोनमभूत्तेनसंदधेन्यच्चगोपिका ॥१४॥ यदासीत्तदपिन्यूनंतेनान्यद
पिसंदधे ॥ तदपिद्व्यंगुलंन्यूनंयद्यदादत्तवंधनं ॥१५॥ एवंस्वगेहदामानियशोदासंदधत्यपि ॥ गो
पीनांसुस्मयंतीनांस्मयंतीविस्मिताभवत् ॥१६॥

ह्यात्तद्वीर्यमेवदर्शयति ॥ नचांतरिति ॥ यस्यश्रीकृष्णस्यनचांतः सामान्यंनचवहिः विशेषः ॥ नचपूर्वंकारणंनापि
चापरंकार्यं स्वयंचजगतः पूर्वापरादिभावेनवर्त्तते ॥ तर्हिजगद्भिन्नेनेत्याह ॥ जगच्चयोभगवान् ॥ तंमर्त्यलिंगमधो
क्षजंआत्मजंमत्वाववंधेति ॥१३॥ द्व्यंगुलोनंद्वाभ्यामंगुलिभ्यामूनंनमपूर्णं ॥१४॥१५॥ स्मितंकुर्वतीनांमध्येस्वयमपिह

संतीविस्मयमाप ॥१६॥

भा० द० पू० अनुग्रहार्थाय॥ अनुग्रहश्च मदनाशः॥ अर्थश्च श्रीकृष्णदर्शनं तदर्थमिदं वक्ष्यमाणं नह्यन्य इत्यादि॥ ८॥ जो
३८ ष्यान् जुषतः सेवमानस्य पुंसः श्रीमदादन्यत्राभिजात्यादिः॥ सत्कुलविद्यादिजनितो मदः॥ अन्यो वा रजोगुणः र
जःकार्यः हास्यहर्षादिरूपो न हि तथा बुद्धिभ्रंशः॥ बुद्धिं भ्रंशयतीति तथा॥ किंतु श्रीमद एवेति तदाह यत्रेत्यादि च
तुर्भिः यत्र श्रीमदे॥ ८॥ इमं नश्वरं देहं॥ अजरामृत्यु॥ अजरश्चायं याभवतीति तथा मन्यमानैः॥ ९॥ नरदेव भूदेवसंज्ञि

तो दृष्ट्वा मदिरामत्तौ श्रीमदान्धौ सुरात्मजौ॥ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ॥ ७॥ नारद उ
वाच॥ न ह्यन्यो जुषतो जोष्यान् बुद्धिभ्रंशो रजोगुणः॥ श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः॥
८॥ हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः॥ मन्यमानैरिमं देहमजरामृत्यु नश्वरं॥ ९॥ देवसंज्ञि
तमप्यन्ते कृमिविड्भस्मसंज्ञितं॥ भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः॥ ९॥ देहः किमन्नदा
तुः स्वं निषेक्तुर्मातुरेव च॥ मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा॥ १०॥

मपि स्वादिभिर्भक्षितं॥ विट्संज्ञितम्॥ दग्धं भस्मसंज्ञितम्॥ अन्यदा कृमिसंज्ञितं॥ तत्कृते तदर्थं यो भूत
कृ ध्रुक् भूतद्रोग्धा॥ यतो भूतद्रोहान्निरयो भवति स किं स्वार्थं वेद इत्यर्थः॥ ९॥ इदानीं देहे अहंभावो न
घटत इत्याह॥ निषेक्तुः पितुः॥ मातुः पितुर्वा॥ मातामहस्य पुत्रिकाकरणे॥ १०॥ ॥ ११ ॥ ॥ ११ ॥ ॥ ११ ३८

२१ तिदशमेनवमः ॥ १ ॥ दशमेपातयद्डिंभोनूनंतरायमलार्जुनौ ॥ तत्रत्याभ्यांचदेवाभ्यांकृतःसंस्तुतइतीर्यते ॥ यद्विग
र्हितंकर्मयेनवादेवर्षेर्भगवतोत्तमस्यापितमःक्रोधस्तदेतत्कथ्यतामिति ॥ १ ॥ २ ॥ गंगायामेतन्मध्ये ॥ कथंभूते

पुरानारदशापेनवृक्षतांप्रापितौमदात् ॥ नलकूवरमणिग्रीवावितिख्यातौश्रियान्वितौ ॥ २२ ॥ इति
श्रीमद्भागवतेमहापुराणेदशमस्कंधेगोपीप्रसादोनामनवमोध्यायः ॥ ९ ॥ राजोवाच ॥ कथ्य
तांभगवन्नेतत्तयोःशापस्यकारणं ॥ यत्तद्विगर्हितंकर्मयेनवादेवर्षेस्तमः ॥ १ ॥ श्रीशुकउवा
च ॥ रुद्रस्यानुचरौभूत्वासुदृप्तौधनदात्मजौ ॥ कैलासोपवनेरम्येमंदाकिन्यांमदोत्कटौ ॥ २ ॥ वारुणींम
दिरांपीत्वामदाघूर्णितलोचनौ ॥ स्त्रीजनैरनुगायद्भिश्चेरतुःपुष्पितेवने ॥ ३ ॥ अंतःप्रविश्यगंगा
यामंभोजवनराजिनि ॥ चिक्रीडतुर्युवतिभिर्गजाविवकरेणुभिः ॥ ४ ॥ यदृच्छयाचदेवर्षिर्भ
गवांस्तत्रकौरव ॥ अपश्यन्नारदोदेवौक्षीवाणौसमबुध्यत ॥ तंदृष्ट्वाव्रीडितादेव्योविव
स्त्राःशापशंकिताः ॥ वासांसिपर्यधुःशीघ्रंविवस्त्रौनैवगुह्यकौ ॥ ५ ॥

अंभोजानांवनानितेषांराजयस्ताविद्यंतेयस्मिन्तस्मिन् ॥ ३ ॥ अपश्यत्दृष्ट्वाच ॥ क्षीवाणौसमबुध्यत ॥ ४ ॥ कु

पुष्पितो ४
कै॰ता॰सा॰५

नेहश्यतत्राह ॥ तंदृष्ट्वेति ॥ ५ ॥

ननु साधूनां धनिक एव प्रियः स्यान्न दरिद्र इत्यत आह ॥ साधूनामिति ॥ धनं स्तंभो गर्वो येषां तैः ॥१७॥ तमोम
दंध अज्ञानं तत्कृतं मदं ॥१८॥ तमः स्तुतौ तमोव्याप्तौ ॥१९॥ प्राप्ति अतः अर्हतः इति ॥ अनुग्रहं करोति स्यात्तानेव मित्या

साधूनां समचित्तानां मुकुंदचरणैषिणां ॥ उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः ॥१७॥ तदहं म
त्तयोर्माध्व्या वारुण्या श्रीमदांधयोः ॥ तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः ॥१८॥ यदिमौ लोक
पालस्य पुत्रौ भूत्वा तमःप्लुतौ ॥ न विवाससमात्मानं विजानीतः सुदुर्मदौ ॥ १९ ततोऽर्हतः स्थावर
तां स्यात्तां नैवं यथा पुनः ॥ स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् ॥ वासुदेवस्य सान्निध्यं ल
ब्ध्वा दिव्यशरच्छतं ॥ वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः ॥२० ॥श्रीशुक उवाच ॥ एवमु
क्त्वा स देवर्षिर्गतो नारायणाश्रमं ॥ नलकूवरमणिग्रीवावासतुर्यमलार्जुनौ ॥२१॥ ऋषेर्भागवतमु
ख्यस्य सत्यं कर्तुं वचो हरिः ॥ जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ ॥२२॥ देवर्षिर्मे प्रियतमो य
१ त्मना दिमौ धनदात्मजौ ॥ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना ॥२३॥
दिनौ मत्प्रसादेन स्मृतिः स्यात् ॥ स्वर्लोकतां देवत्वं
पुनर्लब्ध्वा ॥ तस्मिन्मदनुग्रहाल्लब्धभक्ती भविष्यत इति ॥२०॥२१॥ प्रस्तुतमाह ऋषेरिति ॥२४॥ किमिति सत्यं कर्तुं

तनतानि स्वर्गस्थिति मयततः ततः ॥

अव्यक्तप्रभवाप्ययं॥ अव्यक्तोऽत्प्रभवस्तस्मिन्नेवाप्ययो नाशो यस्य तं॥ आत्मसात्कृत्वा॥ आत्मेति मत्वा असत्तो
मूढा हते॥ ११॥ एवं श्रीमद्धरिविचेष्टितमुक्त्वा तत्प्रतिकारं निश्चिनोति॥ असत इति॥ परं श्रेष्ठं हरिं द्युरेव केवलमिति वा

एवं साधारणं देहमव्यक्तप्रभवाप्ययं॥ को विद्वानात्मसात्कृत्वा हंति जंतून्न ते ऽसतः॥ ११॥ असतः
श्रीमदांधस्य दातरिद्धं परमो ऽज्जनं॥ आत्मौपम्येन भूतानि द्दरिद्रः परमीहते॥ १२॥ यथा कंटकविद्धां
गोऽजंतोनेच्छति तां व्यथां॥ जीवसाम्यं गतो लिंगैर्न तथा विद्धकंटकः॥ १३॥ दरिद्रो निरहंस्तंभो मु
क्तः सर्वमदैरिह॥ कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः॥ १४॥ नित्यं क्षुत्क्षामदेहस्य दरि
द्रस्यान्नकांक्षिणः॥ इंद्रियाण्यनुशुष्यंति हिंसापि विनिवर्तते॥ १५॥ दरिद्रस्यहि युज्यंते साध
वः समदर्शिनः॥ सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति॥ १६॥

कुत इत्यत आह॥ आत्मौपम्येनेति॥ ततो न द्रुह्यतीति भावः॥ १२॥ स दृष्टांतमाह॥ यथेति॥ मुखम्लान्यादिलिं
गैः॥ सर्वेषां जीवानां सुखदुःखे समे इति ज्ञातवानित्यर्थः॥ १३॥ किंच दारिद्र्यं मोक्षमेव साधयतीत्याह
दरिद्र इति त्रिभिश्चत्वारिंशत्तुष्टयेन॥ निरहंस्तंभो॥ निर्गतो ऽहंकाररूपः स्तंभो यस्मात्तस॥ १४॥ १५॥ युज्यंते स्वतएव

नियंतापित्वमेवेत्याहतुः ॥ त्वमेकः इति ॥ देहः असवः प्राणाः ॥ आत्मा अहंकारः ॥ इंद्रियाणि च तेषामीश्वरः ॥ २८ ॥ ननु त्वस्य
कालो निमित्तं ॥ प्रकृतिरुपादानं ॥ प्रकृतेर्जातो महान् विश्वात्मतया परिणमते ॥ पुरुषः कर्त्ता नियंता च किमत्रा
हमतत्राहतुः ॥ त्वमेव काल इत्यादिना सार्द्धेन ॥ यतो भगवानीश्वरः ॥ विष्णुस्त्वमतः कालो नाम तव लीला
प्रकृतिः शक्तिः ॥ पुरुषोंऽशः महान् कार्यम् ॥ अतस्त्वमेव सर्वमित्यर्थः ॥ २९ ॥ नन्वहमेव चेत्सर्वं तर्हि घट

त्वमेकः सर्वभूतानां देहास्वात्मेंद्रियेश्वरः ॥ २८ ॥ त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ॥
त्वं महान्प्रकृतिः सूक्ष्मा रजःसत्वतमोमयी ॥ त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवि
त् ॥ २९ ॥ गृह्यमाणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः ॥ कोन्विहार्हति विज्ञातुं प्राक्सि
द्धं गुणसंवृतः ॥ ३० ॥ तस्मै तुभ्यं भगवते वासुदेवाय वेधसे ॥ आत्मद्योतगुणैश्छन्नमहिम्ने

दिज्ञाने मज्ज्ञानं किं न भवतीति चेत्सर्वेपि ब्रह्मवित्स्यात् ॥ अत आहतुः ॥ गृह्यमाणैः ॥ ब्रह्मणे नमः ॥ ३१ ॥
रिति ॥ दृश्यत्वेन वर्त्तमानैर्बुद्ध्यहंकारेंद्रियादिभिर्दृष्टा त्वं न गृह्यसे इति भावः ॥ ननु तर्हि जीवो ज्ञानातु वे
त्याहतुः ॥ कोन्विहेति ॥ जीवाद्युत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं त्वां को ज्ञानाति ॥ गुणसंवृतः ॥ देहाद्यावृतः
३० ॥ अतो दुर्ज्ञेयत्वात्केवलं प्रणमतः ॥ तस्मै तुभ्यमिति ॥ आत्मनः स्वस्मात् द्योतः प्रकाशो येषां तैर्गुणैश्छन्नोम

यमयोर्यमलयोः सहजातयोः ॥ आत्मनः कृष्णस्य तन्मध्ये प्रवेशमात्रेण ॥ २४ ॥ अन्वं च चतीत्यन्वकु ॥ तत्र हेतुः ॥ दामोदरेणो
ति उत्कलितः ॥ इत्यादितः ॥ अंघ्रिवंधो मूलवंधो ययोस्तौ ॥ परमस्य श्रीकृष्णस्य विक्रमितं विक्रमस्तेनातिवेपः कंपो ययोर्भुत
स्कंधप्रवालविटपाययोस्तौ ॥ २५ ॥ ककुभः प्रतिसर्वतः स्फुरंताविव त्यर्थः ॥ यद्वा ॥ दिशः प्रकाशयंताविति कुजयोः

इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ ॥ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं ॥ २४ ॥ बाले
न निष्कर्षयतान्वगुलूखलं तद्दामोदरेण तरसोत्कलितांघ्रिबंधौ ॥ निष्पेततुः परमविक्रमि
तातिवेपस्कंधप्रवालविटपौ कृतचंडशब्दौ ॥ २५ ॥ तत्र श्रिया परमया ककुभः स्फुरंतौ सिद्धावु
पेत्य कुजयोरिव जातवेदाः ॥ कृष्णं प्रणम्य शिरसाखिललोकनाथं बद्धांजली विरजसाविदमूच
तुः स्म ॥ २६ ॥ कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः ॥ व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः
॥ २७ ॥

रेस्तयोः ॥ रक्तयोः स्थितोऽग्निर्यथा मूर्तिमानुपेति ॥ तथोपेत्य विरजसौ निर्मदौ ॥ २६ ॥ गोपवालं मां युवां देवौ ॥ कि
मिति प्रणमाविति चेत्तत्राहतुः ॥ हे कृष्ण कृष्ण महायोगिन् ॥ अचिंत्यप्रभाव त्वं न बालः ॥ किंतु परः पुरुषः ॥ अतः आ
द्यः कारणभूतः ॥ तत्रापि न निमित्तमात्रं किंतूपादानमपि त्वमेवेत्याशयेन तुष्टुवतुः ॥ व्यक्तमिति स्थूलसूक्ष्मं

सि॰टि॰ २६ ॥ १ ॥

भा०द०पू० युक्तस्यैवैतदित्याह ॥ साधूनां स्वधर्मवर्त्तिनां समचित्तानामात्मविदां सुतरां मत्कृतात्मनां ॥ मय्यर्पितचित्तानां
६१ तेषां कृपातिरेकात् सुतरामित्युक्तं ॥ सवितुर्दर्शनाद्दृगोर्यथा बंधो न भवेत् तद्वत् ॥ ३८ ॥ प्राधान्यादेकस्य संबो
धनं ॥ हे नलकूवर युवां ॥ तत्तस्मात् सादनं सदनं स्वनिकेतनं मत्परमौ संतौ गच्छतं ॥ वां युवयोरपेक्षितो मयि प्रेमोऽजा

साधूनां समचित्तानां सुतरां मत्कृतात्मनां ॥ दर्शनान्नो भवेद्बंधः पुंसोऽक्ष्णोः सवितुर्यथा ॥ ३८ ॥ तद्ग
च्छतं मत्परमौ नलकूवर सादनं ॥ संजातो मयि भावो वामीप्सितः परमोऽभवः ॥ ३९ ॥ श्रीशुक उवा
च ॥ इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः ॥ बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तरां ॥ ४० ॥ इ
ति श्रीमद्भागवते महापुराणे दशमस्कंधे द्रुमपातनो दशमोध्यायः ॥ १० ॥ श्रीशुक उवाच ॥
गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवं ॥ तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः ॥ १ ॥ भूम्यां निप
तितौ तौ ददृशुर्यमलार्जुनौ ॥ बभ्रमुस्तदविज्ञाय लक्ष्यं पतनकारणं ॥ २ ॥

तदेव ॥ परमो भवः ॥ न भवो यस्मिन् सः ॥ ३९ ॥ बद्धोलूखलं यस्मिंस्तं ॥ ४० ॥ इति दशमे दशमः ॥ १० ॥ एकादशे समागत्य वृं
दावनमथार्भकैः ॥ वत्सान् पालयता तेन हतौ वत्सबकासुरौ ॥ निर्घातो वज्रपात इति भयेन शंकिताः ॥ १ ॥ तल्लक्ष्यं प्रत्य
क्षतः पुरतो दृश्यमपि पतनकारणमविज्ञाय बभ्रमुः ॥ २ ॥

अहो अहमीश्वर इति को ज्ञातं तत्राहुः ॥ यस्येति भवायोद्भवाय ॥ विभवाय ॥ विगतो भवो यस्मिंस्तस्मै कैवल्यायेत्यर्थः ॥
३२ ॥ ३३ ॥ नो आवां अनुचरः कुबेरो नारदो वा तस्य किंकरौ भगवतस्तव दर्शनं ॥ ३४ ॥ तत्र गतयोरावयोः एवं स्वभावो मा भूत्
किं तु वाणी गुणानुकथन इत्यादिना नः अस्मदोर्द्वयोर्भवति ॥ द्विवचनस्थाने बहुवचनं ॥ अस्मत्संगिनां सर्वेषामपीति

यस्यावतारा ज्ञायंते शरीरिष्वशरीरिणः ॥ तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ॥ स भवान् सर्वलो-
कस्य भवाय विभवाय च ॥ अवतीर्णोंऽशभागेन सांप्रतं पतिराशिषां ॥ ३२ ॥ नमः परमकल्याण नमः परम-
मंगल ॥ वासुदेवाय शांताय यदूनां पतये नमः ॥ ३३ ॥ अनुजानीहि नौ भूमंस्तवानुचरकिंकरौ ॥ दर्शनं
नौ भगवत ऋषेरासीदनुग्रहात् ॥ ३४ ॥ वाणी गुणानुकथने श्रवणौ कथायां हस्तौ च कर्मसु मन-
स्तव पादयोर्नः ॥ स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनां ॥ ३५ ॥ श्री-
शुक उवाच ॥ इत्थं संकीर्तितस्ताभ्यां भगवान्गोकुलेश्वरः ॥ दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्य-
कौ ॥ ३६ ॥ श्रीभगवानुवाच ॥ ज्ञातं मम पुरैवैतदृषिणा करुणात्मना ॥ यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोऽनुग्रहः
कृतः ॥ ३७ ॥

बहुवचनं ॥ तव निवासभूतं यज्जगत्तस्य प्रणामे तव निवासभूते इति बहुमानेन जगतः प्रणामे शिरोऽस्त्वित्यर्थः ॥
भवत्तनूनां भवतो मूर्तीनां ॥ ३५ ॥ संकीर्तितः संस्तुतः ॥ ३६ ॥ वाग्भिर्नैघ्न्याजुषतो जोष्यानित्यादिभिः ॥ श्रीवि

भ्रंशरूपोऽनुग्रहः कृत इति ॥ ३७ ॥

भा॰ द॰ ११ रंतुं वें दावनें गंतु मंतः कृष्णेन यंत्रिता ॥ स्वतंत्र इव नेदाद्यामंत्रमेतन्ममंत्रयत् ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥
४२
क्रीणीहि भो फलानीति श्रुत्वा सत्वरमच्युतः ॥ फलार्थी धान्यमादाय ययौ सर्वफलप्रदः ॥ १ ॥ फल
विक्रयिणी तस्य च्युतधान्यकरद्वयं ॥ फलैरपूरयद्रत्नैः फलभांडमपूरि च ॥ २ ॥ सरित्तीरग
तं कृष्णं भग्नार्जुनमथाह्वयत् ॥ ३ ॥ नोपेयातां यदाहूतौ क्रीडासंगेन पु त्रकौ ॥ यशोदां प्रेष
यामास रोहिणी पुत्रवत्सलां ॥ ४ ॥ क्रीडंतं सा सुतं बालैरतिवेलं सहाग्रजं ॥ यशोदाऽजोहवीत्कृष्णं
पुत्रस्नेहस्नुतस्तनी ॥ ५ ॥ कृष्ण कृष्णारविंदाक्ष तात एहि स्तनं पिब ॥ अलं विहारैः क्षुत्क्षांतः क्रीड
वान्भोक्तुमर्हति ॥ ६ ॥ हे रामागच्छ ताताशु सानुजः कुलनंदन ॥ प्रातरेव कृताहारः क्री[illegible]श्रांतोऽसि
बालक ॥ ७ ॥ प्रतीक्षते त्वां दाशार्ह भोक्ष्यमाणो व्रजाधिपः ॥ एह्यावयोः प्रियं धेहि स्वगृहान्यात बा
लकाः ॥ ८ ॥ धूलिधूसरितांगस्त्वं पुत्र मज्जनमावह ॥ जन्मर्क्षं तेऽद्य भवति विप्रेभ्यो देहि गाः शुचिः ॥
९ ॥ पश्य पश्य वयस्यांस्ते मातृमृष्टान्स्वलंकृतान् ॥ त्वं च स्नातः कृताहारो विहरस्व स्वलंकृतः ॥ १९ ॥ इ
त्थं यशोदा तमशेषशेखरं मत्वा सुतं स्नेहनिबद्धधीर्नृप ॥ हस्ते गृहीत्वा सहराममच्युतं नीत्वा स्ववाटं कृ
तवत्यथोदयं ॥ ११ ॥ ४२

लत्वं कारणं दर्शयति ॥ उलूखल इति ॥ भ्रमकारणमाह ॥ कस्येदं ग्रहसादेः कर्मणः ॥ कुतो वा कारणात् ॥ अत आश्च-
र्यमिति कातराः भीताः संतो वक्तुमुरित्यर्थः ॥३॥ मध्यगेनेव वृक्षयोर्मध्यगेन ॥ न केवलमेतावत् ॥ वृक्षाभ्यां निर्गतौ दि-
व्यौ पुरुषावप्यचक्ष्महि ॥ दृष्टवंतो वयमित्यर्थः ॥४॥ केवलं ते तां किं का न जगृहुरेव ॥ अन्ये तु संदेहचिन्तावत्तुरिति ॥५॥

उलूखलं विकर्षंतं दाम्ना वद्धं च वालकं ॥ कस्येदं कुत आश्चर्यमुत्पात इति कातराः ॥३॥ वाला ऊचुरनेनेति
तिर्यग्गतमुलूखलं ॥ विकर्षता मध्यगेन पुरुषावप्यचक्ष्महि ॥४॥ न ते तदुक्तं जगृहुर्न घटेतेति तस्य त- तै २
त् ॥ वालस्योत्पाटनं तर्वोः केचित्संदिग्धचेतसः ॥५॥ उलूखलं विकर्षंतं दाम्ना वद्धं स्वमात्मजं ॥ विलोक्य
नंदः प्रहसद्वदनो विमुमोच ह ॥६॥ गोपीभिः स्तोभितोनृत्यद्भगवान्वालवत्क्वचित् ॥ उद्गायति क्वचिन्मु-
ग्धस्तद्वशो दारुयंत्रवत् ॥७॥ विभर्त्ति क्वचिदाज्ञप्तः पीठकोन्मानपादुकं ॥ वाहु-क्षेपं च कुरुते स्वानां ॥२॥
च प्रीतिमावहन् ॥८॥ दर्शयंस्तद्विदां लोके आत्मनो भृत्यवश्यतां ॥ व्रजस्योवाह वै हर्षं भगवान्वालचेष्टितैः ॥९॥

भगवन्मायामोहितस्य नंदस्य चरितमाह ॥ उलूखलमिति ॥६॥ न्नास्यंति मामिति शंकमानः तीवुवाल्यमनुकरो- हरि
ति स्म ॥ तदाह गोपीभिरिति ॥ स्तोभितः करतालादिना प्रोत्साहितः ॥७॥ इदमानयेत्याज्ञप्तः ॥ आनेतुमसमर्थ इ- हरि
व विभर्त्ति केवलं पीठादि ॥ वाहुक्षेपं करचालनं च तद्विदां चकारस्यान्वयः ॥ चात्तदैश्वर्यविदं तियेतेषां ॥ एवं व्रजस्य हरि

भा० द० ए० १८ ॥ एकधियः विप्रतिपत्तिरहिताः ॥ व्रजान् शकटवाहान् रूढाः ॥ शकटारोपिताः परिच्छदा येषां ते ॥ १९ ॥
६३ यत्ताः क्रमप्रयत्नाः ॥ २० ॥ नूत्नैः कुचगतैः ॥ कुंकुमैः कांतिर्यासां ताः ॥ नूत्नेषु कुचगतेषु यत्कुंकुमं तेन कांतिर्या

तत्तत्राद्यैव यास्यामः शकटान्युक्त माचिरं ॥ गोधनान्यग्रतो यांतु भवतां यदि रोचते ॥ १८ ॥ तत्
च्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः ॥ व्रजान्स्वान्स्वान्समायुज्य ययू रूढपरिच्छ
दाः ॥ १९ ॥ वृद्धान्बालान्स्त्रियो राजन्सर्वोपकरणानि च ॥ अनःस्वारोप्य गोपाला यत्ता आ
नू ५ त्तशरासनाः ॥ गोधनानि पुरस्कृत्य शृंगाण्यापूर्य सर्वतः ॥ तूर्यघोषेण महता ययुः सह
पुरोहिताः ॥ २० ॥ गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः ॥ कृष्णलीला जगुः प्रीता निष्ककंठ्यः सुवा
ससः ॥ २१ ॥ तथा यशोदारोहिण्यावेकं शकटमास्थिते ॥ रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणो
त्सुके ॥ २२ ॥ वृंदावनं संप्रविश्य सर्वकालसुखावहं ॥ तत्र चक्रुर्व्रजावासं शकटैरर्द्धचंद्रवत् ॥ २३ ॥
वृंदावनं गोवर्द्धनं यमुनापुलिनानि च ॥ वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ॥ २४ ॥ ॥

सामितिवा ॥ २१ ॥ २२ ॥ व्रजावासम् ॥ गोकुलवसतिस्थानम् ॥ २३ ॥ २४ ॥ रामारामरामरामरामरामरा ॥ ६३

व्रजकार्य्यं गोकुलस्य हितकृत्यं ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ विपदं वीनां पक्षिणां पदं विहारस्थानं विगतप्रतिष्टं वा ॥ २४ ॥ अ

ॐ गोपवृद्धा महोत्पातानतुभूय बृहद्वने ॥ नंदादयः समागत्य व्रजकार्य्यममंत्रयन् ॥ २१ ॥ गोपवृद्धा
महोत्पातानतुभूय बृहद्वने ॥ नंदादयः समागत्य व्रजकार्य्यममंत्रयन् ॥ २१ ॥ तत्रोपनंदना
माह गोपो ज्ञानवयोधिकः ॥ देशकालार्थतत्वज्ञः प्रियकृद्रामकृष्णयोः ॥ २२ ॥ उत्थातव्यमि
तोस्माभिर्गोकुलस्य हितैषिभिः ॥ आयांत्यत्र महोत्पाता बालानां नाशहेतवः ॥ २३ ॥ मुक्तः क
थंचिद्राक्षस्या बालघ्न्या बालको ह्यसौ ॥ हरेरनुग्रहान्नूनमनश्चोपरि नापतत् ॥ २४ ॥ चक्र
वातेन नीतोयं दैत्येन विपदं वियत् ॥ शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः ॥ २५ ॥ यन्नम्रि
येत द्रुमयोरंतरं प्राप्य बालकः ॥ असावन्यतमो वापि तदप्यच्युतरक्षणं ॥ २६ ॥ यावदौत्पा
तिकोरिष्टो व्रजं नाभिभवेदितः ॥ तावद्बालानुपादाय यास्यामोन्यत्र सानुगाः ॥ २७ ॥ वनं
वृंदावनं नाम पशव्यं नवकाननं ॥ गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधं ॥ २८ ॥

न्यतमो वा कश्चिद्रुत्पातः ॥ अच्युतेनैव रक्षणमासीत् ॥ २५ ॥ अरिष्टः अनर्थः ॥ इतः स्थानात् ॥ २६ ॥ पशव्यं

पशुभ्यो हितं ॥ नवानि काननानि अत्र वां तत्र राशिविघ्नं ॥
तेयस्मिन् ॥ २७ ॥

भा० द० पू० ४२ ॥ सर्वेषां लोकानामेकौ मुक्तौ गोपालकौ प्रातराशः प्रातर्भोज्यं अन्नं तत्सहितौ ॥ ४३ ॥ अभ्यासं समीपं ॥ ४४ ॥ ४५ ॥
४४
सकपित्थैर्महाकायः पात्यमानैः पपात ह ॥ तं वीक्ष्य विस्मिता बालाः शशंसुः साधु साध्विति ॥ देवा
श्च परिसंतुष्टा बभूवुः पुष्पवर्षिणः ॥ ४४ ॥ तौ वत्सपालकौ भूत्वा सर्वलोकैकपालकौ ॥ सप्रातराशौ गो
वत्सांश्चारयंतौ विचेरतुः ॥ ४५ ॥ स्वं स्वं वत्सकुलं सर्वे पाययिष्यंत एकदा ॥ गत्वा जलाशयाभ्यासं पाय
यित्वा पपुर्जलं ॥ ४६ ॥ ते तत्र ददृशुर्बाला महासत्वमवस्थितं ॥ तत्रसुर्वज्रनिर्भिन्नं गिरेः शृंगमिवा च्युतं
४७ ॥ स वै बको नाम महानसुरो बकरूपधृक् ॥ आगत्य सहसा कृष्णं तीक्ष्णतुंडोग्रसद्बली ॥ ४८ ॥ कृष्णं
महाबकग्रस्तं दृष्ट्वा रामादयोऽर्भकाः ॥ बभूवुरिंद्रियाणीव विना प्राणं विचेतसः ॥ ४९ ॥ तं तालुमूलं प्रद
हंतमग्निवद्गोपालसूनुं पितरं जगद्गुरोः ॥ चच्छर्द सद्योऽतिरुषाऽक्षतं बकस्तुंडेन हंतुं पुनरभ्यपद्यत
५० ॥ तमापतंतं स निगृह्य तुंडयोर्दोर्भ्यां बकं कंससखं सतां पतिः ॥ पश्यत्सु बालेषु ददार लीलया मुदा
वहो वीरणवद्दिवौकसां ॥ ५१ ॥
४६ रामस्यादिदेयेषां तेन तु रामः ॥ ४७ ॥ ४८ ॥ तुंडयोः चंच्वोः ॥ वीरणवत् ग्रंथितृणविशेषवत् ॥ ५१ ॥ ॥ ऽऽ ॥ ॥ ४४

स्वकालेनतद्योग्यकालेन॥२४॥कौमारलीलांनिरूपयति॥अविदूरइत्यादिना॥२६॥तत्पणैर्गर्विल्वादिभिःकिंकि
णीयुक्तैःपादैःक्षिपतःताडयतः॥वत्सपालाएवचित्राःकंवलादिपिहितावृषरूपमनुकुर्वंतितैःसहस्वयमपित

एवंव्रजौकसांप्रीतिंयच्छंतौबालचेष्टितैः॥कलवाक्यैःस्वकालेनवत्सपालौवभूवतुः॥२५॥अ
विदूरेव्रजभुवःसहगोपालदारकैः॥चारयामासतुर्वत्सान्नानाक्रीडापरिच्छदौ॥२६॥क्वचिद्वाद
यतोवेणुंक्षेपणैःक्षिपतःक्वचित्॥क्वचित्पादैःकिंकिणीभिःक्वचित्कृत्रिमगोवृषैः॥वृषायमा
णौनर्दंतौयुयुधातेपरस्परं॥२७॥अनुकृत्यरुतैर्जंतूंश्चेरतुःप्राकृतौयथा॥२८॥कदाचिद्य
मुनातीरेवत्सांश्चारयतोःस्वकैः॥वयस्यैःकृष्णवलयोर्जिघांसुर्दैत्यमागमत्॥२९॥तंवत्सरूपि
५२ णंवीक्ष्यवत्सयूथगतंहरिः॥दर्शयन्वलदेवायशनैर्मुग्धइवासदत्॥३०॥गृहीत्वापरपादाभ्यांस
हलांगूलमच्युतः॥भ्रामयित्वाकपित्थाग्रेप्राहिणोद्गतजीवितं॥३१॥

येवद्वृषायमाणौनर्दंतौ॥तद्दनुकारिशब्दान्कुर्वंतौयुयुधातेइत्यर्थः॥२७॥रुतैःशब्दैःजंतून्हंससमयूरादी
न्॥२८॥२९॥मुग्धवदवज्ञानन्निव॥आसदत्॥समीपमागमत्॥३०॥अपरपादाभ्यांसहलांगूलेनयथाभवति स्याग्टीका॥६२

भा० द० पू०
६५

ध्ध वत्सयूथगतं हत्वा वत्सदं भासुरं हरिः ॥ मुनियूथगतं चाहन्न ग्रामं दंभिनो वकं ॥ ६७ ॥ इति श्रीदशमे एकादश
॥ ११ ॥ अघ्रदशे तु महासर्पवपुर्धरमघासुरं ॥ वत्सपालगिलत्कुक्षौ गलेहन्निति वर्ण्यते ॥ महावकगलत्क्रीडाकेव

इति नंदादयो गोपाः कृष्णरामकथां मुदा ॥ कुर्वंतो रममाणाश्च नाविंदन्भववेदनां ॥ ६६ ॥ एवं विहा
रैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ॥ ६७ ॥ इति श्रीम
द्भागवते महापुराणे दशमस्कंधे वकवत्सवधमेकादशोध्यायः ॥ ११ ॥ श्रीशुक उवाच ॥ क्
चिद्वनाशाय मनो दधद्व्रजात्प्रातः समुत्थाय वयस्यवत्सपान् ॥ प्रबोधयन्शृंगरवेण चारुणा
विनिर्गतो वत्सपुरःसरो हरिः ॥ १ ॥ तेनैव साकं पृथुकाः सहस्रशः स्निग्धाः सुशिग्वेत्रविषाण
वेणवः ॥ स्वकान्सहस्रोपरिसंख्ययान्वितान्वत्सान्पुरस्कृत्य विनिर्ययुर्मुदा ॥ २ ॥ कृष्णवत्सैरसंख्या
तैर्यूथीकृत्य स्वकान्स्वकान् ॥ चारयंतोऽर्भलीलाभिर्विजह्रुस्तत्र तत्र ह ॥ ३ ॥

लस्यनकौतुकं इति चाघासुरमुखे ससखः प्राविशद्धरिः ॥ कचित्कदाचिद्वनाशाय वन एव प्रथमं भोज
नेकर्तुं ॥ १ ॥ तेनैव शृंगरवेण क्रमेण वा पृथुकाः बालकाः ॥ स्निग्धाः स्नेहयुक्ताः ॥ शिकुशिक्यं रम्याशि

[illegible] ॥ ३ ॥

६५

समीडिरेतुष्टुवुः॥ आनकैः शंखैः॥ अन्यैश्चसंस्तवैश्च सह॥४०॥ स्वस्थानमागतं प्राणमिव॥ कलंचुप्राणीयस्य की-
हात्य॥४१॥ अतिप्रीयेण प्रीत्या॥ आहृत्ताः सादराः॥ प्रेत्यागतमिव॥ लोकांतरादागतमिव॥ तर्षितानि॥ आत्तशानि

तदा वकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिकादिभिः॥ समीडिरे चानकशंखसंस्तवैस्त
द्वीक्ष्य गोपालसुता विसिस्मिरे॥४०॥ मुक्तं वकास्यादुपलभ्य दारका रामादयः प्राणमिवेंद्रियो गणः॥
स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः॥४१॥ श्रुत्वा तद्विस्मिता गोपा गो
प्यश्चातिप्रियादृताः॥ प्रेत्यागतमिवोत्सुक्यादैक्षंत तर्षितेक्षणाः॥४२॥ अहो वतास्य वालस्य वह
वो मृत्यवो भवन्॥ अप्यासीद्विप्रियं तेषां कृतं पूर्वं यतो भयम्॥४३॥ अथाप्यभिभवंत्येनं नैव ते घो
रदर्शनाः॥ जिघांसयैनमासाद्य नश्यंत्यग्नौ पतंगवत्॥४४॥ अहो व्रह्मविदां वाचो नासत्याः
संति कर्हिचित्॥ गर्गो यदाह भगवानन्वभावि तथैव तत्॥४५॥

अमृतं पिबंतीव दृक्षणानि येषां ते॥४
अहो वतेत्यादि श्लोकत्रयस्य इतिनंदादयः इत्यनेनान्वयः॥ अपि एवमपि तेषां मे वानिष्टमासीत्॥ यतस्तेः
एवं भयेषां भयं कृतं॥४३॥ अथ घोरदर्शना अपि नाभिभवंति न धर्षयंति॥४४॥ गर्गो यदाह॥ तस्मान्नंदात्मजो

भा० द० १० तानतिविस्मितः श्लोकः हृदयेनाभिनंदति॥ इत्थमिति॥ सतां विदुषां ब्रह्मसुखं अनुभूतिस्तया स्वप्रकाशपरमसुखेन
९६ त्यर्थः॥ भक्तानां परमदैवतेन॥ आत्मप्रदेनेत्यर्थः॥ मायाश्रितानां तु नरदारकतया प्रतीयमानेन सह विजह्रुः॥ कृ
तानां पुण्यानां पुंजा राशयो येषां ते॥ अक्षवितां तदनुभव एव॥ भक्तानां मतिगौरवं च सेवभजनं॥ एते तु तेन सदस
ख्येन विजह्रुः॥ अहो भाग्यमिति भावः॥११॥ बहुजन्मभिः कृच्छ्रेण धृत आत्मा यैस्तैरपि॥ च॥ सुखक्रीडनविदो ये

इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन॥ मायाश्रितानां नरदारकेण साकं वि
तोर जह्रुः कृतपुण्यपुंजाः॥११॥ यत्पादपांसुर्बहुजन्मकृच्छ्रतो धृतात्मभिर्योगिभिरप्यलभ्यः॥ स
एव यद्दृग्विषयः स्वयं स्थितः किं वर्ण्यते दिष्टमहो व्रजौकसां॥१२॥ अथाघनामाभ्यपत
न्महासुरस्तेषां सुखक्रीडनवीक्षणाक्षमः॥ नित्यं यदंतर्निजजीवितेप्सुभिः पीतामृतै
रप्यमरैः प्रतीक्ष्यते॥१३॥

नत्तमायस्य स॥ कथंभूतः॥ यस्य अंतः अंतरं छिद्रं पीतामृतैरपि तैर्मृत्युभीतैरमरैः प्रतीक्ष्यते॥ कथं म
रिष्यतीति कदावेति॥ यद्वा॥ कथंभूतं सुखक्रीडनं येन तत्॥ अंतर्हृदये अमरैः प्रतीक्ष्यते विचिंत्यते॥ पीतामृतै
रपि पुनर्निजजीवितेप्सुभिः॥ अयं भावः॥ नामृतपानमात्रेण जीवनं सफलं भवति॥ किंतु भगवल्लीलानुस्म ९६

रणेनेति॥ तदेव नित्यमंतश्चिंत्यत इति॥१३॥

काचादिभिः पूर्वं मातृभिर्भूषिता अपि फलादिभिरात्मानमभूषयन्तीत्यर्थः ॥ ५ ॥ मुष्णंतश्चोरयंतः ॥ ६ ॥ यदि दूरगतं कृष्णो भवति तर्हीति ध्मांतः वादयंतः ॥ भृंगैः सह ॥ विच्छायाभिः ॥ कलापिभिर्मयूरैः ॥ कीशबालान् ॥ ९ ॥

फलप्रवालस्तवकसुमनःपिच्छधातुभिः ॥ काचगुंजामणिस्वर्णभूषिता अप्यभूषयन् ॥ ५ ॥ मुष्णंतोऽन्योन्यशिक्यादीन् ज्ञातानाराच्च चिक्षिपुः ॥ तत्रत्याश्च पुनर्दूराद्धसंतश्च पुनर्ददुः ॥ ६ ॥ यदि दूरं गतः कृष्णो वनशोभेक्षणाय तं ॥ अहं पूर्वमहं पूर्वमिति संस्पृश्य रेमिरे ॥ केचिद्वेणून्वादयंतो ध्मांतः शृंगाणि केचन ॥ केचिद्भृंगैः प्रगायंतः कूजंतः कोकिलैः परे ॥ विच्छायाभिः प्रधावंतो गच्छंतः साधुहंसकैः ॥ बकैरुपविशंतश्च नृत्यंतश्च कलापिभिः ॥ विकर्षंतः कीशबालानारोहंतश्च तैर्द्रुमान् ॥ विकुर्वंतश्च तैः साकं प्लवंतश्च पलाशिषु ॥ साकं भेकैर्विलंघंतः सरितः स्रवसंप्लुताः ॥ विहसंतः प्रतिच्छायाः शपंतश्च प्रतिस्वनान् ॥ १० ॥

शाखासु लंबमानानि वानरलांगूलान्याकर्षंतः ॥ लांगूलेन मुंचतः तैः सह द्रुमानारोहंतः ॥ विकुर्वंतः दंतदर्शनभ्रूविजृंभादिभिस्तैः सह विकारान्कुर्वंतः ॥ पलाशिषु वृक्षेषु प्लवंतः ॥ शाखायाः शाखांतरमुद्गच्छंतः ॥ प्रतिच्छायाः प्रतिबिं

भा०द०पू०
६१

वस्तुतोऽजगरमेव व्यात्तं तुंडं दृष्ट्वा वृंदावनस्य श्रीः संपदेवेति भ्रांत्या मत्वा विपरीतं व्यात्ताजगरतुंडसादृश्ये
नोत्प्रेक्षितवंतः ॥१२॥ तत्रैस्तामेव प्रश्नोत्तराभ्यामाहुः ॥ अहो इति सत्वकूटसत्वाभासमिदं न वा । तत्रापि अस्मत्संग्रसन
यव्यात्तं यद्व्यालतुंडं तद्वदाचरतीति वा न वेति ॥१३॥ निश्चितं तथैवेत्याहुः ॥ सत्यमिति ॥ अर्ककरैरारक्तं घनमुत्तरोष्ठवत्
पश्यत ॥ तस्य घनस्य प्रतिच्छाययारुणः रोधः स्थलं अधरोष्ठवत्पश्यतेति सर्वत्रान्वयः ॥ सृक्किभ्यामोष्ठप्रांताभ्यां ।

दृष्ट्वा तं तादृशं सर्वे मत्वा वृंदावनश्रियं ॥ व्यात्ताजगरतुंडेन ह्युत्प्रेक्षंते स्म लीलया ॥१२॥ अहो मित्राणि
गदत सत्वकूटं पुरःस्थितं ॥ अस्मत्संग्रसनव्यात्तव्यालतुंडायते न वा ॥१३॥ सत्यमर्ककरारक्तमुत्तराह
नुवद्घनं ॥ अधराहनुवद्रोधस्तत्प्रतिच्छाययारुणं ॥ प्रतिस्पर्द्धेते सृक्किभ्यां सव्यासव्ये नगोदरे ॥ तुं
गशृंगालयोप्येतास्तद्दंष्ट्राभिश्च पश्यत ॥१४॥ आस्तृतायाममार्गोयं रसनां प्रतिगर्जति ॥ एषामंत
र्गतं ध्वांतमेतदप्यंतराननं ॥१५॥ दावोष्णखरवातोऽयं श्वासवद्भाति पश्यत ॥ तद्दग्धसत्वदुर्गंधोप्यंत
रामिषगंधवत् ॥१६॥

प्रतिस्पर्द्धेते तुल्यतया वर्त्तेते ॥ नगोदरे गिरिदर्यौ ॥ तस्य दंष्ट्राभिः स्पर्द्धमानाः ॥१४॥
आस्तृतायाममार्गोयं ॥ विस्तृतो दैर्घ्यवान्मार्गः ॥ प्रतिगर्जति प्रतिस्पर्द्धते ॥ एषां शृंगाणां मध्यगतमंधकारमेतत् ॥ अंत
राननं आननस्य मध्यं प्रतिगर्जेति ॥१५॥ दावेन उष्णः खरो वातोयं तेन दवाग्निना दग्धानां सत्वानां योदुर्गंधः ॥

[illegible]

६१

कृष्णमुखानर्भकान्दृष्ट्वासुर इति व्यवस्य निश्चित्याजगरं वपुर्धृत्वा तेषां ग्रसनाशया पथि व्यशेते तिरश्चीनः प्रश्नो केनान्वयः ॥ कंसेनानु
शिष्टः प्रहितः ॥ बकीपूतना ॥ कथं व्यवस्यत्तदाह ॥ अयं त्विति सार्द्धेन ॥ ममनयोर्द्वयोः सोदरयोः स्थाने ऽनेनं कृष्णं ससवलं ससैन्यं वत्सतत्पा
लसहितं हनिष्यामि ॥ ननु न घ्नापि कृष्णस्यान्तु अत्र वशिष्ठरन्नेत्याह ॥ एतत् इति ॥ तिलापः कृताः तिलोदकतया कल्पिताः ॥ वर्ष्मसु दे
हेषु ॥ प्रजासवः ॥ प्रजाख्य असवो येषां ते तथा ॥ सयोजनायामं ॥ योजनप्रमाणेन दैर्घ्येण युक्तं चेन्महाद्रिवत्पीवरं च ॥ व्यात्तप्रसा

त१

दृष्ट्वार्भकान्कृष्णमुखानघासुरः कंसानुशिष्टः स बकीबकानुजः ॥ अयं तु मे सोदरनाशकृत्तयोर्द्वयोर्ममैनं
सबलं हनिष्ये ॥ एते यदा मत्सुहृदोस्तिलापः कृतास्तदा नष्टसमा व्रजौकसः ॥ प्राणे गते वर्ष्मसु का नु चिंता प्र
जासवः प्राणभृतो हि ये ते ॥ इति व्यवस्याजगरं बृहद्वपुः स योजनायाममहाद्रिपीवरं ॥ धृत्वाद्भुतं व्यात्तगुहा
ननं तदा पथि व्यशेत ग्रसनाशया खलः ॥ १० ॥ धराधरोष्ठो जलदोत्तरोष्ठो दर्याननांतो गिरिशृंगदंष्ट्रः ॥ ध्वां
तांतरास्यो वितताध्वजिह्वः परुषानिलश्वासदवेक्षणोष्णः ॥ ११ ॥ ध१

रितं गुहावत्तुल्यमाननं यस्मिंस्तत् ॥ १० ॥ अद्भुतमिति यदुक्तं एतद्दर्शयितुं विशिनष्टि ॥ धरायामधरोष्ठो यस्य सः ॥
दर्या विवरं आननस्यांतो ऽस्य ॥ गिरेः शृंगाणीव दंष्ट्रा यस्य सः ॥ ध्वांतवदंतरास्यं यस्य सः ॥ वितता अध्वे
व जिह्वा यस्य सः ॥ परुषानिलवत् श्वासो यस्य सः ॥ दववद्दीप्ते ईक्षणे उष्णे यस्य सः ॥ दाववद्दृष्टिरित्यर्थः ॥ परुषानिलश्वासस्था
जलदे पूर्वोत्तरोष्ठो यस्य सः ३

भा०द०स्कं० कथं विचिंत्य ॥ अस्य जीवनं ॥ अमीषां च विहिंसनमिति द्वयं ॥ वै निश्चितं कथं न स्यादिति ॥ २७ ॥ घनछदा मेघांतरिताः ॥ कौ
९८ णपाः कुणपाशिनो राक्षसाः कौणपो निर्ऋतिस्तदीया इति वा ॥ २८ ॥ चूर्णीकर्तुमिच्छोस्तस्य गले आत्मानं ववृधे तरसा ववृ
धे अवर्द्धत ॥ २९ ॥ निरुद्धो मुखादीनां मार्गो यस्य ततः कंठो यस्यास्ति तस्य ॥ उद्गीर्णे दृष्टे बहिर्विगतलोचनस्य ॥ अंतरंगे देहमध्ये पूर्णः

कृत्यं किमत्रास्य खलस्य जीवनं न वा अमीषां च सतां विहिंसनं ॥ द्वयं कथं स्यादिति संविचिंत्य तज्ज्ञात्वा
पु२ विशत्तुंडमशेषदृग्घरिः ॥ २७ ॥ तदा घनछदा देवा भयाद्धाहेति चुक्रुशुः ॥ जहृषुर्ये च कंसाद्याः कौण
पास्त्वघबांधवाः ॥ २८ ॥ तच्छ्रुत्वा भगवान्कृष्णस्त्वव्ययः सार्भवत्सकं ॥ चूर्णीचिकीर्षोरात्मानं तरसा ववृ
धे गले ॥ २९ ॥ ततोतिकायस्य निरुद्धमार्गिणो ह्युद्गीर्णदृष्टेर्भ्रमतस्त्वितस्ततः ॥ पूर्णोंतरंगे पवनो नि
रुद्धो मूर्द्धन्विनिर्भिद्य विनिर्गतो बहिः ॥ ३० ॥ तेनैव सर्वेषु बहिर्गतेषु प्राणेषु वत्सान्सुहृदः परेतान् ॥ दृ
ष्ट्या स्वयोत्थाप्य तदन्वितः पुनर्वक्त्रान्मुकुंदो भगवान्विनिर्ययौ ॥ ३१ ॥ पीनाहिभोगोत्थितमद्भुतं मह
ज्ज्योतिः स्वधाम्ना ज्वलयद्दिशो दश ॥ प्रतीक्ष्य खेवस्थितमीशनिर्गमं विवेश तस्मिन्मिषतां दिवौकसां ॥ ३२ ॥

पूर्णः ततः ॥ मूर्द्धन् मूर्द्धानं ब्रह्मरंध्रं निर्भिद्य बहिर्गत इति ॥ ३० ॥ प्राणेषु इंद्रियेषु स्वया अमृतवर्षिण्या दृष्ट्यैव ॥ ३१ ॥ अहि
देहे स्थितं शुद्धसत्वमयं ज्योतिः निर्गतं खेऽवस्थितं तस्मिन्नीशे विवेश ॥ ३२ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ९८

एवंसत्यमेवाजगरमन्यथातत्रत्यजतिर्भयाययु ॥ किंग्रसित्ताग्रसिष्यति ॥ अनेनश्रीकृष्णेनहंत्रा ॥ बकारेरुशत्कम
नीयंमुखं ॥ १७ ॥ अमृषावस्तुतःसर्पवपुरसुरएवमृषायते ॥ स्वानांसर्पोसादृश्यगोचरत्वेनप्रतीयतइतितान्निरोद्धुंवार
यितुंयावन्मनोदधेतावत्प्रविष्टाइत्युत्तरेणान्वयः ॥ १८ ॥ प्रविष्टाएवकेवलंनतुतेनगीर्णाः गिलिता ॥ गीर्णाइतिस
अस्मान्किमत्रग्रसित्तानिविष्टान्नयंतथाचेद्बकवद्विनंक्ष्यति ॥ एणदनेनेतिवकार्थ्युशान्मुखंवीक्ष्य
हसंतःकरताडनैर्ययुः ॥ १९ ॥ इत्थंमिथोतथ्यमतज्ज्ञभाषितंश्रुत्वाविचिंत्येत्यमृषामृषायते ॥ रक्षो
विदित्वाखिलभूतहृत्स्थितःस्वानांनिरोद्धुंभगवान्मनोदधे ॥ २० ॥ तावत्प्रविष्टास्त्वसुरोदरांतरंप
रंनगीर्णाःशिशवःसवत्साः ॥ प्रतीक्ष्यमाणेनबकारिवेशनंहतस्वकांतस्मरणेनरक्षसा ॥ १९ ॥
तान्वीक्ष्यकृष्णःसकलाभयप्रदोह्यनन्यनाथान्स्वकरादवच्युतान् ॥ दीनांश्चमृत्योर्जठराग्नि
घासान्घृणार्दितोदिष्टकृत्तेनविस्मितः ॥ २० ॥
पिसएवार्थः ॥ कथंभूतेन ॥ हतयोःस्वकयोरंतःस्मरतितथात्तेन ॥ अतएवबकारेः ॥ श्रीकृष्णस्यप्रवेशंप्रतीक्षमा
णेन ॥ १९ ॥ स्वकरादवच्युतान्विनिःसृतान् विस्मितःसन् ॥ कृत्यंकिमत्रेतितिविचिंत्यतत्रोपायंज्ञात्वास्वयमप्यविशत्

॥ १०४ ॥

भा०द०टी० यस्य श्रीअंगमूर्त्तिस्तस्य प्रतिमा प्रतिकृतिः केवलं मनोमयी सापि बलादंतराहिता सती भागवतीं गतिं ददौ प्रसंगा
४९ द्द्विष्यः॥ स एव साक्षात्स्वयमंतर्गतः॥ किंपुनः नित्यश्चासावात्मसुखानुभूतिश्च तयाभिन्नो व्युदस्तमायः सः॥३२॥

सकृद्यदंग प्रतिमांतराहिता मनोमयी भागवतीं ददौ गतिं॥ स एव नित्यात्मसुखानुभूत्यभिव्युदस्तमायः
परमोंगतः किंपुनः॥३२॥ सूत उवाच॥ इत्थं द्विजा यादवदेवदत्तः श्रुत्वा स्वरातुश्चरितं विचित्रं॥ पप्रच्छ भूयो-
पि तदेव पुण्यं वैयासकिं यन्निगृहीतचेताः॥३३॥ राजोवाच॥ ब्रह्मन्कालांतरकृतं तत्कालीनं कथं भवेत्
यत्कौमारे हरिकृतं जगुः पौगंडकेऽर्भकाः॥३४॥ तद्ब्रूहि मे महायोगिन् परं कौतूहलं गुरो॥ नूनमेतद्धरेरेव
माया भवति नान्यथा॥३५॥ वयं धन्यतमा लोके गुरोपि क्षत्रबंधवः॥ यत्पिबामो मुहुस्त्वत्तः पुण्यं कृष्णक-
थामृतं॥३६॥ सूत उवाच॥ इत्थं स्म पृष्टः स तु बादरायणिस्तत्स्मारितानंतहृताखिलेंद्रियः॥ कृच्छ्रात्पुनर्लब्ध-
बहिर्दृशिः शनैः प्रत्याह तं भागवतोत्तमोत्तम॥३७॥

येन श्रवणेन नितरां गृहीतं वशीकृतं चेतो यस्य सः॥३३॥ कालांतरे कौमारे कृतं पौगंडके कथं ज्ञातं वा इत्यर्थः
३४॥३५॥३६॥ तेन यः स्मारितोऽनंतस्तेन हृतान्यखिलेंद्रियाणि यस्य सः॥ तथाभूतोपि कथंचिल्लब्धा च हि दृष्टिः ४९

स्वकृतः स्वकार्यं कृतं ॥ श्रीकृष्णस्यार्हणं कृतं पूजामकुर्वन् ॥ सुगाः सुष्ठु गायंतीति गंधर्वादयः ॥ २७ ॥ किंच ॥ नैकेषां
यानि अद्भुतस्तोत्रादीनि ॥ नैकोत्सवाः ॥ अनेकोत्सवा ये मंगलस्वनास्तान् स्वधाम्नो ऽतिसमीपे श्रुत्वा ऽजो ब्रह्मा आ
चिरादागतः ॥ ईशस्य श्रीकृष्णस्य महिमानं दृष्ट्वा विस्मयं प्रापेति ॥ २८ ॥ वहुतिथं वहुकालं ॥ आक्रीडगह्वरं क्रीडा

ततोऽतिहृष्टाः स्वकृतो ऽकृतार्हणं पुष्पैः सुरा अप्सरसश्च नर्तनैः ॥ गीतैः सुगा वाद्यधराश्च वाद्यकैः
स्तवैश्च विप्रा जयनिस्वनैर्गणाः ॥ २७ ॥ तदद्भुतस्तोत्रसुवाद्यगीतिकाजयादिनैकोत्सवमंगलस्व
नान् ॥ श्रुत्वा स्वधाम्नो ऽंत्यज आगतो ऽचिराद् दृष्ट्वा महीशस्य जगाम विस्मयं ॥ २८ ॥ राजन्नाजगरं
चर्म शुष्कं वृंदावने ऽद्भुतं ॥ व्रजौकसां वहुतिथं वभूवाक्रीडगह्वरं ॥ २९ ॥ एतत्कौमारजं कर्म ह
रेरात्माहिमोक्षणं ॥ मृत्योः पौगंडके वाला दृष्ट्वोचुर्विस्मिता व्रजे ॥ ३० ॥ नैतद्विचित्रं मनुजार्भमा
यिनः परावराणां परमस्य वेधसः ॥ अघोपि यत्स्पर्शनधौतपातकः प्रापात्मसाम्यं त्वसतां सुदुर्लभं ॥ ३१ ॥

र्थं महाविलं ॥ २९ ॥ अन्यच्चातिविचित्रमित्याह ॥ एतदिति ॥ कौमारं पंचमाब्दांतं पौगंडं दशमावधि ॥ कैशोरमा
पंचदशाद्यौवनं च ततः परं ॥ हरेः कौमारजं पंचमाब्दे कृतं कर्म तदेव दृष्ट्वा पौगंडे षष्ठे ऽब्दे वाला अद्यैतद्वृत्तमित्यू
चुः ॥ किं तत्कर्म मृत्योः सकाशादात्मनामहेश्च मोक्षणं ॥ आत्मनां प्रसिद्धान्मृत्योः ॥ अहेस्तु संसारलक्षणात् ॥ अघासु
रज्योतिषः श्रीकृष्णे प्रवेशमपि तदा दृष्टं कथितवंत इ
त्यर्थः ॥ ३० ॥ नैतद्विचित्रं किंतदपेक्ष्यापि आह ॥ अघोपीति
आत्मसाम्यं स्वसमानरूपतां ॥ ३१ ॥

भा०द०पू०
५०

दिवारूढं वेलानीतैस्तर्षैः ॥ ६ ॥ आरुध्य संरुध्य पुष्पाद्धले हरिततृणदेशे ॥ ७ ॥ तदा ते विरेजुः ॥ कृष्णस्य विष्वक् परितः पुरुरा
जिमंडलैश्चक्रैः पंक्तिमंडलैः सह नैरंतर्येणोपविष्टाः ॥ श्रीकृष्णाभिमुखानि येषां ते फुल्लदृशः ॥ विकसितनयनाः ॥ कमलस्य क
र्णिकायाः परितः पत्राणि यथा ॥ पुष्पैः जले रन्यैश्च पत्रैः कृतानि भाजनानि यैस्ते ॥ ९ ॥ रुचिं स्वादुविशेषं अभ्यवजह्रुः

अत्र भोक्तव्यमस्माभिर्दिवारूढं क्षुधार्दिताः ॥ वत्साः समीपेऽपः पीत्वा चरंतु शनकैस्तृणं ॥ ६ ॥ तथेति
पाययित्वार्भा वत्सानारुध्य शाद्वले ॥ मुक्त्वा शिक्यानि बुभुजुः समं भगवता मुदा ॥ ७ ॥ कृष्णस्य विष्वक्
पुरुराजिमंडलैरभ्याननाः फुल्लदृशो व्रजार्भकाः ॥ सहोपविष्टा विपिने विरेजुश्छदा यथांभोरुहकर्णिकायाः
॥ केचित्पुष्पैर्दलैः केचित्पल्लवैरंकुरैः फलैः ॥ शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ॥ ९ ॥ सर्वे मि
थो दर्शयंतः स्वस्वभोज्यरुचिं पृथक् ॥ हसंतो हासयंतश्चाभ्यवजह्रुः सहेश्वराः ॥ १० ॥ बिभ्रद्वेणुं जठर
पटयोः शृंगवेत्रे च कक्षे वामे पाणौ मसृणकवलं तत्फलान्यंगुलीषु ॥ तिष्ठन्मध्ये स्वपरिसुहृदो हासयन्न
र्मभिः स्वैः स्वर्गे लोके मिषति बुभुजे यज्ञभुग्बालकेलिः ॥ ११ ॥ बुभुजिरे सहेश्वराः श्रीकृष्णसहिताः ॥ १० ॥ यज्ञ
भुगपि तेषु बुभुजे ॥ बालानामिव केलिर्यस्य सः ॥ तदाह उदरवस्त्रयोर्मध्ये वेणुं बिभ्रत् ॥ दधदिति सर्वत्र संबंधः ॥ वाम
इति कक्षपाण्योर्विशेषणं ॥ मसृणं स्निग्धं दध्योदनकवलं तदुचितानि बिल्वादिफलानि अंगुलिसंधिषु करि ५०

इति श्री दशमे द्वादशः ॥१२॥ त्रयोदशे हृतान्वत्सान्वत्सपालांश्च मायया ॥ तदात्तसर्वरूपोऽब्दं ब्रह्मणः पूर्ववच्चरन् ॥ नन्वत्तन
यस्मिन्प्रवृत्त कौरोषि ॥१॥ तथाहि सारभृतां सारग्राहिणामयं निसर्गः स्वभावः ॥ कोऽसौ अच्युतस्य वार्त्ता ॥ प्रतिक्षणं साधु नवं
करोतीति यतस्तु सः ॥ विटानां स्त्रिया कामिन्या वार्त्तेव ॥ कथंभूतानामपि सतां ॥ याश्च अच्युतस्य वार्त्तैव अर्थो येषां तानि वा

इति श्रीमद्भागवते महापुराणे दशमस्कंधे अघासुरमोक्षणं द्वादशोऽध्यायः ॥१२॥ श्रीशुक उवाच ॥ सा
धु पृष्टं महाभाग त्वया भागवतोत्तम ॥ यन्नूतनयसीशस्य शृण्वन्नपि कथां मुहुः ॥१॥ सतामयं सारभृ
तां निसर्गो यदर्थवाणीश्रुतिचेतसामपि ॥ प्रतिक्षणं नव्यवदच्युतस्य यत्स्त्रिया विटानामिव
साधुवार्त्ता ॥२॥ शृणुष्वावहितो राजन्नपि गुह्यं वदामि ते ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्यु
त ॥३॥ तथाघवदनान्मृत्यो रक्षित्वा वत्सपालकान् ॥ सरित्पुलिनमानीय भगवानिदमब्रवीत् ॥
अहोऽतिरम्यं पुलिनं वयस्याः स्वकेलिसंपन्मृदुलाच्छवालुकं ॥ स्फुटत्सरोगंधहृतालिपत्रिकध्वा
निप्रतिध्वानलसद्द्रुमाकुलं ॥५॥

णीश्रुतिचेतांसि येषां तथाभूतानामपि ॥२॥३॥४॥ भोज.
नविधानाय पुलिनं स्तौति ॥ अहो इति ॥ स्वीयानां केलीनां संपदो विद्यंते यस्मिन् तत्तं ॥ मृदुला अच्छा वालुका यस्मिन्
तत् किंच स्फुटद्भिः कमलैः सरः सरोजं वा ... लयेनोपचारतः सरः एव विकसदित्युक्तं ॥ तस्य गंधस्तेन हृता आकृष्टा अलयः

पत्रिणश्च ये तेषां केउदके ध्वनयः तेषां प्रतिध्वानाः ॥ तैर्लसंतो द्रुमास्तैराकुलं व्याप्तम् ॥५॥

उभावपि वत्सान् वत्सपालांश्च विचिकाय अन्वीक्षितवान् ॥१६॥ विधिकृतं ब्रह्मणा कृतं ॥१७॥ उभयायितं वत्सव
त्सपालरूपेण च द्वैत्यर्थः अयं भावः यदि तत्र मीमांसेत हि तन्मातॄणां विषादः स्यात् यदि तु तान्नेत्र नयामि तर्हि
ब्रह्मणो मोहो न स्यादिति तत उभयप्रीतये तथा चक्रे इति ॥१८॥ तद्देववर्धयति यावदिति वत्सपानां वत्सकानां चा

ततो वत्सानदृष्ट्वेत्य पुलिनेऽपि च वत्सपान् । उभावपि वने कृष्णो विचिकाय समंततः ॥१६॥ क्वा
प्यदृष्ट्वांतर्विपिने वत्सपालांश्च विश्ववित् । सर्वं विधिकृतं कृष्णः सहसावजगाम ह ॥१७॥ तत
नः कृष्णो मुदं कर्तुं तन्मातॄणां च कस्य च । उभयायितमात्मानं चक्रे विश्वकृदीश्वरः ॥१८॥ याव
द्वत्सपवत्सकाल्पकवपुर्यावत्कराङ्घ्र्यादिकं यावद्यष्टिविषाणवेणुदलशिग्यावद्विभूषांबरं ।
यावच्छीलगुणाभिधाकृतिवयो यावद्विहारादिकं सर्वं विष्णुमयं गिरोऽङ्गवदजः सर्वस्वरू
पो बभौ ॥१९॥

ल्पकवपुः प्रमाणमनतिक्रम्य एवमुपरि अपि योज्यं ॥ यद्वा याव(व)त्सकादिवपुः तावत्सर्वं स्वरूपो अजः कृष्णो
बभाविति उत्तरत्रापि एवं सर्वं विष्णुमयं जगदिति प्रसिद्धा या गीः तस्यां गवत् । साक्षी रेवार्थस्वरूपेण प्रत्यक्षो

केवसर्वाभिमुखोमध्येतिष्ठन्सन् ॥ स्वस्यपरितःउपविष्टान्सुहृदः ॥ स्वैर्नर्मभिः परिहासवाक्यैः ॥ स्वर्गेस्वर्गवासिभिर्ज
नैश्चाश्चर्येणपश्यत्सुसत्सुलोकेजनमध्येबुभुजे ॥ ११ ॥ १२ ॥ भीभयं भयहेतुभ्योभयं अस्यअपास्य यद्वा अस्य
विश्वस्यभियोऽपिभयंश्रीकृष्णः ॥ आशात भोजनात ॥ अस्मिन्पादेअहराधिक्यमार्षं ॥ १३ ॥ अद्रिषुतद्दरीषु

भारतैवंवत्सपेषुभुंजानेष्वच्युतात्मसु ॥ वत्सास्त्वंतर्वनेदूरंविविशुस्तृणलोभिताः ॥ १२ ॥ तान्
दृष्ट्वाभयसंत्रस्तानूचेकृष्णोऽस्यभीभयं ॥ मित्राण्याशान्माविरमतेहानेष्येवत्सकानहं ॥ १३ ॥ इ
त्युक्त्वाद्रिदरीकुंजगह्वरेष्वात्मवत्सकान ॥ विचिन्वन्भगवान्कृष्णःसपाणिकवलोययौ ॥ १४ ॥
अंभोजन्मजनिस्तदंतरगतोमायार्भकस्येशितुर्द्रष्टुंमंजुमहित्वमन्यदपितद्वत्सानितोवत्स
पान ॥ नीत्वान्यत्रकुरूद्वहांतरदधात्खेवस्थितोयःपुराद्दृष्ट्वाघासुरमोक्षणंप्रभवतःप्राप्तःप
म२ रंविस्मयं ॥ १५ ॥

कुंजेषुलतापिहितोदरविवरेषुगह्वरेषुसंकटस्थानेषुच ॥ १४ ॥ अंभोजन्मनः पद्माज्जनिर्यस्य सब्रह्मात
दंतरेगतः आगतः ॥ नतुछिद्रंप्राप्तोवा ॥ अन्यदपिमहित्वंमहिमानंद्रष्टुंतस्यवत्सानीतः स्थानाद्वत्सपांश्चान्य
त्रनीत्वास्वयंतिरोबभूवप्रभवतःश्रीकृष्णस्य ॥ १५ ॥

भा०द०पू० एतावत्तु वैषम्यं श्रीकृष्णस्यापि दुर्निवारमासीदित्याह ॥ गोगोपीनामिति ॥ गवां गोपीनां चास्मिन् श्रीकृष्णे मातृता उप
५२ लालनादिरूपा पुरोवदेवासीत् ॥ किंतु स्नेहर्द्धिकं विना ॥ स्नेहर्द्धिकं तु इदानीं विशेष इत्यर्थः ॥ आसु गोगोपीषु हरेस्तो
च०३ कता बालभावना पि पूर्ववदेवासीत् ॥ किंतु मायया विना ॥ ममेयं माता अहमस्याः पुत्र इति मोहं विनेत्यर्थः ॥ २५ ॥ स्ने
हर्द्धिकमेव दर्शयति ॥ व्रजौकसामिति ॥ यथा कृष्णे श्रीयशोदानंदने स्वपुत्रेभ्योपि स्नेहाधिक्यं पूर्वमासीत् ॥ इदानीं स्व

गोगोपीनां मातृतास्मिन्सर्वा स्नेहर्द्धिकं विना ॥ पुरोवदास्वपि हरेस्तोकता मायया विना ॥ २५ ॥ व्रजौक
सां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहं ॥ शनैर्निःसीमं ववृधे यथा कृष्णे त्वपूर्ववत् ॥ २६ ॥ इत्थमात्मात्मनात्मानं
वत्सपालमिषेण सः ॥ पालयन्वत्सपो वर्षं चिक्रीडे वनगोष्ठयोः ॥ २७ ॥ एकदा चारयन्वत्सान्सरामो वन
माविशत् ॥ पंचषासु त्रियामासु हायनापूरणीष्वजः ॥ २८ ॥ ततो विदूराच्चरतो गावो वत्सानुपव्रजं ॥ गोवर्द्ध
नाद्रिशिरसि चरंत्यो ददृशुस्तृणं ॥ २९ ॥

लोके घटितं तथैवावर्द्धतेत्यर्थः ॥ आ अब्दं यावत् वत्सरं ॥ निःसीमं यथा भवति तथा ॥ २६ ॥ एवमात्मा श्रीकृष्णः वत्सपो भूत्वा तत्रापि
वत्सानां पालानां च मिषेण आत्मना आत्मानं पालयन् क्रीडितवानित्यर्थः ॥ २७ ॥ एतावत्पर्यंतं रामस्यापि मोह एवासीत्
संवत्सरे तु कथंचित् ज्ञातवानिति दर्शयन्नाह ॥ एकदेति ॥ पंचषासु पंचसु वा षट्सु वा रात्रिषु हायनस्यापूरणीषु पूरकतया
अवशिष्टास्वित्यर्थः ॥ २८ ॥ ततो दूरत एव गोवर्द्धनशिखरे चरंत्यो गावो व्रजसमीपे चरतो वत्सान्ददृशुः ॥ २९ ॥ ॥

एवं सर्वात्मा सन् व्रजं प्राविशत् ॥ कथं स्वयमात्मैव प्रयोजकः ॥ आत्मस्वरूपान्गोवत्सानिति कर्मापि स्वय
मेवेत्युक्तं ॥ आत्मरूपैः वत्सपैः प्रतिवार्येति प्रयोज्यकर्तापि स्वयमेव आत्मविहारैः क्रीडन्निति क्रियापि कारका
ण्यपि स्वयमेवेत्यर्थः ॥ २० ॥ तत्तदात्मा तत्तद्बालकरूपोऽभवत् ॥ ततस्तत्तत्सद्म प्रविष्टः ॥ २१ ॥ गोपिकामोहनमाह ।

स्वयमात्मात्मगोवत्सान्प्रतिवार्य्यात्मवत्सपैः ॥ क्रीडन्नात्मविहारैश्च सर्वात्मा प्राविशद्व्रजं ॥ २० ॥ त
त्तद्वत्सान्पृथङ्नीत्वा तत्तद्गोष्ठे निवेश्य सः ॥ तत्तदात्माभवद्राजंस्तत्तत्सद्म प्रविष्टवान् ॥ २१ ॥ त
न्मातरो वेणुरवत्वरोत्थिता उत्थाप्य दोर्भिः परिरभ्य निर्भरं ॥ स्नेहस्नुतस्तन्यपयःसुधासवं मत्वा प
रं ब्रह्म सुतानपाययन् ॥ २२ ॥ ततो नृपोन्मर्द्दनमज्जलेपनालंकाररक्षातिलकाशनादिभिः ॥ संला
लितः स्वाचरितैः प्रहर्षयन्सायं गतो यामयमेन माधवः ॥ २३ ॥ गावस्ततो गोष्ठमुपेत्य सत्वरं हुंका
रघोषैः परिहूतसंगतान् ॥ स्वकान्स्वकान्वत्सतरानपाययन्मुहुर्लिहंत्यः स्रवदौधसं पयः ॥ २४ ॥

तन्मातर इति ॥ तन्मातरो वेणुरवे एव त्वरया उत्थिताः सत्यः सुतान्मत्वा परब्रह्मैव दोर्भिरुत्थाप्य उद्धृत्य पयःसुधास
वं पयएव सुधा वृत्तस्वादु आसवं मादकं पाययामासुरित्यर्थः ॥ २२ ॥ एवं यामयमेन तत्तत्कालक्रीडानियमेन सायंग
तः प्राप्तः स्वाचरितैः शोभनैराचरितैर्वा मातॄः प्रहर्षयन् तत्ताभिरुपलालितमिति ॥ २३ ॥ गवां मोहनमाह ॥ गावइति प

॥ ४८ ॥

भा० द० पू० कृष्णात्तत्तोपगताः॥निवृत्ताः॥तेषांसुत्तानामनुस्मृत्याउत्कंठंति॥अश्रूणियेषांते॥३४॥प्रेमर्द्धेरौत्कंठ्यमतिशयंमुक्त
५३ स्तनेष्वपत्येष्ववीक्ष्यहेतुमजानन्नचिंतयत्॥३४॥चिंतामेवाह॥किमेतदितिद्वाभ्यां॥वासुदेवेयथापुराप्रेमतथा
स्वतोकेष्वपिव्रजस्यप्रेमवर्द्धते किमेतदद्भुतमिति॥किंचसात्मनः॥मत्सहितस्य॥ममतेषुप्रेमकारणंकिमिति॥
भावः॥३६॥केयंमायादेवानांवानराणांवाकुतोवा॥कस्मात्प्रयुक्ता॥नेत्रोन्यमायानसंभवतियत्तोममामोहंवत्ते॥

ततःप्रवयसोगोपास्तोकाम्भेषसुनिर्वृताः॥कृच्छ्राच्छ्रेनैहपगतास्तदनुस्मृत्युदश्रवः॥३४॥व्रज
स्यरामःप्रेमर्द्धेर्वीक्ष्यौत्कंठ्यमनुक्षणं॥मुक्तस्तनेष्वपत्येष्वहेतुविदचिंतयत्॥३५॥किमेतद
द्भुतमिववासुदेवेऽखिलात्मनि॥व्रजस्यसात्मनस्तोकेष्वपूर्वंप्रेमवर्द्धते॥३६॥केयंवाकुतआ
यातादेवीवानार्युतासुरी॥प्रायोमायास्तुमेभर्तुर्नान्यामेपिविमोहिनी॥३७॥इतिसंचिंत्यदा
शार्होवत्सान्सवयसानपि॥सर्वानाचष्टवैकुंठंचक्षुषावयुनेनसः॥३८॥

अतःप्रायशोमत्स्वामिनःश्रीकृष्णस्यैवमायेयमस्त्वितिसंभावयति॥३७॥सवयसान्॥सखीन
पि॥वयुनेनज्ञानमयेनचक्षुषा॥वैकुंठंश्रीकृष्णमेवापश्यत्॥३८॥रामरामरामरामरामरामरामराम ५३

त्य२

तद्दैवस गोव्रजः ॥ गावो कृत्वा पस्तस्नेहवशः ॥ तेषां वत्सानां स्नेहेनाकृष्टः ॥ अत एव न स्मरत आत्मा येन सः जवेन उपव्रज्य म
गात् कथंभूतः ॥ अत्यात्मपदुर्गमार्गः ॥ अतिक्रान्ता ॥ आत्मपान् गोपान् यः ॥ तथा दुर्गो दुर्गमो मार्गो यस्य स चासौ स च
तथा पुच्छाभ्यां पद्भ्यां धावन् ॥ द्विपादिव प्रतीयमानः ॥ ककुदि आकुंचिता ग्रीवा यस्य सः ॥ उदास्यपुच्छः उन्नमितानि आ
स्यानि पुच्छानि च येन सः ॥ आस्तुपयाः ॥ सर्वत्तः अवती पयांसि यस्य सः ॥ आस्तुपया इति पाठे स स्वार्थे ॥ ३० ॥ गोव्रज इ

हप्तः अथ तत्स्नेहवशोऽस्मृतात्मा स गोव्रजोऽत्यात्मपदुर्गमार्गः ॥ द्विपात्ककुद्ग्रीव उदास्यपुच्छोऽगाद्धुं
कृतैरास्नुपया जवेन ॥ ३० ॥ समेत्य गावोऽधो वत्सान् वत्सवत्योऽप्यपाययन् ॥ गिलन्त्य इव चाङ्गानि लिहन्त्यः
सौधसं पयः ॥ ३१ ॥ गोपास्तद्रोधनायासमौघ्यलज्जोरुमन्युना ॥ दुर्गाध्वकृच्छ्रतोऽभ्येत्य गोवत्सैर्ददृ
शुः सुतान् ॥ ३२ ॥ तदीक्षणोत्प्रेमरसाप्लुताशया जातानुरागा गतमन्यवोऽर्भकान् ॥ उदूह्य दोर्भिः परिरभ्य मूर्
ध्नि घ्राणैरवापुः परमां मुदं ते ॥ ३३ ॥ र२

दं४ स्यनेन वृषभादयोऽप्यगुरित्युक्तं ॥ तत्र विशेषतो धेनूनां चेष्टितमाह ॥ समेत्येति ॥ गोवर्द्धनस्याधः ॥ वत्सवत्यः पुनः प्रसूता
अपि ॥ ३१ ॥ रामेणादृष्टवत्सेषु गवां स्नेहातिशयमुक्त्वा ॥ गोपालानामपि दर्शयितुमाह ॥ गोपा इति ॥ तासां गवां रोधने यत्र आ
यासस्तस्य मौघ्येन मोघत्वेन लज्जया सहोरुमन्युना दुर्गमार्गे जनितक्लेशेन चाभ्येत्य गोवत्सैः सह सुतान् ददृशुः ॥ ३२ ॥ त
त अत एव पामीक्षणेनोद्गतो यः प्रेमरसस्तस्मिन्नाप्लुताः निमग्नाः ॥ आशयाः येषां ते लज्जा मन्युकृच्छ्रास्तान् विता इयितुमा

गताः संतः गतमन्यवः प्रत्युत्तोऽज्ञातोऽनुरागो येषां ते
न्तः घ्राणैः ॥ अवघ्राणैः परमां मुदमापुः ॥ ३३ ॥

४४

भा०द०पू ननु मायाश्रयस्य तस्य कुतो मोह इत्यत आह॥ तम्यामिति महामायाविनि भगवति आवरणविक्षेपकत्वाभावेऽपि ईश

५४ तद्वय माह॥ तम्यां तमिस्रायां रात्र्यां नैहारं हिमकणप्रभवं तमः खद्योतदीप्तार्चीः उपसर्ज्जनस्यापि तमसो नैहारमिति वि

शेषणं छेदः॥ तत्र मायया पृथगावरणं न करोति किंतु तत्रैव लीयते॥ यथा चार्चिः खद्योतार्चिः अहनि पृथक्प्रकाशनं

करोति॥ एवं महति पुरुषे युंजतः पुंसः॥ इतराणी चामाया तत्र न किंचित् करोति किंत्वात्मनि स्वस्मिन्नेव॥ ऐश्यं सामर्थ्यं

एवं संमोहयन्विष्णुं विमोहं विश्वमोहनं॥ स्वयैव मायया जोपि स्वयमेव विमोहितः॥ ४४॥ तम्यां तमो

वन्नैहारं खद्योतार्चिरिवाहनि॥ महतीतरमायैश्यं निहंत्यात्मनि युंजतः॥ ४५॥ तावत्सर्वे वत्सपालाः

पश्यतोजस्य तत्क्षणात्॥ व्यदृश्यंत घनश्यामाः पीतकौशेयवाससः॥ ४६॥ चतुर्भुजाः शंखचक्रगदा

राजिवपाणयः॥ किरीटिनः कुंडलिनो हारिणो वनमालिनः॥ ४७॥ श्रीवत्सांगददोरत्नकंबुकंकणपाणयः

नूपुरैः कटकैर्भाताः कटिसूत्रांगुलीयकैः॥ ४८॥ आंघ्रिमस्तकमापूर्णास्तुलसीनवदामभिः॥ कोमलैः

सर्वगात्रेषु भूरिपुण्यवदर्पितैः॥ ४९॥

हंतीति॥ ४५॥ अन्यदप्याश्चर्यमाह तावदिति॥ वत्सपालाः॥ वत्साः पालाश्च सर्वे युष्टि विषाणादयश्च॥ ४६॥ ४७॥

श्रीवत्सप्रभावायुक्तानि अंगदानि दोःषु येषां॥ रत्नमयानि कंबुवत्त्रिधाराणि कंकणानि पाणिषु येषां ते च ते च

४८॥ तथाभूरि वकुजन्मानि तैः पुण्यवद्भिः अर्पितैः॥ ४९॥ ५४

एवं श्रीकृष्णरूपान्सामान्यतो ज्ञात्वा श्रीकृष्णं दृष्ट्वा श्रीकृष्णोपदेशेन विशेषतो ज्ञातवानित्याह ॥ नैते इति ॥ अय
मर्थः ॥ पाल्यमाना वत्सा ऋषयो गणमेशाः ॥ पालाश्च देवानामीशा इति तावदहं वेद्मि ॥ इदानीं तु न तथा ॥ किं त्वस्मिन्भि
दाश्रये त्वमेव भासि ॥ अतस्त्वं सर्वं पृथग्विविच्य कथं वृत्तमिति वदेत्युक्तेन प्रभुणा वत्सान्निगमात्स्वे पतत्स्व वोत्तं

नैते सुरेशा ऋषयो न चैते त्वमेव भासीश भिदाश्रयेपि ॥ सर्वं पृथक्त्वं निगमात्कथं वदेत्युक्तेन
वृत्तं प्रभुणा बलोऽवैत् ॥ ३९ ॥ तावदेत्यात्मभूरात्ममानेन त्रुट्यनेहसा ॥ पुरोवदाब्दं क्रीडन्तं द
दृशे सकलं हरिं ॥ ४० ॥ यावन्तो गोकुले बालाः सवत्साः सर्व एव हि ॥ मायाशये शयाना मे नाद्यापि
पुनरुत्थिताः ॥ ४१ ॥ इत एतेऽत्र कुत्रत्या मन्मायामोहितेतरे ॥ तावन्त एव तत्राब्दं क्रीडन्तो विष्णु
ना समं ॥ ४२ ॥ एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूः ॥ सत्याः के कतरे नेति ज्ञातुं नेष्टे कथंच
न ॥ ४३ ॥

वृत्तं बलोऽवैत् विदितवानित्यर्थः ॥ ३९ ॥ ततः किं वृत्तमित्यपेक्षायामाह ॥ तावदिति ॥ वर्षे याते ॥ आत्म
मानेन ॥ त्रुट्यनेहसा ॥ त्रुटिमात्रेण कालेन ॥ सकलं सानुचरं हरिं ददर्श ॥ ४० ॥ दृष्ट्वा च वितर्कयदित्याह
यावन्त इति द्वाभ्यां ॥ मे मायाशये मन्मायातल्पे ॥ ४१ ॥ मन्मायामोहितेभ्य इतरे कुत्रत्याः ॥ ४२ ॥ इति वितर्कयन्न
बुध्येदित्याह ॥ यावन्त इति द्वाभ्यां ॥ एवमेतेषु भेदेषु चिरं ध्यात्वा स आत्मभूरिति पाठः ॥ ४३ ॥

एवंसकृत्त् ॥ सहस्रकदैवदृष्टी ॥ परब्रह्मणो विशेषणं यस्येति ॥५५॥ अतिकुतुकेन आश्चर्येण उहृत्यह ॥ परावृत्य हे सख
ष्ठेनिपत्येतिवा ॥ कुतुकशब्देन तृतीयायाश्छांदसो लुक् ॥ पद्य ॥ उहृत्यइति ॥ ८ः अतिकुतुकेन उहृत्य विलोड्य विपर्यस्त
स्मिन्निति यावत् ॥ पागंतरे तु अतिकुतुकेन उद्धृत ॥ चुभित ॥ तेषां धाम्ना तेजसा सात्त्विकः सर्वेंद्रियो ब्रह्मात्मलीनिश्च
लोऽभवत् ॥ तत्र दृष्टेति ॥ पुरदेवी ब्रह्माधिष्ठात्री कापि देवता तस्या अतिसमीपे पुत्रिका च तु मुखीकनकप्रतिमेव ॥५६॥
एवमोहमग्नमज्जमुञ्ज्हारस्याद ॥ इतीति ॥ हे रेशे इरासरस्वतीति तस्या ईशे ब्रह्मणि ॥ किमिदमिति मुह्यति ॥ पश्चात्तद्दृष्टुं मे

एवं सकृद्ददर्शाजः परब्रह्मात्मनोऽखिलान् ॥ यस्य भासा सर्वमिदं विभाति सचराचरं ॥५५॥ ततोऽतिकुतु
कोद्धृत्योऽस्तिमित्तेकादशेंद्रियः ॥ तद्धाम्नाभूदजस्तस्मीपुर्देव्यंतीव पुत्रिका ॥५६॥ [illegible] ईशेन वेद्ये
निजमहिमनि स्वप्रमितिके परस्त्राजानेऽतन्निरसनमुखब्रह्मकमितो ॥ अनीशोऽपि द्रष्टुं किमिदमि
तिवा मुह्यति सति चछादाजोऽज्ञात्वा सपदि परमोऽजजवनिकां ॥५७॥

अनीशे सति परमोऽजः श्रीकृष्णः सपदि जवनिकां मायारूपां तिरस्करणीं ॥ ययाद्रुतं दर्शितं तां च छादितिरोध
त्त अपसारितवानित्यर्थः ॥ अथवा अयं लोकाभिमानी ममैश्वर्यं द्रष्टुं न योग्य इति तत्स्योपरि मायां प्रसारितवानि
ति ॥ कमुह्यति सति ॥ अतर्क्ये तर्कागोचरे ॥ निजं असाधारणं महिमा यस्य तस्मिन्निति मोहहेतुकृतः ॥ दर्शनो [illegible] या
गयत्वोपश्रीणि विशेषणानि ॥ स्वप्रमितिके स्वप्रकाशं ज्ञानं सुखं च तस्मिन् ॥ अत एव अजात्प्रकृतेः परत्र परस्मि
तः

चंद्रिकावद्विशदस्मितयुक्तैः॥ सहारुण्या गुणेन च वर्त्तमानायेऽपांगास्तैर्वीक्षितैः स्वकार्थानां स्वभक्तमनोरथानां रजःस
त्त्वाभ्यां सृष्टपालका इव वा दर्शयंत॥ सत्त्ववद्विशदस्मितेन पालका इव॥ रजोवदरुणगुणेन स्रष्टार इव॥ तादृक्कटाक्षैर्वीक्ष्य
मानाइत्यर्थः॥५०॥ आत्मा ब्रह्मा तदादिस्तंबपर्यंतैरनेकार्हैः अनेकार्हणैः॥५१॥ अजाद्याभिर्मायाविद्याभिर्विभूति
भिः शक्तिभिर्महत्तत्त्वयोः पृथक्कविवक्षया चतुर्विंशतितत्त्वैर्जगत्कारणैः॥५२॥ कालादिभिः तत्सहकारिभिश्च॥ तत्र स्व

चंद्रिकाविशदस्मेरैः सारुणापांगवीक्षितैः॥ स्वकार्थानामिव रजःसत्त्वाभ्यां स्रष्टृपालकाः॥५०॥ आत्मादिस्तं
बपर्यंतैर्मूर्त्तिमद्भिश्चराचरैः॥ नृत्यगीताद्यनेकार्हैः पृथक्पृथगुपासिताः॥५१॥ अणिमाद्यैर्महिमभिः
रजाद्याभिर्विभूतिभिः॥ चतुर्विंशतिभिस्तत्त्वैः परीता महदादिभिः॥५२॥ कालस्वभावसंस्कारकामकर्मगु
णादिभिः॥ स्वमहिध्वस्तमहिभिर्मूर्त्तिमद्भिरुपासिताः॥५३॥ सत्यज्ञानानंतानंदमात्रैकरसमूर्त्तयः॥ अस्पृष्ट
भूरिमाहात्म्या अपि ह्युपनिषद्दृशः॥५४॥

भावः परिणामहेतुः संस्कारस्तदुद्बोधकः॥ स्वमहिध्वस्तमहिभिः॥ भगवन्महिम्नातिरस्कृतस्वातंत्र्यैः कृत्स्नैः सर्वैरणिमाद्यैः॥५३॥
सर्वेषां मूर्त्तिमत्त्वेपि विशेषमाह॥ सत्याश्च ज्ञानरूपाश्च अनंताश्च आनंदरूपाश्च॥ तत्रापि तदेकमात्रा विजातीयसंभेद
रहिताः॥ तत्रापि च एकरसाः॥ सदैकरूपा मूर्त्तयो येषां ते॥ यद्वा॥ सत्यज्ञानादिमात्रैकरसे यद्ब्रह्म तदेव मूर्त्तिर्येषामिति॥ ये
त एव उपनिषत्॥ आत्मज्ञानमेव दृक् चक्षुर्येषां तेषामपि विनिश्चिते॥ अस्पृष्टभूरिमाहात्म्याः॥ न स्पृष्टः स्पर्शयोग्यं भूरि

चिरस्य चिरं पादयोः पतन्नास्ते ६२ सवेपथुः सकंपः अत्रस्वगद्गदानुकरणमेतत् इलया वाचा ऐलत अस्तौत् ६४
इति श्रीदशमे त्रयोदशः ॥१३॥ चतुर्दशे इतं दृष्ट्वा सर्वागंतुकनिश्चयं अनीशाकर्तुमित्यौत्कं सब्रह्मा विमोहितः
स्वकृतापराधेन भियासकंपतया भगवन्महिम्नानमत्वा गाढमानोय याह दृष्टस्वरूपमेवकीर्तयन्नाह नौमीति हे
ईड्यस्तुत्यत्ते तुभ्यं नौमि द्वितीयार्थे चतुर्थी अथवानौमीत्युक्ता प्रस्तुतस्य भगवतः कर्मत्वेज्ञाते प्रयोजनापेक्षा

उत्थायोत्थाय कृष्णस्य चिरस्य पादयोः पतन् आस्ते महित्वं प्राग्दृष्टं स्मृत्वा स्मृत्वा पुनः पुनः ६२
शनैरथोत्थाय विमृज्य लोचने मुकुंदमुद्वीक्ष्य विनम्रकंधरः कृतांजलिः प्रश्रयवान्समाहि
तः सवेपथुर्गद्गदयैलतैलया ६४ ॥इति श्रीमद्भागवते महापुराणे दशमस्कंधे बालक्रीडा
यां ब्रह्ममोहापनोदनं त्रयोदशोध्यायः ॥१३॥ ब्रह्मोवाच ॥ नौमीड्य तेऽभ्रवपुषे तडिदंबराय गु
ंजावतंसपरिपिच्छलसन्मुखाय वन्यस्रजे कवलवेत्रविषाणवेणुलक्ष्मश्रिये मृदुपदे पशुपांगजा

यामेवंभूतो भगवानेव प्रयोजनमिति तादर्थ्ये चतुर्थी यद्वा तुभ्यं त्वामेव प्रसादयितुं त्वामेव स्तौमीत्यर्थः ॥ य ॥१॥
अभ्रवद्वपुर्यस्य तस्मै तडिद्वदंबरं यस्य तस्मै गुंजाभिरवतंसौ कर्णभूषणे परिपिच्छं बर्हापीडं तेर्लसन्मुखं यस्य तस्मै
वन्यास्रजो यस्य तस्मै कवलादिभिः लक्ष्मभिः श्रीर्शोभा यस्य तस्मै पशुपस्य अंगजाय ॥१॥ ॥ ॥ ॥ ॥ ॥

वृति १

अर्वाक्कुवरिः प्रतिलब्धान्यक्षीणि येन सः ॥ परेतवत् मृतो यदि कथंचित्पुनरुत्थितः ॥ तथाह दृष्टीः नेत्राणि ॥ ५८ ॥ जनानां आ
जीव्यद्रुमैराकीर्णं समाप्रियं संततानि आसमंतात्प्रियाणि यस्मिन् तत्तत् ॥ ५९ ॥ तदाह ॥ यत्रेति ॥ नैसर्गदुर्वैराः स्वाभाविकाः प्र
तिकार्य्यवैरवंतोपि नरसिंहादयश्च मित्राणि यत्र सहैवासन् ॥ अजितस्यावासेन द्रुताः पलायिताः रुट्तर्षादयः क्रोधलोभा
द्योयस्मात्त ॥ तथाभूतं वृंदावनमपश्यदिति ॥ ६० ॥ तत्र च परमेष्ठी ब्रह्मा अखर्ववदेवे ब्रह्म अचष्ट अपश्यत् ॥ कथंभूतं तत्पशुपवं

ततोऽर्वाक्प्रतिलब्धाक्षः कः परेतवदुत्थितः ॥ कृच्छ्रादुन्मील्य वै दृष्टीराचष्टेदं सहात्मना ॥ ५८ ॥ स पद्येवाभितः पश्य
न्दिशोऽपश्यत्पुरःस्थितं ॥ वृंदावनं जनाजीव्यद्रुमाकीर्णं समाप्रियं ॥ ५९ ॥ यत्र नैसर्गदुर्वैराः सहासन्नृमृगादयः
मित्राणीवाजितावासद्रुतरुट्तर्षकादिके ॥ ६० ॥ तत्रोद्वहत्पशुपवंशशिशुत्वनाट्यं ब्रह्माद्वयं परमनंतमगाधबोधं
वत्सान्सखीनिव पुरा परितो विचिन्वदेकं सपाणिकवलं परमेष्ठ्यचष्ट ॥ ६१ ॥ दृष्ट्वा त्वरेण निजधोरणतोवतीर्य
पृथ्व्यां वपुः कनकदंडमिवाभिपात्य ॥ स्पृष्ट्वा चतुर्मुकुटकोटिभिरंघ्रियुग्मं नत्वा मुदश्रुसुजलैरकृताभि
षेकम् ॥ ६२ ॥

शशिशुत्वनाट्यमुद्वहत् ॥ नाट्यमित्यत्र हेतुः ॥ अद्वयमित्यादि ॥ अद्वयं च वत्सान् विचिन्वत् ॥ ए
कं च सखीन् ॥ अगाधबोधं च विचिन्वत् ॥ अनंतं च परितो विचिन्वत् ॥ परं च शिशुत्वमुद्वहत् ॥ ब्रह्म च सपाणिक
वलमिति नाट्यमेवोद्वहदित्यर्थः ॥ ६१ ॥ निजधोरणतः स्ववाहनात् ॥ त्वरेण वेगेनावतीर्य दंडवन्नत्वा ॥ चतुर्णां मुकुटा
नां अग्रैरंघ्रियुग्मं स्पृष्ट्वा ॥ मुदश्रुसुजलैरानंदाश्रुरूपैः सुजलैरभिषेकमकरोदिति ॥ ६२ ॥ ऽऽ ॥ ॥ ऽऽ ॥

भा० द० पू० भक्तिं विना ज्ञानं नैव सिद्ध्येदित्याह ॥ श्रेयःसृतिमिति ॥ श्रेयसामभ्युदयापवर्गलक्षणानां सृतिं श्रवणं यस्याः ॥ सरसइ
५७ व निर्झराणां तां तेन स्य भक्तिमुदस्य त्यक्त्वा ॥ श्रेयसां मार्गभूतामिति वा ॥ तेषां क्लेशल एवाऽवशिष्यते ॥ अयं भावः यथाल्पप्र
माणं धान्यं परित्यज्य अंतःकणहीनान् स्थूलधान्याभासांस्तुषान्ये घ्नंति ॥ तेषां न किंचित्फलं ॥ एवं भक्तिं तुच्छी
वं१

श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केवलबोधलब्धये ॥ तेषामसौ क्लेशल एव शिष्य
ते नान्यद्यथा स्थूलतुषावघातिनाम् ॥ ४ ॥ पुरेह भूमन्बहवोऽपि योगिनस्त्वदर्पितेहा निजक
र्मलब्धया ॥ विबुध्य भक्त्यैव कथोपनीतया प्रपेदिरेऽञ्जोऽच्युत ते गतिं पराम् ॥ ५ ॥ ॥

कृत्य केवलबोधाय यतंते तेषामपीति ॥ ४ ॥ भक्त्यैव ज्ञानं नान्यथेत्यत्र सदाचारं प्रमाणयति ॥ पुरेति हे भूमन्
इह लोके पूर्वं योगिनोऽपि संतः ॥ योगेऽज्ञानमप्राप्य ॥ पश्चात्त्वदर्पितेहाः ॥ त्वय्यर्पिता लौकिक्यपि ईहा चेष्टा यैस्ते
निजकर्मलब्धया त्वदर्पितया ईहानि कर्माणि च तैर्लब्धयेत्येकं पदं कथोपनीतया ॥ कथया त्वत्समीपं प्रापित
या भक्त्यैव त्वां विबुध्य आत्मानं ज्ञात्वा ॥ अंजः सुखेनैव ते तव पदं गतिं प्रापुः ॥ ५ ॥ ५७

ननु नौमीति प्रतिज्ञाय किं स्वरूपानुवादमात्रं क्रियते ॥ अत आह ॥ अस्यापीति ॥ भो देव अस्यापि सुलभत्वेन प्रकाशितस्यापि तव वपुषः
अवतारस्य महिमानं अवसितुं ज्ञातुं कोपि ॥ कः ब्रह्मा अहं समपि नेशे न शक्नोमि ॥ यद्वा ॥ कश्चिदपि नेशे न समर्थोसीत् ॥ सुलभत्वाय वि
शेषणद्वयं ॥ मदनुग्रहस्य ॥ मदनुग्रहो यस्मात्तन्मदनुग्रहं तस्य ॥ किंच ॥ स्वेच्छामयस्य ॥ स्वीयानां भक्तानां इच्छया यथेष्टो तयातथा भवतः
तर्हि किमिति ज्ञातुं न शक्यते अत आह ॥ नतु भूतमयस्य ॥ अचिंत्यशुद्धसत्वात्मकस्य ॥ यदास्यैवं तदा कथं पुनः साक्षात्तव एकेवलस्य
आत्मसुखानुभूतेरेव स्वसुखानुभवमात्रस्यावतारिणो गुणातीतस्य महिमानं ॥ अंतरेण मनसा ॥ निरुद्धेनापि मनसा को वा ज्ञातुं

अस्यापि देव वपुषो मदनुग्रहस्य स्वेच्छामयस्य नतु भूतमयस्य कोपि ॥ नेशे महि त्ववसितुं मनसांतरेण
साक्षात्तवैव किमुतात्मसुखानुभूतेः ॥ २ ॥ ज्ञाने प्रयासमुदपास्य नमंत एव जीवंति सन्मुखरितां भवदी रव२
यवार्त्तां ॥ स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्यसि तैस्त्रिलोक्याम् ॥ ३ ॥

समर्थो भवेत् ॥ अथवा भूतमयस्यापि तु विराड्रूपस्य महत्वानियमस्य वपुषः महिमा अवसितुं कोपि नेशे ॥ तदस्याज्ञातत्वा
साधारण्यस्यानियमनियंतृत्वभेदरहितस्य उक्तलक्षणस्यास्य महिमानमवशितुं कोपि नेश इति किमुत वक्तव्यमित्य
र्थः ॥ २ ॥ तर्हि अज्ञाः कथं संसारं तरेयुरत आह ॥ ज्ञान इति उदपास्य ॥ ईषदपि अकृत्वा सद्भिर्मुखरितां ॥ स्वत एव नित्यं प्र
कटितां भवदीयां वार्त्तां ॥ स्वस्थ स्थान एव स्थिताः तत्संबंधिमात्रे स्थले तत एव श्रुतिगतां श्रवणप्राप्तां ॥ तनुवाङ्मनोभिः
यद्यपि १ नमंतः सत्कुर्वंतः ॥ ये जीवंति केवलं नान्यत्कुर्वंति ॥ तैः प्रायशः ॥ त्रिलोक्यामन्यैरजितोपि त्वं जितः ॥ प्राप्तोसीति ॥ किं ज्ञानश्रमे

स्य २

भा॰ द॰ स्क॰ गुणात्मनः गुणान्नाभासेन ॥ गुणाधिष्ठातुस्तेतव पुनः गुणान् विमातुं ॥ एतावंत इति गणयितुमपि के ईशिरे समर्था वभू
५८ वुः ॥ दूरतस्ते विशेषवार्त्ता ॥ कथंभूतस्य तव ॥ अस्य विश्वस्य हिताय पालनाय वहुधा वहुगुणाविष्कारेणावतीर्णस्य ॥ ननु कालेन
निपुणैः किमशक्यमत आह ॥ कालेनेति वा शब्दो वितर्के सुकल्पैरतिनिपुणैः वहुजन्मभिः परमाणवोपि विमिता वि
गणिता भवेयुः ॥ तथा खे मिहिकाहिमकणा अपि तथा द्युभासः ॥ दिवि नक्षत्रादिकिरणपरमाणवोपि ॥ ७ ॥ तस्मा

गुणात्मनस्तेपि गुणान्विमातुं हितावतीर्णस्य क ईशिरेस्य ॥ कालेन यैर्वा विमिताः सुकल्पैर्भूपांशवः खे
मिहिका द्युभासः ॥ ७ ॥ तत्तेनुकंपां सुसमीक्षमाणो भुंजान एवात्मकृतं विपाकं ॥ हृद्वाग्वपुर्भिर्विदधन्न
मस्ते जीवेत यो मुक्तिपदे स दायभाक् ॥ ८ ॥ पश्येश मे नार्यमनंत आद्ये परात्मनि त्वय्यपि मायिमायि
नि ॥ मायां वितत्येक्षितुमात्मवैभवं ह्यहं कियान्नैच्छमिवार्चिरग्नौ ॥ ९ ॥
इति किरेवसंगाह्य तदित्याह ॥ तत्तेनुकंपामि
ति ॥ सुसमीक्षमाणः तव कृपा कदा भविष्यतीति वहु मन्यमानः स्वार्जितकर्मफलमेवानाशक्तः सन् भुंजान एव ॥ नातीव तपआ
दिना क्लिश्यन् ॥ एवं यो जीवेत्स मुक्तौ दायभाग्भवति ॥ भक्तस्य जीवनव्यतिरेकेण दायप्राप्ताविव मुक्तौ नान्यदुपयुज्यत इति भावः ॥
चातेदेवस्तुत्वा भगवंतं क्षमापयितुं स्वापराधं निवेदयति ॥ पश्येति ॥ हे ईश मे नार्यं दौर्जन्यं पश्य ॥ यदहं मायिनामपि मायिनि
विमोहके त्वय्यपि स्वमायां प्रसार्य ऐश्वर्यमीक्षितुमैच्छं ॥ अभिलषितवान् ॥ अहो एवं कर्तुं त्वय्यहं कियान् ॥ न
किंचि॥य यथाग्नेरुद्गता अर्चिः ज्वाला अग्नेः न किंचित्तद्वदिति ॥ ९ ॥ ॥५८॥
न

एवंतावत्सगुणनिर्गुणयोरुभयोरपिज्ञानंदुर्घटमितित्वत्कथाश्रवणादि नैवतत्रापिनान्यथेत्युक्तं ॥ इदानीं
यद्यप्युभयोरविशेषेणदुर्विज्ञेयत्वमुक्तं ॥ तथापिगुणातीतस्यज्ञानंकथंचिद्भवेत् नतुसगुणस्यतव अचिंत्यानंतगुण-
त्वादितिश्लोकद्वयेन ॥ तथापीति ॥ हेभूमन् अपरिछिन्न ॥ अगुणस्यतेमहिमा अमलैरंतरात्मभिः ॥ प्रत्याहृतैरिं-
द्रियैर्विबोद्धुं बोधगोचरीभवितुमर्हति ॥ योग्योभवति ॥ अथवाविबोद्धुंज्ञातुमर्हति ॥ अर्हैतेशक्ता इत्यर्थः ॥ यद्वा ॥ महि-
मेतिमहिमानंकश्चिद्बोद्धुमर्हतीत्यर्थः ॥ कथं स्वानुभवात् ॥ आत्माकारांतःकरणसाक्षात्कारात् ॥ नन्वंतःकरणमपिस-

तथापिभूमन्महिमागुणस्यतेविबोद्धुमर्हत्यमलांतरात्मभिः ॥ अविक्रियात्स्वानुभवा-
दरूपतोह्यनन्यबोध्यात्मतयानचान्यथा ॥ ६ ॥

विकारमेवविषयीकरोतीतिकथमात्माकारतांतस्येति ॥ अतआह ॥ अविक्रियादिति ॥ विक्रियाविशेषाकारः ॥ तद्र-
हितात् विशेषपरित्यागस्वात्माकारतेत्यर्थः ॥ नन्वेवंकरणसाक्षात्कारविषयत्वेनानात्मत्वप्रसंगःस्यादतआह
अरूपतइति ॥ रूपंविषयः ॥ अविषयत्वात् ॥ वृत्तिविषयत्वमेवात्मनोनफलविषयत्वमतोनायंदोषइतिभावः ॥ क-
थंतर्हिस्फूर्तिः ॥ अनन्यबोध्यात्मतयास्वप्रकाशत्वेनैव नत्वन्यथाइदंतदितिविषयत्वेनेत्यर्थः ॥ अथवामाअंतरंगाल
स्मीरपि ॥ अगुणस्यतेमहिमहिमानममलैरंतर्वृत्तिभिरिंद्रियैरपि ॥ तथायादृग्वस्तुतःतेनरूपेणविबोद्धुंकिमर्हतिनार्हत्ये-

वेत्यर्थः ॥ कथंतर्ह्यर्हतीतितत्राह ॥ स्वानुभवादित्यादिना
उक्तार्थमेवैतत् ॥ ६ ॥

भा०द०टी० किंच विशेषतोऽपि त्वत्तो मम जन्म प्रसिद्धमित्याह ॥ जगत्त्रयेत्यादिना जगत्त्रयस्यांते प्रलये यः उदधीनां संप्लवः संश्लेषस्त
५९ स्मिन्नुदे उदके नारायणस्योदरे नाभिस्तस्या नालादजो विनिर्गत इति या वाक् सा तावन्मृषा न भवतीति वै निश्चितं ॥ तत् तथापि तु
हे ईश्वर त्वत्तः अहं किं न विनिर्गतः नोत्पन्नोऽस्मि ॥ अपि तु त्वत्त एवोत्पन्न इत्यर्थः ॥१३॥ ननु तर्हि नारायणस्य पुत्रः स्याः मम किं
मायातं तत्राह ॥ नारायणस्त्वमिति ॥ न हीति काका ॥ त्वमेव नारायण इत्यापादयति ॥ कुतोऽहं नारायण इति चेत् तत्राह ॥ सर्वदेहि
नामात्मासि ॥ एवमपि किं नारायणो न भवसि ॥ नारः जीवसमूहोऽयनं आश्रयो यस्य स तथेति ॥ त्वमेव सर्वदेहिनामात्मत्वा
न्नारायण इति भावः ॥ हे अधीश त्वं नारायणो न हीति पुनः काकुः ॥ अधीशः प्रवर्तकः तेन च नारायणस्यायनं प्रवृत्तिर्यस्मा

जगत्त्रयांतोदधिसंप्लवोदे नारायणस्योदरनाभिनालात् ॥ विनिर्गतोऽजस्त्विति वाङ् न वै मृषा किंत्वीश्व
रत्वन्न विनिर्गतोऽस्मि ॥१३॥ नारायणस्त्वं न हि सर्वदेहिनामात्मास्यधीशाखिललोकसाक्षी ॥ नारायणोऽं
ऽगं नरभूजलायनात्तच्चापि सत्यं न तवैव माया ॥१४॥

त्स तथेति पुनस्त्वमेवासाविति ॥ किंच ॥ त्वमखिललोकसाक्षी ॥ अखिलं लोकं साक्षात्पश्यसि ॥ अतो नारमयसे जानासीति त्वमे
व नारायण इत्यर्थः ॥ नन्वेवं नारायणपदव्युत्पत्तौ भवेत्त्वं न त्वन्यथा प्रसिद्धमित्याशंक्याह नारायणोंऽगमिति ॥ नरादुद्भूतान्यर्था
स्तत्वानि ॥ तथा नराज्जातं यज्जलं तदयनं यस्य सो नारायणः प्रसिद्धः सोऽपि तवैवांगं मूर्तिः ॥ तथा च स्मर्यते ॥ नराज्जातानि तत्त्वा
नि नाराणीति विदुर्बुधाः ॥ तस्य तान्ययनं पूर्वं तेन नारायणः स्मृत इति ॥ तथा आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥ अ
यनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति ॥ ननु मन्मूर्तेरपरिच्छिन्नायाः कथं जलाद्याश्रयत्वं तत्राह ॥ तच्चापि सत्यं

५९

रजोभुवोऽहं जसोऽज्ञातस्य॥ अतः अज्ञानत एव अजावलेपांधतमोऽंधं च त्वं तु पश्य॥ अजो जगत्कर्त्ताहमिति मदेन गाढतमोऽन्धोऽस्मि
धीभृत्त्वेनेत्यर्थः॥ अतस्त्वं तु पृथगीशमानिनः॥ अन्यत्र प्रभुत्वेन वर्त्तमानोऽपि मयि नाथे सति नाथवान्॥ मइत्युत्येवं च अतएषोऽनुकं
पार्ह इति मत्वा क्षमस्वेत्यर्थः॥१०॥ ननु ब्रह्माण्डविग्रहत्वमपीश्वरएवेति चेत्तत्राह॥ क्वाहमिति॥ तमः प्रकृतिः महान् महत्त्वं॥ अहं अहंका
रः खं आकाशं॥ चरो वायुः अग्निः वाः जलं भूः पृथ्वी प्रकृत्यादिपृथिव्यंतैः संवेष्टितो योऽण्डघटः स एव तस्मिन्वा स्वमानेन सप्त वितस्तिः का
यो यस्य सोऽहं क्व॥ क्व च ते महित्वं॥ कथंभूतस्य॥ ईदृग्विधानि॥ अविगणितानि अण्डानि तान्येव परमाणवः तेषां चर्या परिभ्रमणं त
अतः क्षमस्वाच्युत मे रजोभुवो ह्यजानतस्त्वत्पृथगीशमानिनः॥ अजावलेपांधतमोंधचक्षुष एषोऽनुकं
प्यो मयि नाथवानिति॥१०॥ क्वाहं तमो महदहं खचराग्निवार्भूसंवेष्टितांडघटसप्तवितस्तिकायः॥ क्वेदृग्वि
धाऽविगणितांडपराणुचर्या वाताध्वरोमविवरस्य च ते महित्वं॥११॥ उत्क्षेपणं गर्भगतस्य पादयोः किं कल्प
ते मातुरधोक्षजागसे॥ किमस्तिनास्तिव्यपदेशभूषितं तवास्ति कुक्षेः कियदप्यनंत॥१२॥
दर्थं वाता ध्वानो गवाक्षास्तद्वद्रोमविवराणि यस्य तव॥ अतो नितुच्छत्वात्त्वयानुकंप्योऽहमिति॥११॥ अपि च गर्भग
तस्य शिशोः पादयोरुत्क्षेपणं मातुः किमपराधाय भवति लोके॥ अस्तिनास्तिव्यपदेशाभ्यां भावाभावशब्दाभ्यां
स्थूलसूक्ष्मकार्यकारणशब्दैर्वा भूषितं अभिहितं एतेषां शब्दानां भुवि विषये उषितं स्थितमिति वा सर्वं वस्त्वित्यर्थः
हे अधोक्षज तव कुक्षेर्नंतः बहिः किं यदपि किंचिन्मात्रमपि किमस्ति न किंचिदस्तीत्यर्थः॥ अतः सर्वस्य त्वत्कुक्षिगतत्वे

भा०द०पू०
६०

अपि च न केवलं जनन्यामपि तथैव दर्शितमित्याह ॥ अद्यैवेति ॥ त्वदृते त्वां विनास्य विश्वस्य मायात्वं त्वयाममैव च तदप्य
येव किं नादर्शितमस्य तत्राह एकोसीत्यादि ॥ ततो मयासहाखिलैस्तत्त्वादिभिरुपासितास्तावंतश्चतुर्भुजा अस्मिन् जगंति
ब्रह्माद्वयानि रेतिश्चागनुक्तमपि द्रष्टव्यं ॥१८॥ ननु ब्रह्मन् तत्त्वमयादर्शितं सृष्ट्यस्मै वचैतन्यं कथं प्रपंचवन्मीयेत्युच्य
ते स त्वं किं त्वद्वितीयेत्वयि नानात्वं गुणभवेतोर मत्स्याद्यवतारेषु वकोप्यवसन्न स्वतंत्रमायानवधनमित्याह श्लोकद्वयेन

अद्यैव त्वदृतेऽस्य किं मम न ते मायात्वमादर्शितमेकोसि प्रथमं ततो व्रजसुहृद्वत्साः समस्ता अपि ॥ तावंतो
सि चतुर्भुजास्तदखिलैः साकं मयोपासितास्तावंत्येव जगंत्यभूस्तदमितं ब्रह्माद्वयं शिष्यते ॥१८॥ अजानतां त्व
त्पदवीमनात्मन्यात्मात्मना भासि वितत्य मायां ॥ सृष्टाविवाहं जगतो विधान इव त्वमेषोंत इव त्रिनेत्रः ॥१९॥ सुरे
ष्वृषिष्वीश तथैव नृष्वपि तिर्यक्षु यादस्स्वपि तेऽजनस्य ॥ जन्मासतां दुर्मदनिग्रहाय प्रभो विधातः सदनुग्र
हाय च ॥२०॥ को वेत्ति भूमन् भगवन् परात्मन् योगेश्वरोती भवतस्त्रिलोक्यां ॥ क्व वा कथं वा कति वा कदेति विस्तार
यन् क्रीडसि योगमायां ॥२१॥

अजानतामिति त्वत्पदवीं त्वत्स्वरूपमजानतां ॥ अनात्मनि प्रकृतौ स्थितं आत्मानं त्वया आत्मनैव स्वातंत्र्येण मायां वितत्य
भासि कथं जगतः सृष्टौ विवाहमेव अहमिव ॥ विधाने पालने एष त्वमिव अंते त्रिनेत्र इव इति ॥१९॥२०॥ ननु च स्वातंत्र्येण कथं
स्थितेषु मत्स्यादिषु जन्म कथं वा वामनादिषु अवतारेषु पात्रादिकापि एवं कथं वा अस्मिन्नेव कृत्वा विज्ञ्य पलायनादि ॥ अत
४३
ह को वेत्तीति ॥ अन्वर्थेस्तं संबोधने दुर्ज्ञेयत्वमेवाह ॥ भूमन्नित्यादिभिः भवतः ऊतीः लीलास्त्रिलोक्यां को वेत्ति ॥ क्व वा कथं वा कद

॥६०॥

दि१

अपरिच्छेद्यमेवोपादयति ॥ त्वय्येवेति ॥ जगदाश्रयभूतं तव वपुर्जलस्थमित्येवं यदि सत्तत्स्यात्तर्हि तदेव कमलमार्गेणांतः
प्रविश्य संवत्सरशतं विचिन्वतापि मया हे भगवन् अचिंत्यैश्वर्य तत्र किमिति न दृष्टं ॥ दृष्टमपि किमिति नो व्यदर्शि न दृष्टं तदे
व तपःकरणानंतरं सपद्येव सुदृष्टं ॥ अतो मायैव ॥ अनंतत्वन्मूर्तेर्देशविशेषपरिच्छेदः सत्यो न भवतीत्यर्थः ॥ १४ ॥ अपिच यदि
जलादिप्रपंचः सत्यः स्यात्त ॥ तर्हि तेन तव परिच्छेदो भवेत् ॥ सतु मायाविलसितं इति लये वदर्शितमित्याह श्लोकत्रयेण

त्वय्येव जलस्थं तव सज्जगद्वपुः किं मे न दृष्टं भगवंस्तदैव ॥ किंवा सुदृष्टं हृदि मे तदैव किं नो सपद्येव
पुनर्व्यदर्शि ॥ १५ ॥ अत्रैव मायाधमनावतारे ह्यस्य प्रपंचस्य वहिः स्फुटस्य ॥ कृत्स्नस्य चांतर्जठरे
जनन्या मायात्वमेव प्रकटीकृतं ते ॥ १६ ॥ यस्य कुक्षाविदं सर्वं सात्मं भाति यथा तथा
तत्त्वय्यपीह तत्सर्वं किमिदं मायया विना ॥ १७ ॥

हे मायाधमन मायोपशमन अत्रैवावतारे वहिः स्फुरतस्यापि जठरमध्ये जनन्याः प्रदर्शनेन ॥ १६ ॥ ननु वहिः सं
तएवांतर्जठरे प्रतिबिंबोऽस्तु कुतः सर्वथा मायात्वं तत्राह यस्येति ॥ यस्य तव कुक्षौ सर्वमिदं यथा भाति तत्सर्वमि
हापि वहिरपि तथैव भाति ॥ किंच ॥ सात्मं त्वत्सहितं ॥ तदिदं त्वयि मायया विना किं घटेत ॥ अयं भावः ॥ त्वयि प्रति
बिंबश्चेत् तर्हि वाह्याद्विलोमतया प्रतीयेत न तु तदस्ति ॥ न च आदर्शस्थानीयस्य त्वयि प्रतीतिर्न स्यात् ॥ अतः सर्व

भा० द० पू० उपाध्यपाकरणेन न भवेत्। तच्चासंगत्वान्न संभवतीत्याह। मुक्तउपाधितरंति। संस्कारोपि किमतिशयाधानेन मलापाकर
६१ णेन वा तत्रातिशयाधानं पूर्णत्वेनैव निरस्तं मलापाकरणं वारयति निरंजन इति। निर्मल इत्यर्थः॥२३॥ तस्मादेवंभू
तोऽज्ञानान्मुच्यत इत्याह। एवंविधमिति। त्वां ये विचक्षते सम्यक्पश्यंति। कथं आत्मात्मतया। आत्मा प्रत्यङ्। तस्य स्वरू
पत्वेन। न वैतत्पुत्रादिष्विव गौणमित्याह। सकलात्मनामपि स्वात्मानम्। केन गुरुरेवार्कः। तस्माल्लब्धा उपनिष

एवंविधं त्वां सकलात्मनामपि स्वात्मानमात्मात्मतया विचक्षते। गुर्वर्कलब्धोपनिषत्सुचक्षुषा
ए ते तरंतीव भवाऽनृतांबुधिं॥२४॥ आत्मानमेवात्मतयाविजानतां तेनैव जातं निखिलं
प्रपंचितं। ज्ञानेन भूयोपि च तत्प्रलीयते रज्ज्वामहेर्भोगभवाभवौ यथा॥२५॥ ॥ ऽऽ

तज्ज्ञानं तदेव सुचक्षुः तेन। भव एवानृतांबुधिः तं ते तरंति॥२४॥ अत्र च ज्ञानेन तरंतीति। न च तरंतीवेति। न
नु आत्मात्मतया ज्ञानेनेत्यर्थे त्रयं प्रतिज्ञातं क्रमेणोपपाद्यते। तत्र आत्मानमेव वा आत्मतयेत्यनेन श्लो
केन ज्ञानेन तरंतीत्युपपाद्यते। अज्ञानसंज्ञौ वित्यनेन तरंतीवेत्येतत्। त्वामित्यादि श्लोकद्वयेन तु। आत्मात्मतये
त्येतदुपपाद्यते। ननु ज्ञानेन कथं भवं तरंतीति। तस्याज्ञानमूलत्वादित्याह। आत्मानमेवेति। तेनैव अज्ञानेनैव
प्रपंचितं प्रपंचः। रज्ज्वामहेर्भोगभवाऽभवाविति। सर्पशरीरस्याध्यासापवादौ यथेति॥२५॥ ॥ ६१

ननु भवत्स्वरूपतरणामचिंत्यो महिमा प्रपंचस्य तत्सत्वे कथं सत्वप्रतीतिरितीमामाशंकां सपरिकरामुपसंहरन् परिहरति ॥ तस्मादिति ॥ अस्तधिषणं निरस्तप्रतिभासं ॥ त्वय्येव उद्यत् उद्भवत् ॥ अपि यत् नश्यत् सदिव वेति ॥ उपलक्षणमेतत् नित्यमिव सुखमिव चेतनमिव च अधिष्ठानभूतस्य तव गुणैस्तथा तथा भातीत्यर्थः ॥२२॥ त्वमेव तु सत्यमित्याह एकस्त्वं सत्यः कुतः ॥ आत्मा द्रष्टा असत्यं दृष्टं ॥ न चात्मा दृश्यः ॥ किंच यद्विकारवत् ॥ तदसत्यं ॥ न च त्वयि जन्मादयो विकाराः संतीत्याह ॥ आद्यः कारणं ॥ अतो न जन्म ॥ आद्यत्वे हेतुः ॥ पुराणः ॥ पुराऽपि नवः ॥ कार्य्यात्पूर्वमपि वर्त्तमा

तस्मादिदं जगदशेषमसत्स्वरूपं स्वप्नाभमस्तधिषणं पुरुदुःखदुःखं ॥ त्वय्येव नित्यसुखबोधतनावनंते मायात उद्यदपि यत्सदिवावभाति ॥२२॥ एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्यः ॥ नित्योऽक्षरोऽजस्रसुखो निरंजनः पूर्णोऽद्वयो मुक्तउपाधितोऽमृतः ॥२३॥

न इत्यर्थः ॥ तत्र हेतुः पुरुष इति ॥ तथा च श्रुतिः ॥ सर्वमेवाहमिहास्मि इति तत्पुरुषत्वमिति जन्मानंतरास्तित्वलक्षणं विकारं वारयति ॥ नित्य इति ॥ सनातन इत्यर्थः ॥ पूर्णः ॥ अजस्रसुखः ॥ अक्षरः ॥ अमृत इति चतुर्भिः पदैः क्रमेण वृद्धिविपरिणामापक्षयविनाशान्वारयति ॥ पूर्णत्वे हेतुः ॥ अनंतः ॥ अद्वय इति च देशकालपरिच्छेदरहितः ॥ वस्तुपरिच्छेदरहितोऽपि ॥ अमृतत्वोपपादनाय चतुर्विधक्रियाफलत्वं वारयति ॥ स्वयंज्योतिर्निरंजनः उपाधितो मुक्त इति पदत्रयेण ॥ अयं भावः ॥ तत्रोत्पत्तिराद्य इत्यनेनैव निराकृता ॥ आप्तिरपि क्रियया ज्ञानेन वा भवेत् ॥ क्रियया प्राप्तिरात्मपदेने

व निराकृता ॥ ज्ञानेन तु प्राप्तिं वारयति स्वयंज्योतिरिति ॥ विकृतिरपि दुग्धपाकवन्नावघातेन व्रीहीणामिव ॥

भा०द०१ नन्वेवं ज्ञानैकसाध्ये मोक्षे किमिति भक्तिरुत्कृष्टोषिता ॥ अत आह ॥ अथापीति यद्यपि हस्तप्राप्यमिव ज्ञानमुक्तं त-
६२ थापि हे देव तव पदांबुजद्वयमध्ये एकदेशस्यापि यः प्रसादलेशोपि तेनानुगृहीत एव भगवतस्तव महिम्नस्त-
त्त्वं जानाति ॥ हे भगवन् ते महिम्नस्तत्त्वमिति वा । एकोपि कश्चिदपि चिरमपि विचिन्वन्नपि ॥ अतस्तदंशापवादेन विचा-
रयन्नपीत्यर्थः ॥ २९ ॥ तत्तस्माद्भूरिभागो महद्भाग्यं अत्र भवे ब्रह्मजन्मनि तिरश्चामपि मध्ये यज्जन्म तस्मिन्वा येन भा-

अथापि ते देवपदांबुजद्वयप्रसादलेशानुगृहीत एव हि ॥ जानाति तत्त्वं भगवन्महिम्नो न चान्य
एकोपि चिरं विचिन्वन् ॥ २९ ॥ तदस्तु मे नाथ स भूरिभागो भवेत्र वान्यत्र तु वा तिरश्चां ॥ येनाहमे-
कोपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवं ॥ ३० ॥ अहोतिधन्या व्रजगोरम एयः स्तन्या-
मृतं पीतमतीव ते मुदा ॥ यासां विभो वत्सतरात्मजात्मना यत्तृप्तयेद्यापि न चालमध्वराः ॥ ३१ ॥

येन भवदीयानां जनानां एकोपि यः कश्चिदपि भूत्वा निषेवे अत्यर्थं सेवेय ॥ ३० ॥ यद्देवादिजन्मतोपि यत्र
कुत्रचित्त्वद्भक्तिमज्जन्मैव श्रेष्ठमित्योक्तं तु को न सङ्गभिः श्लोकैरभिनंदति ॥ अहोतिधन्या इत्यादिभिः व्रज-
गावो३ गोरमण्यः व्रजस्था गावो गोप्यश्च ॥ तत्त्वया वत्सतरात्मजात्मना ॥ वत्सानामात्मजानां च रूपेण यस्य तव तृप्तये सर्वे
पि यज्ञा अद्यापि न शक्ताः तेन त्वया प्रतिच्छन्नेन तृप्यता यासां स्तन्यममृतरूपं पीतमिति ॥ ३१ ॥ ६२

नन्नुत्तानेनन्तरंत्येवकिमिदमुच्यतेतरंतीवतत्राह॥ अज्ञानसंज्ञावित्ति॥ अज्ञानेसंत्यज्ययोऽसौभवबंधमोक्षौभवेनबंधस्तन्मो
क्षस्तौद्वौनामप्रसिद्धौ॥ इतःतज्ज्ञभावात॥ स्तत्रयोऽसौतस्ययोभावस्तस्माद्न्योनस्तः॥ ननुकथंमहान्पल्लायक्रियते परमार्थ
विचारादित्याह॥ अज्ञस्येति॥ अखंड॰ अनुभवरूपेपरेसुदृढे॥ आत्मनिनाज्ञानंनचबंधः॥ अतएवनज्ञानंनचमोक्षः॥ तरेणोपरस्येराग्रह
नीवति॥२५॥ ननुपरमार्थज्ञानादज्ञानकृतंबंधोनिवर्त्ततां॥ आत्मानंततयैवज्ञानाद्दितिकोयमाग्रहस्त्याग्रोकायदध्यासात्मनः
पररूपास्फूर्त्तिस्तदपवादेनतत्रैवात्मनिज्ञानयुक्तमितीममर्थंविस्मयेनक्रोशन्निवाह॥ त्वामिति॥ त्वामात्मानंपरंदेहादि
अज्ञानसंज्ञोभवबंधमोक्षौनामनान्योऽस्तितज्ज्ञभावात्॥ अजस्वचित्नात्मनिकेवलेपरेविश्वेयमालोतर
लाविवाहनी॥२६॥ त्वामात्मानंपरंमत्वापरमात्मानमेवच॥ आत्मापुनर्बहिर्मृग्यअहोज्ञजनताज्ञता॥ अ
त्तभविनेनतमवंतमेवध्यतद्धाजंतोमृगयंतिसंतः॥ अस्संतमप्यंत्यहिमंतरेणसंतंगुणंनैकिमुयंतिसंतः॥ प
मत्वाआत्मनिदेहादिमध्यस्य॥ [illegible] ॥ अत्रनष्टआत्माबहिर्मृग्यइतिचित्रं॥ नहिमृहेनएवंन
मृगयइत्यर्थः॥२७॥ विवेकिनस्तुप्रत्यक्स्वरूपमेवपरमात्मानंविचिन्वंतीत्याह॥ अतःर्भवत्तीतिभवंचिज्जडात्मकंश
रीरं॥ तन्मध्यएवत्वांमृगयंति॥ अतत्त्वज्ञंत्यजंतःअपवदंतः॥ ननुस्वस्येशानेनालंकिमसत्तोऽपवादेनेत्याशंक्याह॥ अ
ध्यस्तापवादंविनाअधिष्ठानतत्त्वंनज्ञातुंतरंतिसतांव्यवहारेणाह॥ असंतमिति॥ अतिसमीपेअसंतंतमप्यहिमंत
रेणतन्निषेधंविनेत्यर्थः॥ संतंगुणंरन्नुसंतंकिमुयंति॥ जानंति॥ अतिसंनमयिगुणमितिवानजानंतीत्यर्थः॥ तत्मा

भा०द०पू० अपिच। किंवर्ण्यते कृतार्थत्वमेतेषां भक्त्या भगवानपि ऋणीवास्ते॥ ननु किंदातुमसमर्थोहं येनऋणी स्यां
६३ अत आह। एत अपि भवानपि एषां कुत्रापि किं विश्वफलात्मकोच्चैर्तोऽपरं फलं दाता दास्यति। इति न स्वतः अयतत
सर्वत्र गच्छतु। विचारयत सुधियः। ननु मम मे वदत्वाऽनृणः स्यामिति चेन्नहि नहि महेशादिव सतां भक्तानां यावेषस्त
द्वत्कारमात्रेणापि पिष्टापूतनापि त्वामेवाप्तिता। तर्हि एतत्संबंधिनामपि दद्यामिति चेत्तत्राह सकुलेति। बकाघासु
रसहिता॥ एषामपि तावदेवं वेदं पर्याप्तमित्याह। यदिति। तेषां धामादयस्त्वत्कृते तत्वदर्थमेवेत्यर्थः॥३४॥ नन्वेवी

एषां घोषनिवासिनामुत भवान् किं देवरातेति नश्चेतो विश्वफलात्फलं त्वदपरं कुत्राप्ययन्मुह्यति। स
द्वेषादिव पूतनापि सकुला त्वामेव देवापिता यद्धामार्थसुहृत्प्रियात्मतनयप्राणाशयास्त्वत्कृते॥३५॥
तावद्रागादयः स्तेनास्तावत्कारागृहं गृहं॥ तावन्मोहोऽङ्घ्रिनिगडो यावत्कृष्ण न ते जनाः॥३६॥ प्रपंचं
निष्प्रपंचोऽपि विडंबयसि भूतले॥ प्रपन्नजनतानंदसंदोहं प्रथितुं प्रभो॥३७॥

ननु रागादिदोषाणां संन्यासिनामपि न मन्नेऽपरं किंचिदस्ति। कथमेषामपर्याप्तमित्यत आह॥ तावदिति। हे कृष्ण रागादयः स्ता
वदेवस्तेनाश्चोरा भवंति। तथा तावद्गृहमपि कारागृहं बंधनागारं। मोहोऽपि तावदेवांघ्रिनिगडः पादशृंखला। यावत्ते त्वदीया
जना न भवंति। त्वदीयानां रागादयोऽपि त्वन्निष्ठमेव कारावेति। न यतिभ्यो विशेषः। भजनं त्वाधिकमिति भावः॥३६॥ ननु तत्त
एवाहमेषां पुत्रादिरूपेणावर्ते तत्र इति चेत्तत्राह। प्रपंचमिति। प्रपन्नायाजनताजनसमूहः तस्या आनंदानां संदोहं स
मूहं प्रथयितुमिति। न हि कपटपुत्रत्वादिना तादृभक्तेऽनृणः संपद्यत इत्यर्थः॥३७॥ ॥ ऽऽ॥ ऽऽ॥ ॥ ऽऽ॥ ६३

तत्र भगवत्सखानां महिमा वक्तुं तावत्तु च न शक्यत इत्याह ॥ अहो इति पुनरुक्त्या भाग्यस्य सर्वथा अपरिच्छेद्यत्वमुक्तं अ-
किंच ॥ एतेषां भाग्यस्य तावन्महिमा महिमा आस्तां ॥ कस्तावक्तुं शक्नोति ॥ शर्वादयः शर्वो ऽहंकाराधिष्ठाता आदिर्येषां वै-
द्रादीनां एकादशानां तत्तत् धावयं च ॥ वयमित्यात्मानं वक्तुं मन्यमान आह ॥ एवं मनो बुद्ध्यहंकार चक्षुराद्यधिष्ठातारस्त-
यादशदेवा एव ॥ वत्त अहो भूरिभागाः ॥ यस्मादेतेषां हृषीकाणां इंद्रियाणां एव चषकाः पानपात्राणि तैः तेच तद्देशस्य चित्ताधि-
ष्ठातुः अंघ्री एव च द्वंद्वे वारिजितया मधुमकरंदः तदेव अमृतं तत्स्वादु ॥ आसवं मादकं पिबामः ॥ एतदुक्तं भवति ॥ यद्वा अ-

अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसां ॥ यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनं ॥ ३२ ॥ एषां तु भाग्यमहि-
मा च्युत तावदास्तामेकादशैव हि वयं वत भूरिभागाः ॥ एतद्धृषीकचषकैरसकृत्पिबामः शर्वादयोऽं-
घ्र्युदजमध्वमृतासवं ते ॥ ३३ ॥ तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेपि कतमांघ्रिरजोभिषे-
कं ॥ यज्जीवितं तु निखिलं भगवान्मुकुंदस्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ॥ ३४ ॥

त्य कर्मेंद्रियाद्यभिमानिनो वयं कीर्ति सौंदर्य भोगं ध्याधेकैकदेशसेविनोपि कृतार्थाः ॥ तद्वा सर्वेंद्रियैः सर्वसेवि-
नामेतेषां किं वक्तव्यं तेभाग्यमिति ॥ ३३ ॥ अतो मया प्रार्थितं ॥ तदस्तु मे नाथ स भूरिभाग इति यत्तत्तदेवेत्याह ॥ तद्भूरिभाग्यमि-
ति ॥ किं तत् इह मनुष्यलोके यत्किमपि जन्म ॥ तत्राप्यटव्यां यत् ॥ तत्रापि गोकुले यत् ॥ अहो सत्यलोकं विहाय अत्र जन्मनि जा-
ते को लाभः अत आह ॥ अपि कतमांघ्रिरजोभिषेकं ॥ इति गोकुलवासिनां मध्ये ऽपि कतमस्य यस्य कस्यापि अंघ्रिरजसा अभिषे-
को यस्मिंस्तत् ॥ ननु कुतो गोकुलवासिन एवाति धन्याः तत्राह यदिति ॥ एषां जीवितं निखिलं मुकुंद इति ॥ मुकुंदं परमेव

भा० द० पू० ६४ अनुज्ञाप्य अनुज्ञां प्रदाप्य प्रष्टुं त्यर्थः स्वभुवं ब्रह्माणं यथापूर्वं सखायो यस्मिंस्तत्स्वकं पुलिनं ॥४२॥ नन्वेतावंतं कालं कथं ते
तत्रैव क्षणविघ्नाः कथं च बहुतिपासो दिविस्मरणं अत आह ॥ एकस्मिन्निति श्लोकद्वयेन ॥ अब्दे पि याते प्राणेशं कथमंतरा च विना
प्रियविरहं क्षणोऽपि वर्षाधिको भवति ॥ तथापि मायाहताः क्षणार्धं मेनिरे ॥४३॥ यतः यया मायया मोहितं जनेन अभिक्ष्णं पुनःपुनः

ततोऽनुज्ञाप्य भगवान्स्वभुवं प्रागवस्थितान् ॥ वत्सान्पुलिनमानिन्ये यथापूर्वंसखं स्वकं ॥४२॥ एकस्मिन्न
पियातेऽब्दे प्राणेशं चांतरात्मनः ॥ कृष्णमायाहता राजन् क्षणार्धं मेनिरेऽर्भकाः ॥४३॥ किं किं न विस्मरंतीह माया
ही ४ मोहितचेतसः ॥ यन्मोहितं जगत्सर्वमभीक्ष्णं विस्मृतात्मकं ॥४४॥ ऊचुश्च सुहृदः कृष्णं स्वागतं तेऽतिरंहसा ॥ नैकोप्य
भोजि कवल एहीतः साधु भुज्यतां ॥४५॥ ततो हसन्हृषीकेशोऽभ्यवहृत्य सहार्भकैः ॥ दर्शयंश्चर्माजगरं न्यवर्त
त वनाद्व्रजं ॥४६॥ बर्हप्रसूनवनधातुविचित्रितांगः प्रोद्दामवेणुदलशृंगरवोत्सवाढ्यः ॥ वत्सान्गृणन्न
नुगगीतपवित्रकीर्तिर्गोपीदृगुत्सवदृशिः प्रविवेश गोष्ठं ॥४७॥

विस्मृतात्मकं विस्मृतः आत्मैव येन तत्तथा ॥४४॥ अतएव मूचुश्च ॥ तत्त्वयाति वेगेन स्वागतं ॥ सम्यगागतं ॥ एकोऽपि ग्रासस्त्वां
विना अस्माभिर्नाभोजि न भुक्तः ॥ इत एहि ॥ साधु अविक्षेपेण भुज्यतामिति ॥४५॥ अभ्यवहृत्य भुक्त्वा ॥४६॥ प्रोद्दामो यो
वेणवादिरवैरुत्सवस्तेनाढ्यः संपन्नः ॥ गृणन् उपलालनेनाह्वयन् ॥ गोपीदृगुत्सवदृशिः गोपीनां दृशामुत्सवरूपा दृशिर्द ६४
र्शनं यस्य सः ॥४७॥

तदेवमादित्वआरभ्याचिंत्यानंतगुणत्वेन स्वयं दुर्ज्ञेयत्वमुक्तं । केचित्तु जानीम इति स्थिताः तानुपहसन्निवाह । जानंत इति । नतु मे
मनआदीनां तव वैभवं विषय इति ॥३८॥ जगदीशत्वाद्यभिमानं परित्यज्याह । अनुजानीहीति । हे कृष्ण मां अनुजानीहि सत्यलो
कं प्रति गंतुं स्वयं महिमानं अस्मदादीनां च ज्ञानबलादि सर्वं त्वमेव वेत्सि । यतः सर्वदृक् । जगतां नाथस्तु त्वमेवेत्यत्राह ज्ञातं । अतो
ममतास्पदं जगदेतत्त्वय्येवार्पितं ॥३९॥ तदेवं किंकरं प्रस्थापयेति । प्रत्यादरेण नमस्करोति । श्री कृष्ण कृष्णेति । वृष्णिकुल

जानंत एव जानंतु किं बहूक्त्या न मे प्रभो । मनसो वपुषो वाचो वैभवं तव गोचरः ॥३८॥ अनुजानीहि मां
कृष्ण सर्वं त्वं वेत्सि सर्वदृक् । त्वमेव जगतां नाथो जगदेतत्तवार्पितं ॥३९॥ श्रीकृष्ण वृष्णिकुलपुष्करजो
षदायिन् क्ष्मानिर्जरद्विजपशूदधिवृद्धिकारिन् । उद्धर्मशार्वरहर क्षितिराक्षसध्रुगाकल्पमा
र्कमर्हन् भगवन्नमस्ते ॥४०॥ श्रीशुक उवाच ॥ इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः । नत्वाभीष्टं
जगद्धाता स्वधाम प्रत्यपद्यत ॥४१॥

पुष्करस्य प्रीतिदातृत्वेन हे सूर्योपम । क्ष्मा भूः निर्जरा देवाश्च पशू
नस्मादेव उद्धयस्तेषां वृद्धिकारिन् हे चंद्रोपम । उद्धर्मः पाषंडधर्मः स एव शार्वरं तमः तद्धरतीति तथा । अनेन व
ह्न्युपम । हे क्षितिराक्षसध्रुक् क्षितौ राक्षसाः कंसादयः उद्धतेभ्यो द्रुह्यतीति पुनः सूर्योपम । सूर्याद्युपमापि न्यू
नेति सलाह । आर्कमभिव्याप्य सर्वेषामर्हणीय पूज्य हे भगवन् । आकल्पं कल्पपर्यंतं तेतुभ्यं नमः इति ॥४०॥ सखस्ववत्सक
मोषणकौतुकं दृष्ट्वा विलंबितपुत्रसुहृद्भुक्तं । निखिलरूपमतीत्य धृत्यु नागवत्सवपुः कलयन् व्रजमंगतः तं । पारयो

भा०द०पू यत्तुयस्माज्जीर्य्यत्यपि॥आसन्नमरणेपिजीविताशाभवति अयंभावः॥नजीविष्यामीतिनिश्चितेपिदेहेहेयत्वेनममास्प
६५ दत्वेनतुदात्मगततत्वमेवसंगच्छतइति॥अथवायत्तुयस्मिन्देहेजीर्य्यत्यपिजीविताशाअविवेकदशायामासीत्सा
पिविवेकिनोयदाममताभावोभवति तदातत्रनात्मत्वास्थेति॥५३॥तदर्थमेवसकलंप्रियमित्यर्थः॥५४॥प्रस्तुतमा

देहोपिममताभाक्चेत्तर्ह्यसौनात्मवत्प्रियः॥यज्जीर्य्यत्यपिदेहेस्मिन्जीविताशाबलीयसी॥५३॥
यस्मात्प्रियतमःस्वात्मासर्वेषामपिदेहिनां॥तदर्थमेवसकलंजगदेतच्चराचरं॥५४॥कृष्ण
मेनमवेहित्वमात्मानमखिलात्मनां॥जगद्धितायसोप्यत्रदेहीवाभातिमायया॥५५॥वस्तु
तोजानतामत्रकृष्णंस्थास्नुचरिष्णुच॥भगवद्रूपमखिलंनान्यद्वस्त्विहकिंचन॥५६॥सर्वेषाम
पिवस्तूनांभावार्थोभवतिस्थितः॥तस्यापिभगवान्कृष्णःकिमतद्वस्तुरूप्यताम्॥५७॥ ॥

ह॥कृष्णमेनमिति॥५५॥नकेवलमात्मनामात्मा॥अपितुजडानामपीत्याह॥वस्तुतइति॥सर्वजगत्कारणमि
ति॥कृष्णंजानतांपुंसांस्थावरंजंगमंचसर्वंभगवद्रूपंभगवानेववस्तुरूपंयस्यतत्तन्नान्यत॥५६॥कुतइतितदा
ह॥सर्वेषामपीतिभावार्थःपरमार्थःभवतिभवतेःपरिणामंप्राप्नुवत्त॥कारणंतस्मिन्॥तथापिभवतःकार
णस्यापिभगवान्कृष्णोभवत्कारणं॥अतःकिमतत्॥श्रीकृष्णव्यतिरिक्तंवस्तुरूप्यताम्॥५७॥ ६५

यशोदानंदसूनुनेति । यशोदासूनुना नंदसूनुनेति वक्तुना मुक्तिः । स हैवं दर्शिता । यद्वा केचिदाहुः यशोदासूनुः अपरे नंद-
सूनुनेति । यद्वा । यशोदामानंदयतीति यशोदानंदः स चासौ सूनुश्चेति तथा तेन । अस्मात् महाव्यालात् । अयं च अविता रक्षितेति
४८ । व्रजौकसां स्वतोकेषु स्नेहवल्ल्याब्दमन्वहं । शनैर्निःसीम ववृधे यथा कृष्णे त्वपूर्ववदित्यादिना स्वतोकेभ्योऽपि परपुत्रे कृ-
ष्णे प्रेमाधिक्यमुक्तं । तत्र पृच्छति ब्रह्मन्निति । ४९ । श्रीकृष्णस्य परमात्मत्वात्तस्मिन्नात्मीयेभ्यः प्रेमाधिक्यं युज्यत इत्यभि-

अघा नेन महाव्यालो यशोदानंदसूनुना ॥ हतोऽविता वयं चास्मादिति बाला व्रजे जगुः ॥ ४८ ॥ राजोवाच ॥
ब्रह्मन् परोद्भवे कृष्णे इयान् प्रेमा कथं भवेत् ॥ योऽभूतपूर्वस्तोकेषु स्वोद्भवेष्वपि कथ्यतां ॥ ४९ ॥ श्रीशुक उ-
वाच ॥ सर्वेषामपि भूतानां नृप स्वात्मैव वल्लभः ॥ इतरेऽपत्यवित्ताद्यास्तद्वल्लभतयैव हि ॥ ५० ॥ तद्रा-
जेंद्र यथा स्नेहः स्वस्वकात्मनि देहिनां ॥ न तथा ममतालंबिपुत्रवित्तगृहादिषु ॥ ५१ ॥ देहात्मवादिनां
पुंसामपि राजन्यसत्तम ॥ यथा देहः प्रियतमस्तथा न ह्यनु ये च तं ॥ ५२ ॥

नु प्रथमं तावदात्मनः स्वतः प्रेष्ठत्वमन्येषां तु तदुपाधिकमिति दर्शयति पंचभिः ॥ ५० ॥ कुतः तथादर्शनादित्या-
ह तदिति ॥ तस्मादेव कारणात् स्वस्वकात्मनि अहंकारास्पदे ॥ ५१ ॥ अहंकारास्पदेऽपि देहे आत्माध्यासतारतम्ये-
न प्रेमतारतम्यं दृश्यमानं तच्चिह्नमेव दर्शयितुं तत्र मंदेन विशेषमाह ॥ देहात्मवादिनां पुंसामिति द्वाभ्यां
तं देहमनु ये भवंति पुत्रादयस्ते तु न तथा प्रियतमा इत्यर्थः ॥ ५२ ॥

भा० द० पू०
६६

ततः पंचदशे धेनुपालनं धेनुकाहननं ॥ कालियखंडत्तो गोपरक्षणं च निरूप्यते ॥ अहिचक्र प्रवेशेन वृथा खिन्ना स्तवीन ततः ॥ क्रमः प्राविशाय त्यक्तफलं ताला लीकाननं ॥ पशुपालसंमतौ ॥ पशुपालैन संमतौ ॥ ईषद्वयो बलाति रेकमनुकृतवंतावित्यर्थः ॥ अतीव चक्रतुः ॥ सर्वतः प्रसर्पणेन ॥ १ ॥ स्वयशो गृणद्भिर्गोपैर्वृत्तस्तद्वनं प्राविशत् २

श्रीशुक उवाच ॥ ततश्च पौगंडवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ ॥ गाश्चारयंतौ सखि भिः समं पदैर्वृंदावनं पुण्यमतीव चक्रतुः ॥ १ ॥ तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्व यशो बलान्वितः ॥ पशून्पुरस्कृत्य पशव्यमाविशद्विहर्तुकामः कुसुमाकरं वनं ॥ २ ॥ तन्मं

ख ४ जुघोषालिमृगद्विजाकुलं महन्मनःप्र[ख्य]पयःसरस्वता वातेन जुष्टं शतपत्रगंधिना निरी क्ष्य रंतुं भगवान्मनो दधे ॥ ३ ॥ स तत्र तत्रारुणपल्लवश्रिया फलप्रसूनोरुभरेण पादयोः ॥ स्पृशच्छिखान्वीक्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपुरुषः ॥ ४ ॥

नि तद्वनं वीक्ष्य रंतुं मनो दधे ॥ कथंभूतं ॥ मंजुघोषा ये अलिमृगद्विजा भ्रमरमृगपक्षिणस्तैराकुलं व्याप्तं ॥ महन्म नःप्रख्यापयःसरस्वता ॥ महतां मनसा प्रख्यं तुल्यं स्वच्छं पयो यस्मिन् ॥ तत्सरः आश्रयत्वेनास्त्यस्य तेन वा तेन शैत्यमुक्तं ॥ शतपत्रगंधिनेति परिमलवत्त्वं ॥ जुष्टं वनमिति मांद्यं सूचितं ३ ॥ अरुणपल्लवश्रिया सहस्व ६६

तस्माच्छ्रीकृष्णस्यैव परमार्थत्वात्तदेकशरणत्वेनामयत्नसिद्धो मोक्ष इति प्रकरणार्थमुपसंहरति ॥ समाश्रिता इति पुण्यं यशो
यस्य स पुण्ययशाः । स चासौ मुरारिश्च तस्य पदपल्लवप्लवं ये सम्यगाश्रिताः ॥ महत्पदं महतां पदमाश्रयं ॥ यद्वा मह
त्तत्त्वं पदं यस्येति तथा ॥ तेषां भवांबुधिर्वत्सपदमात्रं भवति ॥ किंच परं पदं श्रीवैकुंठाख्यं पदं स्थानं भवति ॥ पदं पदं यत्पदं वि
पदस्तत्पुनः कदाचिदपि तेषां पदं न भवति ॥ न ततः पुनरावर्तंत इत्यर्थः ॥ ५८ ॥ ५९ ॥ सुहृद्भिश्चरितं ॥ मुसंतोऽन्योन्यस्मिन्
वि २

समाश्रिताये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः ॥ भवांबुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषां
५८ ॥ एतत्ते सर्वमाख्यातं यत्पृष्टोहमिह त्वया ॥ यत्कौमारे हरिकृतं पौगंडे परिकीर्तितं ॥ ५९ ॥ एतत्सु
हृद्भिश्चरितं मुरारेरघार्दनं शाद्वलजेमनं च ॥ व्यक्तेतरं रूपमजोर्वभिष्टवं शृण्वन्गृणन्नेति नरो
ऽखिलार्थान् ॥ ६० ॥ एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ॥ निलायनैः सेतुबंधैर्मर्कटोत्प्लवनादिभिः ॥
६१ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे ब्रह्मस्तुतिर्नाम चतुर्दशोऽध्यायः ॥ १४ ॥

दीनित्यादिनोक्तं ॥ अघार्दनं च शाद्वलजेमनं भोजनं च ॥ व्यक्तेतरं ॥ व्यक्ताद्व्यक्तप्रपंचादितरत् शुद्धसत्त्वात्मकं वत्सपालरू
पं ॥ यद्वा ॥ व्यक्तेतरः चिद्विलासस्तं ॥ रूप्यत इति रूपं ॥ अजस्य उरु महानभिष्टवः तं ॥ ब्रह्मकृतां स्तुतिं शृण्वन् गृणन्न
रः सर्वपुरुषार्थान्प्राप्नोति ॥ ६० ॥ ६१ ॥ इति श्रीपरमानंदनृसिंहपदषट्पदः ॥ व्याकरोच्छ्रीधरः स्वामी यथामति विधेः
स्तुतिं ॥ ॥ इति दशमे चतुर्दशः ॥ १४ ॥

एवंश्रीमद्वृंदावनंप्रतिप्रीतःसन् ॥ अद्रेःसमीपवर्तिसरित्तटेषुपशून्संचारयन्सानुगःप्रीतमनारेमे ॥ ९ ॥ तामेवचर ति२
तिमाह्दशभिःक्वचिदित्यादिभिः ॥ १० ॥ ११ ॥ वर्हिणंनृत्यंतमनुअभिनृत्यति वर्हिणंअभिमुखोवानृत्यतीवा सखी

एवंवृंदावनंश्रीमत्प्रीतःप्रीतमनाःपशून् ॥ रेमेसंचारयन्नद्रेःसरिद्रोधस्सुसानुगः ॥ ९ ॥ क्वचिद्गा
यतिगायत्सुमदांधालिष्वनुव्रतैः ॥ उपगीयमानचरितःस्रग्वीसंकर्षणान्वितः ॥ १० ॥ अनुजल्प
तिजल्पंतंकलवाक्यैःशुकंक्वचित् ॥ क्वचित्सवल्गुकूजंतमनुकूजतिकोकिलं ॥ ११ ॥ क्वचिच्चकल
हंसानामनुकूजतिकूजितं ॥ अभिनृत्यतिनृत्यंतंवर्हिणंहासयन्क्वचित् ॥ १२ ॥ मेघगंभीर
याvाचानामभिर्दूरगान्पशून् ॥ क्वचिदाह्वयतिप्रीत्यागोगोपालमनोज्ञया ॥ १३ ॥ चकोरक्रौंच
चक्राह्वभारद्वाजांश्चवर्हिणः ॥ अनुरौतिस्मसत्वानांभीतवद्व्याघ्रसिंहयोः ॥ १४ ॥ क्वचित्
क्रीडापरिश्रांतंगोपोत्संगोपवर्हणः ॥ स्वयंविश्रमयत्यार्य्यंपादसंवाहनादिभिः ॥ १५ ॥

न्हासयन् ॥ १२ ॥ १३ ॥ चकोरादीन् ॥ अनुकृत्यरौति ॥ कदाचिच्चसत्वानांमध्येव्याघ्रसिंहयोस्ताभ्यांभीतवद्भव
ति सत्वेषुपलायमानेषुपलायतइत्यर्थः ॥ तयोःसत्वानांवस्तोद्रेकाणांभीतवद्भवतीतिवा ॥ १४ ॥ आर्य्यमग्रजं

॥ ९ ॥ विक्रमयन्ति विगाहितकक्षं नेगाश्च ॥ १६ ॥

तरुजन्मयेनकृतंतस्यतमसःपापस्यअपहत्यैनाशाय॥अथवायेनत्वयाईश्वरेणसर्वोपकारकंतरुजन्मकृतंत्वांनमं
ति॥एवंश्लाघ्येपिजन्मनियदज्ञानरूपंतमोऽस्तितस्यापहत्यै॥५॥हेअनघवनेगूढमपित्वांनत्यजंति॥त्वयिमनुष्य
विषयेपिगूढेसति॥मुनयोह्यलिवेषेणनिगूढास्त्वांभजंतीत्यर्थः॥६॥इयान्हिसतांनिसर्गइतियदस्तिस्वस्मिन्तत्त

श्रीभगवानुवाच॥अहोअमीदेववरामरार्चितंपादांबुजंतेसुमनःफलार्हणं॥नमंत्युपादाय
शिखाभिरात्मनस्तमोपहत्यैतरुजन्मयत्कृतं॥५॥एतेऽलिनस्तवयशोऽखिललोकतीर्थंगायं
तआदिपुरुषानुपदंभजंते॥प्रायोअमीमुनिगणाभवदीयमुख्यागूढंवनेऽपिनजहत्यनघा
त्मदैवं॥६॥नृत्यंत्यमीशिखिनईड्यमुदाहरिण्यःकुर्वंतिगोप्यइवतेप्रियमीक्षणेन॥सू
क्तैश्चकोकिलगणागृहमागतायधन्यावनौकसइयान्हिसतांनिसर्गः॥७॥धन्येयमद्यध
रणीतृणवीरुधस्त्वत्पादस्पृशोद्रुमलताःकरजाभिमृष्टाः॥नद्योऽद्रयःखगमृगाःसदयाव
लोकैर्गोप्योऽन्तरेणभुजयोरपियत्स्पृहाश्रीः॥८॥

गृहमागतायमहतेसमर्पयंतीति॥तृणवीरुधश्चतवपादौस्पृशंतीतितथाकरजाभिमृष्टाः॥नखैः
स्पृष्टाः॥सदयैरवलोकनैः॥श्रीरपियस्मैस्पृहयति॥केवलंनतुभुजयोरंतरेणवक्षसागोप्योधन्याइति॥८॥

भो० द० पू० विष्वचीनः सर्वतः प्रसृतः ॥२५॥२६॥२७॥२८॥ समनंगां समकृत्तं ॥ अ॥ प्रत्यग्द्वाभ्यां ॥ केशग्रहमिति गर्दभशावानुकरणं ॥ पर्यसरत् ॥ परितो

६८ तस्मात्त्वं कृतनराहाराद्धिंसैर्न्यैर्भिरमित्रहन् ॥ नसेव्यते पशुगणैः पक्षिसंघैर्विवर्जितं ॥ विद्यंते भुक्तपूर्वाणि फ ४

लानि सुरभीणि च ॥ एष वै सुरभिर्गंधो विष्वचीनो ऽवगृह्यते ॥५॥ प्रपक्वतालानि नः कृसगंधलोभितवृतसां

वांछास्ति महती राम गम्यतां यदि रोचते ॥६॥ एवं तु हृद्यं वचः श्रुत्वा सह हर्षिप्रयचिकीर्षया ॥ प्रहस्य जग्मतुर्गोपौ हतौ

तालवनं प्रभू ॥७॥ बलः प्रविश्य बाहुभ्यां तालांस्तांस्संपरिकंपयन् ॥ फलानि पातयामास मत्तेभगजइवौजसा ॥८॥

फलानां पततां शब्दं निशम्यासुररासभः ॥ अभ्यधावत्स्थितितलं समनंगं परिकंपयन् ॥९॥ समेत्य तरसा प्रत्यग्द्वा

प६ भ्यां पद्भ्यां बलं बली ॥ निहत्योरसि काशावृंमुंचन्नपर्यसरत्खलः ॥१०॥ पुनरासाद्यसंरब्धउक्रोधपराक्रमःस्थितः ॥ प३

चरणावपरौ राजन्नुवलाय प्राहिणोद्रुषा ॥११॥ ततो गृहीत्वा पदोर्भ्रामयित्वैकपाणिना ॥ चिक्षेप तरुराजाग्रे

स्वरर्तिपत भ्रामणात्यक्तजीवितं ॥१२॥ तेनाहतो महातालो वेपमानो महाशिराः ॥ पार्श्वस्थं कंपयन्नन्यं स चान्यं सो

ऽपिचापरं ॥१३॥ बलस्य लीलयोत्सृष्टखरदेहहतो हतः ॥ तालांश्चकंपिरे सर्वे महावातेरिता इव ॥१४॥

धावच्छ्रित्य र्षः ॥२०॥ उपक्रोष्टा गर्दभः ॥ पराक् प्रतिमुखः ॥ अपरौ पश्चिमौ बलायबलेहंतुं ॥२१॥ तरुराजस्तालः ॥२२॥२३॥

[illegible]

६८

मिथोनृत्यादीन्कुर्वतोगोपान्प्रशशंसतुः॥१६॥१७॥व्यजनैःपल्लवादिनिर्मितैः॥१८॥१९॥ईशचेष्टितइति गूढस्वै

नृत्यतोगायतःक्वापिवल्गतोयुध्यतोमिथः॥गृहीतहस्तौगोपालान्हसंतौप्रशशंसतुः॥१६॥क्व
चित्पल्लवतल्पेषुनियुद्धश्रमकर्षितः॥वृक्षमूलाश्रयःशेतेगोपोत्संगोपवर्हणः॥१७॥पादसंवाहनंच
क्रुःकेचित्तस्यमहात्मनः॥अपरेहतपाप्मानोव्यजनैःसमवीजयन्॥१८॥अन्येतदनुरूपाणिमनो
ज्ञानिमहात्मनः॥गायंतिस्ममहाराजस्नेहक्लिन्नधियःशनैः॥१९॥एवंनिगूढात्मगतिःस्व
माययागोपात्मजत्वंचरितैर्विडंवयन्॥रेमेरमालालितपादपल्लवोग्राम्यैःसमंग्राम्यवदी
शचेष्टितः॥२०॥श्रीदामानामगोपालोरामकेशवयोःसखा॥सुवलस्तोककृष्णाद्यागोपाःप्रेम्णे
दमब्रुवन्॥२१॥राममरामहावाहोकृष्णदुष्टनिवर्हण॥इतोविदूरेसुमहद्वनंतालालिसंकुलं॥२२॥
फलानितत्रभूरीणिपतंतिपतितानिच॥संतिकिंत्ववरुद्धानिधेनुकेनमहात्मना॥२३॥सोतिवी
र्योऽसुरोरामहेकृष्णखररूपधृक॥आत्मतुल्यवलैरन्यैर्ज्ञातिभिर्वहुभिर्वृतः॥२४॥

भावत्वेपिअंतरांतराईशस्येवचेष्टितानिदर्शयंत्येवमित्याह॥२०॥ईशचेष्टितत्वमेवदर्शयितुमाह॥श्रीदामेति॥स्तो

कृष्णसखाःकथिताः॥गोपालास्तालालिसंकुलमिति॥ स्तोककृष्णो॥२२॥२३॥२४॥

भा० द० पू० मुकुंदस्य मुखपद्मगतं सारघं मधु श्रीहर्योर्विरहस्तस्माज्जातं तापं स च तासां सत्कृतिं पूजां ताम् आह सव्रीडेति ॥ सलज्जेन हासे
१६९ न विनयेन च यथा भवति तथा ॥ यदेतत् किं ॥ अपांगमोक्षं कटाक्षदर्शनं ॥ यथा तां सत्कृतिं प्राप्नोति ॥४३॥४४॥४५॥४६॥४७॥४८॥४९॥ सं

पीत्वा मुकुंदमुखसारघमक्षिभृंगैस्तापं जहुर्विरहजं व्रजयोषितोह्नि ॥ तत्सत्कृतिं समधिगम्य विवे
श गोष्ठं सव्रीडहासविनयं यदपांगमोक्षं ॥४३॥ तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले ॥ यथाकामं यथा
कालं व्यधत्तां परमाशिषः ॥४४॥ गताध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः ॥ नीवीं वसित्वा रुचिरां दिव्य
स्रग्गंधमंडितौ ॥ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ ॥ संविश्य वरशय्यायां सुखं सुषुपतुर्व्रजे ॥४५॥
एवं स भगवान्कृष्णो वृंदावनचरः क्वचित् ॥ ययौ राममृते राजन्कालिंदीं सखिभिर्वृतः ॥४६॥ अथ गावश्च
गोपाश्च निदाघातपपीडिताः ॥ दुष्टं जलं पपुस्तस्यास्तृषार्ता विषदूषितं ॥४७॥ विषांभस्तदुपस्पृश्य दैवो
पहतचेतसः ॥ निपेतुर्व्यसवः सर्वे सलिलांते कुरूद्वह ॥४८॥ वीक्ष्य तान्वै तथाभूतान्कृष्णो योगेश्वरेश्वरः
ईक्षयामृतवर्षिण्या स्वनाथान्समजीवयत् ॥४९॥ ते संप्रतीतस्मृतयः समुत्थाय जलांतिकात् ॥
आसन्सुविस्मिताः सर्वे वीक्ष्यमाणाः परस्परम् ॥ १५ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥

प्रतीतिमद्य एव इतां प्राप्ता स्मृतिर्यैस्ते संप्रतीतस्मृतयः ॥ यद्वा ॥ सम्यक् प्रतीता अतिप्राप्ता स्मृतिर्यैस्ते तथा इति ॥५०॥ १६९

यस्मिन्निदं विश्वं ओतं ऊर्द्ध्वतंतुषु पट इव ग्रथितं ॥ प्रोतं तिर्य्यक्तंतुषु पट इव संग्रथितं ॥ सर्वतोऽनुस्यूतं वर्त्तत इत्यर्थः ॥
३५ ॥ ३६ ॥ ३७ ॥ घनैर्नभ इव भुवस्तलं रराज ॥ तत्र फलप्रकरसंकीर्णमिति दैत्यदेहैः ॥ तालाग्रैस्सह संकीर्णमित्यरुणम्बेत

नैतच्चित्रं भगवति ह्यनंते जगदीश्वरे ॥ ओतं प्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः ॥ ३५ ॥ ततः कृष्णं च
रामं च ज्ञातयो धेनुकस्य ये ॥ क्रोष्टारोऽभ्यद्रवन्सर्वे संरब्धा हतबांधवाः ॥ ३६ ॥ तांस्तानापततः कृष्णो
रामश्च नृप लीलया ॥ गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ॥ ३७ ॥ फलप्रकरसंकीर्णं दैत्यदेहै
र्गतासुभिः ॥ रराज भूः सतालाग्रैर्घनैरिव नभस्तलं ॥ ३८ ॥ तयोस्तत्सुमहत्कर्म निशम्य विबुधादयः ॥
मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ॥ ३९ ॥ अथ तालफलान्यादन्मनुष्या गतसाध्वसाः ॥
तृणं च पशवश्चेरुर्हतधेनुककानने ॥ ४० ॥ कृष्णः कमलपत्राक्षः पुण्यश्रवणकीर्तनः ॥ स्तूय
मानोऽनुगैर्गोपैः साग्रजो व्रजमाविशत् ॥ ४१ ॥ तं गोरजश्छुरितकुंतलबद्धबर्हवन्यप्रसूनरुचिरेक्ष
णचारुहासं ॥ वेणुं क्वणंतमनुगैरनुगीतकीर्त्तिं गोप्यो दिदृक्षितदृशोऽभ्यगमन्समेताः ॥ ४२ ॥

नीलघनसादृश्यं संपादनं ॥ ३८ ॥ ३९ ॥ आदन् अभक्षयन् ॥ ४० ॥ ४१ ॥ गोरजोभिश्छुरितेषु कुंतलेषु बद्धं बर्हं ॥ वन्यानि प्र
सूनानि च यस्य ॥ रुचिरमीक्षणं चारुहासश्च यस्य तं ॥ वत्तं च ॥ दिदृक्षितदृशः ॥ दिदृक्षिता दर्शनोत्कंठा युक्ता दृशो यासां

किंच विप्रुष्मता अंबुकणयुक्तेन विषोदकतरंगस्पर्शिना मरुतेन संस्पृष्टा यस्य तीरगा म्रियंते स ह्रदस्त्रासीदिति ॥ ५ ॥ तं का-
लियं ॥ चंडो वेगो यस्य तं विषमेव वीर्य्यं यस्य तं ॥ कदंबमिति भाविना श्रीकृष्णचरणस्पर्शभाग्येन स एकस्तत्तीरे
न शुष्कः ॥ अथ वा अमृतमाहरता गरुडेनामृतमाक्रांतत्वादिति च पुराणांतरे ॥ आस्फोट्य बाहुं करतलेनाहत्य गाढा दृढव

विप्रुष्मता विषोदोर्मिमारुतेनाभिमर्शिताः ॥ म्रियंते तीरगा यस्य प्राणिनः स्थिरजंगमाः ॥ ५ ॥ तं चं-
डवेगविषवीर्य्यमवेक्ष्य तेन दुष्टां नदीं च खलसंयमनावतारः ॥ कृष्णः कदंबमधिरुह्य ततोऽतितुं-
गमास्फोट्य गाढरशनो न्यपतद्विषोदे ॥ ६ ॥ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषो-
च्छ्वसितांबुराशिः ॥ पर्य्यक्प्लुतो विषकषायविभीषणोर्मिर्धावन्धनुःशतमनंतबलस्य किं तत् ॥
७ ॥ तस्य ह्रदे विहरतो भुजदंडघूर्णवार्घोषमंग वरवारणविक्रमस्य ॥ आश्रुत्य तत्स्वसदनाभिभवं
निरीक्ष्य चक्षुःश्रवाः समसरत्तदमृष्यमाणः ॥ ८ ॥

रशना नाम कटिबंधवस्त्रं येन सः ॥ ६ ॥ तदा सर्पह्रदः पु-
रुषश्रेष्ठस्य पतनभारेण संक्षोभितानामुरगाणां विषैरुच्छ्वसितोऽम्बुराशिर्यस्य सः ॥ विषेण कषायी ईषद्रक्ता भयंकरा ऊ-
र्म्मयो यस्य सः ॥ पर्य्यक् परितः ॥ धनुःशतं प्लुतः नैतच्चित्रमित्याह ॥ अनंतबलस्येति ॥ ७ ॥ भुजदंडाहतोदकघो-
षं श्रुत्वा ॥ तत्र ततः स्वसदनाभिभवं च निरीक्ष्य तदसहमानः सर्पः समसरत् ॥ समाजगाम ॥ ८ ॥ ॥

इति श्रीदशमे पंचदशः ॥ १५ ॥ षोडशे कालियस्यात्र निग्रहो यमुनाह्रदे ॥ तत्पत्नीभिः स्तुतेनाथ कृतः सेनानुग्रहः पुनः ॥ ह
त्वा रासभदैत्यं या नजग्ध्वा तालफलान्यलं प्रीतीनृत्यत्कृष्ण रंगो कालियस्य कलानिधिः ॥ उदवासयदित्याह मारि
तवान् ॥ १ ॥ बहूनि युगानि श्रावासो यस्य तन्महिं ॥ सवैश्च हिः ॥ श्र जलचरो पि तस्मिन्नंतर्जले तेय यथा येन प्रकारेणासी

अन्वभं सततद्राजन् गोविंदानुग्रहेच्छितं ॥ पीत्वा विषं परेतस्य पुनरुत्थानमात्मनः ॥ २१ ॥ इति श्री
मद्भागवते महापुराणे दशमस्कंधे धेनुकवधो नाम पंचदशोऽध्यायः ॥ १५ ॥ श्रीशुक उवाच ॥
विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः ॥ तस्या विशुद्धिमन्विच्छन् सर्पं तमुदवासयत् ॥ १ ॥ राजो
वाच ॥ कथमंतर्जलेऽगाधे न्यगृह्णाद्भगवानहिं ॥ स वै बहुयुगावासं यथासीद्विप्र कथ्यतां ॥ २ ॥ ब्रह्मन्
भगवतस्तस्य भूम्नः स्वच्छंदवर्तिनः ॥ गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ॥ ३ ॥ श्रीशुक उवाच ॥
कालिंद्यां कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना ॥ श्रप्यमाणपया यस्मिन् पतंत्युपरिगाः खगाः ॥ ४ ॥

त ॥ अथवा बहूनि युगानि निवासो यथा भवति तथा तेन प्रकारेण स तत्रासीदिति कथ्यतामिति ॥ २ ॥ गोपालेन यदुदा
रमाचरितं तदेवामृतं ततः कथ्यतामिति ॥ ३ ॥ श्रप्यमाणं पच्यमानं पयो यस्य सः ॥ अत उपरि गच्छंतः खगाः य
स्मिन् पतंति ॥ ४ ॥

भा० द० पू० कातरान्भीतान् ॥१४॥ भगवंतं लक्षयंति यानि तैः पदैः सूचितया पदव्या मार्गेण ॥१५॥ पदैर्मार्गेज्ञानप्रकारमाह ॥ त इति
७१ विश्पतेः श्रीकृष्णस्य ॥ अन्येषां पदानामंतरेंऽतरे मध्येमध्ये तत्तद्रूपोहेन ॥ गवां श्रुतीनां मार्गे त्वरा ॥ अप्रमत्ता ॥ योगिनः ॥ तत्तदु

तांस्तथा कातरान्वीक्ष्य भगवान्माधवो बलः ॥ प्रहस्य किंचिन्नोवाच प्रभावज्ञोऽनुजस्य सः ॥१४॥ तेन्वेषमा
णा दयितं कृष्णं सूचितया पदैः ॥ भगवल्लक्षणैर्जग्मुः पदव्या यमुनातटं ॥१५॥ ते तत्र तत्राब्जयवांकुशाशनि
ध्वजोपपन्नानि पदानि विश्पतेः ॥ मार्गे गवामन्यपदांतरांतरे निरीक्षमाणा ययुरंग सत्वराः ॥१६॥ अंत
र्ह्रदे भुजगभोगपरीतमारात्कृष्णं निरीहमुपलभ्य जलाशयांते ॥ गोपांश्च मूढधिषणान्परितः पशूंश्च
संक्रंदतः परमकश्मलमापुरार्त्ताः ॥ गोप्योनुरक्तमनसो भगवत्यनंते तत्सौहृदस्मितविलोकगि
रः स्मरंत्यः ॥ ग्रस्तेहिना प्रियतमे भृशदुःखतप्ताः शून्यं प्रियव्यतिहृतं ददृशुस्त्रिलोकं ॥१८॥ ताः कृष्ण
मातरमपत्यमनुप्रविष्टां तुल्यव्यथाः समनुगृह्य शुचः स्रवंत्यः ॥ तास्ता व्रजप्रियकथाः कथयंत्य
आसन् ॥ कृष्णानने र्पितदृशो मृतकप्रतीकाः ॥१९॥ कृष्णप्राणान्निर्विशतो नंदादीन्वीक्ष्य तं ह्रदं ॥ प्र
त्यषेधत्स भगवान् रामः कृष्णानुभाववित् ॥२०॥

पाध्यपवादेन यथापूर्वं तत्वं मृगयंतीति हृदि इति भावः ॥१६॥ तत्तत्र सर्पशरीरवेष्टितं कृष्णं दृष्ट्वा निरीहं गोपांश्च पशूंश्च तथा
तथा निरीक्ष्यार्त्ताः परममोहमापुः ॥१७॥ प्रियेण श्रीकृष्णेन विरहितं त्रैलोक्यं शून्यं ददृशुः ॥१८॥१९॥२०॥ ७१

प्रेक्षणीयश्चसुकुमारश्च घनवदुज्ज्वलश्च तं ॥ श्रीवत्सपीतवसनं कृ देविहरतं ॥ श्रीवत्सेनसंयुक्तमुज्ज्वलत्पीतवसनं यस्य
तं ॥ भुजया भोगेन च छादं अवेष्टयत् ॥ ९ ॥ सप्रियोयेषांते तत्प्रियाः ॥ ते च ते सखायश्चेति तथा ॥ १० ॥ ११ ॥ भुवि भूकंपाद
यः ॥ दिवि उल्कापातादयः ॥ आत्मनि वामनेत्रस्फुरणादयः ॥ आसन्नभयशंसित्वं शीलयेषां ते ॥ १२ ॥ तानालक्ष्यो

तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यं ॥ क्रीडंतमप्रतिभयं कमलोदरांघ्रिं
संदश्य मर्मसु रुषा भुजया च छाद ॥ ९ ॥ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृ
शार्ताः ॥ कृष्णेर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः ॥ १० ॥ गावो वृषा वत्सत
र्यः क्रंदमानाः सुदुःखिताः ॥ कृष्णे न्यस्तेक्षणा भीता रुदंत्य इव तस्थिरे ॥ ११ ॥ अथ व्रजे महोत्पातास्त्रिविधा
ह्यतिदारुणाः ॥ उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः ॥ १२ ॥ तानालक्ष्य भयोद्विग्ना गोपा नंदपुरोग
माः ॥ विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतं ॥ तैर्दुर्निमित्तैर्निधनं मत्वा प्राप्तमतद्विदः ॥ तत्प्राणास्तन्मन
स्कास्ते दुःखशोकभयातुराः ॥ आबालवृद्धवनिताः सर्वेङ्ग पशुवृत्तयः ॥ निर्जग्मुर्गोकुलाद्दीनाः कृष्णदर्श
नलालसाः ॥ १३ ॥

कुलान्निर्जग्मुरिति तृतीयेनान्वयः ॥ भयोद्विग्नाः भयहेतोर्भीताः ॥ भयेन कंपमाना इति वा ॥ न तं विदंती
त्यतद्विदः ॥ पशुवृत्तयः ॥ अतिवत्सलाः ॥ १३ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ राम राम राम ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥

२४॥ श्रुत्वैकशीर्ष्णः॥ शतएकानि मुखानि शीर्षाणि यस्य तस्य॥ क्षीणायुषो पि पुनर्भ्रमतः यद्यच्छिरो न नमते तत्तच्यतां न
जहाति नृत्यच्छलेनांघ्रिपातैस्तत्तन्ममर्द॥ तदास्यात्सम्यतोसृग्रक्तं भ्यो नस्तो नासाविवरेभ्यश्च अस्रगवमन्॥ २५॥ पुनरपि कि
धाउद्यैर्निःश्वसतो यद्यत्समुन्नमति तत्तत्सदा पातेनानुनमयन् त्रिरक्षि स्मिन्नवसरे हृष्टैर्गंधर्वादिभिः शेषासनः पुरा
तं नेहि सुधृत मवेत्यन्तरात दीपगंधर्वसिद्धसुरचारणदेववध्वः॥ प्रीत्या मृदंगपणवानकवाद्यगीतपु
ष्पोपहारनुतिभिः सहसोपसेदुः॥ २५॥ यं यं शिरो न नमतेंऽग शतैकशीर्ष्णस्तं तं ममर्द खरदंडधरोंऽ
घ्रिपातैः॥ क्षीणायुषो भ्रमत उल्बणमास्यतोसृङ्नस्तो वमन्परमकश्मलमाप नागः॥ २६॥ तस्या
क्षिभिर्गरलमुद्वमतः शिरस्सु यद्यत्समुन्नमति निःश्वसतो रुषोच्चैः॥ नृत्यन्पदानुनमयन्दमयांब
२ भूव पुष्पैः प्रपूजित इवेह पुमान्पुराणः॥ २७॥ तच्चित्रतांडवविरुग्णफणातपत्रो रक्तं मुखैरुरु व
मन्नृप भग्नगात्रः॥ स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम॥ २८॥ कृष्णस्य
गर्भजगतोतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रं॥ दृष्ट्वाहिमाद्यमुपसेदुरमुष्य पत्न्य आर्ता
ः श्लथद्वसनभूषणकेशबंधाः॥ २९॥
णः पुरुषद्वसयशोदानंदनः पुष्पैः प्रपूजितः॥ यदा तदा गंधर्वादिभिः पुष्पैः प्रपूजितो गोपैः॥ पुराणः पुमानिव दृष्ट
इति॥ पद्यां॥ पुष्पैः प्रपूजित इव प्रसन्नः सन् दमयांबभूव हिंते कृतवानित्यर्थः॥ २७॥ अरणं शरणं॥ २८॥ गर्भजगतोतिभा

रेणावसन्नं॥ आक्रांतं॥ पार्ष्णिः पादपृष्ठे॥ आघ्राघ्री कंसेऽस्त्र
यंतो विस्त्रं समानाव सन्नाइयोया सीनाः॥ २९॥

।२१।।

अनन्यगतिमात्मानमित्थंनिरीक्ष्य ।। अतएवात्महेतोः स्वगोकुलमतिदुःखितमाज्ञाय उरंगबंधादुदतिष्ठदित्यन्वयः ।। तस्यप्रथ्य
मानेनवपुषाव्यथितात्तशरीरो भुजंगः कुंडलिमुन्मुच्यतंत्यक्त्वाकुपितः ।। स्वफणानुन्नमय्यश्वसन्केवलमीक्षमाणस्तस्थौ
स ३ कथंभूतः श्वसनरंध्रेषुनासाविवरेषुविषंयस्य ।। तथाअंबरीषमंडकपाकभाजनं ।। तद्वत्संतप्तानिईक्षणानियस्य ।। तथाउल्मुका

इत्थंस्वगोकुलमनन्यगतिंनिरीक्ष्य सस्त्रीकुमारमतिदुःखितमात्महेतोः ।। आज्ञायमर्त्यपदवीमनुवर्तमा
नः स्थित्वामुहूर्तमुदतिष्ठदुरंगबंधात् ।।२१।। तत्प्रथ्यमानवपुषाव्यथितात्मभोगस्त्यक्त्वोन्नमय्यकुपि
तः स्वफणान्भुजंगः ।। तस्थौश्वसञ्छ्वसनरंध्रविषांबरीषस्तब्धेक्षणोल्मुकमुखोहरिमीक्षमाणः ।।
२२।। तंजिह्वयाद्विशिखयापरिलेलिहानंद्वेसृक्विणीह्यतिकरालविषाग्निदृष्टिं ।। क्रीडन्नमुंपरिससार
यथाखगेंद्रोबभ्रामसोप्यवसरंप्रसमीक्षमाणः ।। २३ ।। एवंपरिभ्रमहतौजसमुन्नतांसमानम्यतत्
पृथुशिरस्स्वधिरूढआद्यः ।। तन्मूर्द्धरत्ननिकरस्पर्शातितांम्रपादांबुजोऽखिलकलादिगुरुर्ननर्त ।।२४।।

निमुखेषुयस्यसचसचसच ।।२२।। हरिस्तुक्रीडन्नतममुंसर्पंपरिससार ।। अतिकरालाविषाग्नियुक्तादृष्टिर्यस्यतं ।। जि
ह्वयाद्विशिखयाप्रतिसृक्वं ।।२३।। एवंपरिभ्रमणेनहृतमोजोयस्यतं ।। उन्नतावंसौयस्यतं ।। तस्यमूर्द्धसुयेरत्ननिकरा
स्तेषांस्पर्शेनात्यरुणौपादांबुजेयस्यसः ।। ननुकथंचंचलेषुशिरस्सुननर्ततत्राह ।। अखिलकलानामादिगुरुः ।।२४।।

भा०द०५० तत्तप आदिनिमित्तभाग्योदयः ॥ किंत्वचिंत्यं तव कृपावैभवमित्याहुः श्लोकत्रयेण कस्यानुभावइति तत्तप आदिमात्र
 हेतुर्दया पि यस्याः श्रियः प्रसादमिच्छंति ॥ सा श्रीर्ललना पि श्रीरेव ललना उत्तमा स्त्री यस्य त्वदंघ्रिस्पर्शाधिकारस्य वांछ
यात पृ आचरत्त ॥ अस्य सर्पस्य स किं कृतं इति को वेत्तीत्यर्थः ॥ ३४ ॥ यत्तेव पादरजः प्रपन्नाः प्राप्ताः ॥ पारमेष्ठ्यमपि लब्ध
मन्यंते ॥ ३५ ॥ अहो तदेषः अयत्नतः प्राप अन्यैः श्रियादिभिरपि पुनः कथंभूतः पादरजः ॥ यदिच्छतः सेव्यमेव भव

कस्यानुभावोऽस्य न देव विद्महे तवांघ्रिरेणुस्पर्शाधिकारः ॥ यद्वांछया श्रीर्ललनाचरत्तपो विहा
य कामान्सुचिरं धृतव्रता ॥ ३४ ॥ न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यं ॥ न योगसि
द्धीरपुनर्भवं वा वांछंति यत्पादरजःप्रपन्नाः ॥ ३५ ॥ तदेष नाथाप दुरापमन्यैस्तमोजनिः क्रोधव
शोऽप्यहीशः ॥ संसारचक्रे भ्रमतः शरीरिणो यदिच्छतः स्याद्विभवः समक्षः ॥ ३६ ॥ नमस्तुभ्यं भग
वते पुरुषाय महात्मने ॥ भूतावासाय भूताय पराय परमात्मने ॥ ३७ ॥

त्विति प्रार्थ्यं यत एव समक्षः प्रत्यक्षः एव विभवः ॥ अपेक्षितार्थसंपद्भवति ॥ ३६ ॥ नमस्तुभ्यं भगवते ॥ अचिंत्यैश्वर्या
दिगुणाय तदुपपादयति दशभिः श्लोकैर्विशेषणानि ॥ पुरुषाय ॥ अंतर्यामिरूपेण वर्त्तमानाय ॥ महात्मने एवम
पिनातिपरिछिन्नाय कुतः भूतावासाय ॥ आकाशाद्याश्रयाय ॥ एतदपि कुतः ॥ भूताय पूर्वमपि संते कुतः ॥ पराय का

रणाय किंच परमात्मने कारणातीताय ॥ ३७ ॥

ताःशरणंप्रपन्नाःसत्यस्तंप्रणेमुः॥सुविग्नमनसः॥अतिविह्वलचित्ताः॥भुविइतितस्मिन्स्थाने॥जलादधस्ताद्दा तीरेवा शमलस्यपापात्मनोपिभर्त्तुर्मोक्षेप्सवः॥भर्त्तुर्यच्छमलंतस्यवा॥भूतपतिंप्राणिमात्रस्यपतिं॥शरणदंश्रीकृष्ण ति २
प्रदं॥२९॥अथमंतावत्कुपितंभगवंतंदंडानुमोदनेनोपशमयंत्यःस्तुवंति॥न्याय्योहीति॥तत्रदंडानुमोदनेनषड्भिःश्लो
भिस्तुहरेर्नुतिः॥प्रार्थनंपंचभिःश्लोकैस्ततःपन्नगयोषितां॥नचनिग्रहानुग्रहलक्षणंवैषम्यंतवास्तीत्याहुः॥धत्ते
तास्तंसुविग्नमनसोऽथपुरस्कृतार्भाः॥कायंनिधायभुविभूतपतिंप्रणेमुः॥साध्व्यःकृतांजलिपुटाः
शमलस्यभर्तुर्मोक्षेप्सवःशरणदंशरणंप्रपन्नाः॥३०॥नागपत्न्यऊचुः॥न्याय्योहिदंडःकृतकिल्वि
षेऽस्मिंस्तवावतारःखलनिग्रहाय॥रिपोःसुतानामपितुल्यदृष्टेर्धत्सेदमंफलमेवानुशंसन्॥३१॥
अनुग्रहोऽयंभवताकृतोहिनोदंडोऽसतांतेखलुकल्मषापहः॥यद्दंदशूकत्वममुष्यदेहिनःक्रोधोऽ
पितेऽनुग्रहएवसंमतः॥३२॥तपःसुतप्तंकिमनेनपूर्वंनिरस्तमानेनचमानदेन॥धर्मोऽथवासर्वज
नानुकंपयायतोभवांस्तुष्यतिसर्वजीवः॥३३॥
दमइति अनुशंसन्॥आलोचयन्॥३१॥निग्रहोपित्वनुग्रह
मेवेत्युक्तं॥इदानीमनुग्रहएवायंननिग्रहइत्याहुः॥अनुग्रहइति॥नोऽस्माकं॥यस्मादस्यसर्पत्वंदृश्यते अतस्तन्मूलपा
पनिवर्तकोदंडोऽनुग्रहएव॥क्रोधत्वेनप्रतीयमानोपीत्यर्थः॥३२॥महांश्चायमनुग्रहइति तस्यपूर्वपुण्यमभि
नंदंति॥तपइति॥स्वयंमानरहितेन॥अन्येभ्योमानदेनच॥सर्वजीवयतीति॥सर्वजीवः॥३३॥ प ५५ ॥ ॥५५॥॥

तंत्वहंकारानावृत्तत्वइति स्तुवंति नमोऽनंताय॥ अहंकारपरिच्छेदात॥ अतःसूक्ष्माय अदृश्यत्वात॥ अत एव कूटस्था
य उपाधिकृतविकाराभावात॥ अत एव विपश्चिते सर्वज्ञाय एवं वस्तुत्वेन वस्तुत्वाऽचिंत्यमायत्वेन स्तुवन्ति॥ नानावादानु
रोधाय॥ अस्ति नास्ति सर्वज्ञः किंचिज्ज्ञः॥ बद्धः मुक्तः॥ एकः॥ अनेक इत्यादिनानावादाननुरुणद्धि मायया अनुवर्त्तते यस्तस्मै
किंच॥ वाच्यवाचकशक्तये अभिधेयाभिधानशक्तिभेदादपि नानात्वेन प्रतीतायेत्यर्थः॥४१॥ अनावृतत्वमेव हेत्वंतरे

नमोनंताय सूक्ष्माय कूटस्थाय विपश्चिते॥ नानावादानुरोधाय वाच्यवाचकशक्तये॥४१॥ न
मः प्रमाणमूलाय कवये शास्त्रयोनये॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः॥४२॥ नमः
कृष्णाय रामाय वसुदेवसुताय च॥ प्रद्युम्नायानिरुद्धाय सात्वतांपतये नमः॥४३॥ ॥६६

णापि सूचयंत्यः स्तुवंति॥ नमः प्रमाणमूलाय चक्षुरादीनां चक्षुरादिरूपाय॥ अत एव कवये स्वयं तन्निरपेक्षज्ञा
नाय॥ कुतः॥ शास्त्रयोनये वेदात्मकनिःश्वासाय॥ किंच॥ प्रवृत्ताय निवृत्ताय निगमाय नमो नमः॥४२॥ किंच॥ अ
नावृतैश्वर्यत्वादेव चतुर्मूर्तिरूपेण सर्वोपास्यत्वेन नमंति नमः कृष्णायेति श्लोकेन॥ रामाय संकर्षणाय वसुदेव
सुताय च॥ वसुदेवशब्देन शुद्धसत्वं तत्र प्रकाशमानाय॥ वसुदेवायेत्यर्थः॥ सात्वतानामुपासकानां पतये॥ सा
लोक्यादिनापालकाय एवं चतुर्मूर्तये कृष्णाय तुभ्यं नमइति॥४३॥

कारणत्वं कारणातीतत्वं च समर्थयितुमाहुः ॥ ज्ञानविज्ञाननिधये ॥ ज्ञानं ज्ञप्तिः विज्ञानं चिच्छक्तिस्तयोर्निधये ता
५२ भ्यां पूर्णाय कथं तथात्वं अत उक्तं ब्रह्मणे ॥ अनंतशक्तये ॥ ब्रह्मत्वे कथंभूताय ॥ अगुणाय ॥ अविकाराय ॥ कथंभूताय अनंतश
क्तये प्राकृताय प्रकृतिप्रवर्तकाय ॥ अप्राकृतायेति वा ॥ अप्राकृतानंतशक्तियुक्ताय अयमर्थः ॥ अगुणत्वादविका
रं ब्रह्म ज्ञप्तिमात्रत्वात्कारणातीतं प्रकृतिप्रवर्तकानंतशक्तिः ॥ विज्ञाननिधित्वादीश्वरः ॥
कारणं तदुभयात्मने नमः इति ॥ ३८ ॥ अनंतशक्तित्वात्कालशक्त्या विश्वसृष्ट्यादिरूपेण नमस्यंति ॥ कालाय काल

ज्ञानविज्ञाननिधये ब्रह्मणेऽनंतशक्तये ॥ अगुणायाविकाराय नमस्ते प्राकृताय च ॥ ३८ ॥ कालाय
कालनाभाय कालावयवसाक्षिणे ॥ विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ॥ ३९ ॥ भूतमात्रेंद्रिय
प्राणमनोबुद्ध्याशयात्मने ॥ त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ॥ ४० ॥ ॥ ss ॥ ॥ ॥

स्वरूपाय ॥ कालनाभाय ॥ कालशक्त्याश्रयाय ॥ कालावयवानां क्षणादिसमयानां साक्षिणे ॥ तत्स्वविश्वाय विश्व
रूपाय ॥ तर्हि किं जडोऽहं ॥ न ॥ तदुपद्रष्ट्रे ॥ न च द्रष्टृमात्राय ॥ किंतु तत्कर्त्रे ॥ न च कर्तृमात्राय ॥ विश्वहेतवे सर्वकारण
रूपाय ॥ ३९ ॥ तदेवाहुः ॥ भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने ॥ आशयश्चित्तं भूतादिरूपाय ॥ अंतःसर्वकारक
पायेति ॥ अहंकारात्मतया नमस्यति ॥ त्रिगुणेनेति ॥ एवं सृष्टकार्ये यस्त्रिगुणोऽभिमानस्तेन गूढा स्वांशभूतानामात्मना

॥ १० ॥ [illegible]

भा०८०पू० विशेषणैरशक्तीर्माः पंच पंचाशता नुतः ॥ अहिस्त्रीभिः प्रसन्नोऽवस्तासामिवभवेद्धरिः ॥ एवं तावद्दंडानुमोदनेन नमस्का
७५ रैश्च भगवंतं प्रसाद्येदानीं त्वदधीनानां प्राणिनां कोऽपराधइत्याशयवत्यः प्रार्थयंते ॥ त्वेहीति ॥ अस्य लोकस्य यज्जन्मा
दि स्त्वमेवाकृत ॥ अकरोः ॥ तत्र तांस्तान्संस्काररूपेणसतः स्वभावान् ॥ चोरत्वादीन् प्रबोधयन् इहसे क्रीडसि ॥ यद्वा ॥ अ

त्वं ह्यस्य जन्मस्थितिसंयमान्विभो गुणैरनीहोऽकृतकालशक्तिधृक् ॥ तत्तत्स्वभावान्प्रतिबोधयन्सतः स
मीक्षयामोघविहार ईहसे ॥ ४७ ॥ तस्यैव तेऽमूस्तनवस्त्रिलोक्यां शांता अशांता उत मूढयोनयः ॥ शांताः
प्रियास्ते ह्यधुनावितुं सतां स्थातुश्च धर्मपरिप्सयेहतः ॥ ४८ ॥ अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः ॥
स्य क्षंतुमर्हसि शांतात्मन्मूढस्य त्वामजानतः ॥ ४९ ॥ अनुगृह्णीष्व भगवन्प्राणांस्त्यजति पन्नगः ॥
स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयतां ॥ ५० ॥ विधेहि ते किंकरीणामनुष्ठेयं तवाज्ञया ॥ य
च्छ्रद्धयानुतिष्ठन्वै मुच्यते सर्वतोभयात् ॥ ५१ ॥

स्य जन्मादीन् त्वमीहसइत्यन्वयः ॥ कथंभूतः ॥ अकृता अनाद्या कालशक्तिस्तां धारयतीति तथा ॥ अन्यत्समानं ॥ ४७ ॥
अमूस्तस्यैव ते तनवः ॥ तन्वंतइति क्रीडोपस्कराः तथापि तव शांताः प्रियाः सतां धर्मपरिपालनेच्छया ई
हतः प्रवर्तमानस्य ॥ अतस्तानवितुं स्थातुः स्थितस्य ॥ ४८ ॥ एवं चेत्तवाप्रियाचरणाद्यपराधस्तर्हि सोढव्यइति
४९ ॥ ५० ॥ युष्मदनुग्रहमन्येषां मृत्युरेवेति चेन्नेत्याहुः ॥ विधेहीति ॥ त्वदाज्ञया प्राणिनो नाद्यामेति भावः ॥ ५१ ॥ ७५ ॥

कथं चक्षुर्भूतिरिति तत्राहुः ॥ नमो गुणप्रदीपायेति गुणान् अंतःकरणानि तान्प्रदीपयतीति तथा तस्मै चित्ताद्यधिष्ठातृ
त्वेन चक्षुर्मूर्तित्वेनेत्यर्थः ॥ ननु तथा एकस्मै कथं चेतृत्वमत आहुः ॥ गुणात्मछादनाय चेतरैर्गुणैरुपासकानां फलवैचि
त्र्यात्मानमाछादयता नानात्वेन प्रकाशमानायेत्यर्थः ॥ ननु कथं तर्हि प्रतीतिरत उक्तं गुणवृत्त्युपलक्ष्याय ॥ चित्तादीनां चेतनाध्य
वसायादिवृत्तिभिरुपलक्ष्याय ॥ उपलक्षणमेवाहुः गुणद्रष्ट्रे तत्साक्षिणे ॥ कथंचिदुपलक्ष्य एवं तत्रेय इत्याहुः स्वसंविदे अगो
चरायेत्यर्थः ॥४४॥ अगोचरत्वस्तूपलक्ष्यत्वे चेद्दर्शयेत्यो न मेति ॥ अव्याकृतविहाराय ॥ अतर्क्यमहिम्न इत्यर्थः ॥ सर्वव्याकृतसि

नमो गुणप्रदीपाय गुणात्मछादनाय च ॥ गुणवृत्त्युपलक्ष्याय गुणद्रष्ट्रे स्वसंविदे ॥४४॥ अव्याकृतविहा
य सर्वव्यापकसिद्धये ॥ हृषीकेश नमस्तेऽस्तु मुनये मौनशीलिने ॥४५॥ परावरगतिज्ञाय सर्वाध्यक्षाय ते
नमः ॥ अविश्वाय च विश्वाय तद्द्रष्ट्रेऽस्य च हेतवे ॥४६॥ द्धये ॥ सर्वकार्योत्पत्तिप्रकाशकत्वेनोपलक्षणयोग्यायेत्यर्थः ॥

उपलक्षणांतरमाहुः ॥ हृषीकेश करणप्रवर्तक ॥ किंविषयलिप्सया न ॥ मुनये आत्मारामाय ॥ किं साधनवशेन नहि नाह मौ
त्त२ नशीलिने मौनमात्मारामता तत्स्वभावाय ॥४५॥ कुतः परावरगतिज्ञाय उत्तमाधमगतिज्ञत्वेन ॥ न क्वापि सज्जमानायेत्य
र्थः ॥ अपि च सर्वाध्यक्षाय ॥ सर्वस्याधिष्ठात्रे ॥ कुत एतत् ॥ अविश्वाय नाविश्वं यस्मिन् ॥ तन्निषेधावधये ॥ विश्वाय च ॥ तद्धि व
स्त्वधिष्ठानायेत्यर्थः ॥ किं च तद्द्रष्ट्रे ॥ अध्यासापवादसाक्षिणे ॥ अपि च अस्य च विश्वाध्यासस्य तदपवादस्य च ॥ विद्याविद्या
भ्यां हेतवे ॥ यद्वा ॥ अविश्वाय ॥ विश्वतैजसाद्यवस्थारहिताय ॥ विश्वाय च ॥ मायया स्वांशेन तत्तदवस्थाय ॥ तद्द्रष्ट्रे तासामवस्था
नां भावाभावसाक्षिणे ॥ अन्यत्समानं ॥ तस्मात्सर्वगतिज्ञः सर्वाधिष्ठाताकारो मत्वादिभिर्निरतिशयैश्वर्याय तुभ्यं नम

भा०द०स्क० न युष्मत्तो भयमाप्नुयात् ॥ तस्य युष्माभिर्भयं नोत्पादनीयमित्याज्ञा ॥ ६० ॥ इतोऽपि त्वया गंतव्यमित्याह ॥ योऽस्मिन्निति
७६ त्वयि स्थिते तन्न संभवतीति भावः ॥ ६१ ॥ न च त्वं वगरुडभयं भवेदित्याह ॥ द्वीपमिति ॥ ६२ ॥ ६३ ॥ ६४ ॥ ६५ ॥ इति दशमे षोड

य एतत्संस्मरेन्मर्त्यस्तुभ्यं मदनुशासनं ॥ कीर्तयन्नुभयोः संध्योर्न युष्मद्भयमाप्नुयात् ॥ ६० ॥ योऽस्मिन्स्नात्वा
मदाक्रीडे देवादींस्तर्पयेज्जलैः ॥ उपोष्य मां स्मरन्नर्चेत्सर्वपापैः प्रमुच्यते ॥ ६१ ॥ द्वीपं रमणकं हित्वा
ह्रदमेतमुपाश्रितः ॥ यद्भयात्स सुपर्णस्त्वां नाद्यान्मत्पादलांछितं ॥ ६२ ॥ ऋषिरुवाच ॥ एवमुक्तो भ
गवता कृष्णेनाद्भुतकर्मणा ॥ तं पूजयामास मुदा नागपत्न्यश्च सादरं ॥ ६३ ॥ दिव्यांबरस्रग्मणिभिः पर
र्ध्यैरपि भूषणैः ॥ दिव्यगंधानुलेपैश्च महत्योत्पलमालया ॥ पूजयित्वा जगन्नाथं प्रसाद्य गरुडध्व
जं ॥ ततः प्रीतोऽभ्यनुज्ञातः परिक्रम्याभिवंद्य तं ॥ सकलत्रसुहृत्पुत्रो द्वीपमब्धेर्जगाम ह ॥ ६४ ॥ तदैव साम
तजला यमुना निर्विषाभवत् ॥ अनुग्रहाद्भगवतः क्रीडामानुषरूपिणः ॥ ६५ ॥ इति श्रीमद्भागवते महा
पुराणे दशमस्कंधे कालियमोक्षणं षोडशोऽध्यायः ॥ १६ ॥ राजोवाच ॥ नागालयं रमणकं कस्मात्तत्या
जकालियः ॥ कृतं किं वा सुपर्णस्य तेनैकेनासमंजसम् ॥ १ ॥ राम ॥

शः ॥ १६ ॥ नागं समुद्रदर्शेनु नागालयं तं निरयापयत् ॥ वंधून्स्वदुःखतः श्रांतास्तु भ्रांतत्रद्दवादपात् ॥ असमंजसं ॥ अप्रि ७६

५२ ॥ ५३ ॥ यदसद्ग्रह इति यतः स्वभावोऽसद्ग्रहरूपः ॥ यद्वा ॥ यतः स्वभावादसति देहादौ यो ग्रहः स दुस्त्यज इति ॥ ५४ ॥ गुणैर्वि
विधतया सृज्यत इति गुणविसर्जनं तत्रापि नानास्वभावादयो यस्य तत् ॥ ५५ ॥ जात्या जन्मनैव उरुमन्युर्येषां ते वयं कथं त्य

श्रीशुक उवाच ॥ इत्थं स नागपत्नीभिर्भगवान्समभिष्टुतः ॥ मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः ॥
५२ ॥ प्रतिलब्धेंद्रियप्राणः कालियः शनकैर्हरिं ॥ कृच्छ्रात्समुच्छ्वसन्दीनः कृष्णं प्राह कृतांजलिः ५३ ॥
कालिय उवाच ॥ वयं खलाः सहोत्पत्त्या तामसा दीर्घमन्यवः ॥ स्वभावो दुस्त्यजो नाथ भूतानां यदसद्ग्रहः ॥
५४ ॥ त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनं ॥ नानास्वभाववीर्यौजोयोनिबीजाशयाकृतिः ॥ ५५ ॥ वयं च त
त्र भगवन्सर्प्पा जात्युरुमन्यवः ॥ कथं त्यजामस्त्वन्मायां दुस्त्यजां मोहिताः स्वयं ॥ ५६ ॥ भवान्हि कारणं तत्र स
र्वज्ञो जगदीश्वरः ॥ अनुग्रहं निग्रहं वा मन्यसे तद्विधेहि नः ॥ ५७ ॥ श्रीशुक उवाच ॥ इत्याकर्ण्य वचः प्रा
ह भगवान्कार्य्यमानुषः ॥ ५८ ॥ नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरं ॥ स्वज्ञात्यपत्यदाराढ्यो गो
नृभिर्भुज्यते नदी ॥ ५९ ॥

जामः ॥ ५६ ॥ हि यस्मात् तत्र त्वन्मायात्यागे भवानेव कारणमिति ॥ अनुग्रहं
विधेहि मम आज्ञया खादन्तीति ॥ ईश्वरत्वान्निग्रहं वा विधेहीति ॥ ५७ ॥ ५८ ॥ यतो गोभिः नृभिश्च नदी भुज्यत इति ॥ ५९ ॥

तार्क्ष्यपुत्रो गरुडः मधुसूदनस्यासनं यस्मिन्सः ॥१॥ तस्य गरुडस्यागम्यं ॥ अगाधत्वाद्दुरासदं ॥२॥ तदगम्यत्वे कार

तं तार्क्ष्यपुत्रः स निरस्य मन्युमान्प्रचंडवेगो मधुसूदनासनः ॥ पक्षेण सव्येन हिरण्यरोचिषा जघान

कद्रुसुतमुग्रविक्रमः ॥५॥ सुपर्णपक्षाभिहतः कालियोऽतीवविह्वलः ॥ ह्रदं विवेश कालिंद्या

स्तदगम्यं दुरासदं ॥६॥ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितं ॥ निवारितः सौभरिणा प्रसह्य क्षुधि

तोऽहरत् ॥७॥ मीनान्सुदुःखितान्दृष्ट्वा दीनान्मीनपतौ हते ॥ कृपया सौभरिः प्राह तत्रत्यक्षेम

माचरन् ॥८॥ अत्र प्रविश्य गरुडो यदि मत्स्यान्स खादति ॥ सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्य

हं ॥९॥ तं कालियः परं वेद नान्यः कश्चन लेलिहः ॥ अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः ॥१०॥

कृष्णं ह्रदाद्विनिष्क्रांतं दिव्यस्रग्गंधवाससं ॥ महामणिगणाकीर्णं जांबूनदपरिष्कृतं ॥ उप

लभ्योत्थिताः सर्वे लब्धप्राणा इवासवः ॥ प्रमोदनिभृतात्मानो गोपाः प्रीत्याभिरेभिरे ॥११॥ यशोदा

रोहिणी नंदो गोप्यो गोपाश्च कौरव ॥ कृष्णं समेत्य लब्धेहा आसन्शुष्का नगा अपि ॥१२॥

णमाह तत्रेति निवारितोपि ॥७॥८॥९॥ लेलिहः सर्पः ॥ अत्र तत्रावात्सीत ॥१०॥ तेनालंकृतं ॥ असवः इंद्रियाणि प्रमोद

जांबूनदः सुवर्णः १

निभृतात्मानः आनंदपूर्णमनसः ॥११॥ लब्धेहाः ॥ लब्ध
चेष्टाः ॥ नगाः वृक्षाः अपि पूर्वं शुष्काः संतः सद्य एव विरू
ढा इत्यर्थः ॥१२॥

उपहार्य्यैर्भक्ष्यैः सर्पजनैः सर्पायत्तैर्जनैः ॥ वानस्पत्यं वनस्पतिमूले देयः ॥ नागानां तद्बाधापरिहाराय यो बलिर्निरूपि
तः उपकल्पितः ॥ ते च नागाः स्वस्वं भागं जनैर्दत्तं सुपर्णाय प्रयच्छंति ॥ ततो भीत्या गोपीथायात्मरक्षणाय ॥ विषवीर्य्यं भूयो
यो मदस्तेनाविष्टः ॥ काद्रवेयः कद्रुपुत्रः ॥ गरुडं कदर्थीकृत्य अविगणय्य ॥ यद्वा उपहार्य्यैः सुपर्णभक्ष्यैः सर्पाय

श्रीशुक उवाच ॥ उपहार्य्यैः सर्पजनैर्मासि मासीह यो बलिः ॥ वानस्पत्यो महाबाहो नागानां प्रा
ङ्निरूपितः ॥ स्वस्वं भागं प्रयच्छंति नागाः पर्वणि पर्वणि ॥ गोपीथायात्मनः सर्वे सुपर्णाय महात्म
ने ॥ विषवीर्य्यमदाविष्टः काद्रवेयस्तु कालियः ॥ कदर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिं ॥२॥ तच्छ्रु
त्वा कुपितो राजन्भगवान्भगवत्प्रियः ॥ विजिघांसुर्महावेगः कालियं समुपाद्रवत् ॥३॥ तमा
पतंतं तरसा विषायुधः प्रत्यभ्ययादुच्छ्रितनैकमस्तकः ॥ दद्भिः सुपर्णं व्यदशद्ददायुधः करालजि
ह्वोच्छ्वसितोग्रलोचनः ॥४॥

वज्रमास्ते ॥ नागानां संबंधी यस्मिन्नैकैको नागो दीयते ॥ तथाभूतो यो बलिः सुपर्णाय निरूपितः तत्र स्वस्वं भागं सर्वे
नागाः प्रयच्छंति कालियस्तु न यच्छति किंतु अन्यैर्दत्तमपि तं बलिं स्वयमेव बुभुजे ॥२॥३॥ विषमेवायुधं यस्य सः प्रत्य
भ्ययात् ॥ योद्धुं प्रतिजगाम ॥ उच्छ्रितनैकमस्तकः ॥ उन्नमिताऽनेकफणः ॥ ददायुधः दंतायुधः ॥ करालजिह्वश्चासौ उ
च्छ्वसितोग्रलोचनश्च ॥ उच्छ्वसितानि उज्जृंभितानि उग्राणि लोचनानि यस्य सः ॥४॥

भा०द०पू० ऽविमोहानहिदंडेनुतत्तश्वशरणंगतान् ॥ गोपानपादनंतोःसावनंतवनवह्नितः ॥ इतिश्रीदशमेसप्तदशः ॥ १७
७८ अश्लादशोतनोग्रीष्मवसंतगुणलक्षिते ॥ अघातयद्बलेनालंप्रलंबंलीलयाहरिः ॥ कृत्वानृत्यंफणाग्रेषुकालिय
स्यसकौतुकं ॥ बलंप्रलंबंतुगोपांसमारोहयद्रातिहा ॥ २ ॥ गोपालछद्ममायया ॥ गोपालैश्छन्नमायया यस्यांतया ॥ २३

इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेदावाग्निमोक्षणंनामसप्तदशोऽध्यायः ॥ १७ ॥ श्रीशुकउवाच

अथकृष्णःपरिवृतोज्ञातिभिर्मुदितात्मभिः ॥ अनुगीयमानोन्यविशद्व्रजंगोकुलमंडितं ॥ १ ॥ व्रजेविक्री
डतोरेवंगोपालछद्ममायया ॥ ग्रीष्मोनामर्तुरभवन्नातिप्रेयान्शरीरिणां ॥ २ ॥ सचवृंदावनगुणै
हा० ४ र्वसंतइवलक्षितः ॥ यत्रास्तेभगवान्साक्षाद्रामेणसहकेशवः ॥ ३ ॥ यत्रनिर्झरनिर्ह्रादनिवृत्तस्व
नझिल्लिकं ॥ शश्वत्तच्छीकरर्जीषद्रुममंडलमंडितं ॥ ४ ॥ सरित्सरःप्रस्रवणोर्मिवायुनाकह्लारकं
जोत्पलरेणुहारिणा ॥ नविद्यतेयत्रवनौकसांदवोनिदाघवह्न्यर्कभवोतिशाद्वले ॥ ५ ॥

वसंतसाम्यमाह ॥ यत्रेति ॥ यत्रग्रीष्मेपिनिर्झराणांनिर्ह्रादेनघोषेणनिवृत्तस्वना [illegible] ध्वनयोझिल्लिकाः
कठोरध्वनिसत्त्वाःकीटायस्मिन् ॥ तथाभूतंवृंदावनंभवति ॥ किंच ॥ शश्वत्तेषांनिर्झराणांशीकरैः ॥ ऋजुकणैः
र्ऋजीषाःस्निग्धायेद्रुमास्तेषांमंडलैर्मंडितं ॥ ४ ॥ यत्रग्रीष्मवनेवा ॥ निदाघोग्रीष्मस्तेनतत्कालीनवह्न्यर्काभ्यांच

भवतियोदवस्तापः ॥ अतिशाद्वलेहरिततृणकीर्णे
यद्वा ॥ अतिक्रांतशाद्वलेपिस्थाने ॥ ५ ॥
७८

१३ ॥ ते विप्रा ऊचुः ॥ १४ ॥ नष्टलब्धप्रजा नष्टप्राया पुनर्लब्धप्रजा यया सा ॥ १५ ॥ श्रमेण च कर्षिताः ॥ उपकूलं ततः कूलप्रां

रामश्चाच्युतमालिंग्य जहासास्यानुभाववित् ॥ नगा गावो वृषा वत्सा लेभिरे परमां मुदं ॥ १३ ॥ नंदं वि
प्राः समागत्य गुरवः सकलत्रकाः ॥ ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तस्तवात्मजः ॥ १४ ॥ देहि दानं द्वि
जातीनां कृष्णनिर्मुक्तिहेतवे ॥ नंदः प्रीतमना राजन् गाः सुवर्णं तदादिशत् ॥ यशोदा च महाभागा
नष्टलब्धप्रजा सती ॥ परिष्वज्यांकमारोप्य मुमोचाश्रुकलां मुहुः ॥ १५ ॥ तां रात्रिं तत्र राजेंद्र क्षुत्तृ
ड्भ्यां श्रमकर्षिताः ॥ ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः ॥ १६ ॥ तदा शुचिवनोद्भूतो दावाग्निः
सर्वतो व्रजं ॥ सुप्तं निशीथ आवृत्य प्रदग्धुमुपचक्रमे ॥ १७ ॥ तत उत्थाय संभ्रांता दह्यमाना व्रजौ
कसः ॥ कृष्णं ययुस्ते शरणं मायामनुजमीश्वरं ॥ १८ ॥ कृष्ण कृष्ण महाभाग हे रामामितविक्र
म ॥ एष घोरतमो वह्निस्तावकान् ग्रसते हि नः ॥ १९ ॥ सुदुस्तरान्नः स्वान् पाहि कालाग्नेः सुहृदः
जे २ प्रभो ॥ न शक्नुमस्त्वच्चरणं संत्यक्तुमकुतोभयं २० ॥ इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः ॥ तमग्नि
मपिबत्तीव्रमनंतोनंतशक्तिधृक् ॥ २१ ॥

ते ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥ कालाग्नेः मृत्युरूपादग्नेः ॥ न मृत्योर्बिभीमः ॥ किंतु त्वच्चरणवियोगादित्याह ॥ न शक्नु

मदत्ति ॥ १० ॥ १२

भा० द० पू० १२ ॥ कुंभैः कुंभवृत्तफलैः ॥ अस्पृश्यत्वं नेत्रबंधस्तदाद्यैः ॥ मृगाणां खगानां च चेष्टया ॥ दर्दुरप्लावैः ॥ मंडूकप्लुतिभिः ॥
स्पंदोलिकया दोलालवनेन ॥ नृपाणामिव लीलया ॥ नद्यः ॥ अद्रिद्रोण्यः कुंजानि च तेषु ॥ १३ ॥ चारयतोः सतोः तद्व-

॥ ७९ ॥

त्य १

क्वचिन्नृत्सु चान्येषु गायकौ वादकौ स्वयं ॥ शशंसतुर्महाराज साधु साध्विति वादिनौ ॥ १२ ॥ क्वचि-
द्बिल्वैः क्वचित्कुंभैः क्व चामलकमुष्टिभिः ॥ अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेहया ॥ क्वचिच्च द-
र्दुरप्लावैर्विविधैरुपहासकैः ॥ कदाचित्स्पंदोलिकया कर्हिचिन्नृपचेष्टया ॥ एवं तौ लोकसिद्धा-
भिः क्रीडाभिश्चेरतुर्वने ॥ नद्यद्रिद्रोणिकुंजेषु काननेषु सरस्सु च ॥ १३ ॥ पशूंश्चारयतोर्गोपैस्तद्व-
ने रामकृष्णयोः ॥ गोपरूपी प्रलंबोगादसुरस्तज्जिहीर्षया ॥ १४ ॥ तं विद्वानपि दाशार्हो भगवान्स-
र्वदर्शनः ॥ अन्वमोदत तत्सख्यं वधं तस्य विचिंतयन् ॥ १५ ॥ तत्रोपाहूय गोपालान्कृष्णः प्राह विहा-
रवित् ॥ हे गोपा विहरिष्यामो द्वंद्वीभूय यथायथं ॥ १६ ॥ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ ॥
कृष्णसंघट्टिनः केचिदासन्रामस्य चापरे ॥ १७ ॥ आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः ॥ यत्रा-
रोहंति जेतारो वहंति च पराजिताः ॥ १८ ॥

तेतस्मिन्वने तयोर्जिहीर्षया ॥ १४ ॥ १५ ॥ यथायथं वयोबलाद्यनुरूपं द्वंद्वीभूय ॥ १६ ॥ परिवृढौ नायकौ ॥ तत्र केचन

कृष्णसंघट्टिनः कृष्णपक्षीयाः ॥ १७ ॥ १८ ॥

॥ ७९

ननु शाद्वलत्वमेव कुतस्त्यं तत्राह ॥ अगाधेति ॥ अगाधानि तोयानि यासां तासां ह्रदिनीनां तटस्पर्शिभिः ऊर्मिभिः
सह द्रवत्कस्तूरीषपंको यस्याः तस्याः भुवः संशाद्वलितं शाद्वलरूपता च विषवदुल्बणेण अपि सूर्यरश्मयो न गृह्णन्ते
ति ॥ न हरंतीत्यर्थः ॥ वनमविशदित्युत्तरेणान्वयः ॥६॥ नदंतश्चित्रामृगा द्विजाश्च यस्मिन् ॥ गायंतो मदेरा भ्रमराश्च य

अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समंततः ॥ न यत्र चंडांशुकरा विषोल्बणा भुवो र
सं शाद्वलितं च गृह्णते ॥६॥ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजं ॥ गायन्मयूरभ्रमरं कूजत्कोकि
लसारसं ॥ क्रीडिष्यमाणस्तत्कृष्णो भगवान् बलसंयुतः ॥ वेणुं विरणयन् गोपैर्गोधनैः संवृतोविशत्
॥७॥ प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः ॥ रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः ॥८॥ कृष्णस्य
नृत्यतः केचिज्जगुः केचिदवादयन् ॥ वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे ॥ गोपजातिप्रति
च्छन्ना देवा गोपालरूपिणः ॥ ईडिरे कृष्णरामौ च नटा इव नटं नृप ॥१०॥ भ्रामणैर्लंघनैः क्षेपैरास्फोटन
विकर्षणैः ॥ चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित् ॥११॥

स्मिन् ॥ कूजंतः कोकिलाः सारसाश्च यस्मिन् त ८
व ॥ अविशत् ॥७॥८॥९॥१०॥ काकपक्षः चूडाकरणात्प्रभृति नाके शाः ॥ भ्रामणादिप्रकारैः नियुद्धेन विक्रीडतुः

आगतस्मृतिरभयद्व आत्मनः ॥ स्वार्थेगोपसमूहं विहायहरंतंरिपुंअहनत् ॥ यद्वा ॥ विहायसा आकाशमार्गे
भा॰ द॰ पू॰ ८० णआत्मनआप्तं अर्थमिवहरंतमिति ॥ वज्ररंहसा वज्रवेगेन मुष्टिना २५ ॥ अपस्मृतः गतस्मृतिः महारवंसमी

अथागतस्मृतिरभयोरिपुंबलोविहायसार्थमिवहरंतमात्मनः ॥ रुषाहनच्छिरसिदृढेनमुष्टिना
सुराधिपोगिरिमिववज्ररंहसा ॥ २५ ॥ सआहतःसपदिविशीर्णमस्तकोमुखाद्वमन्रुधिरमप
स्मृतोऽसुरः ॥ महारवंव्यसुरपतत्समीरयन्गिरिर्यथामघवतआयुधाहतः ॥ २६ ॥ दृष्ट्वाप्रलंबंनिह
तंबलेनबलशालिना ॥ गोपाःसुविस्मिताआसन्साधुसाध्वितिवादिनः ॥ २७ ॥ आशिषोऽभिगृणंत
स्तंप्रशशंसुस्तदर्हणं ॥ प्रेत्यागतमिवालिंग्यप्रेमविह्वलचेतसः ॥ २८ ॥ पापेप्रलंबेनिहतेदेवाः
परमनिर्वृत्ताः ॥ अभ्यवर्षन्बलंमाल्यैःशशंसुःसाधुसाध्विति ॥ २९ ॥ इतिश्रीमद्भागवतेमहापुरा
५२ णेदशमस्कंधेप्रलंबवधोनामअष्टादशोध्यायः ॥ १८ ॥ श्रीशुकउवाच ॥ क्रीडासक्तेषुगोपेषुतद्गावो
दूरचारिणीः ॥ स्वैरंचरंत्योविविशुस्तृणलोभेनगह्वरं ॥ १ ॥
रयन् ॥ २६ ॥ तदर्हणंप्रसंसार्हं ॥ २८ ॥ २९ ॥ इतिश्री
दशमेऽष्टादशः ॥ १८ ॥ ऊनविंशेनिविष्टंतुगोपगोकुलमच्युतः ॥ मुंजारण्यमरण्याग्नेरदत्तन्निपानतः ॥ हर ८०

व॰

वाद्यमानाः एष्टेनोह्यमानाः ॥ १९ ॥ २० ॥ २१ ॥ कृष्णहृष्टिवंचनाय ॥ अंगृह्यतेऽस्मिन्निति ॥ अवरोहणं मर्यादां ततः परं दू
रं प्रागात् ॥ २२ ॥ धरणिधरेंद्रवक्षोरवं यस्य तं ॥ निजमासुरं वपुरास्थितः ॥ पुरटपरिच्छदः सुवर्णालंकारः ॥ तडिद्युमाने
विद्युद्दीप्तिमानद्भ्युत्यलंकारोपमा ॥ उडुपतिवाडतिरामोपमा ॥ उडुपतिं वहतीति ॥ उडुपतिवाट् ॥ यद्दितियथाचित्तस्था

व हंतो वाह्यमानाश्च चारयंतश्च गोधनं ॥ भांडीरकं नामवटं जग्मुः कृष्णपुरोगमाः ॥ १९ ॥ रामसंघट्टि
नो यर्हि श्रीदामन्वृषभादयः ॥ क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप ॥ २० ॥ उवाह कृष्णो भगवा
न्श्रीदामानं पराजितः ॥ वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतम् ॥ २१ ॥ अविषह्यं मन्यमानः
कृष्णं दानवपुंगवः ॥ वहन्द्रुततरं प्रागादवरोहणतः परं ॥ २२ ॥ तमुद्वहन्धरणिधरेंद्रगौ
रवं महासुरो विगतरयो निजं वपुः ॥ स आस्थितः पुरटपरिच्छदो बभौ तडिद्युमानुडुपतिवा
२२ डिवांबुदः ॥ २३ ॥ निरीक्ष्य तद्वपुरलमंबरे चरत्प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकं ॥ ज्वलच्छिखं कटक
किरीटकुंडलत्विषाद्भुतं हलधर ईषदत्रसत् ॥ २४ ॥

नेषु स्थिरा विद्युतो भवंति ॥ उपरिचोडुपतिस्तदा सोंऽबुदो यथा भातीति तद्वद्भावित्यर्थः ॥ २३ ॥ वलमत्ति वेगेन
प्रदीप्ते दृशौ यस्मिंस्तत् ॥ प्रदीप्तदृक्भ्रुकुटितटं यस्मिन् उग्रा दंष्ट्रा यस्मिन् तच्च तच्चेति वा ॥ ज्वलंत्यः शिखाः केशा
भ्रुकुटितटसंलग्ना दंष्ट्रा यस्मिंस्तत् १

॥ ४९ ॥

भा०द० १९ १० ॥ ११ ॥ कृच्छ्राद्दुष्करप्रवेशात् दुःश्रमादिजनितात तत्क्षणमेव भांडीरं नीत्वा तान मोचयदित्यर्थः ॥ १२ ॥ ततो नैव भां

८१ न्तः नं त्वद्बांधवाः कृष्ण न चार्हत्यवसीदितुं ॥ वयं हि सर्वधर्मज्ञ त्वन्नाथास्त्वत्परायणाः ॥ १० ॥ श्रीशुक

उवाच ॥ वचो निशम्य कृपणं बंधूनां भगवान् हरिः ॥ निमीलयत मा भैष्ट लोचनानीत्यभाषत ॥ ११ ॥

तथेति मीलिताक्षेषु भगवानग्निमुल्बणं ॥ पीत्वा मुखेन तान् कृच्छ्राद्योगाधीशो व्यमोचयत् ॥ १२ ॥ तत

श्च तेऽक्षीण्युन्मील्य पुनर्भांडीरमापिताः ॥ निशाम्य विस्मिता आसन्नात्मानं गाश्च मोचिताः ॥ १३ ॥ गाः

संनिवर्त्य सायाह्ने सह रामो जनार्दनः ॥ वेणुं विरणयन् गोष्ठमगाद्गोपैरभिष्टुतः ॥ १४ ॥ कृष्णस्य यो

गवीर्यं तद्योगमायानुभावितं ॥ दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरेऽमरं ॥ १५ ॥ गोपीनां परमानंद

आसीद्गोविंददर्शने ॥ क्षणं युगशतमिव यासां येन विना भवत् ॥ १६ ॥ इति श्रीमद्भागवते महापु

राणे दशमस्कंधे दावाग्निमोक्षणं नामैकोनविंशोध्यायः ॥ १९ ॥ श्रीशुक उवाच ॥ तयोस्तदद्भुतं कर्म दा

वाग्नेर्मोक्षमात्मनः ॥ गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च ॥ १ ॥ भांडीरं प्रापिताः ॥ ततोऽक्षीण्युन्मील्य विस्मिताः ॥ १३ ॥

१४ ॥ १५ ॥ १६ ॥ श्रीदामादिसखोपात्तो सांगामार्हा दृश्यंतां ॥ क्षेमं योग्यमाविरकरोद्धनवृद्धिनिपानतः ॥ इति दशमे एकोनविंशः ॥ १९ ॥

विंशे प्रावृट्शरद्भावे वनौको नवनोचिताः ॥ प्रावृट्क्रीडा निरूप्यंते या परा मयुता हरेः ॥ हेयादेयोपमानेन प्रावृट्शरदृतुश्रियोः

ने

८१

ध कृष्णस्तुंगसमारुह्य वृक्षं मेघनिभच्छविः। आत्मानमाह्वयामास दर्पयन् गाः स्वनामतः॥ ५॥

वनाद्वनांतरं निर्विशंत्यो ह्यावेनृत्तर्षिताः तृषिताः क्रंदंत्यः इषीकाटवीं ऋतुच्छित्रंतघनत्तृणविशेषारण्यं निर्विवि
शुः॥२॥ कृष्णरामौ आदिर्येषां तेन तु तौ॥३॥ ता सांगवां खुरैः दद्भिश्च छिन्नैस्तृणैः॥ गोष्पदैरंकितैश्च भ्रमप्रदेशो त्तृणैः

अजागावो महिष्यश्च निर्विशंत्यो वनाद्वनं॥ इषीकाटवीं निर्विविशुः क्रंदंत्यो दावतर्षिताः॥१॥ ते
ऽपश्यंतः पशून्गोपाः कृष्णरामादयस्तदा॥ जातानुतापा न विदुर्विचिन्वंतो गवां गतिं॥३॥ तृणैस्त
त्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवां॥ मार्गमन्वगमन्सर्वे नष्टाजीव्या विचेतसः॥४॥ मुंजाटव्यां भ्रष्टमा
र्गं क्रंदमानं स्वगोधनं॥ संप्राप्य तृषिताः श्रांतास्ततस्ते संन्यवर्तयन्॥५॥ तौ आहूता भगवता मेघ
गंभीरया गिरा॥ स्वनाम्नां निनदं श्रुत्वा प्रतिनेदुः प्रहर्षिताः॥६॥ ततः समंताद्दवधूमकेतुर्यदृच्छ
याभूत्क्षयकृद्वनौकसां॥ समीरितः सारथिनोल्बणोल्मुकैर्विलेलिहानः स्थिरजंगमान्महान्
॥७॥ तमापतंतं परितो दवाग्निं गोपाश्च गावः प्रसमीक्ष्य भीताः॥ ऊचुश्च कृष्णं सबलं प्रपन्ना यथा हरिं
मृत्युभयार्दिता जनाः॥८॥ कृष्ण कृष्ण महावीर्य हे रामामितविक्रम॥ दावाग्निना दह्यमानान्प्रपन्नांस्त्रातुमर्ह
थः॥९॥

पीगवां मार्गमन्वगमन्॥ नष्टजीव्या गतजीविकाः स्वगोधनाः॥४॥ मुंजाटव्यपि सैव॥५॥ ६॥ गोपानां नाशहेतुर्देवद

भा०टी०प० ॥ नित्यकर्मावसाने आचार्य्योनिनंदं श्रुत्वा तच्छिष्याय यथा अधीयंते तत्तद्दिति ॥ ९ ॥ अनुश्रुष्यती: ॥ अनुश्रु

८२ यंत्य: ॥ अस्मत्तत्रस्य इंद्रियपरतंत्रस्यानिरंकुशस्येतिवा ॥ १० ॥ हरिभिर्नीलैः ॥ शष्पैर्बालतृणैर्नीलवर्णैः क्वचि

त् ॥ क्वचिदिंद्रगोपैः कीटविशेषैर्लोहिता ॥ तत्र तत्र उच्छिलीध्रैः ॥ छत्राकारैरुद्भिदैः ॥ कृत्तच्छायान्तरेणाज्ञा

श्रुत्वा पर्जन्यनिनदं मंडूकाव्याप्तजन्मगिरः ॥ तूष्णीं शयाना: प्राग्यद्वद्ब्राह्मणानियमात्य

ये ॥ ९ ॥ आसन्नुत्पथवाहिन्य: क्षुद्रनद्योनुश्रुष्यती: ॥ पुंसोयथास्वतंत्रस्य देहद्रविणसंपद:

१० ॥ हरिताहरिभि: शष्पैरिंद्रगोपैश्च लोहिता ॥ उच्छिलीध्रकृतच्छाया नृणां श्रीरिव भूरभ

त् ॥ ११ ॥ क्षेत्राणि शष्यसंपद्भि: कर्षकाणां मुदं ददुः ॥ धनिनामनुतापं वै दैवाधीनमजानतां ॥ १२

जलस्थलौकसः सर्वे नववारिनिषेवया ॥ अबिभ्रन्रुचिरं रूपं यथा हरिनिषेवया ॥ १३ ॥ सरिद्भिः

(संगतः सिंधुश्चुक्षुभे श्वसनोर्मिमान् ॥ अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा ॥ १४)

श्री: सेना संपदिव ॥ ११ ॥ क्षेत्राणीति ॥ तदाहि वृष्टेरवच्छेदे लसंत: प्रियंग्वादयो मुदं ददति ॥ विच्छेदे सुष्यंतोऽ

नुतापं चेति ॥ १२ ॥ अबिभ्रन् अबिभरु: ॥ यथा हरिनिषेवयेति ॥ हरिसेवायां प्रवृत्ता हि सद्य एव सर्वे रुचिरा भवंति

[illegible] ॥ १३ ॥

८२

य

अतत्र प्रावृट्वर्णनं तत इत्यादि द्विविंशत्या ॥ सर्वेषां प्राणिनां समुद्भवो उत्पत्तिर्यस्याः वनततत्राणि यस्यां सा प्रावृट् विद्योत
तमानाः परिधयः परिवेषाः दिशो वा यस्यां सा ॥ विस्फूर्जितं संस्तम्भितं नभस्तलं यस्यां सा ॥३॥ सान्द्रैर्निविडैर्नीलाम्बुदैः वि
द्युद्गर्जितसहितैः आच्छन्नं सगुणं गुणैराच्छन्नं जीवरूपं विद्युद्गर्जितानां उदरानां सत्वरजतमोभिरुपमा ॥४॥ पर्जन्यः सूर्यः

गोपवृद्धाश्च गोपाश्च तदुपाकर्ण्य विस्मिताः ॥ मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ ॥२॥ ततः प्रावर्तत प्रावृट्
सर्वसत्वसमुद्भवा ॥ विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ॥३॥ सान्द्रनीलाम्बुदैर्व्योम सविद्युत्स्तनयित्नु
भिः ॥ अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ॥४॥ अष्टौ मासान्निपीतं यद्भूम्याउदमयं वसु ॥ स्वगोभिर्मोक्तुमा
रेभे पर्जन्यः काल आगते ॥५॥ तडित्वन्तो महामेघाश्चण्डश्वसनवेपिताः ॥ प्राणनं जीवनं ह्यस्य मुमुचुः करुणा इ
व ॥६॥ तपःकृशा देवमीढा आसीद्वर्षीयसी मही ॥ यथैव काम्यतपसस्तनुः संप्राप्य तत्फलं ॥७॥ निशामुखेषु ख
द्योतास्तमसा भान्ति न ग्रहाः ॥ यथा पापेन पाषंडा न हि वेदाः कलौ युगे ॥८॥

स्वगोभिः ॥ काले य उचितः समये ॥ व
नरसो ज उपमा करादानतः समये पुनर्दानं तत्र स्मृचिता ॥५॥ अस्य विश्वस्य प्राणनं आप्यायनकरं जीवनमुद
कं मुमुचुः ॥ कृपालवो यथा तत्प्रजनं निरीक्ष्य अनुकंपमानाः तदाप्यायनाय स्वजीवनमपि त्यजंति तद्वन्महान्तो
मेघास्तडिन्नेत्रैर्विश्वं तत्प्रजनं निरीक्ष्य वायुभिर्वेपिता जीवनं मुमुचुरिति ॥६॥ तपसा ग्रीष्मेण कृशा देवमीढा पर्ज
न्यसिक्ता वर्षीयसी उच्छूना पुष्टा ॥ काम्यं तपो यस्य तस्य तनुः कामान् संप्राप्य यथेति ॥७॥८॥ ॥ ऽऽ॥ ॥ ॥ ॥ऽऽ

बसी

अशांतानि पंकंकंटकादि युक्ता निरोधांसितटानियेषां तेषु अपि न्यूषुः निताराम् एव वा वसन् सारस्यः चक्रवाकाः अशांतानि घोराणि अनुपरतानि वा कृत्यानि येषु ते अपि गृहेषु ॥ २१ ॥ इश्वरे इंद्रे ॥ २२ ॥ नुन्नाः प्रेरिताः आशिषः कामान् विश्पतयो राजानः वणिजां पतयो वा द्विजेरिताः पुरोहितैः कृताः ॥ २४ ॥ प्रावृट्कृता क्रीडां वर्णयति एवं वनं मितिस त्रिभिः वर्षिष्टं

सरस्स्वशांतरोधस्सु न्यूषुरंगापि सारसाः ॥ गृहेष्वशांतकृत्येषु ग्राम्याइव दुराशयाः ॥ २१ ॥ जलौघैर्निरभि
द्यंतसेतवो वर्षतीश्वरे ॥ पाषंडिनामसद्वादैर्वेदमार्गाः कलौ यथा ॥ २२ ॥ व्यमुंचन्वायुभिर्नुन्ना भूतेभ्यो
ऽमृतंघनाः ॥ यथाशिषो विश्पतयः कालेकाले द्विजेरिताः ॥ २३ ॥ एवं वनं तद्वर्षिष्टं पक्वखर्जुरजंबु
मत् ॥ गोगोपालैर्वृतो रंतुं सबलः प्राविशद्धरिः ॥ २४ ॥ धेनवो मंदगामिन्य ऊधोभारेण भूयसा ॥ य
युर्भगवताहूता द्रुतं प्रीत्या स्नुतस्तनीः ॥ २५ ॥ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः ॥ जलधारा
गिरेर्नादादासन्ना ददृशे गुहाः ॥ २६ ॥ क्वचिद्वनस्पतिक्रोडे गुहायांचाभिवर्षति ॥ निर्विश्य भगवान्रेमे कं
दमूलफलाशनः ॥ २७ ॥

समृद्धं ॥ २४ ॥ २५ ॥ वनौकसः पुलिंदीः प्रमुदिता भगवान् ददृशे ॥ तथा वनराजीर्मधुच्युतः ॥ मधुस्रवा ददृशे ॥ गिरेः सकाशा
ज्जलधाराश्च ॥ तासां च नादान् ॥ आसन्नानि कटवर्त्तिनीर्गुहाश्च ॥ यद्वा ॥ वनौकसः प्रमुदिता आसन् ॥ तथा वनराजीर्वने
राजयः मधुच्युत आसन् ॥ गिरेर्जलधाराश्च आसन् ॥ तानेवं भूतान् ॥ आददृशे ॥ सर्वतो ददर्श भगवान् ॥ तथा धाराणां नाः

कामार्त्तं कामवासनायुक्तमिति श्वसनोर्मिसाम्यं ॥ गुणैर्विषयैर्युज्यत इति सरित्संगतिसाम्यं ॥ १४ ॥ अधोदत्त
एकचेतोयेषांते ॥ १५ ॥ असंस्कृताः अहृष्णाः ॥ नाभ्यस्यमाना इत्यसंस्कृतसाम्यं ॥ कालेनवाहतेति तृणाच्छादनसाम्यं
॥ १६ ॥ यथा कामिन्यः पुंश्चल्यः ॥ १७ ॥ निर्गुणं ज्यारहितमपि ॥ गुणिनि गर्जितशब्दवति ॥ अभात अशोभत ॥ गुणव्यतिक

सरिद्भिः संगतः सिंधुश्चुक्षुभे श्वसनोर्मिमान् ॥ अपक्वयोगिनश्चित्तं कामार्त्तं गुणयुग्यथा ॥ १४ ॥ गिरयोव
वि२ र्षधाराभिर्हन्यमाना न विव्यथुः ॥ अभिभूयमाना व्यसनैर्यथाधोक्षजचेतसः ॥ १५ ॥ मार्गा बभूवुः संदि
ग्धास्तृणैश्छन्ना ह्यसंस्कृताः ॥ नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव ॥ १६ ॥ लोकबंधुषु मेघेषु विद्यु
तश्चलसौहृदाः ॥ स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव ॥ १७ ॥ धनुर्वियति माहेंद्रं निर्गुणं च गु
णिन्यभात् ॥ व्यक्ते गुणव्यतिकरेऽगुणवान्पुरुषो यथा ॥ १८ ॥ न रराजोडुपश्छन्नः स्वज्योत्स्ना राजितै
र्घनैः ॥ अहंमत्या भासितया स्वभासा पुरुषो यथा ॥ १९ ॥ मेघागमोत्सवा हृष्टाः प्रत्यनंदन् शिखंडिनः
गृहेषु तप्ता निर्विण्णा यथाच्युतजनागमे ॥ २० ॥ पीत्वापः पादपाः पद्भिरासन्नानात्ममूर्तयः ॥ प्राक्क्षामा
स्तपसा श्रान्ता यथा कामानुसेवया ॥ २१ ॥

णात्मके प्रपंचे अगुणवान्निर्गुणः पुरुषो यथेति ॥ १८ ॥ स्वभासा भासितया अहंमत्येति ॥ स्वचैतन्येनैव प्रकाशितेना
हंकारेणाच्छन्नो जीवो यथा यद्वा ॥ अहं विद्वान्दाता स्मर इति स्वप्रतीत्येवारोपितयेति ॥ १९ ॥ मेघागमनोत्सवा ये पा

भा० द० पू० त्यक्तैषणाः त्यक्तपुत्रवित्तलोकैषणायैस्ते ॥ ३४ ॥ गिरय इति अयं भावः न हि सुपाध्यायाः कर्म विद्यामिव ज्ञानानि नो ज्ञा
॥ ८४ ॥ नामृतं सर्वतो वितरंति ॥ अपितु कृपया कश्चिदेव ॥ एवं गिरयः शिवं निर्मलं तोयं क्वचिन्मुमुचुः ॥ क्वचिन्न ॥ न पुनः प्र

सर्वस्वं जलदा हित्वा विरेजुः शुभ्रवर्चसः ॥ यथा त्यक्तैषणाः शांता मुनयो मुक्तकिल्विषाः ॥ ३४ ॥ गि
रयो मुमुचुस्तोयं क्वचिन्न मुमुचुः शिवं ॥ यथा ज्ञानामृतं काले ज्ञानिनो ददते न वा ॥ ३५ ॥ नैवावि
दन् क्षीयमाणं जलं गाधजलेचराः ॥ यथायुरन्वहं क्षय्यं नरा मूढाः कुटुंबिनः ॥ ३६ ॥ गाधवारि
चरास्तापमविंदन् शरदर्कजं ॥ यथा दरिद्रः कृपणः कुटुंब्यविजितेंद्रियः ॥ ३७ ॥ शनैः
शनैर्जहुः पंकं स्थलान्यामं च वीरुधः ॥ यथाहंममतां धीराः शरीरादिष्वनात्मसु ॥ ३८ ॥ निश्च
लांबुरभूत्तूष्णीं समुद्रः शरदागमे ॥ आत्मन्युपरते सम्यङ्मुनिर्व्युपरतागमः ॥ ३९ ॥ केदारे वि ४
भ्यस्त्वपोगृह्णन् कर्षका दृढसेतुभिः ॥ यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ॥ ४० ॥

रूपीव सर्वं तदिति ॥ ३५ ॥ गाधे ह्रदे जले चरंतीति तथा ॥ ते मीनादयः ॥ ३६ ॥ अविंदन्न लेभिरे ॥ ३७ ॥ शनैःशनैरिति
स्त्वं मममतामिव पंकं ॥ अहंतामिवामतां ॥ अपक्वतां जहुरिति ॥ ३८ ॥ आत्मन्युपरते त्यक्तक्रियो मुनिरिव ॥ निश्चलांबुः
सरवत्युपरतागमा निवृत्तवेदघोष इव तूष्णीं बभूवेति ॥ ३९ ॥ केदारेभ्यो वहत्सेतुशालिक्षेत्रेभ्यो दृढैः सेतुभिरपोगृह्णन्

८४

२९॥३०॥शरदं वर्णयति॥एवं निवसतोरित्यष्टादशभिः॥विगताभ्रा निर्गताअभ्राणि यस्यां सा॥स्वच्छानि अंबूनि यस्यां॥अपरुषः शांतोऽ
निलो यस्यां सा च सा च॥३१॥नीरजानामुत्पत्तिर्यया तया शरदा हेतुना॥नीरजानामुत्पत्त्या वा॥३२॥व्योम्नोऽब्दं इति व्योमादीनां चतुर्णां
चतुर्णां मलानि शरद् हरति॥आश्रमिणां चतुर्णां कृष्णे भक्तिर्यथा॥अशुभमसुखं हरति तद्वत्॥तथा हि ब्रह्मचारिणां गुर्वर्थं
उदकाहरणं कष्टं यथा॥भक्तिर्हरति॥तथा गृहस्थस्य तेनानुपयोग्यात्॥गुरुभिरपि कृतार्थस्य तत्स्वनियोगात्॥एवं वा

दध्योदनमुपानीतं शिलायां शलिलांतिके॥संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः॥२९॥शाद्व
लोपरि संविश्य चर्वतो मीलितेक्षणान्॥तृप्तान् वृषान् वत्सतरान् गाश्च स्वोधोभराश्रमाः॥प्रावृट्
श्रियं च तां वीक्ष्य सर्वभूतमुदावहां॥भगवान् पूजयां चक्रे आत्मशक्त्युपबृंहितां॥३०॥एवं निवसतो
स्तस्मिन् रामकेशवयोर्व्रजे॥शरत्समभवद्व्याभ्रा स्वच्छांब्वपरुषानिला॥३१॥शरदा नीरजोत्पत्त्या नी
राणि प्रकृतिं ययुः॥भ्रष्टानामिव चेतांसि पुनर्योगनिषेवया॥३२॥व्योम्नोऽब्दं भूतसावल्यं भुवः पंकम
पां मलं॥शरज्जहाराश्रमिणां कृष्णे भक्तिर्यथाऽशुभं॥३३॥

व्योम्नोऽब्दं शरज्जहार॥यथा च गृहिणोऽपत्यादिसंसक्त्यें भक्तिर्हरति॥विविक्तवासरुच्युत्पत्तेः॥तथा भूतानां साव
ल्यं सांकर्यं शरत्॥वर्षासु हि वृष्टिभिया संकुलानि वसंति॥यथा च वनस्थस्य मलधारणक्लेशं भक्तिर्हरति॥ए
वं भुवः पंकं शरत्॥यथा यतीनां कामादिवासनामलं श्रीकृष्णभक्तिर्हरति॥एवमपां मलं शरदिति॥३३॥ ॥८८

भा०द०स्क० वणिजोऽयतयो नृपाः स्नातका श्च दृष्टाभ्यां वर्षे रुद्धाः संतो निर्गम्यार्थान् ॥ वाणिज्यस्वाध्यायादि विजय विद्यादीन् प्र
८५ पेदिरे प्रापयंत ॥ यथा मंत्रयोगादि सिद्धा आयुषा रुद्धाः काले आगते स्वपिंडान् योगादि प्राप्यान् देवादि देहान् निति
४८ ॥ इतिदशमे विंशः ॥ २० ॥ एकविंशे शरद्रम्य वृंदावनगते हरौ ॥ तद्वेणुस्वरमाकर्ण्य गोपीभिर्गीतमीर्यते ॥ इत्यमे

वणिङ्मुनिनृप स्नाता निर्गम्यार्थान् प्रपेदिरे ॥ वर्षरुद्धा यथा सिद्धाः स्वपिंडान् काल आगते ॥ ४८ ॥ इति ॥
श्रीमद्भागवते महापुराणे दशम स्कंधे प्रावृट्शरद्वर्णनं विंशतितमोऽध्यायः ॥ २० ॥ श्रीशुक उवाच ॥
इत्थं शरत्स्वच्छजलं पद्माकर सुगंधिना ॥ न्यविशद्वायुना वातं सगोगोपालको हरिः ॥ १ ॥ कुसुमितवनरा वनं३
१ जिशुष्मिभृंगद्विजकुलघुष्ट सरः सरिन्महीध्रं ॥ मधुपतिरवगाह्य चारयन् गाः सहपशुपालबलश्चुकू
ज वेणुं ॥ २ ॥ तद्व्रजस्त्रिय आश्रुत्य वेणुगीतं स्मरोदयं ॥ काश्चित् परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्णय
न् ॥ ३ ॥ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितं ॥ नाशकन् स्मरवेगेन विक्षिप्तमनसो नृप ॥ ४ ॥

एवं तं वनं तद्वेवाह ॥ शरदा स्वच्छानि जलानि यस्मिन् तत्तु ॥ वायुना वातं अनुगतं कं तद्वेव व्याप्तमित्यर्थः ॥ १ ॥ ततश्च
कुसुमितवनराजिषु शुष्मिणो मत्ता भृंगा द्विजाश्च गावश्च तेषां कुलानि तैर्घुष्टाः सरांसि सरितः महीध्राश्च यस्मिन् तद्वनं
कृष्णोऽवगाह्य प्रविश्य वेणुमवादयत् ॥ २ ॥ तत्कृष्णस्य वेणुगीतं स्मरस्योदयो यस्मात्तस्मात् श्रुत्वा ॥ परोक्षं यथा भवति
तथा व्रजे स्थित्वा ॥ ३ ॥ विक्षिप्तमनसः व्याकुलचित्ताः ॥ ४ ॥ ८५

देहाभिमानजं बोध इव व्रजयोषितां मुकुंद इवेत्यर्थः ॥४१॥ शारदा विमलानि तारकाणि यस्मिंस्तत् ॥ शब्दब्रह्मणो वेदस्या
र्थान् ॥ पूर्वोत्तरमीमांसानिर्णीतान् दर्शयतीति तथा तद्वत् ॥४२॥४३॥ समः अन्यूनाधिकः शीतोष्मा यस्मिंस्तं ॥ न तु गो
प्यः ॥ कृष्णापहृतचेतस्त्वेन तासां तापो दुस्सह इति ॥ यद्वा ॥ न को अपि तापमाधुः ॥ तदा कृष्णहृतचेतसः इति ॥ चेतसा कृष्णमाश्लिष्य

शरदर्कांशुजांस्तापान्भूतानामुडुपोऽहरत् ॥ देहाभिमानजं बोधो मुकुंदो व्रजयोषितां ॥४१॥ खमशोभ
त निर्मेघं शरद्विमलतारकं ॥ सत्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनं ॥४२॥ अखंडमंडलो व्योम्नि रराजोडु
गणैः शशी ॥ यथा यदुपतिः कृष्णो वृष्णिचक्रावृतो भुवि ॥४३॥ आश्लिष्य समशीतोष्णं प्रसूनवनमा
रुतं ॥ जनास्तापं जहुर्गोप्यो न कृष्णहृतचेतसः ॥४४॥ गावो मृगाः खगा नार्यः पुष्पिण्यः शारदाभवन्
अन्वीयमानाः स्ववृषैः फलैरीशक्रिया इव ॥४५॥ उदहृष्यन्वारिजानि सूर्योत्थाने कुमुद्विना ॥ राज्ञा तु
निर्भया लोका यथा दस्यून्विना नृप ॥४६॥ पुरग्रामेष्वाग्रयणैरिंद्रियैश्च महोत्सवैः ॥ बभौ भूः पक्वशस्याढ्या
कलाभ्यां नितरां हरेः ॥४७॥

यथेत्यर्थः ॥४४॥ पुष्पिण्यः पोगर्भिण्यः ॥ अन्वीयमानाः स्ववृषैः स्वपतिभिरनिच्छंत्यो
ऽपि बलादनुगम्यमानाः ॥ ईश्वराराधनार्थाः ॥ क्रियाः बलात्फलैरनुगम्यमानाः ॥ समस्तभोगगर्भाः यथेति ॥४५॥ कुमु
त् कुमुदं कुत्सितं मुत् तस्येति दस्युसाम्यं ॥४६॥ आग्रयणैर्नवान्नप्राशनार्थैर्वैदिकैरिंद्रियैरिंद्रियार्थैर्लौकिकैः
श्च महोत्सवैः ॥ कलाभ्यां रामकृष्णाभ्यां दर्शनादिमहो ॥ त्सवाभ्यां ॥४७॥

भा० द० पू० अन्या आहुः ॥ चूतेति ॥ चूतप्रवालादीनां विचित्राभिर्मालाभिरनुपृक्ते ईषदंतरांतरा नः संयुक्ते परिधाने नील
८६ पीतांवरे ताभ्यां विचित्रवेषौ यौ कृष्णरामौ क्वचक्क्वचित्पशुपालगोष्ठ्यां गोपालसभायां मध्ये अलमत्यर्थं विरेज
तुः ॥ अहो गोपानां पुण्यमिति भावः ॥ ८ ॥ अन्या ऊचुः हे गोप्यः अयं वेणुः किं स्म पुण्यमाचरत् कृतवान् यतः
यस्मात् गोपिकानामेव भोग्यासतीमपि दामोदराधरसुधां स्वयं स्वातंत्र्येणयथेष्टं भुंक्ते कथं अवशिष्टरसं
८२ चूतप्रवालबर्हस्तबकोत्पलाब्जमालानुपृक्तपरिधानविचित्रवेषौ ॥ मध्ये विरेजतुरलं पशुपाल
गोष्ठ्यां रंगे यथा नटवरौ क्वच गायमानौ ॥ ८ ॥ गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसु
धामपि गोपिकानां ॥ भुंक्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथा
र्याः ॥ ९ ॥
केवलमवशिष्टरसमात्रम् ॥ यथा भवति तथा ॥ यतः यासां ह्रदिनीनां पयसा पुष्टस्तामातृत्वात् ह्र
दिन्यः हृष्यत्त्वचः ॥ विकसितकमलवनमिषेण रोमांचिता लक्ष्यंते ॥ येषां वंशे जातस्तेतरवोऽपि मधु
धारामिषेण आनंदाश्रु मुमुचुः ॥ यथा आर्याः कुलवृद्धाः स्ववंशे भगवद्भक्तं दृष्ट्वा हृष्यत्त्वचोऽश्रु
मुंचंति तद्वदिति ॥ ९ ॥ रामरामरामराम ॥ ऽऽ ॥ रामरामराम ॥ ऽऽ ॥ राममममरामराम ८६

याहक्रूसस्मरणं तासां मनसः क्षोभकं जातं तदाह ॥ वर्हापीडमिति ॥ नटवद्वरं वपुर्विभ्रत्त वृंदावनं प्राविशत्
कथंभूतं वनं ॥ स्वपदैरंकितं ॥ रमणं रतिजनकं ॥ गोपवृंदैर्गीतकीर्त्तिः ॥ तथा वर्हमयमापीडं शिरोभूषणं विभ्रत्त ॥ वर्ह
मापीडो यस्मिन्निति वपुषो विशेषणं वा ॥ वेणुवादनमुत्प्रेक्षते ॥ रंध्रान् वेणोरिति ॥ अत्तो नूनं नेत्रेऽध रसुधयैव पूर्ण
हेरंगारुचेत्त्वेन्नी ॥ गीतत्वप्रसर्पितुमर्हतीति भावः ॥५॥ अभिरेभिरे वर्णयंत्यः पदे पदे परमानंदमग्नाः कंसमपतिरब्धुः

वर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं विभ्रद्वासः कनककपिशं वैजयंतीं च मालां ॥ रंध्रान्वेणो
रधरसुधयापूरयन् गोपवृंदैर्वृंदारण्यं स्वपदरमणं प्राविशद्गीतकीर्त्तिः ॥५॥ इति वेणुरवं राजन् ।
सर्वभूतमनोहरं ॥ श्रुत्वा व्रजस्त्रियः सर्वा वर्णयंत्योऽभिरेभिरे ॥६॥ ॥गोप्य ऊचुः॥ अक्षण्वतां फ
लमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः ॥ वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यैर्वा निपी
तमनुरक्तकटाक्षमोक्षं ॥७॥

वत्यः ॥६॥ अनुचरणेनमेवाह ॥ अक्षण्वतामिति च योदशभिः ॥ अक्षण्वतां चक्षु
ष्मतां त्वदिदमेव फलं प्रदर्शनं न परमन्यत्तु विदामः न विद्म इत्यर्थः ॥ तच्च फलं सखिभिः सह पशून्वनं
प्रवेशयतो रामकृष्णयोर्वक्त्रं यैर्निपीतं तैरेव जुष्टं सेवितं नान्यैरित्यर्थः ॥ कथंभूतं वक्त्रं अनुवेणु वेणुमनुव
र्त्तमानं तद्वादयत् ॥ तथा अनुरक्तकटाक्षमोक्षं ॥ स्निग्धकटाक्षविसर्गं ॥ अथवा यैर्निपीतं तैरेव जुष्टं ॥ इदमेवाक्ष

भा·द·पू·
८१

अत्र सर्वत्र बहुवचनभेदान्नानाजीवसंगतिर्वक्तव्या॥तत्र गावः कृष्णेति वोत्तंभितैः कर्णपुटैः पिबंत्यः॥तथा शावाश्च वत्साः स्नुतस्त-
नपाने प्रवृत्ताः समनंतरमेव गीतं श्रुत्वा॥तदेव पीयूषमुत्तंभितकर्णपुटैः पिबंतः स्नुतस्तनपयःकवलाः केवलं स्तने-
भ्यः क्षरितं क्षीरमास्यग्रासा मुखेषु येषां ते तस्थुः विस्मिता क्रियावभूवुरित्यर्थः॥तत्र हेतुः॥गोविंदं दृशा मार्गेणात्मनि मन-
सि स्पृशंत्यः॥आलिंगंत्यः॥अत एवाश्रूणां कला लेशा लोचनयोर्यासां ताः॥गावः ते च शावाः॥१३॥भो अंब मातः अस्मिन्व-
ने ये विहगाः पक्षिणस्ते प्रायेण मुनयो भवितुमर्हंतीति॥कुतः कृष्णेक्षितं कृष्णसदर्शनं पुण्यफलात्तदनंतरं विना यथा भवति तथा

गावश्च कृष्णमुखनिर्गतवेणुगीतपीयूषमुत्तभितकर्णपुटैः पिबंत्यः॥शावाः स्नुतस्तनपयःकवलाः स्मत-
स्थुर्गोविंदमात्मनि दृशाश्रुकलाः स्पृशंत्यः॥१३॥प्रायो बताव विहगा मुनयो वनेऽस्मिन्कृष्णेक्षितं तदुदि-
भुजा३ तं कलवेणुगीतं॥आरुह्य ये द्रुमभुजान्रुचिरप्रवालान्शृण्वंति मीलितदृशो विगतान्यवाचः॥१४॥नद्यस्त-
दा तदुपधार्य मुकुंदगीतमावर्तलक्षितमनोभवभग्नवेगाः॥आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णंति
पादयुगलं कमलोपहाराः॥१५॥

रुचिराः प्रवालाः येषां तान्द्रुमभुजानारुह्य ग्रंथाः शाखास्तान्आरुह्य तेन श्रीकृष्णेनोदितं प्रकटितं कलवेणुगीतं केनापि सुखेन
मीलितदृशः संतोऽन्यवाचः संत्यज्य शृण्वंतीति॥तथाहि मुनयः श्रीकृष्णसदर्शनं यथा भवति तथा वेदाख्यकर्मफल-
त्यागेन ~~[illegible]~~ वेदद्रुमशाखारूढाः रुचिरप्रवालस्थानीयानि कर्माण्येवोपादानाः॥सुखिनः संतः
श्रीकृष्णगीतमेव शृण्वंति॥अतस्त एवैते भवितुमर्हंतीति भावः॥१४॥आस्तां चेतनानां कथा नद्योऽप्यावर्तैः परिभ्रमै-

८१

अन्याः काश्चिदाहुः ॥ हे सखि वृंदावनं भुवः कीर्त्तिं स्वर्गादपि विशेषेण तनोति ॥ कथंभूतं यद्देवकीसुतस्य पदांबुजाभ्यां ल
ब्धा लक्ष्मीः शोभा संपत् येन तत् ॥ किंच गोविंदस्य वेणुमनु निनादं श्रुत्वा ॥ अनंतरं मदस्फूर्जितं नीलमेघं तं मत्वा मत्ता ये मयूरा
स्तेषां नृत्यं प्रेक्ष्य संघशः तत्र तत्राद्रिसानुषु उपरतानि ॥ उपरतक्रियाणि ॥ अन्यानि समस्तानि सत्वानि यस्मिंस्तत् ॥ नैतदन्येषु
लोकेषु विद्यते ॥ अतो भुवः कीर्त्तिं वितनोतीत्यर्थः ॥ १० ॥ अपराश्चाहुः ॥ हे सखि मूढमतयस्तिर्यग्ज्ञानयोगविएत्ता हरिण्योपि

वृंदावनं सखि भुवो वितनोति कीर्त्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मि ॥ गोविंदवेणुमनु मत्तमयूरनृ
त्यं प्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्वं ॥ १० ॥ धन्याः स्म मूढमतयोपि हरिण्य एता या नंदनंदनमुपात्त
विचित्रवेषं ॥ आकर्ण्य वेणुरणितं सहकृष्णसाराः पूजां दधुर्विरचितां प्रणयावलोकैः ॥ ११ ॥ कृष्णं निरी
क्ष्य वनितोत्सवरूपशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतं ॥ देव्यो विमानगतयः स्मरनुन्नसारा भ्रश्य
त्प्रसूनकबरा मुमुहुर्विनीव्यः ॥ १२ ॥

न्याः कृतार्थाः ॥ या वेणुरणितं ॥ वेणुनादमाकर्ण्य नंदनंदनं प्रति प्रणयसहितैरवलोकनैर्विरचितां पूजां सन्मानं द
धुः कृतवत्यः ॥ किं वा ॥ कृष्णसारैः स्वपतिभिः सहिता एव दधुः ॥ अस्मत्पतयस्तु गोपाः हेद्रोः समक्षं तत्र न सहंते इति भावः
११ ॥ अन्या ऊचुः ॥ हे गोप्य श्रावय्यं शृणुत वनितानामुत्सवाय स्मात्तद्रूपं शीलं च यस्य तं श्रीकृष्णं निरीक्ष्य तेनुवादितं
वेणार संकीर्णगीतं च तत् श्रुत्वा विमानैर्गच्छंत्यो देव्यो देवानां मध्ये केषु स्थिता अपि स्मरेण नुन्नसाराः पीडितधैर्या मुमु
हुः भ्रश्यत्प्रसूनाः कबराश्चूडा यासां ताः विगलितानीव्यो यासां ताः ॥ १२ ॥

द्वि १

भा० द० पू० हे सखि इदं त्वतिचित्रं ॥ गोपैः सह गाः वने संचारयंतोस्तयो रामकृष्णयोः ॥ मधुरपदैर्महावेणुनादैः शरीरिषु येग
८८ तिमंतस्तेषामस्पंदनं स्थावरधर्मः ॥ तरूणां पुलको जंगधर्मः इति ॥ नियुज्यंते गावः आभिरिति नियोगाः पादबंधनरज्ज
वः ॥ अघष्या गवां कर्षणार्थाः ॥ पाशाश्चतैः कृतं लक्षणं चिह्नं ययोः ॥ शिरनियोगवेष्टनेन स्कंधस्थपाशेन च गोपपरि

गा गोपकैरनुवनं नयतोरुदारवेणुस्वनैः कलपदैस्तनुभृत्सु सख्यः ॥ अस्पंदनं गतिमतां पुलकस्त
रूणां नियोगपाशकृतलक्षणयोर्विचित्रं ॥ १९ ॥ एवंविधा भगवतो या वृंदावनचारिणः ॥ वर्णयंत्यो
मिथो गोप्यः क्रीडास्तन्मयतां ययुः ॥ २० ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे वृंदावनक्री
डायां गोविंदलीलावर्णनं एकविंशोऽध्यायः ॥ २१ ॥ श्रीशुक उवाच ॥ हेमंते प्रथमे मासि नंदगोपकु
मारिकाः ॥ चेरुर्हविष्यं भुंजानाः कात्यायन्यर्चनव्रतं ॥ १ ॥ आप्लुत्यांभसि कालिंद्या जलांते चोदिता
रुणे ॥ कृत्वा प्रतिकृतिं देवीमानर्चुर्नृप सैकतीं ॥ गंधैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः ॥ उच्चा
वचैश्चोपहारैः प्रवालफलतंदुलैः ॥ २ ॥

वृंदश्रिया विराजमानयोरित्यर्थः ॥ १९ ॥ २० ॥ गोपीनां कामतः कृष्णे निःसीमप्रेमसंगमः ॥ कात्यायन्यर्चनेनोद्ग
तस्तत्प्रसादमहोदयः ॥ इति दशमे एककविंशः ॥ २१ ॥ द्वाविंशे गोपकन्यानां वस्त्राहरणलीलया ॥ वरं दत्वाग
ताः कृष्णो यज्ञशालामितीर्यते ॥ प्रथमे मासि मार्गशीर्षे ॥ १ ॥ २ ॥ रामराम राम ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ८८

लोकार्त्तिहरणशीलत्वादिसाम्यात्सखः ॥ श्रीकृष्णस्यपञ्चवृन्दस्तदुपरिउदितः पुनः प्रेमाणप्रहृद्धः ॥ सन्नकुसुमौलीभिः पुष्पसमूहैः
तत्तुल्यैस्तुषारैर्वासहस्त्ववपुषाछत्रंविहितवान् ॥ २६ ॥ साहंकारमाहुः ॥ भूरिणः कृतार्थाः पुलिंद्यः सर्वरागानाः कथमित्यतआ
हुः ॥ प्रथमंदयितानांस्तनेषुमंडितेनअनुलिप्तेनपुनश्चरतिसमयेउरुगायस्यश्रीकृष्णस्यपदाम्बुजयोरागेणआरुणेन
श्रीकांतिर्यस्यतेनकुंकुमेन ॥ पुनस्तस्यवनस्थलीषुचंक्रमणेनतत्रस्थेषुतृणेषुरूषितेनलग्नेनतद्दर्शनेनतथाभूतस्यकुंकु

हृष्ट्वान्तपेव्रजपशून्सहरामगोपैः संचारयंतमनुवेणुमुदीरयंतं ॥ प्रेमप्रवृद्धउदितः कुसुमावलीभिः स
ख्युर्व्यधात्स्ववपुषाम्बुदआतपत्रं ॥ २६ ॥ पूर्णाः पुलिंद्यउरुगायपदाब्जरागश्रीकुंकुमेनदयितास्तनमं
डितेन ॥ तद्दर्शनस्मररुजस्तृणरूषितेनलिंपंत्यआननकुचेषुजहुस्तदाधिं ॥ २७ ॥ हंतायमद्रि
वलाहरिदासवर्योयद्रामकृष्णचरणस्पर्शप्रमोदः ॥ मानंतनोतिसहगोगणयोस्तयोर्यत्पानी
यसूयवसकंदरकंदमूलैः ॥ २८ ॥

मस्यदर्शनेनस्मरकृतारुक्तापोयासांताः ॥ तेनकुंकुमेनआनन[illegible]नेषुकु
चेषुचकामतप्तपुलिंपत्यः ॥ तदाधिंकामव्यथांजहुः ॥ अतस्ताः कृतार्थाः ॥ धिगन्यामादृशीः स्याः एवंभूतमप्या
धिशमनंनलभेत्तइतिभावः ॥ २७ ॥ हंतेतिहर्षेहेसख्यः ॥ अयमद्रिर्गोवर्द्धनोध्रुवंहरिदासेषुश्रेष्ठः ॥ कुतइत्यतआहुः
यस्मात्तरामकृष्णयोश्चरणस्पर्शप्रमोदायस्यसः ॥ तत्क्षणात्पुलकमानिभिर्नतेरामहर्षेणदर्शनात् ॥ किंचयतोमानंवितनो
तीति ॥ सहगोभिर्गणेनसखिसमूहेनचवर्त्तमानयोः ॥ कैः पानीयैः ॥ सुयवसैः शोभनतृणैः ॥ कंदरैः ॥ कंदमूलैश्चय

॥ २८ ॥ [illegible]

क्ष्वेलितं परिहासं॥ प्रेमपरिप्लुताः प्रेमरसमग्नाः॥११॥१२॥ तत्र मुग्धा ऊचुः अंग भो श्रीकृष्ण अनयं अन्यायं माकृ
भा॰द॰२॰ थाः॥१३॥ प्रौढा ऊचुः॥ नो चेद्राज्ञे नंदाय कंसाय वा ब्रुवामहे॥ कृष्णेति॥१४॥१५॥ प्रोत्तेरुः॥ निर्गताः॥१६॥ आहता ईषद
८९ द्दृष्टाः॥१७॥ प्रौढा ऊचुः॥ नो चेद्राज्ञे नंदाय कंसाय वा ब्रुवामहे॥

तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः॥ व्रीडिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः॥११॥ एवं ब्रु
वति गोविंदे नर्मणाक्षिप्तचेतसः॥ आकंठमग्नाः शीतोदे वेपमानास्तमब्रुवन्॥१२॥ मानयं भोः कृथा
स्त्वां तु नंदगोपसुतं प्रियं॥ जानीमोऽग व्रजश्लाघ्यं देहि वासांसि वेपिताः॥१३॥ श्यामसुंदर ते दास्यः क
रवाम तवोदितं॥ देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे॥१४॥ ॥श्रीभगवानुवाच॥ भवत्यो यदि मे
दास्यो मयोक्तं वा करिष्यथ॥ अत्रागत्य स्ववासांसि प्रतीछंतु शुचिस्मिताः॥१५॥ ॥श्रीशुक उवाच॥ ततो
जलाशयात्सर्वा दारिकाः शीतवेपिताः॥ पाणिभ्यां योनिमाछाद्य प्रोत्तेरुः शीतकर्षिताः॥१६॥ भगवाना
हता वीक्ष्य शुद्धभावप्रसादितः॥ स्कंधे निधाय वासांसि प्रीतः प्रोवाच सस्मितं॥१७॥ यूयं विवस्त्रा यद
पो धृतव्रता व्यगाहतैतत्तदु देवहेलनं॥ बद्ध्वांजलिं मूर्ध्न्यपनुत्तयेंऽहसः कृत्वा नमोऽधो वसनं प्रगृह्यतां॥१८॥

ततयो नीवीक्ष्य॥१९॥ धृतव्रताः अपो व्यगाहत॥ अप्सु स्नाता इति यत्त॥ तदेतद्देवहेलनमपराध एवेत्यर्थः॥ व्रतवैगुण्य
भीतानां प्रायश्चित्तमिवाह॥ अस्यांहसः पापस्य निवृत्तये मूर्ध्न्यंजलिं बद्ध्वा अधो नमः प्रणामं कृत्वेति॥१८॥ ८९

नो चेन्नाहं प्रदास्ये किं क्रुद्धो राजा करिष्यति॥१५॥

महामायेत्यादिसंबोधनैस्तव न किंचिदशक्यमिति सूचयंत्यः प्रत्येकं प्रार्थयंते ॥३॥ कृष्णचेतस त्वमेवाह ॥ भूयान्नंद
सुतः पतिरित्यान्वयुरिति ॥४॥ व्रतस्य पूर्वांगमाह ॥ उषसीति ॥ गोत्रैर्नामभिः ॥ अन्योन्याबद्धबाहवः ॥ परस्परगृहीतपाण

कात्यायनि महामाये महायोगिन्यधीश्वरि ॥ नंदगोपसुतं देवि पतिं मे कुरु ते नमः ॥ इति मंत्रं जपंत्यस्ताः
पूजां चक्रुः कुमारिकाः ॥४॥ एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेतसः ॥ भद्रकालीं समानर्चुर्भूयान्नंदसु
तः पतिः ॥५॥ उषस्युत्थाय गोत्रैः स्वैरन्योन्याबद्धबाहवः ॥ कृष्णमुच्चैर्जगुर्यांत्यः कालिंद्यां स्नातुमन्वहं ॥६॥
नद्याः कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् ॥ वासांसि कृष्णं गायंत्यो विजह्नुः सलिले मुदा ॥७॥ भगवां
स्तदभिप्रेत्य कृष्णो योगेश्वरेश्वरः ॥ वयस्यैरागतस्तत्र वृतस्तत्कर्मसिद्धये ॥८॥ तासां वासांस्युपादाय
नीपमारुह्य सत्वरं ॥ हसद्भिः प्रहसन्बालैः परिहासमुवाच ह ॥९॥ अत्रागत्याऽबलाः कामं स्वं स्वं वासः
प्रगृह्यतां ॥ सत्यं ब्रुवाणि नो नर्म यद्यूयं व्रतकर्षिताः ॥ न मयोदितपूर्वं वा अनृतं तदिमे विदुः ॥ ए
कैकशः प्रतीच्छध्वं सहैवोत सुमध्यमाः ॥१०॥

यः ॥५॥६॥ योगेश्वराणामपीश्वर इति प्रत्येकं ताः कृष्णेनोरथपूरणसामर्थ्यं दर्शयति ॥ तासां कर्मणः सिद्धये फल
दानायेति ॥८॥ नीपं कदंबं बालैः सह ॥९॥ हे अबलाः ॥ नो नर्म परिहासः यस्माद्यूयं व्रतश्रांताः ॥१०॥ एकैकशो व

[illegible] ॥१०८॥

भा०द०पू० ओसाध्व्यः॥भवतीनांमदर्चनमेवसंकल्पोमनोरथः॥सुचलज्जयायुष्माभिरकथितोपिमयाविदितः॥समयाऽनु
९० मोदितः॥अतःसत्योभवितुमर्हति॥२४॥अर्हत्वोक्तिसंभावनोक्त्या आत्यंतिकोनभविष्यतीतिसूचितं॥शीघ्रमिहेवता
सांसायुज्यादितिभावः॥तत्कुतइत्यतआह॥नमयीतिकामायपुनःकामभोगाय॥विषयमहिम्नाकामस्यापिदृशां

संकल्पोविदितःसाध्व्योभवतीनांमदर्च्चनं॥मयानुमोदितःसोसौसत्योभवितुमर्हति॥२४॥नमय्या
वेशितधियांकामःकामायकल्पते॥भर्जिताक्वथिताधानाप्रायोबीजायनेष्यते॥२५॥यातावलाव्र
जंसिद्धामयेमारंस्यथक्षपाः॥यदुद्दिश्यव्रतमिदंचेरुरार्यार्च्चनंसतीः॥२६॥श्रीशुकउवाच॥इ
त्यादिष्टाभगवतालब्धकामाःकुमारिकाः॥ध्यायंत्यस्तत्पदांभोजंकृच्छ्रान्निर्विविशुर्व्रजं॥२७॥
अथगोपैःपरिवृतोभगवान्देवकीसुतः॥वृंदावनाद्गतोदूरंचारयन्गाःसहाग्रजः॥२८॥नि
दाघार्कातपेतिग्मेछायाभिःस्वाभिरात्मनः॥आतपत्रायितान्वीक्ष्यद्रुमानाहव्रजौकसः॥२९॥

निर्हेतुत्वादितिभावः॥कामाप्ररोहेदृष्टांतः॥भर्जिताद्ग्धाक्वथितापक्वाधानायवादि॥बीजायअंकुरोत्प
मायन्नायइतिस्वेच्छयापुनःप्ररोहंसूचयति॥ध्रुवादीनांतथादर्शनात्॥२५॥सिद्धाःपूर्णमनोरथाः॥तदाह
इमाआगामिनीःक्षपारात्रीर्मयासहरंस्यथेति॥आर्यांकात्यायिनीसतीःसत्यः॥२६॥ २७॥२८॥२९॥ ॥ ९०

ऋतिदोषत्वेनाच्युतेनाभिहितं विवस्त्राप्लवनं व्रतस्य च्युतिहेतुं मत्वा तस्य पूर्त्तिकामाः ॥ तदशेषकर्मणां तस्य
व्रतस्य ॥ अन्येषामशेषकर्मणां च साक्षात्कृतफलभूतं तमेव नेमुः यतः स एवावद्यमृक् पापमार्ज्जकः ॥ १९ ॥ २० ॥
दृढमत्यर्थं प्रलब्धाः वंचिताः ॥ यूयं विवस्त्रा इत्यादिना ॥ त्रपया लज्जया च हापिताः ॥ अत्रागत्य स्ववासांसि ॥ इत्याग्र

इत्यच्युतेनाभिहितं व्रजाबला मत्वा विवस्त्राप्लवनं व्रतच्युतिं ॥ तत्पूर्त्तिकामास्तदशेषकर्मणां
साक्षात्कृतं नेमुरवद्यमृग्यतः ॥ १९ ॥ तास्तथावनता दृष्ट्वा भगवान्देवकीसुतः ॥ वासांसि ता
भ्यः प्रायच्छत्करुणस्तेन तोषितः ॥ २० ॥ दृढं प्रलब्धास्त्रपया च हापिताः प्रस्तोभिताः क्रीडनवच्च
कारिताः ॥ वस्त्राणि चैवापहृतान्यथाप्यमुं ता नाभ्यसूयन्प्रियसंगनिर्वृताः ॥ २१ ॥ परिधा
य स्ववासांसि प्रेष्ठसंगमसज्जिताः ॥ गृहीतचित्ता नो चेलुस्तस्मिंल्लज्जायितेक्षणाः ॥ २२ ॥ तासां
विज्ञाय भगवान्स्वपादस्पर्शकाम्यया ॥ धृतव्रतानां संकल्पमाह दामोदरोऽबलाः ॥ २३ ॥

हेलया प्रस्तोभिताः ॥ उपहसिताः ॥ सत्यं ब्रुवाणि नो नर्मेत्यादिना क्रीडनवच्च कारिताश्च बद्ध्वांजलिमित्यादि प्राय
श्चित्तच्छलेन नाभ्यसूयन् दोषदृष्ट्या नापश्यन् ॥ २१ ॥ प्रेष्ठसंगमेन सज्जिताः वशीकृताः ॥ अतो गृहीतचित्ताः सत्यो
नो चेलुः ॥ गृहीतचित्तत्वमाह ॥ तस्मिन्कृष्णे लज्जायितेक्षणाः लज्जाविलसिते ईक्षणे यासां ता इत्यर्थः ॥ २२ ॥
दामोदर इति भक्तवात्सल्यं दर्शयति ॥ अबलाः प्रति ॥ २३ ॥

भा०द०पू०
९१

३१ कुमारिकाभ्यः पूर्वमेव तन्नर्म कौतुकं तया अगृहीतभोज्यानामेव निर्गमात्तत्क्षुधार्त्तारित्युक्तं ॥ ३६ ॥ इतिश्री
दशमे द्वाविंशः ॥ २२ ॥ त्रयोविंशे ततो गोपैरन्नयाचोपदेशतः ॥ तत्पत्न्यनुग्रहान्कंसो दीक्षितानन्वतापयत्
तस्या उपवने कामं चारयंतः पशून्नृप ॥ कृष्णरामावुपागम्य क्षुधार्त्ता इदमब्रुवन् ३६ ॥ इतिश्रीमद्भा
गवते महापुराणे दशमस्कंधे श्रीकृष्ण यमुनागमनं द्वाविंशोऽध्यायः ॥ २२ ॥ गोपा ऊचुः ॥
राम राम महावीर्य्य कृष्ण दुष्टनिबर्हण ॥ एषा वै बाधते क्षुन्नस्तच्छांतिं कर्त्तुमर्हथः ॥ १ ॥ श्री
शुक उवाच ॥ इति विज्ञापितो गोपैर्भगवान्देवकीसुतः ॥ भक्ताया विप्रभार्य्यायाः प्रसीद
न्निदमब्रवीत् ॥ २ ॥ प्रयात देवयजनं ब्राह्मणा ब्रह्मवादिनः ॥ सत्रमांगिरसं नाम ह्यासते स्वर्ग
काम्यया ॥ ३ ॥ तत्र गत्वौदनं गोपा याचतास्मद्विसर्ज्जिताः ॥ कीर्त्तयंतो भगवत आर्य्यस्य मम चा
भिधाम् ॥ ४ ॥ इत्यादिष्टा भगवता गत्वा याचंत ते तथा ॥ कृतांजलिपुटा विप्रान्दंडवत्पतिता भुवि
॥ ५ ॥
भक्ताया इत्येकवचनं सर्व्वसायुज्याभिप्रायेण ॥ २ ॥ ३ ॥ ननु गोपा दातारो न तु याचका इति चेन्नत्राह
अस्मद्विसर्ज्जिताः आवाभ्यां प्रहिताः संतो याचध्वं ॥ युष्माकं कातत्र लज्जा ननु तथाप्यपात्रत्वादस्माकं किमि

तिदास्यंतीति चेन्नत्राह ॥ अस्माद्विसर्ज्जिताः कीर्त्तयं
तइति ॥ ४ ॥ ५ ॥

९१

भक्त्यानुकंप्यं कन्यास्तास्तद्धि वर्ज्जितयज्वनां॥ पत्न्यनुग्रहतस्तेषां मदनकर्ममहामदं॥ विप्रभार्यानुग्रहाय यज्ञ
वाटं गच्छन्॥ विप्राणां कानिचिन्न्यूनमभिप्रेत्य तेभ्योपि द्रुमाः श्रेष्ठा इति तानभिनंदति चतुर्भिः॥ पश्यतेति हे स्तोक
कृष्णादयो गोपा एतान्द्रुमान्पश्यत॥ परार्थमेव एकांतेन जीवितं येषां तान्॥ तदाह॥ वातवर्षादीन्स्वयं सह
हे स्तोककृष्ण हे अंशो श्रीदामन्सुबलार्ज्जुन॥ विशाल वृषभ तेजस्विन् देवप्रस्थ वरूथप॥ पश्यतैतान्महा
भागान्परार्थैकांतजीवितान्॥ वातवर्षातपहिमान्सहंतो वारयंति नः॥ ३०॥ अहो एषां वरं जन्म सर्वप्राण्यु
न३ पजीवनं॥ सुजनस्येव येषां वै विमुखा यांति नार्थिनः॥ ३१॥ पत्रपुष्पफलछायामूलवल्कलदारुभिः॥ गं
धनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते॥ ३२॥ एतावज्जन्मसाफल्यं देहिनामिह देहिषु॥ प्राणैर
र्थैर्धिया वाचा श्रेय एवाचरेत्सदा॥ ३३॥ इति प्रवालस्तवकफलपुष्पदलोत्करैः॥ तरूणां नम्रशाखानां
मध्येन यमुनां गतः॥ ३४॥ तत्र गाः पाययित्वापः सुमृष्टाः शीतलाः शिवाः॥ ततो नृप स्वयं गोपाः कामं स्वादु
[illegible] पपुर्ज्जलम्॥ ३५॥
मानान्यस्माकं वारयंति॥ ३०॥ सुजनस्य कृपालोरर्थिन इव॥ ३१॥ निर्यासो घनरसः तोक्माः पल्लवाद्यंकुराः॥ ३२॥ ३३॥
इत्यभिनंदन्॥ प्रवालादिसमृद्धेन तरूणां नम्रशाखानां मध्यतो यमुनां प्राप्तः॥ ३४॥ ३५॥ ॥ ॥॥ ५५

भा०द०पू० ॥ ११ ॥ लौकिकीं गतिमिति ॥ नहि कार्य्यार्थिनो निर्विघ्नंते को वा याचकेन पराभूयत इत्यादि लोकसंस्थितिं दर्श
६२ यन ॥ १२ ॥ केवलं देहेन गृहेषु वसंति ॥ धिया तु मय्यर्पिता ॥ यतो मुक्तिस्त्रिभ्यो ऽतो दास्यंतीति ॥ १३ ॥ १४ ॥ इषिता:
प्रेषिताः ॥ १५ ॥ स कृष्णो गोपालैः सह ॥ १६ ॥ तत्कथाक्षिप्तमनस्त्वात् तद्दर्शनोत्सुका ॥ अत एव तमुपागतं श्रुत्वा जातसंभ्रमा

न ते यदोमिति प्रोचुर्न नेति च परंतप ॥ गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः ॥ ११ ॥ तदुपाकर्ण्य भग
वान्प्रहस्य जगदीश्वरः ॥ व्याजहार पुनर्गोपान्दर्शयन्लौकिकीं गतिं ॥ १२ ॥ मां ज्ञापयत पत्नीभ्यः ससंक
र्षणमागतं ॥ दास्यंति काममन्नं वः स्निग्धा मय्युषिता धिया ॥ १३ ॥ गत्वाथ पत्नीशालायां दृष्ट्वासीनाः स्व
लंकृताः ॥ नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रुवन् ॥ १४ ॥ नमो वो विप्रपत्नीभ्यो निबोधत वचांसि नः ॥
इतो ऽविदूरे चरता कृष्णेनेहेषिता वयं ॥ १५ ॥ गाश्चारयन्स गोपालैः सरामो दूरमागतः ॥ बुभुक्षितस्य तस्यान्नं सा
नुगस्य प्रदीयतां ॥ १६ ॥ श्रुत्वाच्युतमुपायातं नित्यं तद्दर्शनोत्सुकाः ॥ तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः ॥ १७
चतुर्विधं बहुगुणमन्नमादाय भाजनैः ॥ अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः ॥

बभूवुरिति ॥ १७ ॥ भक्ष्यभोज्यलेह्यचोष्यभेदैश्चतुर्विधं बहुगुणं संस्कारविशेषैर्बहवो गुणा रससौरभ्यादयो यस्मि
न् तत् ॥ भाजनैः अमत्रैः भांडैर्वा पित्रादिभिर्वार्यमाणा ॥ अपि प्रियं श्रीकृष्णं ॥ अभिसस्रुः ॥ अभिजग्मुः अप्रतिबंधेन

६२

हे॥ अविदूरे वर्त्तमानौ संनिहितौ वो यदन्नं तत्संततः ब्रःओदनं श्रद्धा च यद्यस्ति तर्हि यच्छतेति॥७॥ दीक्षितानां यजमानभोज्या
न्नाइति वैदिष्यं नीतिः स्वयमेवाशंक्याह॥ दीक्षाया इति॥ दीक्षायाः आरभ्य अग्नीषोमीयपश्वालभात्पूर्वं दोषः॥ न॥ ततो
न्यत्र तथा सौत्रामण्यांश्चान्यत्र अन्यदा॥ ८॥ क्षुद्रे स्वर्गादावाशा मात्रं येषां ते॥ भूरीणि क्लेशाधिकानि कर्माणि

हे भूमिदेवाः शृणुत कृष्णस्यादेशकारिणः॥ प्राप्तान्जानीत भद्रं वो गोपान्नो रामचोदितान्॥ ६॥ गा
श्चारयं ताववितूरऽओदनं रामाच्युतौ वो लषतो बुभुक्षितौ॥ तयोर्द्विजा ओदनमर्थिनोर्यदि श्रद्धा च
वो यच्छत धर्मवित्तमाः॥ ७॥ दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः॥ अन्यत्र दीक्षितस्या
पि नान्नमश्नन्हि दुष्यति॥ ८॥ इति ते भगवद्याच्ञां शृण्वंतोपि न शुश्रुवुः॥ क्षुद्राशा भूरिकर्मा
णो बालिशा वृद्धमानिनः॥ ९॥ देशः कालः पृथग्द्रव्यं मंत्रतंत्रर्त्विजोऽग्नयः॥ देवता यजमानश्च क्र
तुर्धर्मश्च यन्मयः॥ तं ब्रह्म परमं साक्षाद्भगवंतमधोक्षजं॥ मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न मे
निरे॥ १०॥

येषां ते अतोऽज्ञाः वृथा ज्ञानवृद्धा इति मानवंतः॥ ९॥ ननु कर्मक्रममुल्लंघ्यादेशकालेऽन्यार्थमन्नमन्यस्मै
कथं देयं तत्राह॥ देश इति॥ पृथक् चरुपुरोडाशादि द्रव्यं मंत्रप्रयोगः॥ धर्मोऽपूर्वं मनुष्योऽयमिति दृष्ट्या मर्त्या
त्मानो॥ देहाभिमानिनो ब्राह्मणा वयं महांत इति मन्यमानाः॥ १०॥

भा० द० पू हे महाभागाः वः स्वागतं शुभमागमनं ॥ तदाह ॥ यद्यस्मात्प्रतिवेंतिरस्कारेण अस्माकं दिदृक्षया प्राप्ताः इति ॥ इदंच
९३ उपपन्नं युक्तमिति वा ॥२२॥ युक्तत्वमाह नन्विति ॥ आत्मप्रिये ॥ आत्मा च प्रियश्च तस्मिन्मयि कुशलाः विवेकिनः
अत एव स्वस्यात्मनोऽर्थे कुरुषार्थं पश्यंतीति ये ते यथा ॥ यथावद्भक्तिं कुर्वंति ॥ यथावत्त्वमाह ॥ अरुद्धा साक्षात् ॥ अ

श्रीशुक उवाच ॥ स्वागतं वो महाभागा आस्यतां करवाम किं ॥ यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि
वः ॥२२॥ नन्वद्धा मयि कुर्वंति कुशलाः स्वार्थदर्शिनः ॥ अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा ॥२३॥
प्राणबुद्धिमनःस्वात्मदारापत्यधनादयः ॥ यत्संपर्कात्प्रिया आसंस्ततः को न्वपरः प्रियः ॥२४॥ तद्या
त देवयजनं पतयो वो द्विजातयः ॥ स्वसत्रं पारयिष्यंति युष्माभिर्गृहमेधिनः ॥२५॥ पत्न्य ऊचुः ॥
मैवं विभोऽर्हति भवान्गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलं ॥ प्राप्ता वयं तुलसिदाम पदा
वसृष्टं केशैर्निवोढुमतिलंघ्य समस्तबंधून् ॥२६॥

त्वहेतुः ॥ अहैतुकी अव्यवहिता फलाभिसंधिरहिता ॥ अतएव अव्यवहिता नितरां ॥२३॥ आत्मनः सर्वतः श्रेष्ठत्वमुपपादयति
प्राणेति ॥ स्वा ज्ञातयः आत्मा देहः ॥ एते सर्वे यत्संपर्कात् ॥ यस्याध्यासेन उपकरणत्वेन वा ॥२४॥ तत्तस्मात्कृतार्था यूयं
यात देवयजनं यज्ञवाटं गच्छत ॥ ननु कृतार्थाः किमिति यास्याम इति चेत्तत्राह ॥ पतय इति ॥ पारयिष्यंति ॥ पत्नी
नामनुग्रहायेत्यर्थः ॥२५॥ नृशंसं परुषं निगमं प्रतिज्ञां ॥ न मे भक्तः प्रणश्यतीति वेदं वा ॥ न स पुनरावर्तते इति प ९३

भि

अत्र हेतुः ॥ भगवतीति ॥ दीर्घं बहुकालं श्रुतेन श्रवणेन धृत आशयो याभिस्ताः ॥१८॥ तथागताः सत्यो ददृशुः ॥ हिरण्यवत्परिधिः परिधानं यस्य तं पीताम्बरमित्यर्थः ॥ वनमाल्यं बर्हं धातुभिः प्रवालैश्च नटवद्वेषो यस्य तं ॥ अनुव्र

निषिध्यमानाः पतिभिर्भ्रातृभिर्बंधुभिः सुतैः ॥ भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः ॥१८॥ यमुनोपवनेऽशोकनवपल्लवमंडिते ॥ विचरंतं वृतं गोपैः साग्रजं ददृशुः स्त्रियः ॥ श्यामं हिरण्यपरिधिं वनमाल्यबर्हधातुप्रवालनटवेषमनुव्रतांसे ॥ विन्यस्तहस्तमितरेण धुनानमब्जं कर्णोत्पलालककपोलमुखाब्जहासं ॥१९॥ प्रायःश्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नमनसस्तमथाक्षिरंध्रैः ॥ अंतःप्रवेश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेंद्र ॥२०॥ तास्तथा त्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया ॥ विज्ञायाखिलदृग्द्रष्टा प्राह प्रहसिताननः ॥२१॥

तस्यांसे विन्यस्तो निहितो हस्तो येन तं इतरेण हस्तेन लीलयाब्जं धुनानं भ्रामयंतं ॥ कर्णयोरुत्पले यस्य ॥ अलकाः कपोले यस्य मुखाब्जे हासो यस्य तं चेति च ॥१९॥ अंतरपि लयेन सामरस्यमाह ॥ प्राय इति ॥ बहुशः श्रुतो यः प्रियतमस्योदय उत्कर्षस्तस्य कर्णपूराः कर्णौ पूरयंति कृतार्थौ कुर्वंतीति तथा तैः ॥ कर्णाभरणैरिति वा यस्मिन् श्रीकृष्णे निमग्नमनसः आविष्टचेतसस्तं लोचनद्वारेणांतः प्रवेश्य सुचिरमुपगूह्य तापं जहुः ॥ अभिमतयोऽहंकृतयः ॥ प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन्नेव लयं प्राप्य यथेति ॥२०॥ अखिलदृग्द्रष्टा सर्वबुद्धिसाक्षी तास्तथा प्राप्ताः विज्ञायापि ॥ तथेत्येतद्विवृणोति ॥ त्यक्तसर्वाशाः त्यक्ताः सर्वा आशा याभिस्ताः ॥ केवलमात्मनः ॥ स्वस्यैव दिदृक्षयेति ॥२१॥

भा०द०पू० अनुशीलयन् ॥ अनुकुर्वन् ॥ गोगोपगोपीनामिति कर्मणि षष्ठी ॥ रूपवाक्कृतैः ॥ रूपेण वाचा वा कृतैस्ते रमयन् ॥ तान् रम
९४ यित्वा रेमे इत्यर्थः ॥३१॥ अनुस्मृतिप्रकारमाह ॥ नराणुकरणवतोर्विश्वेश्वरयोर्याच्ञां ॥ यत् अहन्म हतवंतः ॥ तेन कृतेनाग
सा वयमित्यनुस्मृत्येति ॥३२॥ तदा च भार्याः गुरुइव मानयंतो भगवद्भक्तिरहितमात्मानं व्यनिंदन्नित्याह ॥ दृष्ट्वे

एवं लीलानरवपुर्नृलोकमनुशीलयन् ॥ रेमे गोगोपगोपीनां रमयन्रूपवाक्कृतैः ॥३३॥ अथानुस्मृ
त्य विप्रास्ते अन्वतप्यन्कृतागसः ॥ यद्विश्वेश्वरयोर्याच्ञामहन्म नृविडंबयोः ॥३४॥ दृष्ट्वा स्त्रीणां भग
वति कृष्णे भक्तिमलौकिकीं ॥ आत्मानं च तया हीनमनुतप्ता व्यगर्हयन् ॥३५॥ धिग्जन्म नस्त्रिवृ
द्यत्तद्धिग्व्रतं धिग्बहुज्ञतां ॥ धिक्कुलं धिक्क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे ॥३६॥ नूनं भगवतो मा
या योगिनामपि मोहिनी ॥ यद्वयं गुरवो नृणां स्वार्थे मुह्यामहे द्विजाः ॥३७॥ अहो पश्यत नारीणा
मपि कृष्णे जगद्गुरौ ॥ दुरंतभावं योऽविध्यन्मृत्युपाशान् गृहाभिधान् ॥३८॥

ति ॥ अलौकिकीं लोकातीतां ॥३४॥ त्रिवृत् ॥ शौक्लं सावित्रं दैक्ष्यमिति त्रिगुणितं जन्म व्रतं ब्रह्मचर्यं ॥ क्रिया
कर्माणि ॥ दाक्ष्यं च ॥ क्रियादाक्ष्यमित्येकं वा पदं धिग्धिगि त्यधिक्षेपे ॥ ये वयमधोक्षजे विमुखास्तेषां नो यज्ज
न्मादि तत्सर्वं धिग्धिगिति व्यगर्हयन्नित्यर्थः ॥३६॥३७॥ योऽविध्यत् ॥ अच्छिनत् तं दुरंतभावं भक्तिं पश्यतेति ॥रामः॥
९४

वा

किंच नत्वरहंतिनोऽस्मान्दे ॥ अरिंदम ॥ कामलोभपापादिदमन भवतः पादमूलयोः पतितदेहानां अन्यास्वर्गा
दिगतिरपि न भवेत् ॥ ततस्तस्मात्त्वद्दास्यमपि विधेहीति ॥ २७ ॥ मयाउपेताः अनुज्ञाताः प्रत्येत्तदेवान प्रद्रक्ष्यो
ह ॥ देवा अपीति ॥ २८ ॥ अथापि त्वां त्यक्तुं न शक्नुमः इति चेत्तत्राह ॥ नेति ॥ प्रीतये सुखाय अनुरागाय स्नेहवृद्धये ॥ अं

गृह्णंति नो न पतयो पितरौ सुतौ न भ्रातृबंधुसुहृदः कुत एव चान्ये ॥ तस्माद्भवत्प्रपदयोः पतितात्म
नां नो नान्या भवेद्गतिररिंदम तद्विधेहि ॥ २७ ॥ श्रीभगवानुवाच ॥ पतयो नाभ्यसूयेरन् पितृभ्रातृसु
तादयः ॥ लोकाश्च यो मयोपेता देवा अप्यनुमन्वते ॥ २८ ॥ न प्रीतयेऽनुरागाय ह्यंगसंगो नृणामिह ॥ तन्म
नो मयि युंजाना अचिरान्मामवाप्स्यथ ॥ २९ ॥ श्रीशुक उवाच ॥ इत्युक्ता विप्रपत्न्यस्ता यज्ञवाटं पुन
र्गताः ॥ ते चानसूयवस्ताभिः स्त्रीभिः सत्रमपारयन् ॥ ३० ॥ तत्रैका विधृता भर्त्रा भगवंतं यथाश्रुतं ॥
हृदोपगुह्य विजहौ देहं कर्मानुबंधनं ॥ ३१ ॥ भगवानपि गोविंदस्तेनैवान्नेन गोपकान् ॥ चतुर्विधेना
शयित्वा स्वयं च बुभुजे प्रभुः ॥ ३२ ॥

गसंगः अंगाभ्यां संगः ॥ २९ ॥ अनसूयवः ॥ अदोषदृष्टयः ॥ ३० ॥ देहमिति ॥ तदीयं देहम् ॥ तत्र विहा
य यद्वैतन्येन भगवंतं प्रापेत्यर्थः ॥ ३१ ॥ ३२ ॥ रामराम रामराम ॥ ऽऽ ॥ रामराम रामराम ॥ ऽऽ ॥ ऽऽ

भा० द० पू० ४६ ॥ नचाचलन् ॥ तयोर्दर्शनायनजग्मुः ॥ ४७ ॥ इति श्रीदशमे त्रयोविंशः ॥ २३ ॥ चतुर्विंशे महेंद्रस्य मखव्यावर्त्तनं हरिः
९५ तुभिः ॥ क्रतुः प्रवर्त्तयामास गोवर्द्धनमखोत्सवं ॥ भृशोरगाणां क्रियागर्वे निरस्य स्वः सुरेषु च ॥ मघवन्मदभंगाय तन्म
सर्वेन आद्यः पुरुषः स्वमायामोहितात्मनां ॥ अविज्ञातानुभावानां हंतुमर्हत्यतिक्रमं ॥ ४६ ॥ इति स्वा
घमनुस्मृत्य कृष्णे ते कृतहेलनाः ॥ दिदृक्षवो व्रजमथ कंसाद्भीता न चाचलन् ॥ ४७ ॥ इति श्रीमद्भाग
वते महापुराणे दशमस्कंधे विप्रपत्न्युपचर्यायां ग्रहणं त्रयोविंशतितमोध्यायः ॥ २३ ॥ श्रीशुक उवाच ॥
भगवानपि तत्रैव बलदेवेन संयुतः ॥ अपश्यन्निवसन्गोपानिंद्रयागकृतोद्यमान् ॥ १ ॥ तदभिज्ञो
पि भगवान्सर्वात्मा सर्वदर्शनः ॥ प्रश्रयावनतोऽपृच्छद्वृद्धान्नंदपुरोगमान् ॥ २ ॥ कथ्यतां मे पि
तः कोयं संभ्रमो व उपागतः ॥ ३ ॥ किंफलं कस्य चोद्देशः केन वा साध्यते मखः ॥ एतद्ब्रूहि महा
न्कामो मह्यं शुश्रूषवे पितः ॥ ४ ॥

खंसेन्यवारयत् ॥ ब्राह्मणाः कंसाद्भीताः ॥ स्वाश्रमस्थाएवभु
गवंतमभजन् ॥ भगवानपि तत्रैव निवसन् ॥ इंद्रयागकृतोद्यमान् गोपानपश्यदिति संबंधः ॥ १ ॥ २ ॥ ३ ॥ वृथा
संभ्रमो भवति मखोयस्मिन्नित्येवं चेत्किमत्र फलं कोदेवता केनाधिकारिणा ॥ केनवासाधनेन साध्यते ए

तद्ब्रूहि महान्कामो मम श्रवणे वर्त्तते ॥ यद्वा तव
महान्कामो दृश्यत इति ॥ ४ ॥

द्विजातिसंस्कार उपनयनं ।। क्रियाः संध्योपासनादयः ।। ३९ ।। ४० ।। ४१ ।। स्वात्मदोषापवर्गेण चांचल्यगर्वादित्यागे

नासां द्विजातिसंस्कारो न निवासो गुरावपि ।। न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ।। अथा
पि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे ।। भक्तिर्दृढा न चास्माकं संस्कारादिमतामपि ।। ३९ ।। ननु स्वार्थवि
मूढानां प्रमत्तानां गृहेहया ।। अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ।। ४० ।। अन्यथा पूर्णकामस्य
कैवल्याद्याशिषां पतेः ।। ईशितव्यैः किमस्माभिरीशस्यैतद्विडंबनं ।। ४१ ।। हित्वान्यान्भजते यं श्रीः पाद
स्पर्शाशयाऽसकृत् ।। स्वात्मदोषापवर्गेण तद्याच्ञा जनमोहिनी ।। ४२ ।। देशः कालः पृथग्द्रव्यं मंत्रतं
त्रर्त्विजोऽग्नयः ।। देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ।। स एव भगवान्साक्षाद्विष्णुर्योगेश्वरेश्व
रः ।। जातो यदुष्वित्याशृण्म ह्यपि मूढा न विद्महे ।। ४३ ।। अहो वयं धन्यतमा येषां नस्तादृशीः स्त्रियः ।। भ
क्त्या यासां मतिर्जाता अस्माकं निश्चला हरौ ।। ४४ ।। नमस्तुभ्यं भगवते कृष्णायाकुंठमेधसे ।। यन्मा
यामोहितधियो भ्रमामः कर्मवर्त्मसु ।। ४५ ।।

न ।। ४६ ।। इत्याशृण्म एवं सर्वत्र श्रुतवंतो वयं हित्वापीति ।। ४३ ।। ४४ ।। ४५ ।। राम राम राम राम राम राम

भा॰द॰पू॰
९६

उपजीवंति ॥ जीविकां कल्पयंति ॥ धर्मार्थकामसिद्ध्यै ॥ ननु कृष्यादिभिः ॥ जीवंति किमिंद्रेण तत्राह ॥ पुंसामिति भोग्यप
लसाधकः ॥ पर्जन्यो विना कृष्यादिवैफल्यादित्यर्थः ॥ ११ ॥ १२ ॥ इंद्राय मन्युं जनयन्निति कोपजननद्वारा गर्वपर्व
ताद्विद्रुमवतारयितुं देवतानिराकरणं न त्वयमेवाभिप्राय इत्यर्थः ॥ १३ ॥ अथ मंत्तावत्कर्मवादेन देवान्निराकरो

तच्छेषेणोपजीवंति त्रिवर्गफलहेतवे ॥ पुंसां पुरुषकाराणां पर्जन्यः फलभावनः ॥ ११ ॥ य एवं विसृजे
द्धर्मं पारंपर्यागतं नरः ॥ कामाद्द्वेषाद्भयाल्लोभात्स वै नाप्नोति शोभनं ॥ १२ ॥ श्रीशुक उवाच ॥ व
चो निशम्य नंदस्य तथान्येषां व्रजौकसां ॥ इंद्राय मन्युं जनयन् पितरं प्राह केशवः ॥ १३ ॥ श्रीभ
गवानुवाच ॥ कर्मणा जायते जंतुः कर्मणैव विलीयते ॥ सुखं दुःखं भयं क्षेमं कर्मणैवाभिप
द्यते ॥ १४ ॥ अस्ति चेदीश्वरः कश्चित्फलरूप्यन्यकर्मणां ॥ कर्त्तारं भजते सोपि न ह्यकर्तुः प्रभुर्हि
सः ॥ १५ ॥

ति कर्मणेति ॥ १४ ॥ ननु जडात्कर्मणः केवलात्कथं फलसिद्धिः स्यात् ॥ अहो अत्र शीलितमीमां ॥
सानां स्वमतिविलसितमहो कर्मणां फलकारणत्वे वचनं तोऽश्वशेन किं तत्तोऽनुपपन्नं नाम केचित्तु
न शतिसाहस्रमीनाः कर्म परतंत्रमीश्वरं मन्यंते तन्मतमनूद्य निराकरोति ॥ अस्ति चेदिति ॥ स्वयं कर्मभि
रलिप्तोऽन्येषां कर्मणां फलरूपी फलदाता कर्त्तारं भजते तत्कर्मफलदानेन ॥ १५ ॥

जीवानो १

९६

तूष्णीं स्थितं नंदं प्रत्याह ॥ नेति ॥ सर्वात्मनां सर्वत्रात्मदृष्टीनां ॥ अत एव न विद्यते स्वपर इति दृष्टिर्येषां ॥ इति स्वपर इद
ष्ट्यभावादेव न तदुदासीनमित्रादयोपि येषां संतीत्याह ॥ अमित्रेति ॥ न मित्रं सुदास्तः उदासीनाविद्विट् च येषां तेषां कृत्यं स्व
कर्म न गोपनीयं किंचिदस्तीत्यर्थः ॥ ५ ॥ सत्यपि भेददर्शने उदासीनः शत्रुवद्वर्ज्यः ॥ आत्मतुल्यत्वात्सुहृन्मित्रं
नहि गोप्यं हि साधूनां कृत्यं सर्वात्मनामिह ॥ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां ॥ ५ ॥ उदासीनो
ऽरिवद्वर्ज्य आत्मवत्सुहृदुच्यते ॥ ६ ॥ ज्ञात्वाज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति ॥ विदुषः कर्मसिद्धिः स्या
द्यथा नाविदुषो भवेत् ॥ ७ ॥ तत्र तावत्क्रियायोगो भवतां किं विचारितः ॥ अथवा लौकिकस्तन्मे पृच्छतः सा
धु भण्यतां ॥ ८ ॥ नंद उवाच ॥ पर्जन्यो भगवानिंद्रो मेघास्तस्यात्ममूर्तयः ॥ तेऽभिवर्षंति भूतानां
प्रीणनं जीवनं पयः ॥ ९ ॥ तं तात वयमन्ये च वार्मुचां पतिमीश्वरं ॥ द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभि
र्नराः ॥ १० ॥
पुनर्वर्जनीय इत्याह ॥ उदासीन इति ॥ ६ ॥ किंच सुहृद्भिः सह विचार्य ज्ञात्वैव कर्म क ना
र्त्तव्यं न गतानुगतिकमात्रेणेत्याह ॥ ज्ञात्वेति ॥ अज्ञात्वा च ॥ तत्र विदुषो यथावत्कर्मफलं स्यात् ॥ न यथाविदुषः ॥ ७ ॥ भवतां
अयं क्रियायोगः शास्त्रीयो विचारितः ॥ अथवा ॥ लौकिक आचारप्राप्त एवेति साधु सोपपत्तिकं भण्यतां कथ्यतां ॥ ८ ॥ आचा
रप्राप्त एव भवति ॥ सहेतुकमाह ॥ पर्जन्य इति ॥ आत्ममूर्तयः प्रियामूर्तयः ॥ ततः किमत आह ॥ तमिति ॥ ९ ॥ तमिंद्रं वा
र्मुचां मेघानां ॥ तद्रेतसा ॥ तद्वृष्टिपयसा ॥ १० ॥

भा० द० ४ हेतुवलेनैवविपक्षेदोषमाह।।आजीव्येति उपजीव्येति उपजीवतिसेवते।।२०।।स्ववृत्तिंवक्तुंदृष्टांतत्वेन
९७ वर्णानांवृत्तिभेदमाह।।वर्तेतेति।।ब्रह्मणावेदाध्यापनादिना।।२१।।वैश्यवृत्तेश्चातुर्विध्यमाह।।कृषीति।।कृ
षिवाणिज्यसहितागोरक्षाएवंकुशीदं।।वृद्धिजीवनंतुचतुर्थं।।२२।।ननुगवामपीतिवृत्तिर्महेंद्राधीने

आजीव्यैकतरंभावंयस्त्वन्यमुपजीवति।।नतस्माद्विंदतेक्षेमंजारंनार्य्यसतीयथा।।२०।।
वर्त्तेतब्रह्मणाविप्रोराजन्योरक्षयाभुवः।।वैश्यस्तुवार्त्तयाजीवेच्छूद्रस्तुद्विजसेवया।।२१।।
कृषिवाणिज्यगोरक्षाकुशीदंतुर्य्यमुच्यते।।वार्त्ताचतुर्विधातत्रवयंगोवृत्तयोनिशं।।२२।।स
त्वंरजस्तमइतिस्थित्युत्पत्यंतहेतवः।।रजसोत्पद्यतेविश्वमन्योन्यंविविधंजगत्।।२३।।रज
साचोदितामेघावर्षंत्यंबूनिसर्वतः।।प्रजास्तैरेवसिध्यंतिमहेंद्रःकिंकरिष्यति।।२४।।

चेत्याशंक्यनिरीश्वरसांख्यमताश्रयेणनिराकरोतिसत्वमितिश्लोकद्वयेन।।अन्योन्यंस्त्रीपुरुषयो
गेन।।२३।।सर्वत्रेतिसमुद्रशिलोषरादिष्वपिवृष्टिदर्शनात्।।नप्रेक्षापूर्वकत्वंवृष्टेरितिभावः।।तैरेवमे
घैरेवसिध्यंतिजीवंति।।२४।। ९७

अतः कर्मणा स्वफलसिद्धेस्तत्पारतंत्र्येण चाजागलस्तनतुल्यत्वान्न देवतया कृत्यमित्याह ॥ किमिं
द्रेणेति ॥ ननु कर्मणोऽपि प्रवृत्तिरीश्वरमपेक्षत एव ॥ कथं सर्वथा देवताया अप्रयोग इत्याशंक्याह स्वभा
वविहितमिति ॥ स्वभावेन प्राक्तनेन संस्कारेणैव विहितं प्राप्तमेतदन्यथा कर्तुमनीशेन ॥ १६ ॥ एतद्विवृणो
ति स्वभावतंत्र इति ॥ प्रवृत्तेः संस्काराधीनत्वात् किमंतर्यामिणेत्यर्थः ॥ १७ ॥ तस्मात्स्वभावतो निष्पन्नस्य के

किमिंद्रेणेह भूतानां स्वस्वकर्मानुवर्त्तिनां ॥ अनीशेनान्यथाकर्तुं स्वभावविहितं नृणां ॥ १६ ॥ स्व
भावतंत्रो हि जनः स्वभावमनुवर्त्तते ॥ स्वभावस्थमिदं सर्वं सदेवासुरमानुषं ॥ १७ ॥ देहानुच्चाव
चान्जंतुः प्राप्योत्सृजति कर्मणा ॥ शत्रुमित्रमुदासीनः कर्मैव गुरुरीश्वरः ॥ १८ ॥ तस्मात्संपूज
येत्कर्म स्वभावस्थः स्वकर्मकृत् ॥ अंजसा येन वर्त्तेत तदेवास्य हि दैवतम् ॥ १९ ॥

र्मण एव सर्वकारणत्वात् कर्मैव पूज्यमित्याह ॥ देहानिति सार्द्धेन ॥ १८ ॥ तं पूजयेत् संमानयेत् ॥ न
नु देवतोद्देशेन द्रव्यत्यागात्मकत्वात् कर्मणः कथं देवतां विना सिद्धिरित्याशंक्य कर्म्मागमात्रं दे
वतेति ॥ पक्षमुपसंहरन्निर्हेतुवादमाश्रित्यान्यमेव शैलगवादिरूपं देवतां समर्थयते अंजसेति ॥ १९ ॥

भा०द०पू० सर्वान्नुशिरःकंपेनानुमोदयन्नाह गोब्राह्मणाद्रीणामिति मह्यं मम च ॥३०॥३२॥३३॥ ~~एवं विलिन्नानां ध्मा~~
१९८ ~~पितालेनोदितेन इहाना यस्तुते अपनयुते श्रीमद्देनय स्तनोगर्वस्तं दविभ्यतस्तान अस्माहि अहं~~ पो
पितालेनोदितेन इहाना यस्तुते अपनयुते ... दत्वा ॥ आहृताः सादराः ॥ अ
तद्द्रव्येण तेन महेंद्रमखद्रव्येण गिरिद्विजान् प्रतिप्याय यथं दलीनुपहृत्य दत्वा ॥ आदृताः सादराः ॥ अ

एतन्मम मतं तात क्रियतां यदि रोचते ॥ अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ॥३०॥ श्री
शुक उवाच ॥ कालात्मना भगवता शक्रदर्पजिघांसता ॥ प्रोक्तं निशम्य नंदाद्याः साध्वगृ
ह्णंत तद्वचः ॥३१॥ तथा च व्यदधुः सर्वं यथाह मधुसूदनः ॥३२॥ वाचयित्वा स्वस्त्ययनं तद्द्रव्येण
गिरिद्विजान् ॥ उपहृत्य बलीन्सम्यगादृता यवसं गवां ॥ गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रद
क्षिणं ॥ अनांस्यनडुद्युक्तानि ते चारुह्य स्वलंकृताः ॥ गोप्यश्च कृष्णवीर्याणि गायंत्यः सद्विजा
शिषः ॥३४॥ कृष्णस्त्वन्यतमं रूपं गोपविश्रंभणं गतः ॥ शैलोस्मीति ब्रुवन्भूरि बलिमादद्बृहद्व

पुः ॥३५॥
नडुद्युक्तानि ॥ उक्षमानडुद्भिर्युक्तानि ॥ सद्विजाशिषः द्विजाशीर्भिः सहिताः ॥३४॥
गोपविश्रंभणं गोपानां विश्वासजनकं रूपं गतः ॥ प्राप्तः सन् बलिमुपहारमादत्त अभक्षयत् ॥३५॥ १९८

तथापियोगक्षेमार्थंदेवतापेक्षेतिचेदत्राह ॥ ननःपुरइति ॥ पुरःपत्तनानि जनपदादेशाः ॥ अस्माकंयो
गात्क्षेमहेतुः ॥ वनशैलादयएवेतिभावः ॥ २५ ॥ ब्राह्मणाग्नीनपिसंग्रहन्निगमयति ॥ तस्मादिति ॥ स्वयमुत्प्रेक्षि
तयागकल्पनामाह ॥ यइंद्रमखसंभाराइतिसार्धपंचभिः ॥ संभाराःसाधनानि ॥ २६ ॥ सूपमोदनं ॥ पायसंकंच

ननःपुरोजनपदानग्रामानगृहावयं ॥ वनौकसस्तातनित्यंवनशैलनिवासिनः ॥ २५ ॥ तस्माद्गवां
ब्राह्मणानामद्रेश्चारभ्यतांमखः ॥ यइंद्रयागसंभारास्तैरयंसाध्यतांमखः ॥ २६ ॥ पच्यंतांविविधाः
पाकाःसूपांताःपायसादयः ॥ संयावापूपशष्कुल्यःसर्वदोहश्चगृह्यतां ॥ २७ ॥ हूयंतामग्नयः
सम्यग्ब्राह्मणैर्ब्रह्मवादिभिः ॥ अन्नंबहुगुणंतेभ्योदेयंवोधेनुदक्षिणाः ॥ २८ ॥ अन्येभ्यश्चाश्व
चांडालपतितेभ्योयथार्हतः ॥ यवसंचगवांदत्वागिरयेदीयतांबलिः ॥ २९ ॥ स्वलंकृताभुक्तवं
तःस्वनुलिप्ताःसुवाससः ॥ प्रदक्षिणांचकुरुतगोविप्रानलपर्वतान् ॥ ३० ॥

लेपयसिपक्वं ॥ संयावादयोगोधूमादिविकाराः ॥ कमसूपपायसयोः श्रुत्यादौस्यार्थत्वोऽन्येषांपाव
तः ॥ २७ ॥ यागशोभार्थंअश्वादीनामदनार्थंचाह ॥ हूयन्तामिति ॥ धेनुदक्षिणाः ॥ धेनुसहितादक्षिणाः ॥ ताएव ॥ वा
दक्षिणाः ॥ वोयुष्माभिः ॥ २८ ॥ यवसंतृणं ॥ २९ ॥ ३० ॥

भा०द० ९९ ॥ देवहेलनं ॥ देवस्यममावज्ञा ॥ २ ॥ अहृद्यैः ॥ असमर्थैः ॥ कर्ममयैः क्रियानिर्वृत्तैः ॥ अत एव नाममनोनिभैः
नाममात्रेण यानाव इति व्यर्वाक्रयंते ॥ नसदृशैः ॥ आन्वीक्षिकीमात्मानुस्मृतिरूपां ॥ ३ ॥ तथा वाचालं
बहुभाषिणं ॥ बालिशं शिशुं पंडितमानिनं ॥ पंडितमन्यं ॥ अतस्तथमविनीतमिति निंदायां याजितापी
ति १ इस्यभारती श्रीकृष्णस्तोत्रं तथाहि वाचालशास्त्रयोनिं ॥ बालिशमेवमपि शिशुवन्निरभिमानिनं तत्त्वं

अहो श्रीमद माहात्म्यं गोपानां कानने कसां ॥ कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनं ॥ ३ ॥ य
थाहृद्यैः कर्ममयैः क्रतुभिर्नामनोनिभैः ॥ विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णवं ॥ ४ ॥
वाचालं बालिशं स्तब्धमज्ञं पंडितमानिनं ॥ कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं ॥ ५ ॥ येषां
श्रिया बलिष्ठानां कृष्णेनाध्मापितात्मनां ॥ धुनुत श्रीमदस्तंभं पश्यन्त्वपत्रसं त्वयं ॥ ६ ॥ अहं चैराव
तं नागमारुह्यानुव्रजे व्रजं ॥ मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ॥ ७ ॥

अनास्थवंद्यस्या भावादनम्रं ॥ स्तब्धं ॥ नास्ति ज्ञो यस्मात्तं सर्वज्ञमित्यर्थः ॥ पंडितमानिनं ब्रह्मविदां बहुमाननी
यं कृष्णं सहानंदरूपं परब्रह्म मर्त्यमिति याति भक्तवात्सल्येन मनुष्यतया प्रतीयमानमिति ॥ ५ ॥ अबलिष्ठानाम
त्मानां ध्मापितात्मनां गंहितदेहानां ॥ धुनुत अपनयत श्रीमदेन स्तंभं गर्वं तं ॥ ६ ॥ विभ्यतस्तान प्रत्याह ॥ अहं चे

९९

अहो इति सार्द्धश्लोकं पठन् ॥ अस्मिन्प

तस्मै आत्मने ॥ ~~आत्मने~~ आत्मनात्स्वयं व्रजजनैः सह नमस्कृते ॥ अस्मै अद्रये शर्मणे हेमाय ॥ ३७ ॥ ३५ ॥ कर्मैवालं प्राक्के

घे आकारलोपस्त्वार्षः ॥ ३६ ॥ कामरूपी सर्पादिरूपः ॥ वा त्रीक त्री इदं वत्तो ति यमुक्का देव होभेषण मत्तीन त्वभीष्टो

स्वभावो गुणो वा कर्म्मणो वा तदृशो वा महेश्वरः ॥ अहो पश्यत शैलो सो रूपी नो ऽनुग्रहं व्यधात् ॥ ए

आत्मनो ॥ २ तस्मै नमो व्रजजनैः सह चक्रे आत्मना आत्मने ॥ ३६ ॥ इति स्मैन मस्यामः शर्मणे गवां ॥ ३७ ॥ इत्यद्रिगो

षोऽव्रजान् तोमर्त्यान्कामरूपी वनौकसः ॥ हंति ह्यस्मै नमस्यामः शर्मणे गवां ॥ ३७ ॥ इत्यद्रिगो

द्विजमखं वासुदेव प्रचोदिताः ॥ यथा विधाय ते गोपाः सहकृष्णा व्रजं ययुः ॥ ३८ ॥ इति श्रीमद्भाग

वते महापुराणे दशमस्कंधे इंद्रमखभंगश्चतुर्विंशोऽध्यायः ॥ २४ ॥ श्रीशुक उवाच ॥ इंद्रस्तदात्मनः

पूजां विज्ञाय विहतां नृप ॥ गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप सः ॥ १ ॥ गणं सांवर्त्तकं नाम मे

घानां चांतकारिणां ॥ इंद्रः प्राचोदयत्क्रुद्धो वाक्यं चाहेशमान्युत ॥ २ ॥

३७ ॥ ३८ ॥ इति दशमे चतुर्विंशोऽध्यायः ॥ २४ ॥

पंचविंशे रुषा शक्रे व्रजनाशाय वर्षति उद्धृत्य गिरिमासारादरक्षद्गोकुलं प्रभुः ॥ कृष्णोनाथो येषां तेभ्यः ॥ १ ॥ क्रुद्धः सांवि

द्रः ॥ सांवर्त्तकं नाम संवर्त्तः प्रलयः तत्कर्त्तारं मेघानां प्रसिद्धं गणं प्राचोदयत् प्रेरयामास ॥ तत्रकथं कृष्णनाथा नाथा ते प्रे

भा०द० ८ । देवहेलनं । देवस्य ममावज्ञा ३ । अदृढैः । असमर्थैः कर्ममयैः क्रियानिर्वृत्तैः । अत एव नाममनोनिभैः
ए८ नाममात्रेणायानावद् इति व्यर्थं क्रियंते । तुसदृशैः । आन्वीक्षिकीमात्मानुस्मृतिरूपां । ४ । तथा वाचालं
बहुभाषिणं । वालिशं शिशुं पंडितमानिनं पंडितमन्यं । अतस्तब्धमविनीतमिति निंदायां योजितायां
ति १ द्रस्य भारती श्रीकृष्णस्तोत्रं न त्वहि वाचालं शास्त्रयोनिं । वालिशमेवमपि शिशुवन्निरभिमानिनं स्तब्धं

अहो श्रीमदमाहात्म्यं गोपानां काननौकसां । कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनं ॥ ३ ॥ य
थादृढैः कर्ममयैः क्रतुभिर्नामनौनिभैः । विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णवं ॥ ४ ॥
वाचालं वालिशं स्तब्धमज्ञं पंडितमानिनं । कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं ॥ ५ ॥ एषां
श्रियावलिप्तानां कृष्णेनाध्मापितात्मनां । धुनुत श्रीमदस्तंभं पशून्नयत संक्षयं ॥ ६ ॥ अहं चैराव
तं नागमारुह्यानुव्रजे व्रजं । मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ॥ ७ ॥

अन्यास्वं धस्यात्भावादनम्रं । अज्ञं नास्ति ज्ञो यस्मात् । न सर्वज्ञमित्यर्थः । पंडितमानिनं ब्रह्मविदां बहुमाननी
यं । कृष्णं सहासं नररूपं परब्रह्म मर्त्यमिति या विभक्त्या वात्सल्येन मनुष्यवत्तया प्रतीयमानमिति ५ । अवलिप्तानां मत्तानां
ध्मापितात्मनां दृढितदेहानां । धुनुत अपनयत श्रीमदेन स्तंभो गर्वस्तं ६ । विभ्यतस्तान्प्रत्याह । अहं च

यः १

भा०द०टी०
१००

तदाह अपर्त्विति ॥ अपगत ऋतुर्यस्य तद्वर्षं ॥ अतिशयितो वातो यस्मिंस्तत् ॥ अतिवातं ॥ शिलामयं शि
लाप्रचुरं ॥१५॥ तत्र प्रतिज्ञा एवं कं गोवर्द्धनोद्धरणमाह ॥ तत्रेति ॥ प्रतिविधिं प्रतिकारं ॥ स्वसामर्थ्येन साध
यिष्यामि ॥ तेन च मौढ्याल्लोकेशमानिनां श्रीमदलक्षणं तमो हरिष्यामि ॥ बहुवचनेन वहेणादीनभिप्रैति ॥१६॥

अपर्त्वत्युल्बणं वर्षमतिवातं शिलामयं ॥ स्वयागेन निहत्य ऽस्माभिरिंद्रो नाशाय वर्षति ॥१५॥ तत्र प्रति
विधिं सम्यगात्मयोगेन साधये ॥ लोकेशमानिनां मौढ्याद्धरिष्ये श्रीमदं तमः ॥१६॥ न हि सद्भावयुक्ता
नां सुराणामीशविस्मयः ॥ मत्तो ऽसतां मानभंगः प्रशमायोपकल्पते ॥१७॥ तस्मान्मच्छरणं गोष्ठं म
के ४ न्नाथं मत्परिग्रहं ॥ गोपाये स्वात्मयोगेन सोयं मे व्रत आहितः ॥१८॥ इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्द्धना
चलं ॥ दधार लीलया कृष्णश्छत्राकमिव बालकः ॥१९॥ अथाह भगवान्गोपान्हे ऽंब तात व्रजौ
कसः ॥ यथोपजोषं विशत गिरिगर्त्तं सगोधनाः ॥२०॥ [illegible] मद इति वीतधृक्तानां सुराणां ॥ ई

ननु देवाः सात्विकास्त्वइंद्रः कथं कुतस्तेषां तमस्तत्राह न हीति ॥ सद्भावः
शा वयमिति विस्मयो गर्वो हि यस्मान्न घटते ॥ अतो ऽसतां तेषां मानभंगोऽनुग्रह एवेत्याह ॥ मत्त इ
ति ॥१७॥ गोपाये रक्षिष्यामि ॥ किंच ॥ सोयं मे मया व्रतः नियमः ॥ संकल्पो वा आहितः धृत इत्यर्थः ॥१८॥ कृत्वा उत्क्षि

त्य छत्राकं शिलिंध्रं यथा ॥१९॥ यथोपजोषं यथासु
खम ॥२०॥

१००

मघवताइंद्रेण निर्मुक्तबंधनं येषां ते प्रलयाभिप्रायेण कृता आसन् ॥ तदा निर्मुक्तबंधनाः संतः आसारैः धारासंपा
तैः पीडयामासुः ॥ च स्तनयित्नुभिरशनिभिः स्तनंतः गर्जंतः मरुद्गणैः ॥ आवहप्रवहादिवायुसमूहैः ॥ नुन्नाः प्रेरिताः
जलशर्कराः जलोपलान् ॥ ९ ॥ स्थूणावत्स्थूला ॥ अभ्रेषु मुंचत्सु सत्सु ॥ नतोन्नतं निम्नं उन्नतं तद्विपरीतं यथाभवति
पि२ श्रीऋषिरुवाच ॥ इत्थं मघवताज्ञप्ता मेघा निर्मुक्तबंधनाः ॥ नंदगोकुलमासारैः पीडयामासुरोजसा ॥ च वि
द्योतमाना विद्युद्भिः स्तनंतः स्तनयित्नुभिः ॥ तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ॥ ९ ॥ स्थूणास्थू
लावर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः ॥ जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतं ॥ १० ॥ अत्यासारा
तिवातेन पशवो जातवेपनाः ॥ गोपा गोप्यश्च शीतार्त्ता गोविंदं शरणं ययुः ॥ ११ ॥ शिरः सुतांश्च का
येन प्रच्छाद्यासारपीडिताः ॥ वेपमाना भगवतः पादमूलमुपाययुः ॥ १२ ॥ कृष्ण कृष्ण महाभाग
त्वन्नाथं गोकुलं प्रभो ॥ त्रातुमर्हसि देवान्नः कुपिताद्भक्तवत्सल ॥ १३ ॥ शिलावर्षनिपातेन हन्यमा
नमचेतनम् ॥ निरीक्ष्य भगवान्मेने कुपितेंद्रकृतं हरिः ॥ १४ ॥
तथा भूर्नादृश्यत ॥ १० ॥ जातवेपनाः जातकंपाः ॥ ११ ॥ तत्र पशूनां यानं विशिनष्टि शिर इति ॥ १२ ॥ गोपगोपीनां
प्रार्थनामाह ॥ कृष्ण कृष्णेति ॥ त्वमेव नाथो यस्य ॥ तद्गोकुलं गवां कुलं वंशं नोऽस्मांश्च देवादिंद्रात् त्रातुं रक्षि
तुमर्हसि ॥ १३ ॥ विज्ञापनात्पूर्वमेव कुपितेंद्रेण कृतं तद्वर्षं मेने ॥ १४ ॥

भा०द०पू० ३०॥३०॥३१॥३२॥ ततोगोवर्द्धनस्थानात्॥ अत्रस्यश्रीकृष्णस्यतथाविधमतिगोवर्द्धनोद्धरणादिरूपाणिकृतानिकर्मा
१०१ णिगायंत्यः॥ ईयुः कथंभूताः एवंप्रेम्णाहृदिस्पृशंतीतिहृदिस्पृशस्ताः॥ यद्वा कथंभूतस्यप्रेष्ठस्त्वनतासांहृदि

यशोदारोहिणीनंदोरामश्चवलिनांवरः॥ कृष्णमालिंग्ययुयुजुराशिषःस्नेहकातराः॥ ३०॥ दिविदेवग
णाःसाध्याःसिद्धगंधर्वचारणाः॥ तुष्टुवुर्मुमुचुस्तुष्टाःपुष्पवर्षाणिपार्थिव॥ ३१॥ शंखदुंदुभयो
नेदुर्दिविदेवप्रचोदिताः॥ जगुर्गंधर्वपतयस्तुंवुरुप्रमुखान्नृप॥ ३२॥ ततोनुरक्तैःपशुपैःपरिश्रितोरा
न्पर्ध जन्स्वगोष्ठंसवलोव्रजद्धरिः॥ तथाविधान्यस्यकृतानिगोपिकागायंत्यईयुर्मुदिताहृदिस्पृशः॥ ३३॥ इ
तिश्रीमद्भागवतेमहापुराणेदशमस्कंधेगोवर्द्धनोद्धरणंपंचविंशोऽध्यायः॥ २५॥ श्रीशुकउवा
च॥ एवंविधानिकर्माणिगोपाःकृष्णस्यवीक्ष्यते॥ अतद्वीर्यविदःप्रोचुःसमभ्येत्यसुविस्मिताः॥ १॥
वालकस्ययदेतानिकर्माण्यत्यद्भुतानिवै॥ कथमर्हत्यसौजन्मग्राम्येष्वात्मजुगुप्सितं॥ २॥

स्पृशंतीतिहृदिस्पृक्तत्तस्य॥ ३३॥ इतिश्रीदशमेपंचविंशः॥ २५॥ षड्विंशेविस्मितान्गोपान्कृष्णस्याद्भुतकर्मभिः॥ नं
दोगर्गोक्तिमाश्राव्यतदैश्वर्यमवर्णयत्॥ समभ्येत्यश्रीनंदमभिगम्य॥ १॥ यदूचुस्तदाह वालकस्येति॥ यत्तस्मा
द्भुतानिकर्माणितस्माद्ग्राम्येषुकथंजन्माहतीति॥ आत्मजुगुप्सि
१०१

२१ सव्रजाः शाकटमंडलिसहिताः ॥ सोपजीविनः भृत्यपुरोहिताः २२ पदात् स्थानात् २३ २४ २५ युद्रप्रायाः विगा

न त्रास इह वः कार्यो मद्धस्ताद्रिनिपातने ॥ वातवर्षभयेनालं तत्त्राणं विहितं हि वः ॥२१॥ तथा निर्विविशु
र्गर्त्तं कृष्णाश्वासितमानसाः ॥ यथावकाशं सधनाः सव्रजाः सोपजीविनः ॥२२॥ क्षुत्तृड्व्यथां सुखापेक्षां
हित्वा तैर्व्रजवासिभिः ॥ वीक्ष्यमाणो दधाराद्रिं सप्ताहं नाचलत्पदात् ॥२३॥ कृष्णयोगानुभावं तं निशा
म्येंद्रोऽतिविस्मितः ॥ निस्तंभो भ्रष्टसंकल्पः स्वान्मेघान्संन्यवारयत् ॥२४॥ खं व्यभ्रमुदितादित्यं
वातवर्षं च दारुणम् ॥ निशाम्योपरतं गोपान्गोवर्द्धनधरोऽब्रवीत् ॥२५॥ निर्यात त्यजत त्रासं गोपाः स
स्त्रीधनार्भकाः ॥ उपारतं वातवर्षं व्युदप्रायाश्च निम्नगाः ॥२६॥ ततस्ते निर्ययुर्गोपाः स्वं स्वमादाय
गोधनं ॥ शकटोढोपकरणं स्त्रीबालस्थविराः शनैः ॥२७॥ भगवानपि तं शैलं स्वस्थाने पूर्ववत्प्रभुः ॥ पश्य
तां सर्वभूतानां स्थापयामास लीलया ॥२८॥ तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरंभणा
दिभिः ॥ गोप्यश्च सस्नेहमपूजयन्मुदा दध्यक्षताद्भिर्युयुजुः सदाशिषः ॥२९॥

सोदकप्रायाः स्वल्पजलाः स्वल्पार्थे २६ शकटोढोपकरणं शकटेरूढमुपकरणं यथा भवति तथा २७ २८ निभृताः पूर्णाः

यथायथोचितं परिरंभणादिभिः समीयुः उपजग्मुः सदा
शिषः श्रेष्ठानामाशीर्वादान् ॥२९॥

वि १

ना०द०प० १०॥११॥ आशीविषतमः॥ अतिक्रूरविषश्चासावहींद्रश्च तं १२ औत्पत्तिकः स्वाभाविकः कथमिति किंसर्वे
१०२ षामात्मायस्यादितिशंका॥१३॥ क्वमप्यत्तिविस्मयेनाभिनयेनवदंति॥ क्वसप्तहायन इति॥१४॥ प्राकृसुत

हत्वा रासभदैत्येयं तद्बंधूंश्च बलान्वितः॥ चक्रे तालवनं क्षेमं परिपक्वफलान्वितं॥१०॥ प्रलं
बंघातयित्वोग्रं बलेन बलशालिना॥ अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः॥११॥ आ
शीविषतमाहींद्रं दमित्वा विमदं ह्रदात्॥ प्रसह्योद्वास्य यमुनां चक्रे सौ निर्विषोदकां॥
१२॥ दुस्त्यजश्चानुरागो स्मिन्सर्वेषां नो व्रजौकसां॥ नंद ते तनये स्मासु तस्याप्यौत्पत्तिकः क
थं॥१३॥ क्व सप्तहायनो बालः क्व महाद्रिविधारणं॥ ततो नो जायते शंका व्रजनाथ तवात्मजे॥
१४॥ नंद उवाच॥ श्रूयतां मे वचो गोपा व्येतु शंका च वो र्भके॥ एनं कुमारमुद्दिश्य गर्गो मे
यदुवाच ह॥१५॥ वर्णास्त्रयः किलास्यासन् गृह्णतो नुयुगं तनूः॥ शुक्लो रक्तस्तथा पीत इदा
नीं कृष्णतां गतः॥१६॥

मेवगर्गाचार्य्यवाक्यं तच्चरित्रपरिशीलनेन निवृत्तासंभावनस्य
नंदस्य कृष्णतत्त्वावबोधकज्ञानं॥ सद्दानीति नेव वाक्येन गोपानुपदिशति॥ श्रूयतामिति॥१५॥१६॥ १०२॥

अद्भुतानि कर्माण्याह द्वादशभिः यः सप्तहायन इति कथं बिभ्रत्तस्थितः इति। पुष्करं पद्मं गजराट् महागज इ
व॥ ३॥ महौजसः महाबलो या ? ततो वर्षत्रयं यौवनकालेन यथा पीयूते तद्वत् कथमित्यनुवर्त्तते॥ ४॥ अनसोऽ
धः शयानस्य मासस्य मासात्रयस्परि छेदको यस्य। उदकं ऊर्ध्वं चरणे हिन्वतः चालयतः प्रपदेन पादाग्रेण॥

यः सप्तहायनो बालः करेणैकेन लीलया। कथं बिभ्रद्गिरिवरं पुष्करं गजराडिव॥ ३॥ तोकेनामीलिता
क्षेण पूतनाया महौजसः। पीतः स्तनः सह प्राणैः कालेनेव वयस्तनोः॥ ४॥ हिन्वतोऽधः शयानस्य मा
स्यस्य चरणावुदक्। अनोऽपतद्विपर्यस्तं रुदतः प्रपदाहतं॥ ५॥ एकहायन आसीनो ह्रियमाणो वि
हायसा। दैत्येन यस्तृणावर्त्तमहन्कंठग्रहातुरं॥ ६॥ कच्चिद्धैयंगवस्तैन्ये मात्रा बद्ध उलूखले। गच्छन्न
र्जुनयोर्मध्ये बाहुभ्यां तावपातयत्॥ ७॥ वने संचारयन्वत्सान्सरामो बालकैर्वृतः। हंतुकाम
बकं दोर्भ्यां मुखतोरिमपाटयत्॥ ८॥ वत्सेषु वत्सरूपेण प्रविशंतं जिघांसया। हत्वा निपात्तयत्तेन
कपित्थानि च लीलया॥ ९॥

हतं विपर्यस्तं त्रनः कथमपतत्॥ ५॥ यः दैत्येन ह्रियमाणः सन् तत्तृणावर्त्तं दैत्यं कथमहन्नित्यर्थः॥ ६॥ हे
यंगवस्तैन्येन नवनीतचौर्ये बाहुभ्यां गच्छन् रिंगन्नित्यर्थः॥ ७॥ मुखतो हंतुकामो यस्य। तं च बकं वेष
मरिं बाहुभ्यां मुखतः कथमपाटयत्॥ ८॥

भा० द० पू० गोवर्द्धनोद्धरणं सपरिकरमनुस्मरन्प्रकटितैश्वर्यस्य श्रीकृष्णस्य ॥ प्रीतिं प्रार्थयते देवइति ॥ यज्ञविप्लवे नया
१०३ रुद्धतयादेवेंद्रे वर्षति सति ॥ वज्राश्मपरुषानिलैः ॥ अश्मानिजलशर्करा तीव्रवायुभिः ॥ सीदत्या लपस्युस्त्री ॥ सीदं
तःपालना ॥ पशवः स्त्रियश्च यस्मिंस्तत्त ॥ तथाभूतमात्मा स्वयमेव शरणं यस्य तं गोष्ठं दृष्ट्वानुकंपी उत्स्मयन् हस
न् औदिमाविष्कुर्वन् ॥ शैलमुत्पाट्य अबलो बालो लीलायैमुच्छिलिंध्रं यथा ॥ तथा एकेन करेणाविभ्रद्दधे

देवे वर्षति यज्ञविप्लवरुषा वज्राश्मपर्षानिलैः सीदत्पालपशुस्त्रिआत्मशरणं दृष्ट्वानुकंपु
त्स्मयन् ॥ उत्पाट्यैककरेण शैलमबलो लीलोच्छिलींध्रं यथा विभ्रद्गोष्ठमपान्महेन्द्रमद
भित्प्रीयान्न इंद्रो गवां ॥२५ इति श्रीमद्भागवते महापुराणे दशमस्कंधे गोपह्रांकापनोदनं ना
मषड्विंशोऽध्यायः ॥२६ ॥श्रीशुक उवाच ॥ गोवर्द्धने धृते शैले आसाराद्रक्षिते व्रजे ॥ गोलोका
त्सव्रजेत्कृसं सुरभिः शक्र एव च ॥१॥
गोष्ठमपात् ॥ पालितवान् ॥ एवं महेंद्रमदभित् ॥ गवामिंद्र इत्युत्तराध्यायार्थं च स्मारितं ॥ स एवं भूतः श्री कृ
ष्णः नः प्रीयतां ॥ प्रीयतामिति ॥ षड्विंशे दशमे व्याख्याः षड्विंशोद्धसोहरिः ॥ अथ तत्र पंचविंशतो चतुर्विंशतितः ॥ पृथक्कृ
ष्ण ॥ इति दशमे षड्विंशः ॥ २६ ॥ सप्तविंशे तदा लब्धकृष्णस्य प्रभवं परं ॥ वर्ण्यते सुरभीन्द्राभ्यामभिषेकमहोत्सवः ॥ गो

१७॥१८॥१९॥२०॥२१॥ तस्मात्तस्य कर्मसु विस्मयो नास्तीति नंदस्योक्तिः॥२२॥ इत्यद्धा साक्षात् मां प्रति समादिश्य ग

प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः॥ वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते॥१७॥ बहूनि
संति नामानि रूपाणि च सुतस्य ते॥ गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः॥१८॥ एष वः श्रेय आ
धास्यद्गोपगोकुलनंदनः॥ अनेन सर्वदुर्गाणि यूयमंजस्तरिष्यथ॥१९॥ पुरानेन व्रजपते साधवो
दस्युपीडिताः॥ अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः॥२०॥ य एतस्मिन्महाभागाः प्रीतिं कुर्वं
ति मानवाः॥ नारयोभिभवंत्येतान्विष्णुपक्षानिवासुराः॥२१॥ तस्मान्नंदकुमारोयं नारायणसमो
गुणैः॥ श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः॥२२॥ इत्यद्धा मां समादिश्य गर्गे च स्वगृहं गते
मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणं॥२३॥ इति नंदवचः श्रुत्वा गर्गगीतं व्रजौकसः॥ दृष्टश्रु
तानुभावास्ते कृष्णस्यामिततेजसः॥ मुदिता नंदमानर्चुः कृष्णं च गतविस्मयाः॥२४॥

र्गे स्वगृहं गते सति तदानीं तथा अमन्यमानोपि॥ इदानीं कृष्णं नारायणस्यांशं मन्ये॥ अत्र हेतुः अक्लिष्ट

भा॰द॰पू॰ ननुत्वद्दंडेमम गोपपुत्रस्यकाशक्तिः किंचकारणं॥कोवादंडोमयाकृतइत्यतआह॥पितेति॥जगतांत्वंपिता
१०४ जनकः॥गुरुरुपदेष्टा अधीशः नियंता इतिदंडधारणेहेतुत्रयं॥कालत्वात्समर्थः॥तस्मादुपात्तदंडोलीला
वतारैः॥समीहसे॥तुवसमीहालीलैवजगदीशमानिनामस्माकंमानंधुनन्नित्यर्थः॥६॥कथमेतदित्य
हा॥यइतिमद्विधाअज्ञतेऽज्ञाअज्ञतेऽतोजगदीशमानिनः॥कालेभयकालेपियथाधुनैवातिदृष्ट्वामभयंभयेन

पितागुरुस्त्वंजगतामधीशोदुरत्ययःकालउपात्तदंडः॥हितायस्वेच्छातनुभिःसमीहसेमानंवि
धुन्वन्जगदीशमानिनां॥६॥येमद्विधाज्ञाजगदीशमानिनस्त्वांवीक्ष्यकालेऽभयमाशुतन्मदं॥हि
त्वार्यमार्गंप्रभजंत्यपस्मयाईहाखलानामपितेनुशासनं॥७॥सत्वंममैश्वर्यमदप्लुतस्यकृतागः
सस्तेऽविदुषःप्रभावं॥क्षंतुंप्रभोथार्हसिमूढचेतसोमैवंपुनर्भून्मतिरीशमेऽसती॥८॥

मानायतंवीक्ष्यआशुतन्मदंजगदीशाइतिमदंहित्वाविगतगर्वाःसंतः॥आर्यमार्गंचहित्वाकिलत्वांभजंति
अतस्त्वदीहैवखलानांअनुशासनंदंडइत्यर्थः॥७॥एवंभगवत्स्वरूपमभिप्रायंचानुवर्ण्यक्षमापयति॥सत्वमि
ति॥एवंभूताअसतीमतिर्मेपुनर्माभूदितिप्रार्थनांतरं॥८॥रामराम॥ऽऽ॥प॥ऽऽ॥॥रामरामराम॥प ऽऽ

तत्रेंद्र आगत्य किं कृतवानित्याह ॥ विविक्तमुपसंगम्येत्यादिना ॥ अथाह स्तुतिभिरित्यतः प्राक्तनेन ग्रंथेन
विविक्ते एकांते ॥ पादयोः पस्पर्श नमस्कारं चकार ॥२॥ अस्य श्रीकृष्णस्य श्रुतश्चासावनुभावश्च श्रुतानुभावः ॥ दृ
ष्टश्रुतानुभावो येन स इंद्रः ॥ नष्टः त्रिलोकेशोऽहमिति मदो यस्य सः ॥३॥ तत्र मम अपराधं क्षमस्वेति वक्तुं त
त्तावदपराधो नास्त्येव त्वयानुग्रह एव कृत इत्याह चतुर्भिः ॥ विशुद्धसत्त्वमिति ॥ धाम स्वरूपं तपोमयं प्रबु

विविक्त उपसंगम्य व्रीडितः कृतहेलनः ॥ पस्पर्श पादयोरेनं किरीटेनार्कवर्चसा ॥२॥ दृष्टश्रुतानु
भावोस्य कृष्णस्यामिततेजसः ॥ नष्टत्रिलोकेशमद इदमाह कृतांजलिः ॥३॥ इंद्र उवाच ॥ विशुद्ध
सत्त्वं तव धाम शांतं तपोमयं ध्वस्तरजस्तमस्कं ॥ मायामयोयं गुणसंप्रवाहो न विद्यते ते ग्रहणानु
बंधः ॥४॥ कुतो नु तद्धेतव ईश तत्कृता लोभादयो येऽबुधलिंगभावाः ॥ तथापि दंडं भगवान्बिभर्ति ध
र्मस्य गुप्त्यै खलनिग्रहाय ॥५॥

र्ज्ञानं सर्वज्ञमित्यर्थः ॥ कुतः ॥ ध्वस्तरजस्तमस्कं ॥ ध्वस्ते अविद्यमाने रजस्तमसी यस्मिन् ॥ अत एवायं अस्मदादि
भिर्दृश्यमानः मायाकार्यरूपः गुणसंप्रवाहः ॥ गुणैः संप्रोह्यत इति तथा संसार इत्यर्थः ॥ स ते तव न विद्यते ॥ यतः अग्र
हणेनाज्ञानेनानुबध्यत इति तथा सः ॥ सर्वज्ञस्य तेनास्तीत्यर्थः ॥४॥ यदा अज्ञाने तत्कृते देहसंबंधो न ते तः ॥ तदा तत्कृ
तानां लोभादीनां का वार्तेत्याह ॥ कुतो न्विति ॥ तत्कृताः देहसंबंधकृताः तद्धेतवः ॥ पुनरन्यस्य देहस्य हेतवः ॥ न

भा०द०पू० ।१४। इंद्रेण स्वाभिप्राये निवेदिते भगवानपि तथैवाह । मयेति इत्थं श्रिया देवराज्येन ।१५। ।१६। वः युष्माभिः वृद्धि

१०५ वचनं विहरणाद्यभिप्रायेण । क गंतव्यं स्वर्गे पितवैवेश्वरत्वादिति चेत्तत्राह । क्रियतामिति । मदनुशासनेन तय.

श्रीशुक उवाच ॥ एवं संकीर्त्तितः कृष्णो मघोना मघवन्नमुं । मेघगंभीरया वाचा प्रहसन्निदमब्रवी

त् ॥१४॥ श्रीभगवानुवाच ॥ मया ते कारि मघवन्मखभंगोनुगृह्णता । मदनुस्मृतये नित्यं म

त्तस्येंद्रश्रियाभृशं ॥१५॥ मामैश्वर्यश्रीमदांधो दंडपाणिं न पश्यति । तं भ्रंशयामि संपद्भ्यो यस्य चे

च्छाम्यनुग्रहं ॥१६॥ गम्यतां शक्र भद्रं वः क्रियतां मेनुशासनं । स्थीयतां स्वाधिकारेषु युक्तैर्वः स्त

६५ म्भवर्ज्जितैः ॥१७॥ अथाह सुरभिः कृष्णमभिवंद्य मनस्विनी । स्वसंतानैरुपामंत्र्य गोपरूपिणमीश्वर

गि६ ं ॥१८॥ सुरभिरुवाच ॥ कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वसंभव । भवता लोकनाथेन सनाथा

वयमच्युत ॥१९॥ त्वं नः परमकं दैवं त्वं न इंद्रो जगत्पते । भवाय भव गोविप्रदेवानां ये च साधवः ॥२०॥

या पूर्वं तत्रस्थीयतामित्यर्थः । युक्तैरप्रमत्तैः स्तंभवर्ज्जितैर्निरहंकारैः ॥१७॥ स्वसंतानैः गोभिः सहि ।१८।

कृष्ण कृष्णेत्यादि संबोध्य । इंद्रेण हतं तत्रापि भवता सनाथा वयं कृता । हि नाइत्यर्थः ।१९। त्वं नः परमकं दैवं

महान्नयमपराधः।कथंत्वंतत्व्यइतिचेदत आह।तवेति।स्वयंभराणांपुनश्चउरुभारजन्मनांवृन्दानांभारराणांजन्म
येभ्यस्तेषामभवायनाशाय।युष्मच्चरणसेविनांतुभवाय।अतोममत्वत्सेवत्कृत्वोदत्येतापराधिनोपिक्षन्तव्यमिति
भावः।८।क्षमापयन्नमस्करोति।तुभ्यंभगवतेकृष्णायनमः।पुरुषायसर्वान्तर्यामिणे।महात्मने।अतएवतेपि
तवावतारोयमधोक्षजेहभुवोभराणामुरुभारजन्मनां।चमूपतीनामभवायदेवभवाययुष्मच्चरणा
नुवर्तिनां।९।नमस्तुभ्यंभगवतेपुरुषायमहात्मने।वासुदेवायकृष्णायसात्वतांपतयेनमः।१०।स्वच्छ
न्दोपात्तदेहायविशुद्धज्ञानमूर्तये।सर्वस्मैसर्वबीजायसर्वभूतात्मनेनमः।११।मयेदंभगवन्गोष्ठनाशा
यासारवायुभिः।चेष्टितंविहतेयज्ञेमानिनातीव्रमन्युना।१२।त्वयेशानुगृहीतोस्मिध्वस्तस्तंभोवृथोद्य
मः।ईश्वरंगुरुमात्मानंत्वामहंशरणंगतः।१३।
अपरिछिन्नायकुतः।वासुदेवायसर्वनिवासाय।सात्वतांयादवानांपतये।१०।तर्हिकिमहंयादवइत्यन्न।स्वच्छन्दोपात्तदे
हाय।स्वेषांभक्तानांछन्देनइछयास्वीकृतदेहाय।तत्रापिविशुद्धज्ञानमेवमूर्तिर्यस्यतस्मैमाययास्तदस्मैकुतःसर्व
स्यबीजायकारणाय।अतएवसर्वभूतात्मनेनमइति।११।कृतागसइत्यनेनोक्तमपराधंनिवेदयति।मयेदमिति।
आसारवायुभिर्गोष्ठनाशाय।मयेदमहंकृत्यचेष्टितंकृतं।१२।तथापिमामेवत्वयानुगृहीतोस्मि।अनुग्रहंदर्शयति

भा०द०५ नानारसौघाः स्त्रीरादिवृद्धिन्यः ॥ अकृष्टपच्याः कर्षणं विनैव पक्वा औषधयो व्रीह्यादयः आसन् ॥ यद्वा अकृ
१०६ ष्टपच्या औषधयो यायेषु ते गिरय उन्मणीन् ॥ उत्तरन्तान् बहिः प्रकटान् ॥ अबिभ्रन् अबिभरुः ॥ २५ ॥ २६ ॥ २७ ॥ त्रि
दशामेसप्रविशाः ॥ २७ ॥ अष्टाविंशे तते नंदानयनं वरुणालयात् ॥ वैकुंठदर्शनं चाथ गोपानामनुव
नानारसौघाः सरितो वृक्षा आसन्मधुस्रवाः ॥ अकृष्टपच्यौषधयो गिरयो बिभ्रन्नुन्मणीन् ॥ २५ ॥ कृ
ष्णेऽभिषिक्त एतानि सर्वाणि कुरुनंदन ॥ निर्वैराण्यभवंस्तात क्रूराण्यपि निसर्गतः ॥ २६ ॥ इति गो
गोकुलपतिं गोविंदमभिषिच्य सः ॥ अनुज्ञातो ययौ शक्रो वृतो देवादिभिर्दिवं ॥ २७ ॥ इति श्रीम
द्भागवते महापुराणे दशमस्कंधे श्रीगोविंदाभिषेको नाम सप्तविंशोऽध्यायः ॥ २७ ॥ श्रीशुक उ
वाच ॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनं ॥ स्नातुं नंदस्तु कालिंद्या द्वादश्यां जलमावि
शत् ॥ १ ॥ तं गृहीत्वानयद्भृत्यो वरुणस्यासुरोऽन्तिकं ॥ अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि ॥ २ ॥
रिपत्ते गोवर्द्धनं समुद्धृत्य कोपं कृत्वा सुरेश्वरं नंदानयनतः कंसो वरुणं च वशेऽनयत् ॥ १ ॥ कलामात्रायां द्वादश्यां पा
रणाद्दशभिनिवेशो नो सुरीवेलामविज्ञाय हरणं दयात्पूर्वमेव शास्त्रबलेन निशि उदकं प्रविष्टं तदनभिज्ञो वरुण
स्य भृत्योऽनयदिति ॥ तथा च शास्त्रं ॥ कलार्द्धं द्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि ॥ आमध्याह्नाः क्रियाः सर्वाः कर्त्त

व्याः शुभुशासनादिति ॥ वत्यतिच्युवरुणः ॥ अजानता
मामकैनेतिभगवद्धर्ममजानतेत्यर्थः ॥ २ ॥
१०६

श्री

नतु भवती नोंद्रोऽस्तीति चेत्तत्राह॥इंद्रमिति॥अलं पुरंदरस्येंद्रतयेत्यर्थः॥ननु देव इंद्रो भवति कथम्
हं भवेयमिति चेत्तत्राह॥अवतीर्णोसीति॥२१॥सुरभिरात्मनः पयसाभ्यषिंचत्॥इंद्रस्त्वाकाशगंगायाः
दि २ जलैरभ्यषिंचत्॥देवमातृभिरदित्यादिभिः॥देवैर्मानवैर्भिश्चेति वा गाः पशून् स्वर्गं वा इंद्रत्वेन विंदतीति कृ

इंद्रं नत्वाभिषेक्ष्यामो ब्रह्मणा चोदिता वयं॥अवतीर्णोसि विश्वात्मन् भूमेर्भारापनुत्तये॥२१॥एवं कृ
ष्णमुपामंत्र्य सुरभिः पयसात्मनः॥जलैश्चाकाशगंगाया ऐरावतकराधृतैः॥इंद्रः सुरर्षिभिः सा
कं चोदितो देवमातृभिः॥अभ्यषिंचत दाशार्हं गोविंद इति चाभ्यधात्॥२२॥तत्रागतास्तुंबुरुनार
दाद्या गंधर्वविद्याधरसिद्धचारणाः॥जगुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मुदा
न्विताः॥२३॥तं तुष्टुवुर्देवनिकायकेतवो व्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः॥लोकाः परां निर्वृति
मापुस्तस्त्रयो गावस्तदा गामनयन्पयोद्रुताम्॥२४॥

त्वा गोविंद इत्यभ्यधात्॥नाम कृतवानित्यर्थः॥२२॥२३॥देवनिकायेषु केतव इव दर्शनीया मुख्या
इत्यर्थः॥गावः॥गां पृथ्वीं पयोभिर्द्रुतामार्द्रामनयन्॥अनुकुर्वन्नित्यर्थः॥२४॥रामरामरामरामराम

भा०द०पू १०॥ अतींद्रियं अदृष्टपूर्वं लोकपालस्य महोदयं ऐश्वर्यं॥११॥ औत्सुक्ययुक्ता धीर्येषां ते अपि किं स्वगतिं
१०७ स्वस्थानं सूक्ष्मं ब्रह्माख्यं च उपाधास्यत् उपाधास्यति॥ अस्मान्प्रापयिष्यतीति संकल्पितवंत इत्यर्थः
१२॥ इति एवंभूतं स्वानां स्वेषां संकल्पं दृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां संकल्पसिद्धये कृपया एतत् दध्यौ॥

श्रीशुक उवाच॥ एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः॥ आदायागात्स्वपितरं बंधूनां चाव
कृष्णा२ हन्मुदं॥१०॥ नंदस्त्वतींद्रियं लोकपालमहोदयं॥ कृष्णे च संनतिं तेषां ज्ञातिभ्यो विस्मितो ब्र
वीत्॥११॥ ते चौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरं॥ अपि नः स्वगतिं सूक्ष्मामुपाधास्यद
धीश्वरः॥१२॥ इति स्वानां स भगवान्विज्ञायाखिलदृक्स्वयं॥ संकल्पसिद्धये तेषां कृपयैतदचिं
तयत्॥१३॥ जनो वै लोक एतस्मिन्नविद्याकामकर्मभिः॥ उच्चावचासु गतिषु न वेद स्वां गतिं भ्र
मन्॥१४॥ इति संचिंत्य भगवान्महाकारुणिको विभुः॥ दर्शयामास लोकं स्वं गोपानां तमसः परं॥१५॥

माएमचिंतयत्॥१३॥ अविद्या देहाद्यहंबुद्धिः॥ ततः कामं ततः कर्म तैः उच्चावचासु देवतिर्यगादिषु भ्र
मन् स्वीयां गतिं न वेद॥१४॥ स्वं ब्रह्मस्वरूपं लोकं च वैकुंठाख्यं तमसः प्रकृतेः परं॥ देहादिपिहितानां तद्द
र्शन [illegible] मशक्यमिति॥ प्रथमं देहादिव्यतिरिक्तं॥ ब्रह्मस्वरूपं दर्शयामास॥१५॥ ॥ ऽऽ ॥ १०७

६र्म

३ स्वानां भगवान् परायणं ॥ अभयदः माभैष्टेत्यभयं ददत् ॥३॥ सपर्य्यया अर्हणेन ॥४॥ अद्य इदानीमे मया देहो निभृ
तः धृतः ॥ यदा त्वद्दर्शनं जातं तदैव देहस्य साफल्यं प्राप्तमित्यर्थः ॥ यद्वा निभृतः पूर्णमनोरथ इत्यर्थः ॥ किंच अद्यैवा
र्थोधिगतः ॥ सर्वरत्नाकरपतिनापीतः सर्वं नैवेद्यिधोर्थः प्राप्त इत्यर्थः ॥ किंच संसारोपि निवृत्त एवेत्याशयेनाह

चुक्रुशुस्तमपश्यंतः कृष्ण रामेति गोपकाः ॥३॥ भगवांस्तदुपश्रुत्य पितरं वरुणाहृतं ॥ तदंतिकं
गतो राजन् स्वानामभयदो विभुः ॥४॥ प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्य्यया ॥ महत्या पूजयि
त्वाह तद्दर्शनमहोत्सवः ॥५॥ ॥ वरुण उवाच ॥ अद्य मे निभृतो देहः अद्यार्थोधिगतः प्रभो ॥ त्वत्पाद
भाजो भगवन्नवापुः पारमध्वनः ॥६॥ नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ॥ न यत्र श्रूयते माया
लोकसृष्टिविकल्पना ॥७॥ अजानता मामकेन मूढेनाकार्यवेदिना ॥ आनीतोयं तव पिता तद्भ
वान् क्षंतुमर्हति ॥८॥ गोविंद नीयतामेष पिता ते पितृवत्सल ॥ ममाप्यनुग्रहं कृष्ण कर्तुमर्हस्यशेषदृ
क् ॥९॥

त्वत्पादभाज इति ॥ अध्वनः पारं मोक्षं ॥६॥ भगवते निरतिशयैश्वर्यायोप ब्रह्मणे पूर्णाय परमात्म
ने सर्वजीवनियंत्रे तत्र हेतुः ॥ न यत्रेति ॥ लोकसृष्टिं विकल्पयतीति या माया सा यत्र न श्रूयते अविद्यमानैवेति तिष्ठ
तीत्यर्थः ॥७॥ अजानता मज्ञत्वेन त्वत्पित्राहरणं यत्कृतं तत्तदिति ॥ नेदं विमुच्य समर्पयति गोविंदेति ॥९॥

भा·द·द०
१०८

उनत्रिंशो तु रासार्थमुक्तिप्रत्युक्तयो हरेः ॥ गोपीभी रास संरंभे तस्य चांतर्द्धि कौतुकं ॥ कृष्णादिजयसंरूढ दर्पके
दर्पदर्पहा ॥ जयति श्रीपति गोपीरासमंडलमंडनः ॥ ननु विपरीतमिदं परदारविनोदेन कंदर्पविजेतृत्वप्रती
तेः ॥ मैवं ॥ योगमायामुपाश्रितः ॥ आत्मारामोऽप्यरीरमत् ॥ साक्षान्मन्मथमन्मथः ॥ आत्मन्यवरुद्धसौरतस्त्यादि
षु स्वातंत्र्याभिधानात् ॥ तस्माद्रासक्रीडाविडंबनं कामजयख्यापनायेत्येव तत्त्वं ॥ किंच ॥ शृंगारकथापदेशेन

श्रीबादरायणिरुवाच ॥ भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः ॥ वीक्ष्य रंतुं मनश्च
क्रे योगमायामुपाश्रितः ॥ १ ॥ तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः
सचर्षणीनामुदगाच्छुचो मृजन् ॥ प्रियः प्रियाया इव दीर्घदर्शनः ॥ २ ॥ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥

विशेषतो निवृत्तिपरेयं पंचाध्यायीति व्यक्तीकरिष्यामः ॥ ता रात्रीरिति ॥ या ता वल्लव्रजं सिद्धा मयेमा रंस्यथ क्ष
पा इति प्रतिश्रुता इत्यर्थः ॥ १ ॥ तदा तस्मिन्नेव क्षणे तत्प्रीतये उडुराजश्चन्द्र उदगात् उदितः ॥ किं कुर्वन् दीर्घ
कालेन दर्शनं यस्य सः ॥ प्रियः प्रियाया मुखं अरुणेन कुंकुमेन यथा विलिंपति तथा प्राच्याः ककुभः दिशो
मुखं शंतमैः सुखतमैः करैः रश्मिभिः ॥ अरुणेन उदयरागेण विलिंपन् ॥ अरुणीकुर्वन्नित्यर्थः ॥ सः प्रसि

१०८

प

त दाह सत्यमिति ॥ सत्यमबाध्यं ॥ ज्ञानमजडं ॥ अनंतमपरिछिन्नं ॥ ज्योतिः स्वप्रकाशं ॥ सनातनं शश्वत्सिद्धं
गुणापाये गुणापाये ॥ ज्ञानिनो यत्पश्यंति ॥ तत्स्वरूपमेव दर्शयामास ॥ १६ ॥ एवं ब्रह्मह्रदं ब्रह्मैव ह्रदः ॥ तत्र निम
ग्नस्य विशेषज्ञानाभावात् ॥ नन्व ब्रह्मह्रदे तेनु नीताः ॥ प्रापिताः ॥ तस्मिन्मग्नाश्च तु शब्दो के विशेषमाह ॥ पुनः कृ
ष्णेनोद्धृताः ॥ समाधेरिवोत्थापिताः संतः ॥ ब्रह्मणस्तस्यैव लोकं वैकुंठं ददृशुरिति ॥ नन्दुब्रह्मनिमग्ना नापुन

सत्यं ज्ञानमनंतं यद्ब्रह्म ज्योतिः सनातनं ॥ यद्धि पश्यंति मुनयो गुणापाये समाहिताः ॥ १६ ॥ ते तु ब्रह्म
ह्रदं नीता मग्नाः कृष्णेन चोद्धृताः ॥ ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा ॥ १७ ॥ नंदादयस्तु
तं दृष्ट्वा परमानंदनिर्वृताः ॥ कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः ॥ १८ ॥ इति श्रीमद्भा
गवते महापुराणे दशमस्कंधे नंदमोक्षणं अष्टाविंशतितमोऽध्यायः ॥ २८ ॥ श्रीवादरायणिः ॥

लोकदर्शनमघटितमेवेत्याशंक्याह ॥ यत्रेति ॥ यत्र यस्मिन्कृष्णे निमित्ते सति पूर्वमक्रूरोऽध्यगात् ॥ दृष्टवान्
स्तुकपरीक्षित्संवादात्प्राक्कनत्वात् भूतनिर्देशः ॥ न ह्यत्र कैश्चर्यं भगवति किंचिदप्यसंभावितमिति भा
वः ॥ अथ वा अक्रूरो यत्र ह दृष्टवान् ॥ तस्य यमुनाह्रदस्य ब्रह्मह्रद इति नाम तद्ध्रदं नीताः ॥ मग्नाश्च संतः ब्रह्मणः
लोकं ददृशुः ॥ पुनश्च श्रीकृष्णेनोद्धृताः ॥ एवं वृत्तं दृष्ट्वा विस्मिता बभूवुरिति व्यवहिता न्वयोऽप्रसिद्धकल्प

भा॰ द॰ १० अन्यां प्रमृजंत्यः काश्च काश्चित्तु कस्तु तु शुश्रूषंत्यः अर्थेक मेतद्दासक्तमनसां ॥ अन्यथाकृतमपि फलत्येवेति द्योत
१०९ यन्नाह ॥ व्यत्यस्तेति ॥ स्थानतः स्वरूपतश्चाऽधोऽधोधारणेन विपर्ययं प्रापितानि वस्त्राभरणानि याभिस्ताः ॥ ६ ॥ न
चैतस्माकृष्टमनसो विघ्नाः प्रभवंतीत्याह ॥ ता वार्यमाणा इति ॥ ७ ॥ न लब्धो विनिर्गमो याभिस्ताः ॥ प्रागपि

लिंपंत्यः प्रमृजंत्योऽन्या अंजंत्यः काश्च लोचने ॥ व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ॥ ६ ॥ ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः ॥ गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ॥ ७ ॥ अंतर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः ॥ कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ ८ ॥ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ॥ ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः ॥ ॥

प्रागपि तद्भावनायुक्तास्तदानीं तरां दध्युरित्यर्थः ॥ ८ ॥ किंच न दानीमेव तं परमात्मानं श्रीकृष्णं ध्यानतः ॥ प्राप्ताः सत्यः गुणमयं देहं जहुरित्याह ॥ श्लोकद्वयेन ॥ दुःसहेति ॥ ननु कथं जहुः ॥ परमात्मेति ॥ ज्ञाना भावादित्याशंक्याह ॥ जारबुद्ध्यापीति ॥ नहि वस्तुशक्तिः बुद्धिमपेक्षते ॥ अन्यथा मत्वापि पीतामृतवदिति भावः ॥ ननु तदपि प्रारब्धकर्मबंधने सति कथं जहुस्तत्राह सद्यः प्रक्षीणबंधना इति ॥ ॥ १०९

कुमुद्वंतं कुमुदं विकसनीयं विद्यते यस्य तं कुमुद्वंतं॥ न खंडं मंडलं यस्य तं॥ रमाया आननस्य आभेव आभा यस्य तं॥ न
व कुंकुममिव अरुणं दृष्ट्वा॥ तथा वनं च तस्य कोमलैर्गोभिः॥ रश्मिभिः रंजितं दृष्ट्वा कलं मधुरं जगौ॥ अगायत॥ कथं
वामा मनोहरा दृशो यासां तासां मनोहरं यथा॥३॥ असापत्न्यायान्योन्यमलक्षितः॥ न ज्ञापित उद्यमो याभिस्ताः

दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं॥ वनं च तत्कोमलगोभिरंजितं ज-
गौ कलं वामदृशां मनोहरं॥३॥ निशम्य गीतं तदनंगवर्द्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः
आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो जवलोलकुंडलाः॥४॥ दुहंत्योभिययुः का
श्चिद्दोहं हित्वा समुत्सुकाः॥ पयोधिश्रित्य संयावमनुद्वास्यापरा ययुः॥ परिवेषयंत्यस्तद्धि
त्वा पाययंत्यः शिशून्पयः॥ शुश्रूषंत्यः पतीन्काश्चिदश्नंत्योपास्य भोजनम्॥५॥

सकांतो यत्र तत्र गीतध्वनिमार्गेण जग्मुः॥ जवेन वेगेन लोलानि कुंडलानि यासां ताः॥४॥ श्रीकृष्णस्य च कः शब्द
श्रवणेन तत्प्रवणचित्तानां तत्क्षणमेव त्रैवर्गिककर्मनिवृत्तिं द्योतयंत्य इत्याह चार्धवसितं कर्म विहाय ययुः॥ न
दोहं दुहंत्य इति॥ पयः स्थालीस्थं॥ दुग्धं अधिश्रित्य एतत्प्रथमप्रतीत्यमाणाः कश्चिद्ययुः॥ संयावं गोधूम
चूर्णान्नं पक्वं अनुद्वास्य अनवतार्य॥५॥

मि

भा०द०पू० अतोयथाकथंचित्तदाशक्तिमुक्तिकारणमित्याह कामेति ॥ ऐक्यं संबंधसौहृदं भक्तिं ॥१३॥ न चैवं भवताः यमि
११० तिभावदुत्याह न चैवमिति ॥ यतः श्रीकृष्णादेतत्स्थावरादिकमपि विमुच्यते ॥१४॥ प्रस्तुतमाह ॥ ताद्दृष्टेति ॥ वाचः
प्रेष्ठो वो विलासैः ॥१४॥ सर्वाः ससंभ्रममागताः ॥ ता विलोक्य सभयमिवाह ॥ व्रजस्येति ॥१६॥ लज्जयामंदहसित

कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ॥ नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते ॥१५॥ न चैवं वि
स्मयः कार्यो भवता भगवत्यजे ॥ योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥१६॥ श्रीभगवानुवाच ॥
स्वागतं वो महाभागाः प्रियं किं करवाणि वः ॥ व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणं ॥१७॥ रजन्येषा घो
ररूपा घोरसत्त्वनिषेविता ॥ प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः ॥१८॥ मातरः पितरः पुत्रा भ्रातरः
पतयश्च वः ॥ विचिन्वन्ति ह्यपश्यन्तो मा कृढ्वं बंधुसाध्वसं ॥१९॥ दृष्टं वनं कुसुमितं राकेशकररंजि
तं ॥ यमुनानिललीलैजत्तरुपल्लवशोभितं ॥१९॥ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः ॥ क्रंदं
ति वत्सा बालाश्च तान्पाययत दुह्यत ॥२०॥

मालस्याह ॥ रजन्येषेति ॥१७॥ किंच मातर इति ॥ विचिन्वंति मृगयंते ॥ बंधूनां साध्वसं मा कृढ्वं ॥ मा कुरुतेत्यर्थः ॥१८॥ प
ईषत्कंपयकोपेनान्यतो विलोकयंतीः प्रत्याह ॥ दृष्टमिति ॥ राकेशस्य पूर्णचंद्रस्य करै रंजितं ॥ यमुनास्पर्शिनोऽनि
ल स्थली ला मंदगतिस्तया एङ्गतः कंपमानास्तरूणां पल्लवास्तैः शोभितं ॥२१॥ सतीः हे सत्यः ॥२०॥

मू० ताद्दृष्ट्वांतिकमायाता भगवान्व्रजयोषितः ॥ अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन् ॥१७॥ ॥ ह्री ॥

११०

ननु कथं भोगमंतरेण प्रारब्धकर्म्मक्षीणं ॥ भोगेनैव सद्यः क्षीणमित्याह ॥ दुःसहेति दुःसहो यः प्रेष्ठविरहस्तेन
तीव्रस्तापस्तेन धूतानि निर्गतान्यशुभानि यासां ताः ॥ तदप्राप्तिपरमदुःखभोगेन पापक्षीणमित्यर्थः ॥ तथा ध्या
नेन प्राप्ताच्युतस्याश्लेषेण या निर्वृतिः परमसुखभोगस्तया क्षीणं मंगलं पुण्यबंधनं यासां ताः ॥ अतो
ध्यानेन परमात्मप्राप्तिस्तत्कालसुखदुःखाभ्यां निःशेषकर्मक्षयात् गुणमयं देहं जहुरिति ॥ ८ ॥ ननु यथापाति

तमेव परमात्मानं जारबुद्ध्यापि संगताः ॥ जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ॥ ९ ॥ राजोवाच ॥
कृष्णं विदुः परं कांतं न तु ब्रह्मतया मुने ॥ गुणप्रवाहोपरमस्तासां गुणधियां कथं ॥ १० ॥ श्रीशुक उ
वाच ॥ उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः ॥ द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः ॥ ११ ॥ नृ
णां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप ॥ अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः ॥ १२ ॥

दृ १ पुत्रादीनां च स्वतोऽब्रह्मत्वेऽपि न तद्भजनान्मोक्षः ॥ तथा बुद्ध्यभावात् ॥ एवं कृष्णेऽपि बुद्ध्यभावेन तत्संगतिः कथं मोक्ष
हेतुरिति शंकते ॥ कृष्णं विदुरिति ॥ परं केवलं कांतं कमनीयं ॥ १० ॥ परिहरति ॥ उक्तमिति ॥ अयं भावः ॥ जीवे ह्यावृतं
ब्रह्मत्वं कृष्णस्य हृषीकेशत्वादनावृतं न तत्र बुद्ध्यपेक्षेति ॥ ११ ॥ ननु देही कथमनावृतः स्यात् तत्राह ॥ नृणामि
ति ॥ गुणात्मनः गुणनियंतुः भगवत एवंरूपाभिव्यक्तिः ॥ अतो न देहिसादृश्यमत्र वक्तुं युज्यत इति भावः ॥ १२ ॥

किंच प्रेष्ठमिति । किंचित्संरंभेण कोपावेशेन गद्गदा गिरो यासां ताः । अब्रुवत तस्य संभ्रमे कारणं प्रेष्ठमित्यादि प्रि
येतरमिव प्रतिभाषमाणं प्रत्याचक्षाणम् । रच नृशंसं क्रूरं । दुरवग्रह स्वच्छंद मूलं । भक्ताः सेवितवतीः अस्मान्
भजस्व मात्यजेति । अपि च यदुक्तं पत्यपत्येत्यादि स्त्रीणां धर्मो विदितः सोपहासं । एवमेतदुपदेशानां पदे विषये त्वय्ये
वास्तु । उपदेशपदत्वे हेतुः । ईशः इति विविदिषावाक्येन सर्वोपदेशानां शेषत्वावगमादिति भावः । ईशत्वे हेतुः । आ
त्मा किल भवानिति । भोग्यस्य हि सर्वस्य भोक्तात्मैवेशः इत्यतः प्रेष्ठो बंधुश्च भवानेवेति । सर्वेति सर्वे बंधुषु
प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः । नेत्रे विमृज्य रुदितोपहते स्म
किंचित्संरंभगद्गदगिरोऽब्रुवतानुरक्ताः ॥२८॥ गोप्य ऊचुः ॥ मैवं विभोऽर्हति भवान्गदितुं नृशंसं सं
त्यज्य सर्वविषयांस्तव पादमूलं । भक्ता भजस्व दुरवग्रह मा त्यजास्मान्देवो यथादिपुरुषो भजते मुमुक्षून
२९ ॥ यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तं । अस्त्वेवमेतदुपदेशपदे त्वयी
शे प्रेष्ठो भवांस्तनुभृतां किल बंधुरात्मा ॥३०॥
करणीयं त्वय्येवास्त्वित्यर्थः । अथवा धर्मोपदेशानामपदे स्थाने धर्मोपदेष्टरि त्वयि सति अस्मासु च धर्मजिज्ञासमानासु
सतीषु त्वया धर्मो विदितः यदुक्तं एवमेतदस्तु । न तु त्वं धर्मोपदेष्टा किं तु भवानात्मेति । अथवा यदुक्तं एतदुपदेशपदे तत्कौ
चरो पुरुषः अस्तु नाम । त्वयि तु ईशे स्वामिनि सति । एवं कांकाने वमित्यर्थः । यतस्तनुभृतां त्वमात्मा फलरूपः इति वदा
यदुक्तं पत्यादिशुश्रूषणं धर्म इति । एवमेतत्त्वय्येवास्तु । कुतः उपदेशपदे शुश्रूषणीयत्वेनोपदिश्यमानानां पत्या

८१

संरंभ क्षुभितदृष्टीः प्रत्याह ॥ अथवेति ॥ यंत्रितानाशयाः वशीकृतचित्ताः ॥ उपपन्नं युक्तं ॥ प्रीयंते प्रीता भवंति ॥ २१
दृष्टादृष्टभयप्रदर्शनेन निवर्त्तयति ॥ भर्त्तुरित्यादि श्लोकत्रयेण ॥ २२ ॥ २३ ॥ फल्गु तुच्छं कृच्छ्रं दुःसंपाद्यं ॥ औपपत्यं जार

अथवा मदभिस्नेहाद्भवत्यो यंत्रिताशयाः ॥ आगता ह्युपपन्नं तत्प्रीयंते मयि जंतवः ॥ २१ ॥ भर्त्तुः शुश्रूषणं स्त्री
णां परो धर्मो ह्यमायया ॥ तद्बंधूनां च कल्याण्यः प्रजानां चानुपोषणं ॥ २२ ॥ दुःशीलो दुर्भगो वृद्धो जडो रो
ग्यधनोपि वा ॥ पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी ॥ २३ ॥ अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भया
वहं ॥ जुगुप्सितं च सर्वत्र ह्यौपपत्यं कुलस्त्रियः ॥ २४ ॥ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोऽनुकीर्तनात् ॥
न तथा सन्निकर्षेण प्रतियात ततो गृहान् ॥ २५ ॥ श्रीशुक उवाच ॥ इति विप्रियमाकर्ण्य गोप्यो गो
विंदभाषितं ॥ विषण्णा भग्नसंकल्पाश्चिंतामापुर्दुरत्ययां ॥ २६ ॥ कृत्वा मुखान्यवशुचः श्वसनेन शुष्य
द्बिंबाधराणि चरणेन भुवं लिखंत्यः ॥ अस्रैरुपात्तमषिभिः कुचकुंकुमानि तस्थुर्मृजंत्य उरुदुःख
भराः स्म तूष्णीम् ॥ २७ ॥

सौख्यं ॥ २४ ॥ किंच श्रवणादिभिरिति ॥ २५ ॥ २६ ॥ चिंताप्राप्तानां स्थितिमाह ॥
कृत्वेति ॥ शुचः शोकात् द्रुतेन श्वसनेन शुष्यंतो बिंबफलसदृशा अधरा येषु मुखेषु तानि अवनतानि कृत्वा ॥ तथा
अंगुष्ठेन महीं लिखंत्यः तथा गृहीतकज्जलैरस्रुभिः ॥ कुचकुंकुमानि क्षालयंत्यः ॥ तूष्णीं स्थिताः ॥ यतः उरुदुःखभ

भा०द०पू०
११२

ननु स्वपत्नीर्नेवोपगच्छत तत्र गन ममिंनिसिंचेयुरितित्तत्राहुः यर्हीति रमायाः लक्ष्म्याः दत्तः क्षणः उत्सवो येन संवंदत्तावसरं वा त
दपि क्वचिद्देवनसवंद्य अरण्यजनप्रियस्य तवादरण्ये कचित् यर्हि अर्हि अस्प्राक्ष्म स्पृष्टवत्यो वयं तत्र च अभिरमि
ता आनंदिताः सत्यस्तदारभ्य अन्यसमक्षं स्थातुमपि न पारयामः तुच्छास्ते नरो नरोचंते इत्यर्थः ३४ तत्पादसौभा
ग्यं त्वतिचित्रमित्याहुः श्रीरिति वक्षसि असापत्न्यं स्थानं लब्ध्वापि तुलस्याः सपत्न्याः सह तव पदांबुजरजः

यर्ह्यंबुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य अस्प्राक्ष्म तत्प्रभृति नान्यस
मक्षमंग स्थातुं त्वयाभिरमिता बत पारयामः ॥ ३४ ॥ श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वापि वक्ष
सि पदं किल भृत्यजुष्टं ॥ यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पादरजः प्रपन्नाः ॥ ३५ ॥
तन्नः प्रसीद वृजिनार्दन तेंऽघ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः ॥ त्वत्सुंदरस्मि
तनिरीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यम् ॥ ३६ ॥

कामयते स्म भृत्यैः सर्वैर्जुष्टमिति सौभाग्यातिरेकोक्तिः यस्याः स्ववीक्षणे श्रीरात्मनो विलोकयुक्त्वित्यर्थः तदर्थम
न्येषां ब्रह्मादीनां तपोभिः प्रयासः स्यात् तद्रजस्तद्धृदयमपि प्रपन्ना इति ॥ ३५ ॥ हे वृजिनार्दन दुःखहर्तः त्वदुपासने
च्छया नए वेश्मा शय्यासांता वयं वसतीर्गेहान् विसृज्य योगिनद्भवप्राप्ता तव सुंदरस्मितविलसितनिरीक्षणे
न यस्तीव्रः कामस्तेन तप्तचित्तानां नः हे पुरुषरत्न दास्यं देहि ॥ ३६ ॥ ११२

एतत्सदाचारेणाद्रियंते यः प्रार्थयंते॥ कुर्वंति हीति कुशलाः शास्त्रनिपुणाः॥ तथा च शास्त्रं॥ किं प्रजया करिष्यामो येषां नो
ऽयमात्मा लोक इत्यादि॥३१॥ किंच प्रतियातेति यदुक्तं तं दशकं॥ तयैव च चित्तादीनामपहृतत्वादित्याह॥ चित्तमिति॥ य
दस्माकं चित्तं कालं सुखेन गृहेषु निर्विशति॥ तत्त्वयापहृतं॥ करावपि योगृहकृत्ये निर्विशतः॥ तावपि स्वखात्मना

कुर्वंति हि त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किं॥ तन्नः प्रसीद वर
देश्वर मास्म छिंद्या आशां धृतां त्वयि चिरादरविंदनेत्र॥३१॥ चित्तं सुखेन भवतापहृतं गृहेषु
यन्निर्विशत्युत करावपि गृह्यकृत्ये॥ पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो
करवाम किं वा॥३२॥ सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतजहृच्छयाग्निं॥
नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते॥३३॥

तयेति॥३२॥ अतः अंग हे कृष्ण नः॥ अस्माकं तव अधरामृतपूरकेण॥ तवैव हाससहितेनावलोकेन कल
गीतेन च जातो यो हृच्छयाग्निः॥ कामाग्निः तं सिंच॥ नो चेद्वयं तावद्देकोऽग्निः॥ तथा विरहाज्जनिष्यते यो
ऽग्निस्तेन च उपयुक्तदेहा दग्धशरीराः॥ योगिवद्ध्वत्तपदवीमंतिकं ध्यानेन याम॥ प्राप्नुयाम॥३३॥

भा० द० पू विक्लवितं पारवश्यप्रलपितं गोपीरीरमत् रमयामास ॥४० प्रियस्येक्षणेन उत्फुल्लानि मुखानि यासां ताभिः ॥ उदारहा
११३ सश्च द्विजाः दंताश्च ते एव कुसुमवद्दीधितिर्यस्य सः ॥ एणांक अंकः ॥४१॥४२॥४३॥ बाहुप्रसारश्च परिरंभश्च करादीनां आल

श्रीशुक उवाच ॥ इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः ॥ प्रहस्य सदयं गोपीरात्मारामोप्य
रीरमत् ॥४० ताभिः समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः ॥ उदारहास
द्विजकुंददीधितिर्व्यरोचतैणांक इवोडुभिर्वृतः ॥४१ उपगीयमान उद्गायन् वनिताश
४४ तयूथपः मालां बिभ्रद्वैजयंतीं व्यचरन्मंडयन्वनं ॥४२ नद्याः पुलिनमाविश्य गोपीभिर्हिमवा
४५ लुकं ॥ रेमे तत्तरलानंदिकुमुदामोदवायुना ॥४३ बाहुप्रसारपरिरंभकरालकोरुनीवीस्त
नालभनननर्मनखाग्रपातैः ॥ क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं रमया
चकार ॥४४ तासां तत्सौभगमदं वीक्ष्य मानं च केशवः ॥ प्रशमाय प्रसादाय तत्रैवांतरधीयत ॥४६॥

भनं स्पर्शश्च नर्मपरिहासश्च नखाग्रपातश्च तैः ॥ क्ष्वेल्या क्रीडया च अवलोकैश्च हसितैश्च कामं तासामुद्दीपयन् तां रमयामा
सः ॥४४॥ महात्मनश्च विसृतः चिन्ता ॥४५॥ तत्सौभगमदं ॥ तत्सौभगेन मदं ॥ अस्वाधीनत्वं मानं गर्वं ॥ केशवः कस्य ईशश्चतौ
स० १ एवं भगवतः कृष्णाल्लब्धमाना महात्मनः ॥ आत्मानं मेनिरे स्त्रीणां मानिन्योभ्यधिकं भुवि ॥४५॥ ११३

ननु गृहस्वामिनं विहाय मद्दास्यं किमिति प्रार्थ्यते तत्राहुः॥ वीक्ष्येति॥ अलकावृतमुखं तथा कुंडलयोः श्रीर्य
यस्मिंस्तं गंडस्थलं यस्मिन् ॥ अधरे सुधा यस्मिन् ॥ तच्च तच्च मुखं वीक्ष्य ॥ दत्ताभयं भुजदंडयुगं च वक्षश्च श्रिया एक
रमणं रतिजनकं वीक्ष्य दास्यमेव भवामेति ॥३७॥ ननु जुगुप्सितमौपपत्यमित्युक्तं तत्राहुः ॥ कास्त्रीति ॥ अंग हे कृ
ष्ण कलानि पदानि यस्मिंस्तत् ॥ आयतं दीर्घं मूर्छितं स्वरालापादिभेदवत्तेन ॥ पाठांतरे कलपदं च यदमृतमयं वेणु

दृ २ वीक्ष्यालकावृतमुखं तव कुंडलश्रीगंडस्थलाधरसुधं हसितावलोकं ॥ दत्ताभयं च भुजदंडयुगं वि
लोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ॥३७॥ कास्त्र्यंग ते कलपदायतवेणुगीतसंमोहितार्यचरि
तान्न चलेत्त्रिलोक्यां ॥ त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्र
न् ॥३८॥ व्यक्तं भवान्व्रजभयार्तिहरोभिजातो देवो यथादिपुरुषः सुरलोकगोप्ता ॥ तन्नो निधेहि
करपंकजमार्तबंधो तप्तस्तनेषु च शिरःसु च किंकरीणां ॥३९॥
गीतं तेन संमोहिता का वा स्त्री आर्यचरितान्निजधर्मान्न चलेत् ॥ यन्मोहिताः पुरुषा अपि चलिताः ॥ किंच त्रैलोक्य
सौभगमिति ॥ यत्ते यतः ॥ अबिभ्रन् अबिभरुः ॥ त्वद्योतकस्य वर्णमात्रेणापि तावन्निजधर्मत्यागो युक्तः ॥ किं पु
नस्त्वदनुभावेनेति भावः ॥३८॥ व्यक्तम् ॥ निश्चितम् ॥३९॥ रामरा ॥ ६६ ॥ रामराम ॥ ३३ ॥ ॥ ६६ ॥ ॥ राम

तत्प्रपंचयति नवभिः ॥ त्वत्र महत्त्वादेते पश्येयुरित्याशया अश्वत्थादीन् पृच्छंति ॥ हृष्टइति प्रेमहासविलसितैरवलो
कनैरस्माकं मनो हृत्वा चोर इव गतः ॥ युष्माभिः किं दृष्टइति ॥ ५ ॥ महांतः स्वपुष्पैर्व्वैकूपकारिणश्चेति कुरुवकादी
न् ॥ कच्चिदिति हे कुरुवकादयः ॥ दर्प्पहरं स्मितं यस्य सः ॥ इतो गतः ॥ कच्चिदिति ॥ ६ ॥ अलिकुलैः सह त्वां बि

दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः ॥ नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ॥ ५ ॥ कच्चित्कु
रुबकाशोकनागपुन्नागचंपकाः ॥ रामानुजो मानिनीनामितो दर्पहरस्मितः ॥ ६ ॥ कच्चित्तुलसि क
ल्याणि गोविंदचरणप्रिये ॥ सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेऽतिप्रियोऽच्युतः ॥ ७ ॥ मालत्यदर्शि वः क
च्चिन्मल्लिके जाति यूथिके ॥ प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ॥ ८ ॥ चूतप्रियालपनसासन
कोविदारजंब्वर्कबिल्वबकुलाम्रकदंबनीपाः ॥ येऽन्ये परार्थभविका यमुनोपकूलाः शंसंतु कृष्णप
दवीं रहितात्मनां नः ॥ ९ ॥

भ्रत् तवातिप्रियस्त्वया किं दृष्टइति ॥ ७ ॥ गुणातिरेकेऽपि नम्रत्वादिमाः पश्येयुरिति पृच्छंति ॥ मालतीति ॥ हे मालति मल्लिके
जाति यूथिके वो युष्माभिः ॥ किमदर्शि दृष्टः ॥ करस्पर्शेन वः प्रीतिं जनयन् किं यातः इति ॥ अत्र मालतीजात्योरवांतरवि
शेषाद्द्वयं ॥ ८ ॥ फलादिभिः सर्वप्राणिसंतर्पकाः ॥ एते पश्येयुरिति पृच्छंति चूतेति ॥ चूताम्रयोरवांतरजातिभेदः ॥ कदंबनी
पयोस्तु ह्रस्वादयः ॥ ये अन्ये च परार्थभविकाः ॥ परार्थमेव भवो जन्म येषां ते ॥ यमुनोपकूलाः ॥ तस्याः कूले समीपे वर्तमानाः तीर्थवा

इतिदशमेएकोनत्रिंशोध्यायः ॥२९॥ त्रिंशेतुविरहसंतप्तगोपीभिःकृष्णमार्गणं ॥ उन्मत्तवद्दीर्घरात्र्यांभ्रमंतीभिर्वनेवनेत्र्य
चवर्ण्यते ॥ अपश्यंत्यः ॥१॥ गत्याचअनुरागस्मिताभ्यांविभ्रमेक्षितानिसविलासनिरीक्षितानितैःअमनोरमाआलापाश्चवि
हाराः क्रीडाश्चविभ्रमाअन्येचविलासास्तैश्चरमाधत्तगत्यादिभिरितेराक्षिप्तानिआकृष्टानिचित्तानियासांताः ॥ अतस्ता

इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेरासक्रीडायांश्रीकृष्णांतर्धानमेकोनत्रिंशोध्यायः ॥२९॥ श्रीशुकउ
वाच ॥ अंतर्हितेभगवतिसहसैवव्रजांगनाः ॥ अतप्यंस्तमचक्षाणाःकरिण्यइवयूथपं ॥१॥ गत्यानुरा
गस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः ॥ आक्षिप्तचित्ताःप्रमदारमापतेस्तास्ताविचे
ष्टाजगृहुस्तदात्मिकाः ॥२॥ गतिस्मितप्रेक्षणभाषणादिषुप्रियाःप्रियस्यप्रतिरूढमूर्त्तयः ॥
असावहंत्वित्यबलास्तदात्मिकान्यवेदिषुःकृष्णविहारविभ्रमाः ॥३॥ गायंत्यउच्चैरमुमेवसं
हताविचिक्युरुन्मत्तकवद्वनाद्वनं ॥ पप्रच्छुराकाशवदंतरंबहिर्भूतेषुसंतंपुरुषंवनस्पतीन् ॥४॥

स्मिन्नेवात्माआसांताः ॥ तस्यविविधाचेष्टाजगृहुः ॥ तदनुकरणेनाक्रीडन् ॥२॥ अपिचगतिस्मितेति ॥ प्रियस्यगत्या
दिषुप्रतिरूढाआविष्टामूर्त्तयोयासांताः ॥ अतःकृष्णविहारविभ्रमाःकृष्णस्येवविहारविभ्रमाःक्रीडाविलासायासां
ताः ॥ अहमेवासौकृष्णइतिपरस्परंनिवेदितवत्यः ॥३॥ किंचगायंत्यइतिवनाद्वनांतरंगच्छंत्योविचिक्युः ॥ अम

गयन्तुउन्मत्ततुल्यत्वमाह ॥ वनस्पतीन्पप्रच्छुः भूतेषु
अंतरंमध्येसंतंपुरुषंवहिश्चसंतमिति ॥४॥ ॥ss॥

 काश्चिदाहुः॥ हे सख्यः॥ इमा लताः कृष्णेन संगता नूनं मत इमाः पृच्छत॥ ननु स्वपतिसंगतौ नत्वं गतिर्दुर्घटा नस्य
 ते:॥ पत्युर्बाहून् शाखा आश्लिष्टा अपि॥ अहो भाग्यं॥ नूनं तन्नखैः स्पृष्टाः यतस्तुत्पुलकानि बिभ्रति॥ न हि स्वपतिसंग
ताद् कृ पुलकसंभव इति भावः॥१३॥ उन्मत्तकवत्प्रष्टुरित्यत्र पंच॥ इदानीं रमापतेस्तास्ता विचेष्टा जगदुः
तदात्मिका इति यदुक्तं॥ तत्प्रपंचयति॥ इतीति। उन्मत्तवचो गोप्यः॥ उन्मत्तवच सश्चत्तौ गोप्यश्च कृष्णान्वेषणेन का

पृच्छतेमा लता बाहून् अप्याश्लिष्टा वनस्पतेः॥ नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो॥१३॥ इ
त्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः॥ लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः॥१४॥
कस्याश्चित्पूतनायंत्याः कृष्णायंत्यपिबत्स्तनं॥ तोकायित्वा रुदत्यन्याः पदाहन् शकटायतीं॥१५॥
दैत्यायित्वा जहारान्यामेका कृष्णार्भभावनां॥ रिंगयामास काप्यंघ्री कर्षंती घोषनिःस्वनैः॥१६॥
कृष्णरामायिते द्वे तु गोपायंत्यश्च काश्चन॥ वत्सायतीं हंति चान्या तत्रैका तु बकायतीं॥१७॥

तराः अतिविह्वलाः अनुचक्रुः॥ अनुकृतवत्य॥१४॥ कस्याश्चिदित्यादिभिश्चतुर्भिरनुकरणं प्रपंच्यते॥ ततश्च
तुर्भिस्तन्मयत्वं पुनरेकैनानुकरणमिति विवेकः॥ पूतनायंत्याः पूतनावदाचरंत्याः॥ कृष्णवदाचरंती स्तनमपि
बत्॥ तोकायित्वा स्तोकवदात्मानं कृत्वा॥१५॥ दैत्यायित्वा दैत्यवदात्मानं कृत्वा॥ एका कृष्णार्भभावनां कृष्णस्यार्भवा

हेत्तिति दिने त्वया किं तपः कृतं यात्वं केशवांघ्रिस्पर्शोत्सवा । केशवांघ्रिस्पर्शेनोत्सवो यस्याः सा कुतः । अंग
हहे हतुलकिता रोमांचिता विभासि पुष्पाभसे । तत्र विशेषं पृच्छंति । अपि किमयमुत्सवः अंघ्रिसंभवः । रघुनाथदेव
देशांघ्रिस्पर्शसंभूतः । यद्वा नैतावत् । किं तरुक्रमविक्रमात् पूर्वमेव त्रिविक्रमस्य पदा सर्वांक्रमणात् । आहो अथवा
नेतावदेव । अपि तु ततोपि पूर्वं वराहस्य वपुषः परिरंभणेनेति । अतस्त्वयान्न दृष्टः तं दर्शय ॥१०॥ हरिण्या दृष्टिप्रसत्या

किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवातुलकितांगरुहैर्विभासि । अप्यंघ्रिसंभव उरुक्रम
विक्रमाद्वा आहो वराहवपुषः परिरंभणेन ॥१०॥ अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि
सुनिर्वृतिमच्युतो वः । कांतांगसं[illegible]गकुच[illegible]कुंकुमरंजितायाः कुंदस्रजः कुलपतेरिह वाति गं
धः ॥११॥ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदांधैः । अन्वीयमान इह व
स्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलोकैः ॥१२॥

श्रीकृष्णदर्शनं संभाव्याहुः । अपीति । हे सखि । एणपत्नी । अपि किं उपगतः समीपं गतः । गात्रैः सुंदरैः । मुखवाहादिभिः
प्रिययासहितः यच्छुक्तं तत्र द्योतकं कांतयायोंगसंगतस्तत्कुचकुंकुमेन रंजितायाः कुंदकुसुमस्रजो गंधः कुलपतेः
कृष्णस्य वातिच्यागच्छति ॥११॥ फलभारेण नतास्तरून्दृष्ट्वा प्रणतइति मत्वा प्रिययासहितस्य गतिविलाससंभा
वयंत्यः पृच्छंति । बाहुमिति । तुलसिकायामलिकुलैः । अतस्तत्र मंदैर्मदांधैरन्वीयमानः । अनुगम्यमानः । इह चेरन्नि

दं

भा॰द॰पू॰ स्पृष्टानि संमिश्राणि ॥ २६ ॥ तेन अंसे न्यस्तः प्रकोष्ठो यस्याः करेणोर्हस्तिन्याः ॥ २७ ॥ रहस्याक्रांतस्थानं ॥ २८ ॥ हे
११६ आल्यः सख्यः अहो धन्याः ॥ अतिपुण्याः गोविंदाघ्र्यब्जरेणवः ॥ तत्र हेतुः यानिति ॥ अस्माभिरप्येतद्दूरएवाभिषेकु
ण तथैव कामः प्राप्तुं स क्यतइति भावः ॥ २९ ॥ अन्याआकुः तस्याइति ॥ गोपीनां सर्वस्वं ॥ अयं भावः भवे

त्तैस्तैः पदैस्तत्पदवीमन्विष्यंत्योऽग्रतोऽबलाः ॥ वध्वाः पदैः सुपृक्तानि विलोक्यार्त्ताः समब्रुव
न् ॥ २६ ॥ कस्याः पदानि चैतानि यातायानंदसूनुना ॥ अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा य
रि २ था ॥ २७ ॥ अनयाराधितो नूनं भगवान्हरिरीश्वरः ॥ यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः ॥ २८ ॥ ध
न्या अहो अमी आल्यो गोविंदाघ्र्यब्जरेणवः ॥ यान्ब्रह्मेशौ रमा देवी दधुर्मूर्ध्न्यघनुत्तये ॥ २९ ॥ ते
नि २ ष्माकं मूनिनः तो भं कुर्वंत्युच्चैः पदानि यत् ॥ यैकापहृत्य गोपीनां रहो भुंक्तेऽच्युताऽधरं ॥ ३० ॥ न ल
क्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः ॥ खिद्यत्सुजातांघ्रितलामुन्निन्ये प्रेयसीं प्रियः ॥ ३१ ॥

दिवं यदि तस्याः पदानि संपृक्तानि न भवेयुः तानि लुनो दुःखं कुर्वंतीति ॥ ३० ॥ तद्दसंपृक्तान् केवलं कहसपाद
रेण न ॥ एवं विचिन्वंत्यः तानदृष्ट्वा पुनरत्यंतं समतप्यन् ॥ तदाह श्लोकत्रयेण ॥ न लक्ष्यंत इति ॥ खिद्यंती सुजा ११६

दूरगाः॥ दूरेवर्त्तमाना गाः॥ यद्वत् यथा कृष्णस्तथा आकृष्यंतं कृष्णमनुवर्त्तंती॥ अनुवर्त्तमानां॥ अनुकुर्वंतीमितिवापाठः॥ १८॥
१९॥ यतंती प्रयत्नं कुर्वंती॥ अंबरमुत्तरीयवस्त्रमुन्निदधे ऊर्द्ध्वं धत्तवती॥ २०॥ २१॥ अपिदध्वं निमीलयत॥ २२॥ सुदृक् सु

आहूत दूरगा यद्वत्कृष्णस्तमनुवर्त्तंतीं॥ वेणुं क्वणंतीं क्रीडंतीमन्याः शंसंति साध्विति॥ १८॥ कस्यांचित्स्व नि १
भुजं न्यस्य चलंत्याहापरा ननु॥ कृष्णोहं पश्यत गतिं ललितामिति तन्मनाः॥ १९॥ मा भैष्ट वातवर्षा
भ्यां तत्त्राणं विहितं हि वः॥ इत्युक्त्वैकेन हस्तेन यतंत्युन्निदधेंऽबरं॥ २०॥ आरुह्यैका पदाक्रम्य शि
रस्याहापरान्नृप॥ दुष्टाहे गच्छ जातोहं खलानां ननु दंडधृक्॥ २१॥ तत्रैकोवाच हे गोपा दावाग्निं प
श्यतोल्बणं॥ चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममंजसा॥ २२॥ बद्धान्यया स्रजा काचित्तन्वी
तत्र उलूखले॥ भीता सुदृक् पिधायास्यं भेजे भीतिविडंबनं॥ २३॥ एवं कृष्णं पृच्छमाना वृंदावनल
तास्तरून्॥ व्यचक्षत वनोद्देशे पदानि परमात्मनः॥ २४॥ पदानि व्यक्तमेतानि नंदसूनोर्महात्मनः॥
लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः॥ २५॥

नयने॥ आस्यं पिधाय सुदृक् वराक्षी॥ भीतिविडंबनं भयानुकरणं॥ २३॥ एवं पुनरपि वृंदावने लतास्तरून् कृष्णं सं
पृच्छंत्यः॥ वनोद्देशे वनप्रदेशे॥ व्यचक्षत अपश्यन्॥ २४॥ २५॥

भा० द० पृ० ३६ ॥ कामिनां दैन्यं दर्शयति ॥ अखंडितत्वमाह ॥ ततश्चेति ॥ तस्यां कंधारोहे उद्यतायां अंतर्हितः इत्यर्थः ॥ ३७ ॥ अनुताप

११७ माह हा नाथेति ॥ ३८ ॥ अन्विच्छंत्यः मृगयमाणाः ॥ अविदूरतः समीपे ॥ ३९ ॥ ४० ॥ ततस्तयापि सहिताः कृष्णान्वेषण

ततो गत्वा वनोद्देशं दृप्ता केशवमब्रवीत् ॥ न पारयेऽहं चलितुं नय मां यत्र ते मनः ॥ ३६ ॥ एवमुक्तः प्रि

यामाह स्कंध आरुह्यतामिति ॥ ततश्चांतर्दधे कृष्णः सा वधूरन्वतप्यत ॥ ३७ ॥ हा नाथ रमण प्रेष्ठ क्वा

सि क्वासि महाभुज ॥ दास्यास्ते कृपणाया मे सखे दर्शय संनिधिं ॥ ३८ ॥ अन्विच्छंत्यो भगवतो मार्गं

दुःखितां ४ गोप्योऽविदूरतः ॥ ददृशुः प्रियविश्लेषमोहितां सखीं ॥ ३९ ॥ तया कथितमाकर्ण्य मानप्राप्तिं च मा

धवात् ॥ अवमानं च दौरात्म्याद्विस्मयं परमं ययुः ॥ ४० ॥ ततो विशन्वनं चंद्रज्योत्स्ना यावद्विभा

मालक्ष्य ३ व्यते ॥ तमः प्रविष्टं ततो निववृतुः स्त्रियः ॥ ४१ ॥ तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः ॥ तद्गु

णानेव गायंत्यो नात्मागाराणि सस्मरुः ॥ ४२ ॥ पुनः पुलिनमागत्य कालिंद्याः कृष्णभावनाः ॥ समवेता ज

गुः कृष्णं तदागमनकांक्षिताः ॥ ४३ ॥

यवनमविशन् ॥ ततो हरेरन्वेषणाय वनमविशन् ॥ ततो हरेरन्वेषणान्निवृत्ताः ॥ ४१ ॥ एवं तं अप्राप्ता अपि स्वगृहाण्नैव स्मृत

वत्यः ॥ तदात्मिकाः स एवात्मा यासां ताः ॥ तन्मय्य इत्यर्थः ॥ ४२ ॥ किंतु पूर्वं यत्र श्रीकृष्णेन संगतिरासीत् ॥ तदेव कालिंद्याः पुलि

[illegible]

प्रपदाभ्यामाक्रमणं द्रोणीसंमर्दनं पयोः अत एव असकले पदे पश्येते इति ३२ तस्याः कुसुमजान्वेषणे प्रविष्टाया
श्चिह्नं दृष्ट्वा आहुः केशप्रसाधन इति कान्तामधिकृत्य तानि प्रसूनानि चूडयता चूडानुकारेणैव प्रथितानि इह अत्र
मुपविष्टमस्मिन् रेमे इत्यादि शुकोक्तिः आत्मरतः स्वतस्तुष्टः आत्मारामः स्वक्रीडः अखण्डितः स्त्रीविभ्रमैरनाकृष्टः
इमान्यधिकमग्नानि पदानि वहतो वधूं गोप्यः पश्यत कृष्णस्य भाराक्रान्तस्य कामिनः अत्राव
रोपिता कान्ता पुष्पहेतोर्महात्मना अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः प्रपदाक्रमणे एते
पश्यतासकले पदे ३२ केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतम् तानि चूडयता कान्तामुप
विष्टमिह ध्रुवं ३३ रेमे तया चात्मरत आत्मारामोऽप्यखण्डितः कामिनां दर्शयन् दैन्यं स्त्रीणां चै
व दुरात्मतां ३४ इत्येवं दर्शयन्त्यस्ताश्चेरुर्गोप्यो विचेतसः यां गोपीमनयत् कृष्णो विहायान्याः स्त्रि
यो वने सा च मेने तदात्मानं वरिष्ठं सर्वयोषितां हित्वा गोपीः कामयाना मामसौ भजते प्रियः ३५
भि ऽपि तत्याचे त्विति रिरंसेत् अत आह कामिनामिति ३४ स्त्रीणां दुरात्मतामाह सा चेति द्वाभ्याम् कामो यानं
आगमसाधनं यासां ताः गोपीर्हित्वा मां भजते इति हेतोरात्मानं वरिष्ठं मेने इति ३५ ॥ ऽऽ ॥ ऽऽ

किंच॥ वहुभ्यो मृत्युभ्यः कृपया रक्षित्वा किमितीदानीं दृशा मन्मथं प्रेष्य घातयसीत्याहुः॥ विषेति॥ हे ऋषभ श्रे
भा०द०पू० ष्ठ विषमयाज्जलाद्योऽप्ययो नाशस्तस्मात्॥ तथा व्यालराक्षसात्तसप्यात् मारुताच्च॥ वैद्युतानलात्॥ अशनिपातात्॥ वृ
११८ षोऽरिष्टस्तस्मात्॥ मयात्मजात्॥ व्योमात्॥ विश्वतः॥ अन्यस्मादपि सर्वतो भयाच्च॥ कालियहृदे मनाद्रक्षिताः॥ किमिदानीमुपे
क्षसे इति भावः॥ ३॥ अपि च विश्वपालनायावतीर्णस्य तव भक्तापेक्षा अत्यंतमनुचितेत्याशयेनाहुः॥ न खल्विति॥ हे स
वा५ खे भवान् खलु निश्चितं यशोदासुतो न भवति॥ किंतु सर्वप्राणिनां बुद्धिसाक्षी॥ स त्वं किं दृशो भवति तत्राहुः॥ विखनसा ब्रह्मणा

विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात्॥ वृषमयात्मजाद्विश्वतो भयादृषभ ते व
यं रक्षिता मुहुः॥ ३॥ न खलु गोपिकानंदनो भवानखिलदेहिनामंतरात्मदृक्॥ विखनसार्थितो विश्वगु
प्तये सख उदेयिवान्सात्वतां कुले॥ ४॥ विरचिताभयं वृष्णिधुर्य ते चरणमीयुषां संसृतेर्भयात्॥ क
रसरोरुहं कांत कामदं शिरसि धेहि नः श्रीकरग्रहं॥ ५॥

विश्वपालनाय प्रार्थितः सन् सात्वतां कुले उदेयिवान् उदित इति॥ ४॥ तस्मात्त्वं इह का नाम स्माकमेतत्त्रा
णेनाचलस्थं संपादय इत्याहुः॥ विरचिताभयमित्यादि चतुर्भिः॥ हे वृष्णिधुर्य॥ संसृतेर्भयात् ते चरण
मीयुषां शरणं प्राप्तानां विरचितं दत्तमभयं येन॥ तत्॥ ते याहे कांत॥ कामदं वरदं श्रियः करं गृह्णातीति
तथा तत्॥ भवत्करसरोरुहं मम॥ नः शिरसि धेहि॥ ५॥ ११८

इति दशमे त्रिंशः ॥ ३० ॥ एकत्रिंशे निराशास्ताः पुनः पुलिनमागताः ॥ कृष्णमेवानुगायंत्यः प्रार्थयंते तदागमं ॥ जयतीति हे दयित
तेजन्मना व्रजः अधिकं यथा भवति तथा जयति उत्कर्षेण वर्त्तते ॥ यस्मात्त्वमत्र जातस्तस्मादिंदिरा लक्ष्मी ॥ अत्र हि श्रयति व्रजमनुसृत्य वर्त्तते ॥ एवं व्रजे सर्वोत्कर्षे सति त्वमात्मा अत्र तु तावकास्त्वदीया योगिजना त्वयि लब्धप्राणाः कथंचिद्वृत्ता सर्वतो ये त्वा
त्वां विचिन्वते मृगयंते अतो ... त्वया दृश्यतां प्रत्यक्षीभूयतामिति ॥ यद्वा ॥ अस्माभिर्भवान्दृश्यतां ॥ यद्वा ॥ एवं त्वया
दृश्यतामेते विचिन्वंत इति ॥ अत्र त्वत्त्राणां च कृत्वा ... आकृष्टिरिति सर्वश्लोकेषु वक्ततारूपेण ॥ तथापि
इति श्रीमद्भागवते महापुराणे दशमस्कंधे रासक्रीडायां भगवदन्वेषणं त्रिंशोऽध्यायः ॥ ३० ॥ गोप्य
ऊचुः ॥ जयति तेऽधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि ॥ दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासव
वस्त्वां विचिन्वते ॥ १ ॥ शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा ॥ सुरतनाथ तेऽशुल्कदा
सिका वरद निघ्नतो नेह किं वधः ॥ २ ॥ संगतिरुच्यते ॥ तत्र विचिन्वंतु सम्यक् किमिति चेत्तत्राहुः शरदिति ॥ शरदुद
शये शरत्काले निसरसि साधुजातसत्सरसिजोदरश्रीमुषा दृशा साधुजातं सम्यग्जातं यत्सरसिजं सुविकसितं पद्मं
तस्य यदुदरे गर्भे या श्रीस्तां मुष्णाति हरतीति तथा तया दृशा नेत्रेण हे सुरतनाथ संभोगपते ॥ वरद ॥ अभिष्टप्रद ॥ अशुल्क
दासिकाः अमूल्या दासीर्नो ॥ निघ्नतो मारयतस्ते तव ॥ त्वया क्रियमाण इह लोके यं वधो न भवति किं ॥ किं शस्त्रेणैव
वधो वधः ॥ किं दृशा वधो न भवति ॥ किंतु भवत्येव ॥ अतस्त्वद्दृशा पहृतप्राणा प्रत्यर्पणाय त्वया दृश्यतामिति ॥ य

भागवत दशम टीका ॥

भा॰द॰पू॰ ११९

जना भूरिदाः वहुदातारः जीवितं ददतीत्यर्थः ॥ यद्वा ॥ एवंभूतं त्वत्कथामृतं ये भुवि गृणंति ते भूरिदाः ॥ पूर्वजन्मसु व
हुदत्तवंतः सुकृतिन इत्यर्थः ॥ एतदुक्तं भवति ॥ ये केवलं कथामृतं गृणंति ते पितावदतिधन्याः किं पुनर्ये त्वां पश्य
ति ॥ अतः प्रार्थयामहे त्वया दृश्यतामिति ॥ ९ ॥ ननु तर्हि मत्कथाश्रवणेनैव निर्वृता भवत किं मद्दर्शनेन नैवं ॥ त्वद्वि
लाससंस्मृतिभिः तत्र चित्ता वयं ॥ तत्रापि शांतिं न विंदाम इत्याहुः ॥ प्रहसितमिति ॥ हे प्रिय हे कुहक कपट संविदः ॥ संकेतनर्मा

प्रहसितं प्रियप्रेमवीक्षणं विहरणं च ते ध्यानमंगलं ॥ रहसि संविदो या हृदिस्पृशः कुहक नो मनः
क्षोभयंति हि ॥ १० ॥ चलसि यद्व्रजाच्चारयन् पशून् नलिनसुंदरं नाथ ते पदं ॥ शिलतृणांकुरैः सीदती
ति नः कलिलतां मनः कांत गच्छति ॥ ११ ॥ दिनपरिक्षये नीलकुंतलैर्वनरुहाननं बिभ्रदावृतं ॥ घ
नरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥

टि॰ ॥ १० ॥ किंच ॥ त्वयि वयमतिप्रेमार्द्रचित्ताः त्वं तु
नरस्मासु केनहेतुना कपटमाचरसीत्याहुः ॥ श्लोकद्वयेन ॥ हे नाथ कांत यत् यदा व्रजाच्चलसि ॥ पशूंश्चार
यन् ॥ तदानंतरं तव सुंदरं कोमलं ते पदं शिलैः कणिशैः तृणांकुरैश्च सीदति क्लिश्येदिति नो मनः कलिलतां
अस्वास्थ्यं गच्छति प्राप्नोति ॥ ११ ॥ एवंभूतोऽस्य दुःखशंकितचित्ता वयं त्वं तु दिनपरिक्षये सायंकाले नीलकुंतलैः
रावृतं ॥ घनरजस्वलं ॥ गोरजश्छुरितं वनरुहाननं ॥ अलिमालाकुलपरागच्छुरितपद्मतुल्यमाननं ॥ तच्च मुहुर्द

११९

हे व्रजजनार्त्तिहन ॥ हे वीर निजजनानां यः स्मयो गर्वस्तस्य ध्वंशकं स्मितं यस्य ते हे तथाभूत हे सखे भवत्किंकरीर्नः अस्मान् भज आश्रय स्मेति निश्चितं ॥ प्रथमं तावत् जलरुहाननं योषितां नो दर्शय ॥६॥ अविशेषेण प्रणतानां देहिनां पापकर्षणं पुनः तृणचरान् पशून् अप्यनुगच्छति ॥ कृपयातितया ॥ सौभाग्येन श्रियो निकेतनं ॥ वीर्यातिरेकेण फणिनः फणास्वर्पितं ते पदाम्बुजं नः कुचेषु कृणु कुरु किंच ममर्थं हृच्छयं कामं कृन्धि छिन्धि ॥७॥ हे पुष्करेक्षण तव मधुरया गिरा ॥ वल्गूनि वाक्यानि यस्यां तया ॥ बुधानां मनोज्ञया हृद्यया गाम्भीर्येत्यर्थः ॥ मुह्यतीः ॥ विधिकरीः किंकरीः ॥ अधरशीधुना आप्यायय सञ्जीवयेति

व्रजजनार्त्तिहन्वीर योषितां निजजनस्मयध्वंशनस्मित ॥ भज सखे भवत्किंकरीः स्म नो जलरुहाननं चारु दर्शय ॥६॥ प्रणतदेहिनां पापकर्षणं तृणचरानुगं श्रीनिकेतनं ॥ फणिफणार्पितं ते पदाम्बुजं कृणु कुचेषु नः कृन्धि हृच्छयं ॥७॥ मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ॥ विधिकरीरिमा वीर मुह्यतीरधरशीधुनाप्याययस्व नः ॥८॥ तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहं ॥ श्रवणमंगलं श्रीमदाततं भुवि गृणन्ति ये भूरिदा जनाः ॥९॥

किंच ।

ट ॥ अस्माकं त्वद्विरहेण प्राप्तमेव मरणं किंतु त्वत्कथामृतं पाययद्भिः सुकृतिभिर्वंचितमित्याहुः ॥ तवेति ॥ कथैवामृतं अत्र हेतुः ॥ तप्तजीवनं ॥ प्रसिद्धामृतादुत्कर्षमाह ॥ कविभिर्ब्रह्मादिभिरपीडितं स्तुतं ॥ देवभोग्यं त्वमृतं तत्तु त्सुष्ठीकृतं ॥ किंच कल्मषापहं कामकर्मनिरसनं तत्वमृतं ॥ नैवंभूतं ॥ किंच श्रवणमात्रेण मंगलप्रदं ॥ तत्त्वनुष्ठानपेक्षं ॥ किंच ॥

भा॰ द॰ पू॰
१२०
नं

तस्मात्त्वदेहेऽच्युत पतीन्सुतान्॥ अन्वयान्॥ तत्संबंधिनः भ्रातॄन्बांधवांश्चातिविलंघ्य तव समीपमागता वयं
कथंभूतस्य गतिविदः॥ अस्मदागमनं जानतः गीतगतिविज्ञानतः॥ गतिविदो वयं वा॥ तव उद्गीतेनोच्चैर्गीतेन मोहिताः
हे कितव सर्व॥ एवंभूता योषितः निशि त्वयि मागतास्त्वमृते कस्त्यजेत॥ न कोपीत्यर्थः॥१६॥ अतस्त्वया त्यक्ता नो
मस्माकं प्राक्तनत्वद्दर्शननिदानं हृच्छयस्य तत्समात्येव चिकित्सां कुर्वित्याहुः॥ रहसीति॥ श्रियो धामत्व

पतिसुतान्वयभ्रातृबांधवानतिविलंघ्य तेऽन्त्यच्युतागताः॥ गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि॥१६॥ रहसि संविदं हृच्छयोदयं प्रहसिताननं प्रेमवीक्षणम्॥ बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः॥१७॥ व्रजवनौकसां व्यक्तिरंग ते वृजिनहंत्र्यलं विश्वमंगलं॥ त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनम्॥१८॥

बृहद्विशालं उरश्च वीक्ष्य नोऽतिस्पृहा भवति तया च मुहुर्मुहुर्मनो मुह्यति॥१७॥ तव च व्यक्तिः॥ अ
भिव्यक्तिः व्रजवनौकसां॥ सर्वेषामविशेषेण वृजिनहंत्री दुःखनिरसनी॥ विश्वमंगलं सर्वमंगल
रूपा च॥ अतस्त्वत्स्पृहात्मनां॥ त्वत्स्पृहारूढमनसां नः मनाक् ईषत्॥ किमपि त्यज सुच॥ कोपि श्लषम
कुर्वन्न देहीत्यर्थः किं तत् स्वजनहृद्रोगाणां यत् दत्तिर्णाम्यं निषूदनं निवर्तकमौषधं तत्त्वमेव वेत्सी

१२०

ततोऽधुना कपटं विहाय एवं कुर्विति प्रार्थयंते ॥ श्लोकद्वयेन ॥ प्रणतकामदमिति आधिहन्तृ हे रमण ॥ पद्मजेना वि ३
र्चितं आपदि ध्येयं ध्यानमात्रेण पन्नितं तेन वा ॥ शंतमं च ॥ सेवासमयेऽपि सुखतमं ॥ तव चरणपंकजं ॥ कामस्तापशांत
येनं स्तने घर्पयेति ॥ अपि च हे वीर तेऽधरामृतं नो वितर देहि ॥ खरिलेन नादितेन वेणुना सुष्ठु चुंबितमिति ना शमन तव
२ चिंतोमिति भावः ॥ इतररागविस्मारणं नृणामितरे सुखसार्वभौमादिसुखेषु रागमिच्छां विस्मारयति ॥ विलापयतीति

प्रणतकामदं पद्मजार्चितं धरणिमंडनं ध्येयमापदि ॥ चरणपंकजं शंतमं च ते रमण नः स्तने
ष्वर्पयाधिहन् ॥ १३ ॥ सुरतवर्द्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुंबितं ॥ इतररागविस्मारणं नृ
णां वितर वीर नस्तेऽधरामृतं ॥ १४ ॥ अटति यद्भवानह्नि काननं त्रुटिर्युगायते त्वामपश्यतां ॥ कु
टिलकुंतलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां ॥ १५ ॥

६१ तथातं ॥ १४ ॥ किंच त्वन्नामपित्व दर्शने च सुखं दृष्ट्वा सर्वे संगपतित्यागेन यत्तयद्भवयं त्वामुपासताः त्वं तु कथ
मस्मास्त्यक्त्वा मुक्तस्त्वसे इति सकरुणामसुः ॥ अटतीति द्वयेन ॥ यत्त ॥ यदा भवान्काननं वृंदावनं प्रत्यटति गच्छति
तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्द्धमपि युगवद्भवति ॥ एवमदर्शने दुःखमुक्त्वा पुनश्च कथंचिद्दिनांते ते
तव श्रीमन्मुखं उत्त उच्चैः रीक्षमाणानां तेषां दृशां पक्ष्मकृद्ब्रह्मा जडो मंदः ॥ एवं निमेषमात्रमप्यंतरमसह्यमिति

भा० द० पू० तन्वः करचरणाद्वयः ॥ ३ ॥ अंजलिना संहतहस्तद्वयेन ॥ ४ ॥ ५ ॥ भ्रुकुटिमाबध्य भ्रुवौ कुटिलीकृत्य प्रेमसंरंभेण
१२१ प्रणयकोपावेशेन विह्वला विवशा संदष्टाधरोष्ठा धरोष्ठा कटाः कटाक्षास्तैः आक्षेपाः परिभवास्तैस्ताडय

तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वं प्राणमिवागतं ॥ ३ ॥ काचि
त्करांबुजं शौरेर्जगृहेंऽजलिना मुदा ॥ काचिद्दधार तद्बाहुमंसे चंदनभूषितं ॥ ४ ॥ काचिदंजलि
नागृह्णात्तन्वी तांबूलचर्वितं ॥ एका तदंघ्रिकमलं संतप्ता स्तनयोरधात् ॥ ५ ॥ एका भ्रूकुटि
माबध्य प्रेमसंरंभविह्वला ॥ घ्नंतीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥ अपरानिमिषद्दृग्भ्यां
जुषाणा तन्मुखांबुजं ॥ आपीतमपि नातृप्यत्संतस्तच्चरणं यथा ॥ ७ ॥ तं काचिन्नेत्ररंध्रेण हृदि
कृत्वा निमील्य च ॥ पुलकांग्युपगुह्यास्ते योगीवानंदसंप्लुता ॥ ८ ॥ सर्वास्ताः केशवालोकपरमोत्स
वनिर्वृताः ॥ जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ ९ ॥

घ्नंतीव ऐक्षत ॥ ६ ॥ अनिमिषतीभ्यां ॥ अनि
मीलतीभ्यां दृग्भ्यां आपीतमपि सम्यग्दृष्टमपि पुनः पुनर्जुषाणा नातृप्यत ॥ ७ ॥ हृदि कृत्वा हृदयं नीत्वेत्यर्थः
॥ ९ ॥ प्राज्ञमीश्वरं प्राप्य यथा मुमुक्षवो जनाः ॥ यद्वा प्राज्ञं ब्रह्म प्राप्य यथा संसारिणः ॥ यद्वा प्राज्ञं सौषुप्तं प्राप्य

[illegible] १२१

अतिप्रेमधर्षिताहृदंत्यआहुः ॥ यदिति ॥ हेप्रिययत्तेतवसुकुमारपदाब्जंकठिनेषुकुचेषुसंमर्दनशंकिताःशनैः
शनैर्दधीमहि ॥ धारयेमवयंतेनाटवीमटसिगच्छसिनयसीतिपाठे ॥ पशून्वाकाचिदन्यावा ॥ आत्मानमेव
वानयसिप्रापयसि ॥ तत्वनतःतत्पदाब्जंवाकूर्पादिभिःकिंस्विन्नव्यथते ॥ कथंहेनामनव्यथेतेति ॥ भवान्नेवायुर्जी

यत्तेसुजातचरणांबुरुहंस्तनेषुभीताःशनैःप्रियदधीमहिकर्कशेषु ॥ तेनाटवीमटसितद्व्य
थतेनकिंस्वित्कूर्पादिभिर्भ्रमतिधीर्भवदायुषांनः ॥ १९ ॥ इतिश्रीमद्भागवतेमहापुराणेद
शमस्कंधेरासक्रीडायांएकत्रिंशोध्यायः ॥ ३१ ॥ श्रीशुकउवाच ॥ इतिगोप्यःप्रलपंत्यश्चचित्र प्रगायंत्यः २
धा ॥ रुरुदुःसुस्वरंराजन्कृष्णदर्शनलालसाः ॥ १ ॥ तासामाविरभूच्छौरिःस्मयमानमुखांबुजः ॥
पीतांबरधरःस्रग्वीसाक्षान्मन्मथमन्मथः ॥ २ ॥
वर्णयासांतासांनोधीर्भ्रमतिमुह्यतीति ॥ १९ ॥ इतिदशमेएकत्रिंशः ॥ ३१ ॥ द्वात्रिंशेविरहालापविक्लिन्नहृदये
हरिः ॥ तत्राविर्भूयगोपीस्ताःसांत्वयामासमानयन् ॥ स्वप्रेमामृतकल्लोलविह्वलीकृतचेतसः ॥ सदयंनंदयन्
गोपीरुक्तोनंदनंदनः ॥ रतीति ॥ इतिएवंचित्रधाअनेकधासुस्वरंउच्चैःकृष्णदर्शनेलालसाः ॥ अतिस्पृहायासांताः
॥ १ ॥ साक्षान्मन्मथमन्मथः ॥ जगन्मोहनस्यापिकामस्यमनःप्रमथ्नातः ॥ साक्षात्तस्यापिमोहकइत्यर्थः ॥ २ ॥

भा०द०पू० गोपीसुमागतस्ताभिः संमानितः सन् चकास सुशुभे त्रैलोक्यालक्ष्मीः शोभा तस्या एकमेवस्थानं तद्वपुर्दध
१२२ त् दर्शयन् ॥ १२ ॥ सहाससलीलेक्षणेन विभ्रमो विलासो यस्यां तया भ्रुवा उपलक्षिताः संस्पर्शनेन संमर्दनेन
॥ १३ ॥ तत्र भगवतोऽकृतज्ञत्वं तद्वचनेनैवोपपादयितुकामा गूढाभिप्रायेण लोकवृत्तं तं निविष्टं पृच्छन्ति भजत इति भजतः

तत्रोपविष्टो भगवान् स ईश्वरो योगेश्वरान्तर्हृदि कल्पितासनः । चकास गोपीपरिषद्गतोऽर्चितस्त्रैलोक्य
लक्ष्म्येकपदं वपुर्दधत् ॥ १२ ॥ सभाजयित्वा तमनंगदीपनं सहाससलीलेक्षणविभ्रमभ्रुवा ॥ संस्पर्शने
नांककृतांघ्रिहस्तयोः संस्तुत्य ईषत्कुपिता बभाषिरे ॥ १३ ॥ गोप्य ऊचुः ॥ भजतोऽनुभजंत्येक एक ए
तद्विपर्य्ययं ॥ नोभयांश्च भजंत्येक एतन्नो ब्रूहि साधु भोः ॥ १४ ॥ श्रीभगवानुवाच ॥ मिथो भजंति ये स
ख्यः स्वार्थैकांतोद्यमा हि ते ॥ न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १५ ॥

प्राणिनः ॥ अनु तत्र अनंतरं केचिद्भजनानुसारेण भजं
ति ॥ केचिदेतद्विपर्य्ययं यथा भवति तथा तद्भजनापेक्षमभजतोऽपि भजंति ॥ अन्ये तु नोभयानिति ॥ १४ ॥ विहिता
भिप्रायमुत्तरमाह मिथ इति हे सख्यः उपकारप्रत्युपकारतया ये मिथो भजंति तेऽन्यं न भजंति किंतु स्वात्मानमेव
के तेः हि यस्मात्स्वार्थ एवैकांतः उद्यमो येषां ते ॥ तत्र च न सौहृदं मतोऽन सुखं ॥ न च धर्मः दृष्टोऽदृष्टो वा महिष्यादि भजन
१२२

पुरुषः परमात्मा शक्तिभिर्यया ॥ यद्वा ॥ उपासकः पुरुषो ज्ञानबलवीर्यादिभिः ॥ यद्वा पुरुषोऽनुशायी प्रकृत्या ह्युपादि
भिर्वृतो यथा विरोचत इत्यर्थः ॥ विकसत्कुंदमंदारैः सुरभिर्योऽनिलस्तस्मात् ॥ षट्पदा यस्मिन्स्तत्तथा ॥ शरच्चंद्रांशूनां संदो
हैः समूहैर्ध्वस्तं दोषातमः रात्रिगतं तमो यस्मिंस्तत् ॥ अतः शिवं सुखकरं ॥ हस्तरूपैस्तरलैस्तरंगैरारचितत्वात् ॥ आस्तृता
कोमला वालुका यस्मिंस्तत् ॥ एवंभूतं पुलिनं ताः समादाय निर्विश्य तत्र ताभिर्वृतोऽधिकं व्यरोचतेति पूर्वेणान्वयः

ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ॥ व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥ ताः स
मादाय कालिंद्या निर्विश्य पुलिनं विभुः ॥ विकसत्कुंदमंदारसुरभ्यनिलषट्पदं ॥ शरच्चंद्रां
शुसंदोहध्वस्तदोषातमः शिवम् ॥ कृष्णाया हस्ततरलाचितकोमलवालुकं ॥१०॥ तद्दर्शना
ह्लादविधूतहृद्रुजो मनोरथांतं श्रुतयो यथा ययुः ॥ स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्ना
सनमात्मबंधवे ॥११॥

न्वयः ॥१०॥ ताश्च मनोरथानामंतं ययुः ॥ पूर्णकामा बभूवुः ॥ श्रुतयो यथेति ॥ अयमर्थः ॥ यथा कर्मकांडे श्रुत
यः परमेश्वरमपश्यंत्यस्तत्र तत्कामानुबंधैरपूर्णा इव भांति ॥ ज्ञानकांडे तु परमेश्वरं दृष्ट्वा तदाह्लादपूर्णकामा
नुबंधं जहतीति तद्वदिति ॥ आत्मकेति प्रश्नमय्य तमभजन्नित्याह ॥ स्वैरिति ॥ अचीक्लृपन्रचयामासुः ॥ आत्मबंध

मे१

१० स्कं॰ भागवतटी॰ ॥ ८९ ॥

भा०द०पू० १२३ एवंमदर्थोज्झितलोकवेदस्वानां ॥ मदर्थे उज्झितो लोकः युक्तोऽयमितिज्ञापनात् ॥ वेदश्च धर्मोऽधर्मोऽयं प्रतिज्ञापनात्
स्वाः ज्ञातयश्च येस्त्रहत्यागात्तु याभिस्तासां वो युष्माकं परोक्षं मद्दर्शनं यथा भवति तथा भजता युष्मत्प्रेमालोपा
र्थमेवनैव ॥ तिरोहितं मत्तः इलीनेन स्थितं ॥ तत्तस्मात् हे अबलाः ॥ हे प्रियाः मां मा असूयितुं दोषारोपेण द्रष्टुं यूयं
मा अर्हथ ॥ न योग्याः स्थ ॥ १९ ॥ आस्तामिदं परमार्थतस्तु युष्मत्कृत्यं त्वाह ॥ नेति ॥ निरवद्यसंयुजां निरवद्यः संयुक् सं

एवंमदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेऽबलाः ॥ मयापरोक्षं भजता तिरोहितं
मासूयितुं मार्हथ तत्प्रियं प्रियाः ॥ १९ ॥ न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः
या माभजन्दुर्जरगेहशृंखलाः संवृश्च्य तद्वः प्रतियातु साधुना ॥ २० ॥ इति श्रीमद्भागवते म
हापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कंधे रासक्रीडायां द्वात्रिंशोऽध्यायः ॥ ३२ ॥

योगो यासां तासां वः विबुधानामायुषापि चिरकालेनापि स्वीयं साधुकृत्यं कर्तुं न पारये ॥ न शक्नोमि ॥ कथंभूतानां ॥ याः मद्
र्त्याद्दुर्जरा अजरा या गृहशृंखला तां संवृश्च्य निःशेषं छित्वा मां मां अभजन् ॥ तासां मच्चित्ते तु वद्धानुरूपं मयुक्ततया नैव नि
कनिष्ठं ॥ तस्माद्धो युष्माकमेव साधुकृत्येन ॥ तत्तत् युष्मत्साधुकृत्यं प्रतियातु ॥ प्रतिकृतं भवतु ॥ युष्मत्सौशील्येनैव मम आ १२३
नृण्यं ॥ न तु मत्कृतप्रतिकारेणेत्यर्थः ॥ २० ॥ इति दशमे द्वात्रिंशः ॥ ३२ ॥

प्र२ ३१२

येतु अभजंतो भजंतीति ते द्विविधाः करुणाः स्निग्धाश्च ॥ तत्रतु यथाक्रमं धर्मकामौ भवत इत्याह ॥ भजंत्यभजत इति ॥ १६ ॥ ततस्तृती
यप्रश्नस्योत्तरं ॥ भजंतोऽपीति ॥ अयमर्थः ॥ ते चतुर्विधाः ॥ एके आत्मारामाः ॥ अपरे हृष्टः ॥ केचिदाप्तकामा विषयदर्शनेपि
पूर्णकामत्वेन भोगेच्छारहिताः अन्ये चाकृतज्ञाः संमूढाः ॥ अन्ये च गुरुद्रुहः ॥ अतिकठिनाः ॥ स पिता यस्तु पोषक इति ॥

भजंत्यभजतो ये वै करुणाः पितरो यथा ॥ धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १६ ॥ भज
तोपि न वै केचिद्भजंत्यभजतः कुतः ॥ आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः ॥ १७ ॥ ना
हं तु सख्यो भजतोपि जंतून्भजाम्यमीषामनुवृत्तिवृत्तये ॥ यथाऽधनो लब्धधने विनष्टे त
च्चिंतयान्यन्निभृतो न वेद ॥ १८ ॥

न्यायाद् उपकर्ता गुरुतुल्यः ॥ तस्मै द्रुह्यंतीति तथा ॥ १७ ॥ तत्र च चरमकोटिनमात्मानमत्वाऽस्थितसंनिकोचैः ॥
परस्परं गूढस्मितसमुखीता दृष्ट्वाह ॥ नाहं त्विति ॥ हे सख्यः ॥ अहं तेषां मध्ये न कोपि ॥ किंतु परमकारुणिकः पर
मसुहृच्च ॥ कथं ॥ अमीषां भजतां अनुवृत्तिवृत्तये ॥ निरंतरध्यानप्रवृत्त्यर्थं तान्न भजामि ॥ एतत्स दृष्टांतमाह यथे
ति ॥ तस्य धनस्यैव चिंतया निभृतः ॥ पूर्णो व्याप्त इति यावत् ॥ अन्यत् क्षुत्पिपासादि अपि न वेद ॥ १८ ॥

हं १

भा॰द॰पू॰ १२४

४॥ सप्रियाणां श्रीकृष्णसहितानां तु तुमुलः संकीर्णः ॥५॥ महामरकतो नीलमणिरिव हैमानां मध्ये ताभिः स्वर्णवर्णाभिरा
श्लिष्टाभिः शुशुभे॥ गोपीदृष्ट्याभिप्रायेणैवाविनैव च मध्यपदानुवृत्तिमेकवचनेन ॥६॥ सप्रयाताभिः शुशुभे तथा
ता॥ अर्पितेन विरेजुरित्याह॥ पादन्यासैरिति॥ भुजविधुतिभिः॥ करचालनैः॥ भज्यमानैर्मध्यैः॥ चलद्भिः कुचैः॥ पट
श्च गंडलोलैः॥ गंडेषु चंचलैः॥ स्विद्यन्मुख्यः॥ स्विद्यंति स्वेदयुक्तानि मुखानि यासां ताः॥ कबरेषु रसनासु च ग्रं
ततो दुंदुभयो नेदुर्निपेतुः पुष्पवृष्टयः॥ जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोऽमलं॥४॥ वलयानां नूपु
राणां किंकिणीनां च योषितां॥ सप्रियाणामभूच्छब्दस्तुमुलो रासमंडले॥५॥ तत्रातिशुशुभे ताभिर्भगवा
न्देवकीसुतः॥ मध्ये मणीनां हैमानां महामारकतो यथा॥६॥ पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूवि
लासैर्भज्यन्मध्यैश्चल कुचपटैः कुंडलैर्गंडलोलैः॥ स्विद्यन्मुख्यः कबररसनाग्रंथयः कृष्णव
ध्वो गायंत्यस्तं तडित इव ता मेघचक्रे विरेजुः॥७॥ उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः॥ कृष्णाभि
मर्शमुदिता यद्गीतेनेदमावृतम्॥८॥
थयो दृढा यासां ताः॥ पृथ॥ ते तु तासु च ग्रंथयः शिथिलाः पृथग् इत्यर्थः॥ तत्र नानामूर्तेः कृष्णो मेघचक्रमिव
तासु तु बहुविधास्तडित इव खदस्तुषार इव॥ गीतं गर्जितमिवेति॥ यथासंभवमुह्यं॥७॥ नृत्यमानाः नृत्यंत्यः॥
रक्तकंठ्यः॥ नानारागैरनुरंजितकंठ्यः॥ कृष्णस्याभिमर्शेन संस्पर्शेन मुदिताः इदं विश्वम्॥८॥ १२४

त्रयस्त्रिंशे ततो गोपीमंडलीमध्यगो हरिः॥ प्रियास्ता रमयामास सच्छंदिनीवनकेलिभिः॥ तत्तदा त्रंगहेराजन्॥ यद्वा॥ तस्य
भगवतोंशेन वपुषा करचरणाद्यवयवैर्वा उपचिताः समृद्धाः॥ आशिषो यासां तैः॥१॥ रासक्रीडां रासोनाम वक्तुनंतं
कीयुक्तो नृत्यविशेषः॥ तां क्रीडां॥ अन्योन्यमाबद्धाः संग्रथिता बाहवो यैस्तैः सह॥२॥ तत्साहित्यमभिनयेन दर्शयति
रासोत्सवउत्सवस्तुष्टयाधिकेन सार्द्धेन॥ तासां मंडलरूपेणावस्थितानां द्वयोर्द्वयोर्मध्ये प्रविष्टेन तेनैव कंठे

श्रीशुकउवाच॥ इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः॥ जहुर्विरहजं तापं तदंगोपचिताशिषः॥
१॥ तत्रारभत गोविंदो रासक्रीडामनुव्रतैः॥ स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः॥२॥ रासो
त्सवः संप्रवृत्तो गोपीमंडलमंडितः॥ योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः॥ प्रविष्टेन गृहीतानां
कंठे स्वनिकटं स्त्रियः॥ यं मन्येरन्नभस्तावद्विमानशतसंकुलं॥ दिवौकसां सदाराणामौत्सुक्यापहृतात्मनां॥३॥

गृहीतानामुभयतः आलिंगितानां॥ कथंभूतेन यं सर्वाः स्त्रियः स्वस्वनिकटं मामेवा॥
श्लिष्टवानिति मन्येरन्॥ तेन एतदर्थं द्वयोर्द्वयोर्मध्ये प्रविष्टेनेत्यर्थः॥ नन्वेकस्य कथं तथा प्रवेशः॥ सर्वसंनिहितेवा
कुतः स्वैकनिकटाभिमानस्तासामित्यत उक्तं॥ योगेश्वरेणेति॥ अचिंत्यशक्तिनेत्यर्थः॥ ~~तावत्त~~॥ तावत्तत्रत्तेण
मेव॥ औत्सुक्यापहृतमनसां सस्त्रीकाणां देवानां विमानशतैः संकीर्णं नभो बभूव॥ ३॥ रामरामरामरामराम

तत्रवादकेषुगायकेषुचसस्त्रीकेषुगांधर्वकिन्नरादिषुरसावेशेनमुख्यत्वन्तत्यक्तुचान्यामेववाद्यादिसंप
त्तिंदर्शयन्रासंसंभ्रममाह॥कर्णेति॥कर्णोत्पलैश्च॥अलकविटंकैरलकालंकृतैःकपोलैश्चघर्मे
श्चवक्त्रेषुश्रीःशोभायासांताः॥घोषाःकिंकिण्यः॥वलयनूपुरघोषैर्वादित्रैः॥स्वकेशेभ्यःस्रस्ताःस्रजोया
सांताः॥ततेनतालगतिसंतुष्टाःस्तकेशास्तशिरःकंपपादेषुपुष्पवृष्टिमिवाकुर्वन्तीत्युत्प्रेक्षितंभगव

कर्णोत्पलालकविटंककपोलघर्मवक्त्रश्रियोवलयनूपुरघोषवाद्यैः॥गोप्यःसमंभगव
तानन्नृतुःस्वकेशस्रस्तस्रजोभ्रमरगायकरासगोष्ठ्यां॥१६॥एवंपरिष्वंगकराभिमर्शस्निग्धे
क्षणोद्दामविलासहासैः॥रेमेरमेशोव्रजसुंदरीभिर्यथार्भकःस्वप्रतिबिंबविभ्रमः॥१७॥

पकी १ तास्सहननृतुः॥कभ्रमरएवगायकस्यांरासससभायां॥१६॥यथागोप्योनानाविभ्रमैर्भगवतासहविजह्रुः॥ए
वंभगवानपिस्वविलासैस्ताभिःसहरेमइत्याह॥एवमितिनत्हिलौकिकभिन्नतस्यैवरतौदृष्टान्तः॥यथार्भकइति सैर २
स्वप्रतिबिंबैर्विभ्रमः॥क्रीडायस्यसइव॥अनेनैतद्दर्शितं॥स्वीयमेवसर्वकलाकौशलंसौगंध्यलावण्यमाधु
र्यादिचतासुसंचार्य॥ताभिःसहरेमे॥यथार्भकःस्वप्रतिबिंबैरिति॥१७॥ ॥ ॥

मुकुंदेनसहस्वरजातीःषड्जादिस्वरालापगतीः॥अमिश्रिताःकृष्णोन्नीताभिरसंकीर्णाः॥प्रीयमाणेनसंमानिताः॥ऐ
तन्नात्युन्नयनमेवध्रुवाख्यंतालविशेषंकृत्वोन्निन्येउन्नीतवती॥१०॥एवंनृत्यगीतादिनाश्रीकृष्णसंमानितानांता
सामतिप्रीतिविलसितंवृत्तमाह॥काचिदिति॥श्लथानिवलयानिमल्लिकाश्चयस्याःसा॥११॥उत्पलस्यसौरभमिवसौ

काचित्समंमुकुंदेनस्वरजातीरमिश्रिताः॥उन्निन्येपूजितातेनप्रीयतासाधुसाध्विति॥ऐ॥तदेवध्रुव
मुन्निन्येतस्यैमानंचबह्वदात्॥१०॥काचिद्रासपरिश्रांतापार्श्वस्थस्यगदाभृतः॥जग्राहबाहुनास्कंधे
श्लथद्वलयमल्लिका॥११॥तत्रैकांसगतंबाहुंकृष्णस्योत्पलसौरभं॥चंदनालिप्तमाघ्रायहृष्टरोमा
चुचुंबह॥१२॥कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडितं॥गंडंगंडेसंदधत्याःप्रादात्तांबूलचर्वि
तं॥१३॥नृत्यतीगायतीकाचित्कूजन्नूपुरमेखला॥पार्श्वस्थाच्युतहस्ताब्जंश्रांताधात्स्तनयोःशिवं
१४॥गोप्योलब्ध्वाच्युतंकांतंश्रियएकांतवल्लभं॥गृहीतकंठ्यस्तद्दोर्भ्यांगायंत्यस्तंविजह्रिरे॥१५॥

रभंयस्यतंबाहुं॥१२॥नाट्येननृत्येनविक्षिप्तयोश्चंचलयोःकुंडलयोस्त्विषेणत्विषमंडितंगंडकपोलंतत्याभृतेस्वगं
डेसंदधत्याःसंयोजयंत्याः॥१३॥कूजंतीनूपुरेमेखलाचयस्याःसा॥१४॥एवमन्याअपिगोप्योयथायथंनानाविभ्रमैर्वि
जह्रुरित्याहगोप्यइति॥१५॥

भा०द०४ ततोतिहृष्टानांगोपीनांचरितमाह॥गोप्यइति॥स्फुरतांस्वर्णकुंडलानांचत्विषागंडेषुयाश्रीःतयासुधितेन॥अमृता
९२६ यितेनहाससहितेननिरीक्षणेनचऋषभस्यपत्युःश्रीकृष्णस्यमानंदधत्यःपूजांकुर्वत्यःतत्कर्माणिजगुः॥तस्य
कररुहैर्नखैःस्पर्शेनप्रमोदोयासांताः॥२२॥अथजलकेलिमाह॥ताभिरिति॥तासामंगसंगेनघृष्टासंमर्दितायास्र

गोप्यःस्फुरत्पुरटकुंतलकुंडलत्विड्गंडश्रियासुधितहासनिरीक्षणेन॥मानंदधत्यऋषभस्यजगुः
कृतानिपुण्यानितत्कररुहस्पर्शप्रमोदाः॥२२॥ताभिर्युतःश्रममपोहितुमंगसंगघृष्टस्रजःसकुच
कुंकुमरंजितायाः॥गंधर्वपालिभिरनुद्रुतआविशद्वाःश्रांतोगजीभिरिभराडिवभिन्नसेतुः॥२३॥
सोंभस्यलंयुवतीभिःपरिषिच्यमानः॥प्रेम्णेक्षितःप्रहसतीभिरितस्ततोऽंग॥वैमानिकैःकुसु
मवर्षिभिरीड्यमानोरेमेस्वयंस्वरतिरत्रगजेंद्रलीलः॥२४॥

कुंकुमस्याः॥अतएवतासांकुचकुंकुमेनरंजितायाःसंबंधिभिर्गंधर्वपालिभिः॥गंधर्वपाःगंधर्वपतयइवगायंतोयेअ
लयस्तैरनुद्रुतः॥अनुगतःसश्रीकृष्णःवाःउदकं॥आविशत्॥भिन्नसेतुः॥विदारितवप्रः॥स्वयंचातिक्रमंतलोक
वेदमर्यादः॥२३॥स्वरतिः॥आत्मारामोपि॥अत्रगोपीमंडलेअंभसिवा॥२४॥ रामरामरामरामराम ॥ ॥ ॥ ९२६

तास्तु भगवद्विलासैराकुला बभूवुरित्याह ॥ तदंगेति ॥ तस्यांगसंगेन प्रकृष्टामुत्प्रीतिस्तया ऽऽकुलानि अवशानींद्रि
याणि यासां ताः विस्रस्थवं धातुं केशादीन् ॥ अंजसा प्रतिवोढुं पृथक्पृथक् यथापूर्वं धर्तुं नालं न समर्था बभूवुः ॥ विस्रस्ता
मालाभरणानि च यासां ताः ॥ १८ ॥ न केवलं ता एवाकुलेंद्रियाः किंतु देव्योपीत्याह ॥ कृष्णविक्रीडितमिति ॥ किंच ॥
शशांकश्चेति ॥ अनेनेतत्सूचितं ॥ शशांकेन विस्मितेन गतौ विस्मृतायां ततः प्रभृति नाः सर्वापि ग्रहास्तत्र तत्रैव तस्थुः ॥

तदंगसंगप्रमुदाकुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां वा ॥ नांजः प्रतिव्योढुमलं व्रजस्त्रियो विस्र
स्तमालाभरणाः कुरूद्वह ॥ १८ ॥ कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ॥ कामार्दिताः शशांक
श्च सगणो विस्मितोभवत् ॥ १९ ॥ कृत्वा तावंतमात्मानं यावतीर्गोपयोषितः ॥ रेमे स भगवांस्ताभिरात्मा
रामोपि लीलया ॥ २० ॥ तासामतिविहारेण श्रांतानां वदनानि सः ॥ प्रामृजत्करुणः प्रेम्णा शंतमेनांगपा
णिना ॥ २१ ॥

तश्चातिदीर्घासु रात्रीषु यथासुखं विजह्रुरिति ॥ १९ ॥ किंच ॥ कृत्वेति ॥ अयं भावः ॥ कात्यायनी महामाये महायोगिन्य
धीश्वरि ॥ नंदगोपसुतं देवि पतिं मे कुरु ते नमः इति प्रत्येकं ताभिः प्रार्थनात् ॥ भगवतापि याताबला व्रजं सिद्धा म
येमा रंस्यथ क्षपा इति तथैव प्रतिश्रुतत्वात्तावंतमात्मानं कृत्वा रेमे इति यावतीः यावत्यः ॥ २० ॥ कृपातिशयमाह तासा

टि १६

आप्तकामस्य नायमधर्ममिति चेत् ॥ यद्येवं कामाभावान्निंदितं ॥ केनाभिप्रायेण कृतवानिति पृच्छति ॥ आप्तकाम
इति २८ परमेश्वरे कैमुत्यन्यायेन परिहरन् सामान्यतो महतां वृत्तमाह ॥ धर्मव्यतिक्रममिति साहसं च दृष्टं प्रजा
पतींद्रसोमविश्वामित्रादीनां तच्च तेषां तेजस्विनां दोषाय न भवतीति ॥ २९ ॥ तर्हि यद्यदाचरति श्रेष्ठ इति न्याये

आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितं ॥ किमभिप्राय एतन्नः संशयं छिंधि सुव्रत ॥ २८ ॥ श्री
शुक उवाच ॥ धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं ॥ तेजीयसां न दोषाय वह्नेः सर्वभुजो य
था ॥ २९ ॥ नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः ॥ विनश्यत्याचरन्मौढ्याद्यथारुद्रोऽब्धिजं
विषं ॥ ३० ॥ ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥ तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समा
चरेत् ॥ ३१ ॥ कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥ विपर्ययेण वानर्थो निरहंकारिणां प्रभो ॥ ३२

नान्योपि कुर्यादित्याशंक्याह नैतदिति ॥ अनीश्वरो देहादिपरतंत्रो यथारुद्रव्यतिरिक्तो विषभक्षणमाचरन्नश्य
यन् ॥ ३० ॥ कथं तर्हि सदाचारस्य प्रामाण्यमत आह ॥ ईश्वराणामिति ॥ तेषां वचः सत्यं अतस्तदुक्तमाचरेदेव आ
चरितं तु क्वचित्सत्यं ॥ अतः स्ववचोयुक्तं तेषां ॥ वचसायुक्तं अविरुद्धं तत्तदेवाचरेत् ॥ ३१ ॥ ननु तर्हि तेपि किमेवं सा
हसमाचरंतीत्यत्राह ॥ कुशलेति ॥ आरब्धकर्मक्षपणमात्रमेव तेषां कृत्यं नान्यदित्यर्थः ॥ ३२ ॥

जलस्थलक्रीडे दर्शिते ॥ वनश्रीं उंदर्शयति ॥ ततश्चेति यमुनाया उपवने जलस्थलप्रसूनानां गंधो यस्मिन् तेनानिलेन
जुष्टानि दिशां तटानि अंता यस्मिन् ॥ यद्वा दिशश्च तत्तटस्थलं च यस्मिन् ॥ वने भृंगाणां प्रमदानां च गणैरावृतः ॥ २५ ॥
एष रासक्रीडानिगमनं ॥ एवमिति ॥ सत्यो हि कामः संकल्पः ॥ अनुरागी स्त्रीकदंबस्य ॥ एवं सर्वा निशाः सेवितवान् स्मरत्वाय

ततश्च कृष्णोपवने जलस्थलप्रसूनगंधानिलजुष्टदिक्तटे ॥ चचार भृंगप्रमदागणावृतो यथा मद
च्युद्द्विरदः करेणुभिः ॥ २५ ॥ एवं शशांकांशुविराजिता निशाः स सत्यकामोऽनुरताबलागणः ॥ सिषेव आ
त्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥ राजोवाच ॥ संस्थापनाय धर्मस्य प्रशमा
येतरस्य च ॥ अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता ॥
प्रतीपमाचरेद्ब्रह्मन् परदाराभिमर्शनम् ॥ २७ ॥

कथारसाश्रयाः ॥ शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः ॥ यद्वा निशा इति द्वितीयांतं
तस्य योगे ॥ शृंगाररसाश्रयाः शरदि प्रसिद्धाः काव्येषु याः कथाः तास्ताः सिषेव इति ॥ एवमप्यात्मन्येवावरुद्धः सौ
रतः स्मरधातुर्न तु स्खलितो यस्येति कामजयोक्तिः ॥ २६ ॥ प्रतीपं प्रतिकूलमधर्ममित्यर्थः ॥ आचरत् कृतवा
न् ॥ न चेदं धर्ममात्रं कलंजभक्षणादिवत् ॥ किंतु महासाहसमित्याह ॥ परदाराभिमर्शनमिति ॥ २७ ॥ ॥

ति

भा०द०पु० १२८ नन्वन्येपिभिन्नाचाराः स्वचेष्टितमेवैवंवदंतितत्राह ॥ नासूयन्निति ॥ एवंभूतेश्वर्य्याभावेतथाकुर्वंत्तपापाज्ञेया
इतिभावः ॥३७॥ ब्रह्मरात्रेब्राह्ममुहूर्त्तेउपावृत्तेप्राप्ते ॥३८॥ भगवतःकामविजयरूपरासक्रीडाश्रवणादेः ॥ काम
जयमेवफलमाह ॥ विक्रीडितमिति ॥ अचिरेणधीरःसन् ॥ हृद्रोगंकामंआशुअपहिनोतिपरित्यज्यतीति ॥३९॥

नासूयन्खलुकृष्णायमोहितास्तस्यमायया ॥ मन्यमानाःस्वपार्श्वस्थान्स्वान्स्वान्दारान्व्रजौकसः
व्र२ ॥३७॥ ब्रह्मरात्रउपावृत्तेवासुदेवानुमोदिताः ॥ अनिच्छंत्योययुर्गोप्यःस्वगृहान्भगवत्प्रियाः ॥
३८ ॥ विक्रीडितंव्रजवधूभिरिदंचविष्णोःश्रद्धान्वितोनुशृणुयादथवर्णयेद्यः ॥ भक्तिंपरांभ
गवतिप्रतिलभ्यकामंहृद्रोगमाश्वपहिनोत्यचिरेणधीरः ॥३९॥ इतिश्रीमद्भागवतेमहापुरा
णेदशमस्कंधेरासक्रीडायांत्रयत्रिंशोऽध्यायः ॥३३॥ श्रीशुकउवाच ॥ एकदादेवयात्रायांगो
पालाजातकौतुकाः ॥ अनोभिरनडुद्युक्तैःप्रययुस्तेऽबिकावनं ॥१॥

सेव्यश्रीपरमानंदसेविश्रीधरनिर्मिता ॥ इतिश्रीभावार्थदीपिकादशमाश्रया ॥ इतिश्रीदशमेत्रयस्त्रिंशः ॥३३॥
चतुस्त्रिंशेहिनाग्रस्तंनंदंहरिरमूमुचत् ॥ विद्याधरंचगिरिशःशापाच्छंखचूडमथावधीत् ॥ रासापदेशतःकामं
किंकरीकृत्यकामतः ॥ अनुग्रहान्नवसंनिन्येतथाविद्याधराधिपं ॥ तदेवंकामानुग्रहमुखेनकामजयंप्रति

प्रस्तुतमाह ॥ किमुतेति ॥ कुशलाकुशलान्वयो न विद्यत इति किंउ नर्वक्तव्यमित्यर्थः ॥ ३३ ॥ एतदेव स्फुटीकरोति
यस्य पादपंकजस्य परागस्य निषेवणेन तृप्ताः यद्वा ॥ यस्य पादपंकजपरागे निषेवा येषां ते तथा ते च ते तृप्ताश्चेति
भक्ता इत्यर्थः ॥ तथा ज्ञानिनश्च न नह्यमानाः बंधनं न प्राप्नुवंतः ॥ ३४ ॥ परदारत्वं गोपीनामंगीकृत्य परिहृतं इदा
नीं भगवतः सर्वांतर्यामित्वेन परदारसेवा नाम न काचिदित्याह ॥ गोपीनाम न काचिदित्याह ॥ गोपीनामिति योऽंत

किमुताखिलसत्वानां तिर्यङ्मर्त्यदिवौकसां ॥ ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३३ ॥ यत्पाद
पंकजपरागनिषेवतृप्ता योगप्रभावविधुताखिलकर्मबंधाः ॥ स्वैरं चरंति मुनयोपि न नह्यमाना
स्तस्येच्छयात्तवपुषः कुत एव बंधः ॥ ३४ ॥ गोपीनां तत्पतीनां च सर्वेषामेव देहिनां ॥ योऽंतश्चरति सो
ध्यक्षः क्रीडनेनेह देहभाक् ॥ ३५ ॥ अनुग्रहाय भक्तानां मानुषं देहमास्थितः ॥ भजते तादृशीः क्री
डा याः श्रुत्वा तत्परो भवेत् ॥ ३६ ॥

श्चरति ॥ अध्यक्षो बुद्ध्यादिसाक्षी स एव क्रीडनेन देहभाक् ॥ न त्वस्मदादितुल्यः ॥ येन दोषः स्यादिति ॥ ३५ ॥ नन्वे
वं चेत् ॥ आप्तकामस्य निंदिते कुतः प्रवृत्तिरित्यत आह ॥ अनुग्रहायेति शृंगाररसाकृष्टचेतसोऽतिबहिर्मुखा
नपि स्वपरान् कर्तुमिति भावः ॥ ३६ ॥ रामराम राम राम रामराम ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ॥ ऽऽ

भा०द०पू गोपैश्चात्मनः स्वैश्वर्यं प्रकाशयितुमविज्ञानिवत्तमपृच्छत् दीप्यमानेन वपुषा समवस्थितं १० यः परया शोभया प्रकाशते
१२९ सम्भवान्कइति ११ १२ प्राहसं उपहसितोस्मि प्रलब्धैः उपहसितैः मदीयेनैव पापेन निमित्तेन १३ यत यतः शापात् १४
तमपृच्छद्धृषीकेशः प्रणतं समवस्थितं ॥ दीप्यमानेन वपुषा पुरुषं हेममालिनं ॥१०॥ को भवान्परयाल
क्ष्म्या रोचतेद्भुतदर्शनः ॥ कथं जुगुप्सितामेतां गतिं वा प्रापितोवशः ॥११॥ सर्प उवाच ॥ अहं विद्याध
रः कश्चित्सुदर्शन इति श्रुतः ॥ श्रिया स्वरूपसंपत्त्या विमानेनाचरं दिशः ॥१२॥ ऋषीन्विरूपानंगिर
सः प्राहसं रूपगर्वितः ॥ तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना ॥१३॥ शापो मेनुग्रहायैव कृतस्तैः
करुणात्मभिः ॥ यदहं त्रिलोकगुरुणा पादस्पृष्टो हताशुभः ॥१४॥ तं त्वाहं भवभीतानां प्रपन्नानां भया
पहं ॥ आपृच्छे शापनिर्मुक्तः पादस्पर्शादमीवहन् ॥१५॥ प्रपन्नोस्मि महायोगिन्महापुरुष सत्पते अ
रि१ नुजानीहि मां देव सर्वलोकेश्वरेश्वर ॥१६॥ ब्रह्मदंडाद्विमुक्तोहं सद्यस्तेच्युत दर्शनात् ॥१७॥ यन्नाम गृ
ह्णन्नखिलान् श्रोतॄनात्मानमेव च ॥ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥१८॥
आपृच्छे ॥ स्वर्लोकं गंतुमनुज्ञां याचे ॥ अमीवहन् दुःखनाशन ॥१५॥१६॥१७॥ १८ रामरामरामरामरामरामराम ॥ १२९

२॥ गावः गाः ॥ मधु रं मध्वन्नं मधुना सहितमन्नं ॥ ३ ॥ जलमात्रं प्राश्ययोपोषिताः ॥ तां निशां तत्र ऊषुः ॥ न्यवसन् ॥ ४
महानहिः ॥ अजगरः ॥ उरगः उरसा गच्छन्तीत्यल्लक्षितत्वमुक्तं ॥ अग्रसीत् दजग्रास ॥ ५ ॥ ६ ॥ विव्यधुः ताडया
तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुं ॥ आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेंऽबिकां ॥ २ ॥ गावो हि
रण्यं वासांसि मधु मध्वन्नमादृताः ॥ ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ॥ ३ ॥ ऊषुः सर
स्वतीतीरे जलं प्राश्य यतव्रताः ॥ रजनीं तां महाभागा नंदसुनंदकादयः ॥ ४ ॥ कश्चिन्महानहिस्त
स्मिन्विपिनेतिबुभुक्षितः ॥ यदृच्छयागतो नंदं शयानमुरगोग्रसीत् ॥ ५ ॥ स चुक्रोशाहिना ग्रस्तः कृ
ष्ण कृष्ण महानयं ॥ सर्पो मां ग्रसते तात प्रपन्नं परिमोचय ॥ ६ ॥ तस्य चाक्रंदितं श्रुत्वा गोपालाः सहसो
त्थिताः ॥ ग्रस्तं च दृष्ट्वा विभ्रांताः सर्पं विव्यधुरुल्मुकैः ॥ ७ ॥ अलातैर्दह्यमानोपि नामुंचत्तमुरंगमः
तमस्पृशत्पदाभ्येत्य भगवान्सात्वतां पतिः ॥ ८ ॥ स वै भगवतः श्रीमत्पादस्पर्शहताशुभः ॥ भेजे सर्प
वपुर्हित्वा रूपं विद्याधरार्चितं ॥ ९ ॥
मासः ॥ उल्मुकैः ज्वलत्काष्ठैः ॥ ७ ॥ अलातैस्तैरेव काष्ठैरुल्मुकैः ॥ ८ ॥ विद्याधरैरर्चितं ॥ पूजितं ॥ ९ ॥ रामराम

श्रीनं१

भा०द० पू० १३० मूर्छितास्तद्गीतं चिन्त्नाः स्रंसत् भ्रश्यत् दुकूलं यस्मात् ॥ तमात्मानं देहं ॥ स्रस्ताः केशेभ्यः स्रजो यस्य तं च ॥ ततो नाविदन्
२३॥२४॥ निरीक्षतो निरीक्षमाणयोः ॥ तौ नो यो यस्य तत्प्रमदाजनं कालयामास सहसा प्रेरयामास ॥ २५ ॥ दस्युना चौरेण ग्र

गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाविदन्नृप ॥ स्रंसद्दुकूलमात्मानं स्रस्तकेशस्रजं ततः ॥ २३ ॥ एवं विक्री
डितोः स्वैरं गायतोः संप्रमत्तवत् ॥ शंखचूड इति ख्यातो धनदानुचरोऽभ्यगात् ॥ २४ ॥ तयोर्निरीक्षतो राजं
स्तन्नाथं प्रमदाजनं ॥ क्रोशंतं कालयामास दिश्युदीच्यामशंकितः ॥ २५ ॥ क्रोशंतं कृष्ण रामेति विलो
रा ६ क्य स्वपरिग्रहं ॥ यथा गा दस्युना ग्रस्ता भ्रातरावन्वधावतां ॥ २६ ॥ मा भैष्टेत्यभयारावौ शालहस्तौ तरस्विनौ ॥
आसेदतुस्तं तरसा त्वरितं गुह्यकाधमं ॥ २७ ॥ स वीक्ष्य तावनुप्राप्तौ कालमृत्यू इवोद्विजन् ॥ विसृज्य
स्त्रीजनं मूढः प्राद्रवज्जीवितेच्छया ॥ २८ ॥ तमन्वधावद्गोविंदो यत्र यत्र स धावति ॥ जिहीर्षुस्तच्छि
रोरत्नं तस्थौ रक्षन् स्त्रियो बलः ॥ २९ ॥ अविदूर इवाभ्येत्य शिरस्तस्य दुरात्मनः ॥ जहार मुष्टिनैवांग सह
चूडामणिं विभुः ॥ ३० ॥ शंखचूडं निहत्यैवं मणिमादाय भास्वरं ॥ अग्रजायाददात्प्रीत्या पश्यंतीनां च योषितां ॥ ३१ ॥
१ख

स्ता॥२६॥ मा भैष्ट भयं न प्राप्नुतेत्यभयरावौ ॥ २७ ॥ २८ ॥ २९ ॥ शिरसा सह चूडामणिं जहारेत्यर्थः ॥ ३० ॥ ३१ ॥ रामराम १३०

१९।२०॥ अहिदेहनिहत्येवं प्रागुन्मत्त सुदर्शनं ॥ तद्वदुन्मादिनं कंसः शंखचूडमताडयत् ॥ तत्र संगमाह ॥ कदाचिदिति
२१ विरजांबरावितिरजस्सिग्ध्रवरे ययोस्तौ ॥ किंच ॥ निशाप्रवेशसत्कुर्वंतौ उदित उडुपः तारकाश्च यस्मिंस्तत् ॥ मल्लिकागंध

श्रीशुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं परिक्रम्याभिवंद्य च ॥ सुदर्शनो दिवं यातः कृच्छ्रान्नंदश्च मोचितः ॥ १९ ॥ निशाम्य कृष्णस्य तदात्मवै[illegible]भवं व्रजौकसो विस्मितचेतसस्ततः ॥ समाप्य तस्मिन्नियमं पुनर्व्रजं नृपाययुस्तत्कथयंत आदृताः ॥ २० ॥ कदाचिदथ गोविंदो रामश्चाद्भुतविक्रमः ॥ विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां ॥ २१ ॥ उपगीयमानौ ललितं स्त्रीजनैर्बद्धसौहृदैः ॥ स्वलंकृतानुलिप्तांगौ स्रग्विणौ विरजोंबरौ ॥ निशामुखं मानयंतावुदितोडुपतारकं ॥ मल्लिकागंधमत्तालिजुष्टं कुमुदवायुना ॥ जगतुः सर्वभूतानां मनःश्रवणमंगलं ॥ तौ कल्पयंतौ युगपत्स्वरमंडलमूर्छितम् ॥ २२ ॥

मत्ताः अलयो यस्मिंस्तत् ॥ अन्यैरद्भुतादन्यैर्युगपत्कल्पयितुमशक्यमपि तौ स्वरमंडलमूर्छितं ॥ युगपत्कल्पयंतौ ॥ मनःश्रवणयोर्मंगलं यथा भवति तथा जगतुः ॥ अगायतामिति ॥ २२ ॥ रामराम राम रामराम राम राम ॥

यं १

भा०द०पू० हंतहे अवलाः इदंचित्रंश्रणुत हारहासः हारवद्विशदो हासोयस्य यद्वा वेणुवादने अधोवदने नहसितः हारेषुस्फुरन्
१३१ हासोयस्यसः हारवद्धावन्नसि शोभमानो हासोयस्यसः यद्वा हाराणां हासइव विशदास्फूर्त्तिर्यस्मिन उरसीति
३ सि रःस्थिराविद्युदिवलक्ष्मीर्यस्यसः यर्हियदा कूजितवेणु भवतितिहायैव्रजेवृषामृगागावश्चवेणुवाद्यैहृतानि
चेतांसियेषांते आरात्दूरादेवदंतैर्दष्टाः कवलाःग्रासाःयैस्ते धृताउन्नमिताःकर्णायैस्ते निद्रिताइवालिखिता चित्रइ
हंतचित्रमबलाःशृणुतेदंहारहासउरसिस्थिरविद्युत् नंदसूनुरयमार्त्तजनानांनर्मदोयर्हिकूजित
वेणुः वृंदशोव्रजवृषामृगगावो वेणुवाद्यहृतचेतसआरात् दंतदष्टकवलाधृतकर्णानिद्रिताली
खितचित्रमिवासन् ७ बर्हिणस्तवकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः कर्हिचित्सबलआ
लिसगोपैर्गाःसमाह्वयतियत्रमुकुंदः तर्हिभग्नगतयःसरितोवैतत्पदांबुजरजोनिलनीतं
स्पृहयंतीर्वयमिवाबहुपुण्याः प्रेमवेपितभुजाःस्तिमितापः ८
व१ वासन् अविदुःपीतिरश्वामिदमतिचित्रमित्यर्थः ७ किंच अचेतनासुसरित्सुतदंत दतिचित्रमित्याह हेआलि
बर्हिणः मयूरस्यस्तवकः पिच्छाःधातवोगैरिकादयश्च पुलाशानि पल्लवाश्चतैर्बद्धश्चासौ मल्लानांपरिबर्हःपरिकरःतं
विडंबयति अनुकरोतीतितथासमुकुंदोगोपैःसहवेणुनातिउपरितन मत्रापिज्ञातव्यं यत्रयदागाःसमाह्वयतितर्हि
तदातद्ध्वनिश्रवणात् अनिलेननीतंतस्यपदांबुजेरजः स्पृहयंत्यइवभग्नगतयःसरितः वेनिश्चिते वयमिवताअपि

१३१

इति दशमे चतुस्त्रिंशः ॥ ३४ ॥ पंचत्रिंशे वनं याते कृष्णे गोकुलयोषितः ॥ पुण्यश्लोकानुगीतेन निन्युर्दुःखेन वासरान् ॥ एवं
रात्रिषु कृष्णेन स्वैरमभिरमितानां तासां तद्विरहितानामुक्तीर्न निस्तारप्रकारमाह ॥ गोप्य इति दुःखेन कृष्णेऽहूरण ॥ १ ॥ वामबाहु
कृतवामकपोल इत्यादीनि द्वादशयुग्मानि ॥ हे गोप्यः ॥ वामे बाहौ तन्मूलकृते ॥ अर्पितः वामकपोलो येन सः ॥ वल्गिते
न त्रितेन भ्रुवौ येन सवल्गितभ्रुर्मुकुंदः ॥ अधरे अर्पिते वेणौ कोमलाभिरंगुलीभिराश्रिता मार्गाः स्वरस्वरछिद्राणि

इति श्रीमद्भागवते महापुराणे दशमस्कंधे शंखचूडवधो नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ श्रीशुक उवाच

गोप्यः कृष्णे वनं याते तमनुद्रुतचेतसः ॥ कृष्णलीलाः प्रगायंत्यो निन्युर्दुःखेन वासरान् ॥ १ ॥ गोप्य ऊचुः ॥
वामबाहुकृतवामकपोलो वल्गितभ्रुरधरार्पितवेणुं ॥ कोमलांगुलिभिराश्रितमार्गं गोप्य ईरय
ति यत्र मुकुंदः ॥ व्योमयानवनिताः सह सिद्धैर्विस्मितास्तदुपधार्य सलज्जाः ॥ काममार्गणसम
र्पितचित्ताः कश्मलं ययुरपस्मृतनीव्यः ॥ २ ॥

यस्मात् ॥ यत्र यदा ईरयति वादयति ॥ तदा व्योमयानानां सिद्धानां वनिताः सिद्धैः स्वपतिभिः सह वर्तमाना ॥ अपित
द्वेणुवीरणमुपधार्य ॥ आकर्ण्य प्रथमं विस्मिताः ॥ ततः काममार्गणेभ्यः समर्पितानि चित्तानि याभिस्ताः ॥ तत्परव
शा इत्यर्थः सलज्जाः सत्यः ॥ कश्मलं मोहं ययुः ॥ अत्र लिंगं अपस्मृताः ॥ विस्मृताः नीव्यो याभिरिति ॥ अत्र एवं भूत

स्य कृष्णस्य विरहं कथं सहाम हे इति सर्वत्र वाक्यशेषः ॥ २ ॥

भा०द०पू० १३२

किंच मे घोषिहरिं सेवनतइत्याह ॥ सहबलइति ॥ भोव्रजदेव्यो गोप्यः ॥ सहबलः सरामः स्रक्सः ॥ वभिर्निर्मिताभ्यां कर्णभूषणाभ्यां
विलासोयस्येति ॥ क्षितिभृतः सानुषु गिरेस्तटेषु वर्तमानः स्वयंजातहर्षो विश्वंहर्षयन् यदा वेणुरवेणउपरम्भयति निनादं
यति ॥ नादेनापूरयतीत्यर्थः ॥ तदा मेघो महतः श्रीकृष्णस्यातिक्रमेणाशंकितं चेतोयस्य सः ॥ न पुनरन्यतोपीति नवऽश्वैर्गर्ज्जे
ति ॥ किंतु तत्रैवस्थितः सन्वेणुरवमनुमंदमंदंगर्जति ॥ किंच सुहृदं विश्वमातिहरणसाम्यात्सुहृदं कृष्णं स्वसुमनोभिरभ्यव

सहबलःस्रगवतंसविलासः सानुषु क्षितिभृतो व्रजदेव्यः ॥ हर्षयन्यर्हि वेणुरवेण जातहर्ष उपरंभति
विश्वं ॥ महदतिक्रमणशंकितचेता मंदमंदमनुगर्जति मेघः ॥ सुहृदमभ्यवर्षत्सुमनोभिश्छायया च
विदधत्प्रतपत्रं ॥ ९ ॥ विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः ॥ तव सुतः सति यदाधरबिंबे
दत्तवेणुरनयत्स्वरजातीः ॥ सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः ॥ कवय आन
तकंधरचित्ताः कश्मलं ययुरनिश्चिततत्वाः ॥ १० ॥

ति २ र्षत् ॥ श्रद्धयादेवैः क्रियमाणां कुसुमवर्षं मेघकल्पयित्वोक्तं ॥ तुषारो वा कुसुमतया कल्पितः स एव वा देवतारूपो
ऽभ्यवर्षदित्य ॥ प्रतपात्आतपात्त्रायतइतिप्रतपत्रं छत्रं च छायया कुर्वन्निति ॥ ९ ॥ अपि च महदेतदाश्चर्यमित्याह
विविधेति ॥ हे सति यशोदे ॥ तव सुतः ॥ नाना गोपक्रीडासु निपुणो वेणुवाद्यविषये निजैः शिक्षायासु ता नत्वन्यतः
श्रुता इत्यर्थः ॥ स्वरजातीः निषादर्षभादिस्वरालापभेदान् ॥ अनयत ॥ उन्नीतवान् सन् ॥ ताः स्वरजातीः ॥ सवनशः ॥ मंद्र

स्थावरेष्वपि चित्रं दृश्यत इत्याहुः ॥ अनुचरैर्गोपैर्देवादिभिर्वा मुग्धानां वा क्रमादिपुरुष इवेति अचल
भूतिर्निश्चलश्रीः ॥ वेणुनाह्वानं नामगानेन ॥ तदा प्रणतभारेण विटपाः शाखा यासां ताः ॥ वनगता लतास्तरवश्चास्मिन्वि
ष्णुं प्रकाशमानं सूचयन्त्य इव मधुधारा ववृषुः स्मेति विस्मये ॥ तरवश्च तथा तत्पतीनामपि तथैवानंदमितिभा
वः एतानि विष्णुभक्तिलक्षणानि ॥८॥ किंच सरसि कमलवनेषु विहरतां पक्षिणामप्याकर्षणं तत्कृतं किंपुनरन्ये

अनुचरैः समनुवर्णितवीर्य आदिपूरुष इवाचलभूतिः ॥ वनचरो गिरितटेषु चरंतीर्वेणुनाह्वय
ति गाः स यदा हि ॥ वनलतास्तरव आत्मनि विष्णुं व्यंजयंत्य इव पुष्पफलाढ्याः प्रणतभारविटपा मधु
धाराः प्रेमहृष्टतनवः ससृजुः स्म ॥ दर्शनीयतिलको वनमालादिव्यगंधतुलसीमधुमत्तैः ॥ अलि
कुलैरलघु गीतमभीष्टमाद्रियन्यर्हि संधितवेणुः ॥ सरसि सारसहंसविहंगाश्चारुगीतहृतचेतस ए
त्य ॥ हरिमुपासत ते यतचित्ता हंत मीलितदृशो धृतमौनाः ॥ ९ ॥

नो यामित्याह ॥ दर्शनीयतिलक इति दर्शनीयस्तिलको यस्य ॥ दर्शनीयानां सुंदराणां मध्ये मुख्य इति वा ॥ वनमा
लासु याद्दिव्यगंधा तुलसी तस्या मधु नाम तैः ॥ अलिकुलैः ॥ अलघु उच्चैः ॥ अभीष्टमनुकूलगीतमाद्रियन् ॥ आद
रेण न्यूनयन् यर्हि अधरे संधितवेणुर्भवति ॥ तर्हि ये सरसि सारसहंसा अन्ये च विहंगास्ते चारुणा गीतेन हृतचेत

भा०द०प
१३२

तदेव कुंदवनप्रदेशे गोधनैः क्रीडितास्ताः गोपीनां सर्वतः आलं … यमुनायां क्रीडनस्य सौभाग्यमनुवर्णयंति ॥ कुंदे
ति ॥ कुंददाम कृतकौतुकवेष इति गोपीनां मुखसवायं कुंददामभिः कृतैः कौतुकेनउत्सवेन वेषोऽलंकारो यस्य सः हे श्रे
ष्ठे यशोदे तव वत्सः पुत्रः नंदसूनुः कृष्णः यद्वा सह एव वत्साः कथयंत्य ॥ काचिन्नंदवत्स इति ॥ काचिन्नंदसूनुरिति चा
दुः ॥ नर्मदः हर्षदः सन् ॥ यदा विजहार क्रीडति स्म ॥ तदा मलयजस्पर्शेन मलयस्य चंदनस्य वस्तु रश्मिः स्नेहः स्पर्श

कुंददामकृतकौतुकवेषो गोपगोधनवृतो यमुनायां ॥ नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां
विजहार ॥ मंदवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन ॥ वन्दिनस्तमुपदेवगणा ये वाद्य
गीतबलिभिः परिवव्रुः ॥ २४ ॥ वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः ॥ कृत्स्नगोध
नमुपोह्य दिनान्ते गीतवेणुरनुगेडितकीर्तिः ॥ उत्सवं श्रमरुचापि दृशीनामुन्नयन्खुररजश्छुरित
स्रक्‌ ॥ दित्सयैति सुहृदाशिष एष देवकीजठरभूरुडुराजः ॥ २५ ॥

… श्रीकृष्णं सम्मानयन् ॥ अनुकूलं यथा भव
ति तथा उपवाति विजयति ॥ यद्वा ॥ मलयजो दक्षिणवायुः ॥ महान्मनस्विजो … वायुः ॥ यद्वा मलयजस्य श्रीकृष्णस्य न
खाग्रेन लिप्तस्य स्पर्शेन मानयन्तीति किंच ॥ वंदिन इति तावत्कालं संतः गंधर्वादिगणा वाद्यगीतपुष्पवर्षादिभिः प
रिवव्रुः परित उपासत ॥ २४ ॥ अद्यापि तमालोक्य हृष्यंत्यः परस्परमाहुः ॥ वत्सल इति ॥ व्रजस्य गवां च ॥ यद्वा व्रजेनिकटानां गा
वो मनुष्याणामस्माकमित्यर्थः वत्सलः हितकारकः ॥ यत्तयस्मादगध्रः ॥ अगध्रः ॥ तीतिगोवर्द्धनोद्धरणः व्रजपार १३२

अस्माकं तु मोह किं ब्रूम इत्याह ॥ निज पदाब्ज दलैरिति ॥ ध्वजादीनि विचित्राणि ललामानि चिह्नानि येषां तैः निजानि पदानि
एवाब्ज दलानि तैर्व्रजभुवः खुरतोदः खुराक्रमणव्यथा शमयन् वर्ष्मणा देहेन धुर्योगजः तद्वद्गतिर्यस्य स ईडितवेणुः
सयस्य व्रजति तेन निमित्तेन सविलासवीक्षणेन अर्पितमनोभववेगा या सु तावयं कुजा ॥ वृक्षाः तेषां गतिं गमि
ताः सत्यो मोहेन विदामः ॥ कवरं वसनं वेत्ति ॥ १५ ॥ किंच मणिधरः ॥ मणीन् ग्रथितान् ॥ आभरणानार्थं धरतीति मणिधः

व४ निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशविचित्रललामैः ॥ व्रजभुवः शमयन्खुरतोदं वर्ष्मधु
र्यगतिरीडितवेणुः ॥ व्रजतितेन वयं सविलासवीक्षणार्पितमनोभववेगाः ॥ कुजगतिं गमिता न
विदाम कश्मलेन कवरं वसनं वा ॥ १६ ॥ मणिधरः क्वचिदागणयन्गाः मालया दयितगंधतुल
स्याः ॥ प्रणयिनोऽनुचरस्य कदांसे प्रक्षिपन्भुजमगायत यत्र ॥ क्वणितवेणुरववंचितचित्ताः ॥ कृस
मन्वसत कृष्णगृहिण्यः ॥ गुणगणार्णमनुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः ॥ १७ ॥
रः क्वचिद्देशे तैर्मणिभिर्गाः ॥ आसमंतादगणयन् तदा दयितगंधाया तुलसीतस्या मालया सहवर्तमानः ॥ प्रणयि
नः प्रियस्य ॥ अनुचरस्य ॥ अंसे भुजं प्रक्षिपन् ॥ यत्र यदा कदाचिदगायत ॥ तदा क्वणितस्य वेणोः रवेण वंचितानि अप ॥ ७० ॥
पहृतानि चित्तानि यासां ताः ॥ कृष्णस्य हरिणस्य गृहीण्यो भार्या गुणगणार्णं गुणगणस्य समुद्रं कृष्णमनुगत्य प्राप्य ताः
कृष्णमेवान्वसत अन्ववर्तंत इत्यर्थः ॥ कुतः यतो विमुक्ता गृहाशा याभिस्ताः गोपिका इव ता अपि स्थिवमेव अन्वा वृत्ति

भा०द०पू० इति दशमे पंचत्रिंशः॥३५॥ षड्विंशे तु हते रिष्टे नारदोक्त्या बलाच्युतौ वसुदेवसुतौ ज्ञात्वा कंसोऽक्रूरं समादिशत
१३४ गोपीरासांतरयांतं शंखचूडं निरंतरस॥अहनं गोपीमहानंदास्संहं दुष्टमरिष्टकं॥एवं देवगंधर्वी द्विगीतं नृत्य रू
वाद्य कुसुमवर्षादिभिः॥श्रीकृष्णं प्राप्तं दृष्ट्वा व्रजस्य परमोत्सवे वर्तमाने तद्विघ्नार्थं तत्राधिका
रार्थं भयं शत्रुः॥तर्हि तस्मिन् वृषभाकृति रसुरः॥तं वल्ग्य निर्माय स्वयं एण महान्तो ककुत्कायो यस्य स॥खुरैर्विद
इति श्रीमद्भागवते महापुराणे दशमस्कंधे गोपिकागीतं नाम पंचत्रिंशोऽध्यायः॥३५॥
श्रीबादरायणिरुवाच॥अथ तर्ह्यागतो गोष्ठमरिष्टो वृषभासुरः॥महीं महाककुत्कायः कंपु
यन्खुरविक्षतां॥रंभमाणः खरतरं पदा च विलिखन्महीं॥उद्यम्य पुच्छं वप्राणि विषाणाग्रे
णचोद्धरन्॥किंचित्किंचिच्छकृन्मुंचन्मूत्रयन्स्तब्धलोचनः॥२॥यस्य निर्ह्रादितेनांग नि
ष्ठुरेण गवां नृणां॥पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै॥निर्विशंति घना यस्य ककुद्यचल
शंकया॥॥
रितां महीं कंपयन् रंभमाणः वृषभजातिशब्दं कुर्वन्॥विलिखन् विदारयन्॥उद्यम्य
ऊर्द्धं कृत्वा॥वप्राणि तटानि उत्क्षिपन्॥किंचित्किंचित् शकृत् मध्ये मध्ये ईषदीषत् पुरीषं मुंचन् तथा मू
त्रयन् मूत्रमुत्सृजन् स्तब्धलोचनः अनिमिषलोचनः॥२॥यस्य निर्ह्रादितेन ध्वनिना गवां नारीणां च॥॥ १३४

थि

वंद्यमानचरण इत्यर्थः ॥ सा यं श्रीघ्रमागांतुं मद्दाती त्यर्थः ॥ उपोद्धस्यकीकृ
तएगस्योपलक्षणमेतत्त रुद्रेंद्रब्रह्मादिभिः ॥ पूजित इति क्वचित्पाठः ॥ पद्यमान्वचरण इत्यर्थः
त्य गीतयुक्तो वेणुर्यस्य सः ॥ श्रमयुक्तयापि कांत्या नेत्राणां हर्षमुन्नयन् उच्चैः प्रापयन् खुररजोभिश्छुरिता व्याप्ता स्रजो
यस्य सुहृदामस्माकमाशिषः मनोरथस्य दित्सया दातुमिच्छया देवकीजठरे भवतीति तथा स एव उडुराजश्चंद्रः ॥ निद्र
त्तिहेतुत्वेन स एव भवतीति ॥ २२ ॥ अतिसंभ्रमेणाकारित्तत्समीपमायांतं कथयंति ॥ इषन्मदेन घूर्णिते विवकेलिकृते लोचने
यस्य सः ॥ वदरपांडुवदनः ईषत्पक्ववदरवत्पांडुरं वदनं यस्य सः ॥ अत एव हेतुः ॥ कनककुंडलयोर्लक्ष्म्या कोमलं मृदुकोम

मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां वनमाली ॥ वदरपांडुवदनो मृदुगंडं मंडयन्कन
ककुंडललक्ष्म्या ॥ यदुपतिर्द्विरदराजविहारो यामिनीपतिरिवैष दिनांते ॥ मुदितवक्त्र उपयाति दुरं
तं मोचयन्व्रजगवां दिनतापं ॥ २५ ॥ श्रीशुक उवाच ॥ एवं व्रजस्त्रियो राजन्कृष्णलीलानुगायतीः ॥ रे
मिरेऽहःसु तच्चित्तास्तन्मनस्का महोदयाः ॥ २६ ॥ लोगंडो यस्मिंस्तदृशं मंडयन्निति ॥ कोमलगंडस्थलं वा शो
ति २ भयन्निति ॥ यदुपतिरिति ॥ देवकीजठरभूरिति च ॥ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मज इत्या दिगर्गवाक्यप्रसिद्धे
र्न्तः ॥ यद्वा स खलु देयिवान्सात्वतां कुलेऽरति वज्ज्ञात्वा काश्चिद्वदंतीति गजेंद्रगति ॥ गजेंद्रवत्प्रसन्नवक्त्रः ॥ व्रजगवामस्मा
कमनंतं दिनतापं च श्रामयन् उपयाति ॥ एवं समीपमायातीति ॥ १४ ॥ एवं विरहदुःखेनापि तु ॥ अहो हरिलीलाः एवं
गायंत्यः ॥ तस्मिन्नेवचित्तं चेतनाजीवितं यासां ताः ॥ तस्मिन्नेव मनः संकल्परूपं यासां ताः ॥ अतो महानुदय उत्सवो यासां ताः ॥

॥ ४१ ॥

अपविद्धः ॥ अपक्षिप्तः ॥ आपतत् ॥ आद्रवत् ॥ स्विन्नानि स्वेदयुक्तानि सर्वांगानि यस्य सः ॥ क्रोधमूर्छितः क्रोधेन व्याप्तः ॥ १० ॥
कृत्वा विषाणमुत्पाट्य तेनैव जघान ॥ स चापतत् ॥ ११ ॥ मूत्रशकृत् मूत्रं शकृच्च एकवद्भावः ॥ तदुभयं समुत्सृजन् त्यजन्नित्यर्थः ॥
पादांश्च क्षिपन् ततश्चालयन् ॥ अनवस्थितेक्षणः प्रचलितनेत्रः कृच्छ्रं कष्टं जगाम अथ निर्ऋतेर्मृत्योः चैत्यं निवासं ज
गामेकुपुष्पं यथा भवति तथा स्तुत इति वा ॥ १३ ॥ नयनोत्सवो नयनानां मूर्तिमानुत्सवः ॥ १४ ॥ कामं व्रजे वसंतं तं कंसस्यान्तेगतस्य

सोऽपविद्धो भगवता पुनरुत्थाय सत्वरः ॥ आपतत्स्विन्नसर्वांगो निःश्वसन्क्रोधमूर्छितः ॥ १० ॥ तमापतंतं स
निगृह्य शृंगयोः पदा समाक्रम्य निपात्य भूतले ॥ निष्पीडयामास यथार्द्रमंबरं कृत्वा विषाणेन जघान
सोऽपतत् ॥ ११ ॥ असृग्वमन्मूत्रशकृत्समुत्सृजन्क्षिपंश्च पादाननवस्थितेक्षणः ॥ जगाम कृच्छ्रं निर्ऋतेरथ
क्षयं पुष्पैः किरंतो हरिमीडिरे सुराः ॥ १२ ॥ एवं कुकुद्मिनं हत्वा स्तूयमानः स्वजातिभिः ॥ विवेश गोष्ठं सबलो गो
पीनां नयनोत्सवः ॥ १३ ॥ अरिष्टे निहते गोष्ठे कंसेनाद्भुतकर्मणि ॥ कंसायाथाह भगवान्नारदो देवदर्शनः ॥ यशो
दायाः सुतां कन्यां देवक्याः कृष्णमेव च ॥ १४ ॥

ति ॥ नारदः स्मारयामास कंसं संहृतं गिरैव तु ॥ तदाह अरिष्ट इति ॥ देवदर्शनो
देवर्षिः ॥ यद्वा ॥ एवं कथितेऽप्येवं नेष्यतीति साक्षाद्देवदर्शनं ऊर्जितं ज्ञानं यस्य सः अतोऽनेन नारदेनोक्तमाह ॥ यशोदा
याः इति ॥ देवक्या अष्टमगर्भत्वेन प्रसिद्धां कन्यां यशोदायाः सुतामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह

तत्र आचतुर्थ्याद्भवेत्स्रावः पातः पंचमषष्ठयोः ॥ ततऊर्द्ध्वं प्रसूतिः स्यादिति माघः ॥ कुकुद्मिगलपृष्ठशृंगे ॥ ३ ॥ कंसस्मक
स्मरन्तेत्येवं वदंतः ॥ ३ ॥ ४ ॥ ५ ॥ इत्येवमास्फोट्य करतलेन वाहुमाहत्य तेन तलशब्देन कोपयन् भुजाभोगे ॥ भुजाभु

तं तीक्ष्णाग्रशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रस्थः ॥ पशवो दुद्रुवुर्भीता राजन् संत्यज्य गोकुलं ॥ ६ ॥ हे कृष्ण हे कृष्णे
त्तित्ते सर्वे गोविंदं शरणं ययुः ॥ ७ ॥ भगवानथ तद्वीक्ष्य गोकुलं भयविद्रुतं ॥ माभैष्टेति गिराश्वास्य वृष
सुरमुपाह्वयत् ॥ ८ ॥ गोपालैः पशुभिर्मंद त्रासितैः किमसत्तम ॥ वलदर्पहाहं दुष्टानां त्वद्विधानां ॥
पि५ दुरात्मनां ॥ ९ ॥ इत्यास्फोट्याच्युतोरिष्टं तलशब्देन कोपयन् ॥ सख्युरंसे भुजाभोगं प्रसार्यावस्थितो ह
रिः ॥ १० ॥ सोप्येवं कोपितोरिष्टः खुरेणावनिमुल्लिखन् ॥ उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् ॥ ११ ॥ अ
ग्रन्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतम् ॥ कराक्षिप्याद्रवत्तूर्णमभिद्रमुक्तोऽशनिर्यथा ॥ १२ ॥ गृ
हीत्वा शृंगयोस्तं वा अष्टादश पदानि सः ॥ प्रत्यपोवाह भगवान् गर्जः प्रतिगर्जयथा ॥ १३ ॥

जः सैव भोगः सर्पदेहाकारं भुजमित्यर्थः ॥ स्वयमच्युत ॥ अन्यान् दुष्टान् हरतीति संहर्तीति हरिः ॥ ६ ॥ उद्यता अंर्वग
च्छता पुच्छेन भ्रमंतो मेघा यस्मात्सः ॥ ७ ॥ अग्रन्यस्तविषाणाग्रे यस्य सः ॥ स्तब्धे असृक्तुल्ये लोचने यस्य सः ॥ कटाक्षिप्य क

टाक्षेणतिर्य्यग्छिन्नेरीत्य ॥ ८ ॥ प्रत्यपोवाह प्रतिलोमं ववुदत्र
॥ ९ ॥

भा०द०ए० त्राहितौ शत्रू ॥२०॥ मीढुषे वरदाय अर्थतंत्रत्तः ॥ अर्थसिद्धं तन्मे जानातीति ॥२३॥ हन्न पतेश्चक्रूर मैत्रं मित्र कर्तव्यं त्वया कि

१३६ महामात्र त्वया भद्र रंगद्वार्युपनीयतां द्विपः कुवलयापीडो जहि तेन ममाहितौ ॥२१॥ आरभ्यतां धनुर्या

गश्चतुर्दश्यां यथाविधि ॥ विशस्यंतु पशून्मेध्यान्मेज राजाय मीढुषे ॥२२॥ इत्याज्ञाप्यार्थतं चक्रे श्रादृ

यय दुपुंगवस्य गृहीत्वा पाणिना पाणिं ततोऽक्रूरमुवाच ह ॥२३॥ भो भो दानपते मह्यं क्रियतां मैत्रमो

दृतः ॥ नान्यस्त्वत्तो हितं तन्मो विद्यते वृष्णिषु ॥२४॥ अतस्त्वामाश्रितः सौम्य कार्यगौरवसाधनं

यथेंद्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः ॥२५॥ गच्छ नंदव्रजं तत्र सुतावानकदुंदुभेः ॥ आसाते

ताविहानेन रथेनानय माचिरं ॥२६॥ निसृष्टः किल मे मृत्युर्देवैर्वैकुंठसंश्रयैः ॥ तावानय समं गो

पैर्नंदाद्यैः साभ्युपायनैः ॥२७॥ घातयिष्ये इहानीतौ कालकल्पेन हस्तिना ॥ यदि मुक्तौ ततो मल्लै

र्घातये वैद्युतोपमैः ॥२८॥ ततो योर्निहतयोस्तु प्तान्च वसुदेवपुरोगमान् ॥ तद्धत्विहनिष्यामि र

स्मि भोजन दशार्हकान ॥२९॥ उग्रसेनं च पितरं स्याकिं राज्यकामुकं ॥ तेद्भानतरं देवकं च ये चान्ये विद्विषो मम ॥ हं

यतां ॥ त्वं तो न्यत्र आहृतः सादरो हितं तमश्च न विद्यत इति ॥२४॥२५॥२६॥ तौ मे मृत्युर्निरास्पष्टः ॥ वैकुंठ संश्रयैर्विष्णुसंश्रयैर्देवैः ॥२७॥

रोहिणीपुत्रं रामं च देवक्याः सप्तमं सुतमाह ॥ यद्वा ॥ नंदसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्यायाः रोहिण्याः पुत्रमाह ॥ वसु
देवस्य तौ चेत्कथं व्रजे गतौ तत्राह ॥ वसुदेवेनेति ॥ १४ ॥ १५ ॥ निवारित इति हते वसुदेवे तौ पलायेयातां ॥ अतो वध्यतामिति भिं

रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता ॥ न्यस्तौ स्वमित्रे नंदे वै याभ्यां ते पुरुषा हताः ॥ १४ ॥ निशम्य
तद्भोजपतिः कोपात्प्रचलितेंद्रियः ॥ निशातमसिमादत्त वसुदेवजिघांसया ॥ १५ ॥ निवारितो
नारदेन तत्सुतौ मृत्युमात्मनः ॥ ज्ञात्वा लोहमयैः पाशैर्बबंध सह भार्यया ॥ १६ ॥ प्रतियाते तु देव
र्षौ कंस आभाष्य केशिनं ॥ प्रेषयामास हन्येतां भवता रामकेशवौ ॥ १७ ॥ ततो मुष्टिकचाणूरश
लतोषलकादिकान् ॥ अमात्यान्हस्तिपांश्चैव समाहूयाह भोजराट् ॥ १८ ॥ भो भो निशम्यता
मेतद्वीर चाणूरमुष्टिकाः ॥ नंदव्रजे किलासाते सुतावानकदुंदुभेः ॥ रामकृष्णौ ततो मह्यं मृत्युः कि
लनिदर्शितः ॥ भवद्भ्यामिह संप्राप्तौ हन्येतां मल्ललीलया ॥ १९ ॥ मंचाः क्रियंतां विविधा मल्लरंगप
रिश्रिताः ॥ पौरा जानपदाः सर्वे पश्यंतु स्वैरसंयुगं ॥ २० ॥

एवं वदता नारदेन निवारित इति ॥ १६ ॥ १७ ॥ १८ ॥
मह्यं मम निदर्शितः ॥ विधात्रा नारदेन वा ॥ व्रजं गत्वा मुच्यतौ तावाह ॥ भवद्भ्यामिति ॥ १९ ॥ मंचानुन्नतस्तंभादिर

केशीत्विति॥ प्रथमश्लोकेनन्वयः एवंभूतः केशीत्यनूद्यतं भगवानुपाह्वयदिति तिस्तीयेनान्वयः॥ महाहयः सन्॥
महीं निर्ज्जरयन् श्लथयन् विद्रावयन्नित्यर्थः सटाभिः केशरैः अभ्रं वर्त्मानि एत स्ततः स्वप्रान्तिस्त्रश्रावलि विमा
नानिच तैः संकीर्णं निभः कुर्वं हेषितेन रक्तजातिशब्दः भीषितमखिलं विश्वं येन सः॥ १॥ नद्धषितैः हेरतेन स्फुरै हेषि

श्रीबादरायणिरुवाच॥ केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्ज्जरयन्मनोजवः॥ सटावधूताभ्र
विमानसंकुलं कुर्वन्नभो हेषितभीषिताखिलः॥ १॥ विशालनेत्रो विकटास्यकोटरो बृहद्गलो नील
महाम्बुदोपमः॥ दुराशयः कंसहितं चिकीर्षुर्व्रजं स नन्दस्य जगाम कम्पयन्॥ २॥ तं त्रासयंतं भगवान्स्व
गोकुलं तद्धेषितैर्वालविघूर्णिताम्बुदं॥ आत्मानमाजौ मृगयन्तमग्रणीरुपाह्वयत्स व्यनदन्मृगेन्द्रवत्
॥ ३॥ स तं निशाम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः॥ जघान पद्भ्यामरविन्दलोचनं दु

रासदश्चण्डजवो दुरत्ययः॥

तैः स्वगोकुलं त्रासयंतं॥ वालैः पुच्छलोमभिः घूर्णिताः परिभ्रामिता अम्बुदा येन तं॥ आजौ संग्रामार्थी॥ आत्मानं श्रीकृष्णं
अग्रणीः पुरतो निर्गतः सन् उपाह्वयत् स्वसमीपमाजुहाव॥ स च केशी तं निशाम्य मृगेन्द्रवन्नादं॥ ३॥ ततः स केशी तं श्री
कृष्णं दृष्ट्वा मुखेन खं पिबन्निव व्यादाय मुखं विवृत्य अभिमुखः सन्नभिजगाम॥ किंच॥ अत्यमर्षणः॥ अतिकुपितः
अत्यंतमसहमानो वा॥ पद्भ्यां जघान॥ दुरासदः अन्यैरभिभवितुमशक्यः दुरत्ययः

तयंतः सन् दुरतिक्रमः॥ अत्र हेतुः चंडजवत्वमिति॥

नष्टकंटकान् नष्टशत्रुः ॥ ३१ ॥ ननु कतिपयसुहृद्वधेन नष्टकंटकाः कथं स्यादिति तत्राह ॥ जरासंध इति ॥ ३२ ॥ मनीषितं विचारितं
सध्र्यक् स्वावद्यमरणं तन्मार्ज्जनं तथाप्येतावानभिनिवेशो न कार्य्य इति भविष्यत्सूचयन्नाह ॥ सिद्ध्यसिद्ध्योरिति ॥ ३४ ॥ पु
रुषकारस्य सव्यभिचारतामाह ॥ मनोरथानिति ॥ ३५ ॥ ३६ ॥ इति दशमे षट्त्रिंशः ॥ ३६ ॥ स तत्रेति प्रोहते केशिन्यच्युतो भावि

ततश्चैषा मही मित्र भवित्री नष्टकंटका ॥ ३१ ॥ जरासंधो मम गुरुर्द्विविदो दयितः सखा ॥ शंबरो नरको बा
णो मय्येव कृतसौहृदाः ॥ तैरहं सुरपक्षीयान्हत्वा भोक्ष्ये महीं नृपान् ॥ ३२ ॥ एतज्ज्ञात्वानय क्षिप्रं रामकृ
ष्णाविहार्भकौ ॥ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियं ॥ ३३ ॥ अक्रूर उवाच ॥ राजन्मनीषितं सध्र्यक्त
व स्वावद्यमार्ज्जनं ॥ सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलभावनं ॥ ३४ ॥ मनोरथान्करोत्युच्चैर्जनो
दैवहतानपि ॥ युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ॥ ३५ ॥ एवमादिश्य चाक्रूरं मंत्रिणश्च विसृ
ज्य सः ॥ प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयं ॥ ३६ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे
समत्रः षट्त्रिंशोऽध्यायः ॥ ३६ ॥

कर्म्मभिः ॥ नारदेन ततः क्रीडन् ॥ व्योमासुरमथावधीत् ॥ वृषवेषा
सुरं पद्धत ॥ केशिनं हयवेषिणम् ॥ कंसप्राणसमं हत्वा कंसं व्यसुमिवाकरोत् ॥ ॥ रामराम रामराम

भा०द०स० कंसायकृष्णसमादिश्यतद्रहस्यादिपैप्सुनेः॥कंसघातादिकृष्णस्यकार्य्यमावेदयन्मुनिः॥नरदाहदेवर्षिरित्यादिना
१३८ न्त्वार्यस्तुचकः॥किंतुसर्वसुहृदित्याहभागवतप्रवरइति॥ऽ॥अस्मद्रहस्यंवैरिणिकंसेस्तचितवानितिमाशंकी
त्वपि४ रित्याहकृष्णकृष्णेत्यादिना॥अयंभावस्त्वमीश्वरोभूमारदैत्यसंहारायावतीर्णोसि॥अतस्तद्रहुरूपाचरणेनवि
श्वंपरिपालयेतितत्रतावद्भयशंकैवनास्तीत्याह॥अप्रमेयात्मन्अपरिछिन्नस्वरूपः॥योगेशअचिंत्यप्रभा
वजगदीश्वर॥विश्वनियंतः॥वासुदेव॥सर्वभूतेषुवर्तमान॥अखिलावाससर्वस्याश्रयसंप्रतिसात्वतानांप्र
देवर्षिरुपसंगम्यभागवतप्रवरोनृप॥कृष्णमक्लिष्टकर्माणंरहस्येतदभाषत॥ऽ॥कृष्णकृष्ण
प्रमेयात्मन्योगेशजगदीश्वरवासुदेवाखिलावाससात्वतांप्रवरप्रभो॥त्वमात्मासर्वभू
तानामेकोज्योतिरिवैधसां॥गूढोगुहाशयःसाक्षीमहापुरुषईश्वरः॥१०॥ ॥८॥
वरश्रेष्टप्रभोसर्वव्याप्तकेकथमेवंरूपाहमितिचेदत्तआह॥त्वमात्मेति॥नहित्वंजीववत्परिछिन्न॥किंतुसर्व
भूतानामंतरएकोऽनुस्यूतत्वेदृष्टांतः॥एधसांकाष्टानामंतर्ज्योतिरिवेतितेषुस्थितोपितैर्नदृश्यतइत्याह॥गू
ढइति॥अत्रहेतवः॥गुहाशय॥बुद्धेरभ्यंतरः॥किंच॥साक्षीद्रष्टेत्यर्थः॥अपिचमहापुरुषः॥अतःपरिछिन्नम
तिभिर्नज्ञायसइत्यर्थः॥नहिसर्वांतरत्वेकिंप्रमाणं॥अतआह॥ईश्वरइति॥नहीश्वरंविनापरतंत्राणांजीवानांप्रवृ १३८

हृ° १ टि १

तद्धननं वंचयित्वा तं चंचुहननाय प्रसारितयोः॥हस्ताभ्यां गृहीत्वा परिंध्य भ्रामयित्वा व्यवस्थितः॥तथैव स्थितो बकस्तं॥४॥
व्यादाय मुखं प्रसार्य वेगेन हरिं प्रत्याद्रवत्॥सोपि हरिर्हसन्॥उत्तरं सव्यं भुजं॥निर्भयत्वे दृष्टांतः॥यथोरगं विलइति॥५॥
तत्तः किं तदाह॥दंताइति॥चर्वणाय भगवद्भुजं स्पृशंतीतिति तथा तं व्यादाय तैर्येविवृत्ताः॥अयः स्लोहं स्पृशंतीति स्पृशः यद्वा न १

तद्वंचयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः॥सावज्ञमुत्सृज्य धनुःशतांतरे यथोरगं
तार्क्ष्यसुतो व्यवस्थितः॥४॥सलब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशीतरसापतद्धरिं॥सोप्यस्य वक्रे
भुजमुत्तरं स्मयन प्रवेशयामास यथोरगं बिले॥५॥दंता निपेतुर्भगवद्भुजस्पृशस्ते केनस्तप्तमयःस्पृ शि ३
शो यथा॥बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः॥६॥समेधमानेन सकृष्णबाहु
ना निरुद्धवायुश्चरणांश्च विक्षिपन्॥प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेंडं विसृजन् क्षितौ व्यसुः॥
७॥तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः॥अविस्मितोयत्नहताहितः सुरैः प्रसू
नवर्षैर्वर्षद्भिरीडितः॥८॥
तप्तमयं अतितप्तं लोहादि स्पृशंतोयथेति॥आमयो जलोदरं॥६॥लेंडं पुरीषमुत्सृजन्॥७॥कर्कटिकाफलं हि पक्वं
सद्यस्तं विदीर्णं भवति॥तद्वद्विदीर्णात्तस्य देहात्॥विगतप्राणात्॥अविस्मितः गर्वरहितो ऽरिर्येन सः॥८॥७॥

स्वधामतः॥महाकालपुरात्॥द्वारकामावसन्॥द्वारकायांवसन्॥कर्ताकरिष्यतिघाति॥१५॥अमुष्यविश्वस्यप्रभुभारस्य
वा॥ऽर्थ॥एवंविज्ञाप्याकृताभिनंदनंभगवंतंनमस्यतिद्वयेन॥विशुद्धविज्ञानघनमिति॥केवलज्ञानैकमूर्त्तिं॥अतएवस्व
संस्थयास्वरूपसम्यक्स्थित्यैव।परमानंदरूपयासम्यगाप्ताःप्राप्ताः।सर्वेऽर्थायेनतं॥आप्तकामंततोऽमोघं॥सत्यसंकल्पं

मत्तपुत्रोपादानंचबाणस्यास्वधामतः॥पौंड्रकस्यवधंपश्चात्काशिपुर्याश्चदीपनं॥दंतवक्त्रस्य
निधनंचैद्यस्यचमहाक्रतौ॥यानिचान्यानिवीर्याणिद्वारकामावसन्भवान्।कर्ताद्रक्ष्याम्यहंतानिगे
यानिकविभिर्भुवि॥१७॥अथतेकालरूपस्यक्षपयिष्णोरमुष्यवै॥अक्षौहिणीनांनिधनंद्रक्ष्याम्यर्जु
नसारथेः॥१८॥विशुद्धविज्ञानघनंस्वसंस्थयासमाप्तसर्वार्थममोघवांछितं॥स्वतेजसानित्यनिवृ
त्तमायागुणप्रवाहंभगवंतमीमहि॥१९॥त्वामीश्वरंस्वाश्रयमात्ममाययाविनिर्मिताशेषविशेष
कल्पनं।क्रीडार्थमद्यात्तमनुष्यविग्रहंनतोस्मिधुर्यंयदुवृष्णिसात्वतां॥२०॥

त्वमाप्त॥अमोघवांछितमिति॥ननुवांछाचेदस्ति॥दुर्निवारासंसृतिः॥अतआहस्वतेजसेति॥चिच्छक्त्यानित्यनिवृत्तो
मायाकार्यरूपोगुणप्रवाहोयस्यतं॥अतोभगवंतंनिरतिशयैश्वर्यमीमहिशरणंव्रजामेति॥ननुत्रिकालज्ञस्त्वं
कथमत्रप्रपंचंनजानासि।जानासिचेत्कथंगुणप्रवाहःस्वीकृतइत्यत्राह॥त्वामिति॥ईश्वरमन्यस्यवशयितारमस्वा
श्रयमन्यस्यावशंच॥अतआत्माधीनयामाययाविनिर्मिताशेषविशेषामहदाद्यायादवादिरूपावाकल्पना

अहमीश्वरः। अन्यत्सर्वमीशितव्यमित्येतदेव कुतस्तत्राह। आत्मनेति। साधनांतरपेक्षैव आत्माश्रयः स्वतंत्रः। मायया
शक्त्या भवान् गुणान् ससृजे सृष्टवान्। तैः सृष्टैर्गुणैः इदं विश्वं सृजसि। अत्सि संहरसि। पालयसि। न तु स्रष्ट्रादिक्रियासु दंडा
रकसाध्येवस्थेत्याह। सत्यसंकल्प इति। न हि संकल्पैकसाध्ये हविःसाधनापेक्षेति भावः। अतस्त्वमीश्वर इत्युप

आत्मनात्माश्रयः पूर्वं मायया ससृजे गुणान्। तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः ॥११॥ स त्वं
भूधरभूतानां दैत्यप्रमथरक्षसां। अवतीर्णो विनाशाय सेतूनां रक्षणाय च ॥१२॥ दिष्ट्या ते निहतो दैत्यो
लीलयायं हयाकृतिः। यस्य हेषितसंत्रस्तास्त्यजंत्यनिमिषा दिवं ॥१३॥ चाणूरं मुष्टिकं चैव मल्लानन्यां
श्च हस्तिनं। कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो ॥१४॥ तस्यानु शंखयवनमुराणां नरकस्य च। पा
रिजातापहरणमिंद्रस्य च पराजयं। उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणं। नृगस्य मोक्षणं
स१ पापाद्वारवत्यां जगत्पते। स्यमंतकस्य च मणेरादानं सह भार्यया ॥५०॥

संहारः ॥११॥ प्रस्तुतमाह। स त्वमिति। भूधरभूतानां भुवं धरंतीति भूधरा राजानस्तद्रूपाणां ॥१२॥ ॥१३॥ परश्वोऽहनीति
अद्यैवाक्रूर एष्यति श्वो मथुरां गंतासि। परश्वश्चाणूरादीन्त्वया निहतान्द्रक्ष्यामि इति सिद्धवन्निर्देशो विज्ञापनप्र
कारविशेषः ॥१४॥ तस्यानु तदनंतरं शंखादीनां शंखः पंचजनः। वधं द्रक्ष्यामीति शेषः। भावि निर्देशमात्रमेतत्त

भा०द०पू० शरण्यदः ॥ हरिःसिंह इव ॥ २५ ॥ २६ ॥ पशुमारं पशुमारो यथा भवति तथा ॥ अनिश्वासमित्यर्थः ॥ २७ ॥ भुवि गोपैः स्तूयमा
१४० नः उपरि वैमानिकैर्देवैरिति ॥ २८ ॥ इति श्रीदशमे सप्तत्रिंशः ॥ ३७ ॥ अष्टत्रिंशे यथाध्यायन्न क्रूरो गोकुलं गतः ॥
तथैव रामकृष्णाभ्यां गेहं [illegible] नित्वा सुसत्कृतः ॥ प्रातः केशिवधे वृत्ते ह्याद्रश्यां निर्गते मुनौ ॥ ततो व्योमे हते क्रूरः
तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सतां ॥ गोपान्नयं तं जग्राह वृकं हरिरिवौजसा ॥ २५ ॥ स निजं
रूपमास्थाय गिरीन्द्रसदृशं बली ॥ इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ॥ २६ ॥ तं निगृ
ह्याच्युतो दोर्भ्यां पातयित्वा महीतले ॥ पश्यतां दिवि देवानां पशुमारममारयत् ॥ २७ ॥ गुहापिधा
नं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः ॥ स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलं ॥ २८ ॥ इति श्रीमद्भा
गवते महापुराणे दशमस्कंधे केशिव्योमवधो नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥ श्रीशुक उवाच ॥ अ
क्रूरोपि च तां रात्रिं मधुपुर्यां महामतिः ॥ उषित्वा रथ [illegible] मास्थाय प्रययौ नंदगोकुलम् ॥ १ ॥
सायं गोकुलमाविशत् ॥ तदेव नारदेन कंसवधादिकार्ये विज्ञापिते श्रीकृष्णो मथुरां गंतुमुद्यते तावत्तेने
तदा अक्रूरोपि गोकुलमगादित्याह ॥ अक्रूरोपीति ॥ १ ॥ राम ॥ ऽऽ ॥ राम राम राम ॥ ऽऽ ॥ ॥ ऽऽ ॥ १४०

१९। २०। ननु नारदेन व्योमवधो न दृष्टस्तत्कथं व्योमवधप्रसक्तिरिति। तत्रोच्यते। प्रातरेव केशिवधानंतरं नारदोक्त
मंगीकृत्य। पुनस्तत्रैव पशून्पालयता व्योमो हतः। यद्वा। व्योमवधः पूर्वमेव वृत्तोऽपि विशेषाविवक्षया प्रसंगात्तत्रोच्यते इ

श्रीशुक उवाच॥ एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः॥ प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनो
त्सवः॥ १९॥ भगवानपि गोविंदो हत्वा केशिनमाहवे॥ पशूनपालयत्पालैः प्रीतैर्व्रजसुखावः
हः॥ २०॥ एकदा ते पशून्पालांश्चारयंतोऽद्रिसानुषु॥ चक्रुर्निलायनक्रीडाश्चौरपालापदेशतः॥ ३५
२१॥ तत्रासन्कतिचिच्चोराः पालाश्च कतिचिन्नृप॥ मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः॥ २२॥
मयपुत्रो महामायो व्योमो गोपालवेषधृक्॥ मेषायितानपोवाह प्रायश्चोरायितो बहून्॥ २३॥
गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः॥ शिलया पिदधे द्वारं चतुःपंचावशेषिताः॥ २४॥

तिद्रष्टव्यं॥ केचित्तु पुनः शंखचूडवधात्पूर्वमेव पठंति च॥ तमाह एकदेति॥ २१॥ २२॥ मेषवदाचरिता
न्॥ स्वयं चोरवदाचरितः सन्॥ अपोवाह॥ अपकृष्य निनाय॥ २३॥ पिदधे छादितवान्॥ २४॥ राम राम राम॥

भा०द०पू० अंघ्रिपद्मं विभावयति ॥ यदिति ॥ ब्रह्मादिभिरर्च्चितमिति परमैश्वर्यमाह श्रियाचेति सौभाग्यातिशयं ॥ मुनि
१४१ भिर्भक्तैः सहितैरिति पुरुषार्थत्वम् ॥ गोचारणायेति कृपालुत्वं ॥ यद्गोपिकानामिति प्रेममात्रसुलभत्वमट
मनोरथांतरं करोति ॥ द्रक्ष्यामीति ॥ शोभनौ कपोलौ नासिका च यस्मिंस्तत् ॥ स्मितेन सहितोऽवलोको यस्मिन्

यदर्च्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः ॥ गोचारणायानुचरैश्चर
द्वने यद्गोपिकानां कुचकुंकुमांकितं ॥ ८ ॥ द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारु
णकंजलोचनं ॥ मुखं मुकुंदस्य गुडालकावृतं प्रदक्षिणं मे प्रचरंति वै मृगाः ॥ ९ ॥ अप्यद्य विष्णो
र्मनुजत्वमीयुषो भारावतारायभुवो निजेच्छया ॥ लावण्यधाम्नो भवितोपलंभनं मह्यं न न स्या
त्फलमंजसा दृशः ॥ १० ॥

अरुणकंजवल्लोचने यस्मिन् तत् ॥ तच्च मुखं गुडालकावृतं वक्रकेशावृतम् ॥ तदानीमेव शुभसूचकं दृष्ट्वाऽत्र
तिहृष्यन्नाह ॥ प्रदक्षिणमिति ॥ ९ ॥ पुनरप्यन्यच्चिंतयति ॥ अप्यद्येति ईयुषः प्राप्तवतः ॥ लावण्यधाम आश्रयः
तस्य विष्णोः यद्वा ॥ विष्णोर्लावण्ययुक्तं यद्वा मम वपुस्तस्य उपलंभनं दर्शनं भविता भविष्यति ॥ अपि यद्येवं स्या
त्तर्हि मह्यं मम लोचनस्य फलं न स्यादिति न ॥ अपितु स्यादेवेत्यर्थः ॥ १० ॥ १४१

॥ अप्रीतिसंभावनायां ॥ अर्हस्तेयोग्याय ॥ ३ ॥ स्वस्य हृत्सद्दर्शने ऽसंभवमाशंक्य पुनः संभावयति ॥ ममैतदिति द्वयेन वि
षयात्मनः विषयाकृष्टचित्तस्य शूद्राज्जन्मयस्य तस्य ब्रह्मकीर्तनं वेदोच्चारणं यथेति ॥ ४ ॥ यद्धा मैवं किं त्वधमस्य नी
चस्यापि मम स्याद्देवं ॥ कुत इत्यत आह ॥ ह्रियमाणः कालनद्येति ॥ अयं भावः ॥ यथा नद्या ह्रियमाणानां तृणादीनां मध्ये
किंचित्कदाचित्तरति कूलं प्राप्नोति ॥ तथा कर्मवशेन कालेन ह्रियमाणानां जीवानामपि मध्ये कश्चित्तरेदिति संभवति ॥

गच्छन्पथि महाभागो भगवत्यंबुजेक्षणे ॥ भक्तिं परामुपगत एवमेतदचिंतयत् ॥ २ ॥ किं मयाचरितं
भद्रं किं तप्तं परमं तपः ॥ किं वाथाप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवं ॥ ३ ॥ ममैतद्दुर्लभं मन्य उत्तमश्लोक
दर्शनं ॥ विषयात्मनो यथा ब्रह्मकीर्त्तनं शूद्रजन्मनः ॥ ४ ॥ मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनं ॥
ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ॥ ५ ॥ ममाद्यामंगलं नष्टं फलवांश्चैव मे भवः ॥ यन्नमस्ये
भगवतो योगिध्येयांघ्रिपंकजं ॥ ६ ॥ कंसो बताद्याकृत मेत्यनुग्रहं द्रक्ष्येंघ्रिपद्मं प्रहितो मुना हरेः ॥ कृ
तावतारस्य दुरत्ययं तमः पूर्वेतरन्यन्नखमंडलत्विषा ॥ ७ ॥

ति ॥ ५ ॥ ततोन्याप्रवृत्त्यैव ममामंगलं ध्रुवं नष्टमेवेति ज्ञायते भवो जन्म च सफलं जातमिति यत्त ॥ यतः नमस्करिष्यामि
द्रि ॥ अमंगलनाशस्य च कारणमाह ॥ कंस इति ॥ कंस इति ॥ बतेत्याश्चर्ये ॥ अतः खलः कंसोपि मम अत्यंतमनुग्रहं कृतवान् ये

तोऽमुना कंसेन प्रहितो हरेरंघ्रिपद्मं द्रक्ष्यामीति ॥ हरेर्वैऽ
वरीषादयः तमः संसारं अतरन् तीर्णाः ॥ ७ ॥

भा० द० पू० स्वयं चिंतान्न सेत्तु ॥ वर्णाश्रमधर्मान्पालयंतं नमस्ये व्योरांगस्त्वकर्तीसन्नवतीर्णः ॥ यत यथाः ॥ ११ ॥ त्रैलोक्यैकर
१६२ वकांतं दृशि शिरोहः तद्दृतां महानुत्सवाय स्मात् ॥ यद्वा महानुत्सव एव ॥ अत्र तत एव श्रिय ईप्सितमासाद ॥ एवंभूतं श्री
मूर्तिं दधानं ॥ तमीप्सयं द्रक्ष्यामीति ॥ अत्र लिंगं ॥ उषसः प्रभातसमयाः ॥ सुदर्शना ॥ सुखप्रभाता रजन्यः ॥ सुभसत्वकाव
भवुरित्यर्थः ॥ १२ ॥ किंच ॥ अथ दर्शनानंतरं संपादितं नत्वाऽप्यसेवरथाद्वतीर्णः सन्प्रधानयोः पुरुषयोः रामकृष्ण

योरचावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्यशर्म्मकृत ॥ यशो वितन्वन्व्रज आस्त ईश्वरो गायं
तिदेवा यदशेषमंगलं ॥ ११ ॥ तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवं ॥ रूपं दधा
नं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः ॥ १२ ॥ अथावरूढः सपदीशयो रथात्प्रधान
पुंसोश्चरणं स्वलब्धये ॥ धियाधृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन्वनौकसः ॥ १३ ॥ अप्यंघ्रि नृ४
मूले पतितस्य मे विभुः शिरस्यधास्यन्निजहस्तपंकजं ॥ दत्ताभयं कालभुजंगरंहसा प्रोद्वेजितानां श
रणैषिणां नृणां ॥ १४ ॥

योऽश्वरणं योगिभिरप्यात्मलाभाय ॥ केवलधियैव धृतं ॥ साक्षादहं नम
स्यामि ॥ आभ्यां सह ॥ अनयोः सखीन् गोपांश्च नमस्यामीति ॥ १३ ॥ किंच अपीति ॥ अधास्यत् ॥ धास्यति तद्धि भावयति
दत्ताभयमिति सार्द्धेन ॥ १४ ॥ रामरामरामराम रामराम राम

मा१

॥ ॥ १५६

यदीच्छितेत्यादि चतुर्भिः कुलकं तत्रैव शंका ॥ ननु सदादिवदेवं कर्तृत्वभोक्तृत्वादिधर्मैस्तत्र तत्र प्रतीयमानस्य कथं
विभुत्वमितीमां शंकां श्लोकत्रयेण परिकुर्वंश्चतुर्थेन तन्महं हृद्यामीति मंगलाचरणं करोति ॥ तथाहि यदीच्छितेति ॥ ईक्ष
णमात्रकर्ता ॥ असंसक्ततोः ॥ कार्यकारणयोः ॥ ईक्षणमात्रकर्तृत्वं ॥ अहंकाररहितः ॥ अहंकाररहितः ॥ तथापि स्तत्तमोभिदो
भ्रमः तमस्यास्तानंतत्तोभिदाभेदः ततो भ्रमः अभिनिवेशादिः ॥ अपास्ता ॥ अपाकृता स्तस्मात्तादृशाया मायायाः कृतए
तत्त्वाह ॥ स्वतेजसा चिच्छक्त्यो नित्यस्वरूपसाक्षात्कारेण तथापि स्वमायया स्वाधीनया मायया तदीक्षयाप्राणादि

यदीच्छिताहंरहितोऽपास्ततोऽस्वतेजसापास्ततमोभिदाभ्रमः ॥ स्वमायया त्मन् चिते तदीक्षयाप्राणा
क्षधीभिः सदनेष्वभीयते ॥ यस्माखिलामीवहाभिः सुमंगलैर्वाचो विमिश्रा गुणकर्मजन्मकर्म
भिः ॥ प्राणंति शुंभंति पुनंति वै जगद्यास्तद्विरक्ताः शवशोभना मताः ॥

धीभिः सहितैः ॥ आत्मन आत्मनि स्वस्मिन्नेव रचितैर्जीवैः सदनेषु वृंदावनतरुषु गोपी ॥ रहेषु च लीलया कर्माणि
कुर्वन्न सक्तवदभीयते आभिमुख्येन प्रतीयते ॥ ननु सर्वथाहंकारादिरहितस्यात्मारामस्य लीलापि कुत इत्या
शंक्य परानुग्रहार्थेत्याशयेनाह ॥ यस्येति ॥ अखिलानि ॥ अखिलस्य वा अमीवहानि पापानि घ्नंतीत्यखिलामीवहा
नि ॥ तस्य सुमंगले ॥ शोभनानि मंगलानि येभ्यस्ते ॥ गुणाः करुणाकरुणादयः ॥ कर्माणि जन्मानि च तैर्विमिश्रा युक्ता वा

भा० द० पू०
१४३

अथ मां परिरप्स्यते ॥ आलिंगिष्यति यदा तदैव मे आत्मा देहः तीर्थीक्रियते ॥ अतिपवित्रीकरिष्यते ॥ आश्लेषात्कर्मात्मकं
कर्ममयो बंध अत उच्छ्वसिति ॥ श्लथो भविष्यति ॥ अतो देहात् ॥ १९ ॥ अतः भोतानेति ॥ तदा जन्मभृतः सफलजन्मा
न ॥ अन्यथा तज्जन्मैव भवतीत्याह ॥ महीयसेति ॥ महीयसा श्रीकृष्णेन ॥ अमुष्य जंतोः ॥ २० ॥ ननु सुहृदादिषु परिष्व
गप्रश्नादयो जीवधर्माः कथमीश्वरे संगच्छते ॥ अत आह तस्येति ॥ दयितः ॥ प्रियः ॥ तद्विपरीतोऽप्रियः सुहृत्तमो हितः
सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यतेऽथ मां ॥ आत्मा हि तीर्थीक्रियते तदैव मे बंध
श्च कर्मात्मक उच्छ्वसित्यत ॥ १९ ॥ लब्धांगसंगं प्रणतं कृतांजलिं मां वक्ष्यतेऽक्रूर ततेत्युरुश्रवाः ॥ तदा
वयं जन्मभृतो महीयसा नैवादृतो यो धिगमुष्य जन्म तत् ॥ २१ ॥ न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो
द्वेष्य उपेक्ष्य एव वा ॥ तथापि भक्तान्भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः ॥ २२ ॥ किं चाग्रजो माव
नतं यदूत्तमः स्मयन्परिष्वज्य गृहीतमंजलौ ॥ गृहं प्रवेश्याप्तसमस्तसत्कृतं संप्रक्ष्यते कंसकृतं स्वबंधुषु ॥ स
द्विपरीतो द्वेष्यः एते सर्वे व्यतिरिक्त उपेक्ष्य इति दयितादयो न संभवंतीति सत्यं ॥ तथापि भक्तान्भजते ॥ तत्र च यथा
ये भक्तास्तांस्तथा भजते ॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहमिति भगवद्वचनात् ॥ अविषमत्वेपि भक्तेभ्य एव
फलं ददातीत्यत्र दृष्टांतः ॥ यद्वत्सुरद्रुम इति ॥ २० ॥ यो मम योंजलिः करिष्यते तस्मिन्नेव गृहीते मां आश्रितानि समस्तानि

॥ १९ ॥ [illegible]

१४३

वलिनातावत्पदत्रयपरिमितभूदानसमयेतस्यहस्तेउदकंनिहितं॥ कौशिकरंद्रस्तेनापिकदाचिन्निहितमितित्रा
तवं॥ मुमुक्षूणांसंसारभयनिवर्तकं॥ सकामानामभ्युदयंप्रदंचेत्युक्तं॥ अनुरक्तानांपरमसुखदंचेत्याह॥ बाणश्चोवितकं॥ विहा
रेरासक्रीडायांसौगंधिकस्यगंधोयस्यतस्मैसौगंधि॥१४॥ एवंपरमानुग्रहंसंभाव्यपुनर्णप्यसंभवमाशंक्यपरिहरति॥ नम
यीति॥ यद्यप्यहंकंसेनप्रहितः॥ अतस्तस्यदूतस्तथापिमायि॥ अरिरयमितिबुद्धिंनउपेष्यति॥ नकरिष्यतीत्यर्थः॥ यतोवि

समर्हणंयत्रनिधायकौशिकस्तथाबलिश्चापजगत्त्रयेंद्रतां॥ यद्वाविहारेव्रजयोषितांश्रमंस्पर्शेन
सौगंधिकगंध्यपानुदत्॥१५॥ नमय्युपेष्यत्यरिबुद्धिमच्युतःकंसस्यदूतःप्रहितोपिविश्वदृक्॥ योंत
र्वहिश्चेतसएतदीहितंक्षेत्रज्ञईक्षत्यमलेनचक्षुषा॥१६॥ अप्यंघ्रिमूलेवहितंकृतांजलिंमा
मीक्षितासस्मितमार्द्रयादृशा॥ सपद्यपध्वस्तसमस्तकिल्बिषोवोढामुदंवीतविशंकऊर्जितां॥१७॥

श्वदृक् सर्वज्ञः॥ अतोममचेतसोंतश्चबहिश्चयदीहितंचेष्टितं॥ एतत्यःक्षेत्रज्ञः॥ अंतर्यामीनित्यज्ञानेनेक्षते
अयंभावः॥ चेतसाबहिरेवकंसमनुवर्त्तते॥ अंतस्तुकृष्णमेव॥ तदेतदसौहृदिस्थोजानातीति॥ यद्वा॥ एतस्यजगत
ईहितमिति॥१६॥ अतः अपियदि॥ अंघ्रिमूलेचरणयोः॥ प्रांतःअवहितंसंयतंरूपामृतेनार्द्रयादृशामामीक्षिताद्र
क्ष्यति॥ तर्हिसपद्येवविनष्टाखिलकल्मषः॥ परांमुदंवोढाप्राप्स्यामीति॥१७॥ ॥

भा०द० ए०उदाररुचिराक्रीडया यया(?)स्तौ॥ स्रग्विणौ रत्नस्वर्णालंकृतौ प्रधानभूतौ पुरुषौ प्रकृतिपुरुषात्मकौ वा कुतः॥ आद्यौ
१४४ तदपि कुतः जगद्धेतू॥ अत एव जगत्पती॥ विपरीतौ वा बहूनां पदानां हेतुहेतुमद्भावः॥ जगत्यर्थे पृथिव्या

समुखौ सुंदरवरौ वालद्विरदविक्रमौ॥ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजं॥ शोभयंतौ
महात्मानौ सानुक्रोशस्मितेक्षणौ॥ उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ॥ पुण्यगंधानुलि
प्तांगौ स्नातौ विरजवाससौ॥ प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती॥ अवतीर्णौ जगत्यर्थे स्वांशे
न बलकेशवौ॥ दिशो वितिमिरा राजन् कुर्वाणौ प्रभया स्वया॥ यथा मारकतः शैलो रौप्यश्च कन
काचितौ॥ २८॥ रथात्तूर्णमवप्लुत्य सोऽक्रूरः स्नेहविह्वलः॥ पपात चरणोपांते दंडवद्रामकृष्ण
योः॥ २९॥ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः॥ पुलकाचितांग औत्कंठ्यात्स्वाख्याने नाशकन्नृ
प॥ ३०॥

भारापनयनाय स्वांशेन मूर्त्तिभेदेन बलकेशवौ संतौ॥ स्वप्रभया विगततिमिरा दिशः कुर्वाणौ
कनकाचितौ॥ सुवर्णव्याप्तौ वितिसालंकारयोः शैलसदृशार्थमुक्तं॥ २८॥ २९॥ भगवद्दर्शनाह्लादेन य
द्बाष्पं तेन पर्याकुले ईक्षणे यस्य सः॥ पुलकैराचितान्यंगानि यस्य सः॥ स्वाख्याने अक्रूरोऽहं नमस्करोमीति

१४४

मो० ३

सतुमार्गमपिनवेद ॥ तथापिरथेनप्राप्तइति ॥ २३ ॥ अखिलैर्लोकपालैः किरीटैर्जुष्टाश्च अमलाः पादरेणवो यस्य ॥ क्षि
तिकौतुकानि ॥ क्षितेरलंकाररूपाणि ॥ २४ ॥ तद्दर्शनेन यआह्लादस्तेन विवृद्धः संभ्रमो यस्य सः ॥ प्रेम्णा ऊर्ध्वा
णि रोमाणि यस्य सः ॥ अश्रूणां कलाभिर्लेशैराकुलेईक्षणे यस्य सः ॥ अवस्कंद्य ॥ अवप्लुत्य ॥ तेषु परेषु सोऽक्रूरः

श्रीशुकउवाच ॥ इतिसंचिंतयन्कृष्णं श्वफल्कतनयोऽध्वनि ॥ रथेन गोकुलं प्राप्तः सूर्यश्चास्तगि
रिंगतः ॥ २३ ॥ पदानि तस्याखिललोकपालकिरीटजुष्टामलपादरेणोः ॥ ददर्श गोष्ठे क्षितिकौतुका
नि विलक्षितान्यब्जयवांकुशाद्यैः ॥ २४ ॥ तद्दर्शनाह्लादविवृद्धसंभ्रमः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्ष
णः ॥ रथादवस्कंद्य स तेष्वचेष्टत प्रभोरमून्यंघ्रिरजांस्यहो इति ॥ २५ ॥ देहंभृतामियानर्थो हि
त्वादंभं भियं शुचं ॥ संदेशाद्यो हरेर्लिंगदर्शनश्रवणादिभिः ॥ २६ ॥ ददर्श कृष्णं रामं च व्रजे गोदो
हनं गतौ पीतनीलांबरधरौ शरदंबुरुहेक्षणौ ॥ किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृहद्भुजौ ॥

अचेष्टत व्यलुठत ॥ अहो इति दुर्लभतां भावयन् ॥ २५ ॥ ननु किमर्थमेवं व्यलुठत ॥ नास्ति प्रेमसंभ्रमे फलाहे
शादित्याह ॥ देहंभृतामितिदेहंभृतामेतावानेव पुरुषार्थः ॥ कंसस्य संदेशादस्य हरेर्लिंगदर्शनश्रवणादि
भिर्यो यमक्रूरस्य वार्थो जात इति संदेशाद्यायस्यार्थस्य सयावान ॥ अक्रूरस्य जातः इति वा ॥ २६ ॥ ततः कृष्णं च रामं च

ददर्श ॥ गावो दुह्यंते यस्मिन् क्षितिगोदोहनं तत्स्थानं गतौ
प्राप्तौ ॥ अनुक्रोशोऽनुकंपा तं विलसितं स्मितं यत्र तमी
क्षणं ययोस्तौ ॥ २७ ॥

भा०द०पू०
१४५

चा।

मधुरयावाचाइत्यंसत्कृतः॥तयैववापरिपृष्टेनप्रश्नेनअध्वपरिश्रमं॥३६॥इतिश्रीदशमेऽष्टत्रिंशः॥ ३८॥नवत्रिं
शःपुरीगछत्यच्युतेगोपिकोक्रयः॥अक्रूरेणाथकालिंद्यांविस्मितोऽलौकिकस्यदर्शने॥भक्तानांमनोरथाःसत्याभवंती
तियोत्तयन्नाह॥सुखोपविष्टइति॥रामकृष्णाभ्यामुरुअधिकंसमानितः॥१॥२॥३॥हेतातहेसौम्यस्वागतंयथातथा
इत्यंसुनृतयावाचानंदेनसुसभाजितः॥अक्रूरस्यपरिपृष्टेनजहावध्वपरिश्रमं॥३६॥इतिश्रीमद्भा
गवतेमहापुराणेदशमस्कंधेऽक्रूरागमनेअष्टत्रिंशोऽध्यायः॥३८॥श्रीशुकउवाच॥सुखोप
विष्टःपर्य्यंकेरामकृष्णोरुमानितः॥लेभेमनोरथान्सर्वान्पथियान्सचकारह॥१॥किमलभ्यंभ
गवतिप्रसन्नेश्रीनिकेतने॥तथापितत्पराराजन्नहिवांछंतिकिंचन॥२॥सायंतनाशनंकृत्वा
भगवान्देवकीसुतः॥सुहृत्सुवृत्तंकंसस्यपप्रच्छान्यच्चिकीर्षितं॥३॥श्रीभगवानुवाच॥
तातसौम्यागतःकच्चित्स्वागतंभद्रमस्तुवः॥अपिस्वज्ञातिबंधूनामनमीवमनामयम्॥४॥

आगतः॥स्वज्ञातिबंधूनाम्॥स्वेसुहृदः॥ज्ञातयःसपिंडाः॥बंधवोऽसपिंडाःसंबंधिनस्तेषामपिकि
म्॥अनमीवमपापमदुःखसुखमितियावत्॥अनामयम्॥आरोग्यम्॥४॥रामरामरामरामरामराम॥

अभिप्रेत्य अक्रूरोऽयमेतदर्थमागत इति ज्ञात्वा कं॥ [illegible] सह्रूनने सामर्थ्यद्योतयन्निवरयांगेन
चक्रेणांकितेनाय:पाणिस्तेनाभ्युपाकृष्य तमालिंगितवान्॥२८॥पाणी अंजलिरूपेण संहतौ वक्रहीत्वा॥२०॥मधु
भगवांस्तमभिप्रेत्य रथांगांकितपाणिना॥परिरेभेभ्युपाकृष्य प्रीत: प्रणतवत्सल:॥२८॥संकर्षणश्च
प्रणतमुपगुह्य महामना:॥गृहीत्वा पाणिना पाणी अनयत्सानुजो गृहं॥३०॥दृष्ट्वाथ स्वागतं तस्मै निवे
द्य च वरासनं॥प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हणमाहरत्॥३१॥निवेद्य गां चातिथये संवाह्य श्रांतमा
दृत:॥अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभु:॥३२॥तस्मै भुक्तवते प्रीत्या रामः परमधर्मवित् मुख
वासैर्गंधमाल्यैः परां प्रीतिं व्यधात्पुन:॥३३॥पप्रच्छ सत्कृतं नंद: कथं स्थ निरनुग्रहे॥कंसे जीव
ति दाशार्ह सौनपाला इवावय:॥३४॥योऽवधीत्स्वस्वसुस्तोकान्क्रोशंत्या असुतृप्खल:॥किं नु स्वित्त
त्प्रजानां वः कुशलं विमृशामहे॥३५॥

पर्केणवार्हणं यस्मिन्नेवायदुचितमर्हणं आहरत्॥आनीय समर्पितवानित्यर्थ:॥३१॥३२॥३३॥सत्कृतं संमानितं॥निर
नुग्रहे कंसे कथं केन प्रकारेण स्थ जीवथ इत्यर्थ:॥पशुघाती स एव पालकोयेषां अवीनां मेषाणां त एव तत्तुल्या इत्यर्थ:॥३४॥
निरनुग्रहतामाह॥योऽवधीदिति॥तोकान् तोकानि॥असुतृप्॥असूनेव तर्पयति य: अत: खल: तस्य कंसस्य प्रजानां हे अक्रूर ये

हु

षां जीवनमात्रमपि दुर्लभं तेषां व: किं कुशले विचारयामीति॥३५॥

रसान् घृतादीन् ॥ शकृच्छलेनेदं सूचयति ॥ अचिकित्सस्य चिकित्सार्थं रसान् दास्याम इति तत्राव्रजरक्षा
धिकृतेन घोषयत् सर्वतो घोषितवान् ॥११॥ ताः श्रीकृष्णैकजीवनाः गोप्यः ॥ तत् तदा अक्रूरआगमनमुपश्रु
त्येति ॥१२॥ व्यथालिंगान्याह पंचभिः ॥ काश्चिदिति ॥ तिन अश्रवणेन हृततोयो हृत्तापस्तेन यः श्वासः ॥ तेन म्लानामु

यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् ॥ द्रक्ष्यामः सुमहत्पर्व यान्ति जानपदाः किल ॥ एवमा
घोषयत् क्षत्रा नंदगोपः स्वगोकुले ॥११॥ गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशं ॥ रामकृष्णौ पुरीं ने
तुमक्रूरं व्रजमागतं ॥१२॥ काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः ॥ स्रंसद्दुकूलवलयकेशग्रंथ
द२ श्च काश्चन ॥१३॥ अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः ॥ नाभ्यजानन्निमं लोकमात्मलोकं गता इव ॥१४॥
स्मरंत्यश्चापराः शौरेरनुरागस्मितेरिताः ॥ हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः ॥१५॥

खश्रीर्यासां ताः बभूवुरिति दुकूलानि वलयानि केशग्रंथयश्च ॥ स्रंसंतः दुकूलादयो यासां ताः याः भूताः काश्चन
बभूवुरिति ॥१३॥ तस्य श्रीकृष्णस्यानुध्यानेन निवृत्ता अशेषा श्रवणेक्षणादिवृत्तयो यासां ताः ॥ इमं लोकं देहमपि न जा
नंति स्म मुक्ता इवेति ॥१४॥ अपराः स्त्रियः शौरेर्गिरः स्मरंत्यः संमुमुहुः ॥ कथंभूताः गिरः ॥ अनुरागेण यत् स्मितं
तेनेरिताः ॥ हृदि स्पृशंतीति हृदिस्पृशः मनोज्ञाः ॥ चित्राणि प

एवंप्रश्नोपिममनातिसंगतइत्याह॥ किंत्विति॥ अंगहेअक्रूरएछेपृछामि॥ नःअस्माकंकुलस्यामयेरोगेनोमा
तुलूइतिनामयस्यतस्मिन्॥ नःस्वानांज्ञातीनांतस्यप्रजासुच॥ ५॥ अस्मत्अस्मन्निमित्तंवृजिनंदुःखंआर्य्ययोर्निरप
राधयोः यद्धेतोः॥ यःअहमेवहेतुस्तस्मात्॥ ६॥ हेसोम्यस्वानांचोदर्शनंचिरधमसंजातंदिष्ट्याभद्रं॥ ७॥ माधवःम

किंनुनःकुशलंपृछ्छेएधमानेकुलामये॥ कंसेमातुलनाम्न्यंगस्वानांनस्तत्प्रजासुच॥ ४॥ अहोअ
स्मदभूद्भूरिपित्रोर्वृजिनमार्य्ययोः॥ यद्धेतोःपुत्रमरणंयद्धेतोर्बंधनंतयोः॥ ६॥ दिष्ट्याद्यदर्श
नंस्वानामह्यंवःसोम्यकांक्षितं॥ संजातंवर्ण्यतांतातेतवागमनकारणं॥ ७॥ ॥श्रीशुकउवाच॥ पृ
भास ४ ष्टोभगवतासर्वंवर्णयामासमाधवः॥ वैरानुबंधंयदुषुवसुदेववधोद्यमं॥ यत्संदेशोयदर्थंवादू
तःसंप्रेषितःस्वयं॥ यदुक्तंनारदेनास्यस्वजन्मानकदुंदुभेः॥ ८॥ श्रुत्वाक्रूरवचःकृष्णोबलश्चपर
वीरहा॥ प्रहस्यनंदंपितरंराज्ञादिष्टंविजज्ञतुः॥ ९॥ गोपान्समादिशत्सोपिगृह्यतांसर्वगोरसः॥
उपायनानिगृह्णीध्वंयुज्यंतांशकटानिच॥ १०॥

धुवंशेजातः॥ यःधनुर्मखस्तस्यासंदेशोयस्य॥ यदर्थंचाणूरादिभिः॥ घातनार्थं॥ अस्यश्रीकंसस्यस्वजन्मश्री
कंसजन्म॥ आनकदुंदुभेःसकाशात्॥ ९॥ विजज्ञतुः॥ विशेषेणज्ञापयामासतुः॥ १०॥ सोपिनंदगोपान्समादिशत्
तदेवदर्शयति॥ गृह्यतामित्यादिना॥ गोरसःक्षीरादिः उपायनानिउत्तमवस्तूनि॥ १०॥ ॥ ॥ ऽऽ॥ ॥ ॥ ऽऽ ॥ ॥

भा०द०ए० किंच दत्त्वापहारित्वेनातिक्रूरत्वमित्याहुः ॥ क्रूरस्त्वमिति ॥ ननु अक्रूरोऽहरति नाहमिति चेदत्त्राहुः ॥ अक्रूरसमाख्ययेति
२४७ न ह्येवं केवलं मन्युः प्रभवति ॥ मृतो नामांतरेण स्म धृष्टत्वं त्वमेवागतोऽसि ॥ कस्मै हरामि नु युष्मच्चक्षुरिति चेन्न ॥ येन त्वद्दत्त
न चक्षुषा मधुद्विषः एकदेशे नेत्रवक्त्रादौ त्वदीयं समग्रसृष्टिनैपुण्यं अद्राक्ष्म ॥ हृष्टवंतो वयं ॥ तच्च हेतुः ॥ अयं भावः ममस्र
ष्टिप्रसत्त्या सर्वरहस्याभिज्ञतामित्यमर्षेणैव हृत्संविभाज्य नस्मानंधीकरोषीति ॥ १९ ॥ विधातारं विहाय परस्य

क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत् ॥ येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीय
मद्राक्ष्म वयं मधुद्विषः ॥ १९ ॥ न नंदसूनुः क्षणभंगसौहृदः समीक्षते नः स्वकृतातुरा बत ॥ वि
हाय गेहान् स्वजनान् सुतान् पतीन् तद्दास्यमद्धोपगता नवप्रियः ॥ २० ॥ सुखं प्रभाता रजनीयमा
शिषः सत्या बभूवुः पुरयोषितां ध्रुवं ॥ याः संप्रविष्टस्य मुखं व्रजस्पतेः पास्यंत्यपांगोत्कलितस्मि
तासवं ॥ २१ ॥

स्मत्तुः ॥ न नंदसूनुरिति बत खेदे क्षणभंगेन स्थिरं सौहृदं यस्य सः गृहादीन् विहा
य अद्धा साक्षात् तस्यैव दास्यमुपगताः स्वकृतातुरा ॥ तत्कृतेनैव विस्मिता दीना परवशा अपि न ॥ अस्मान् समीक्षते
नवं नवं प्रियं यस्य सः ॥ अतः एनं निवारयाम इति भावः ॥ २० ॥ सेर्ष्यमाहुः ॥ सुखं प्रभातेति ॥ व्रजस्पतेः श्रीकृष्णस्य
सुखं पास्यंति ॥ आदरेण द्रक्ष्यंतीति कथंभूतं ॥ अपांगेन नेत्रप्रांतेन उत्कलितं मुज्जृंभितं स्मितमेव आसवो रसो यस्य

स्तत् ॥ यद्वा ॥ अपांगोत्कलितेन स्मितेनासवरूपं यन्मुखं ॥
ततश्च पानं मुखमेव संभावयंति ॥ २१ ॥

१६७

विरहेणकातराविह्वला॥अच्युतेआसमयंचिंतयासांताः॥१६॥कलसंगतिंविधायविघटयतीतिविधातारंप्रत्येकमात्रो
ज्ञात्यःआऽकु॥अहोश्रुतिं॥मेऽद्यादिहिताचरणेनप्रणयेनस्नेहेनच॥अकृतायान्॥अप्राप्तभोगानपितान्वियुनंक्तिवियोज
यति॥तस्मात्त्वत्तावत्तवदया॥बालिशोपित्वमित्याकुः॥अपार्थकमिति॥१७॥विगर्हिततंतवेदंकर्मेत्याहुः॥यस्त्वमिति॥शोकमप

गतिंसुललितांचेष्टांस्नेहहासावलोकनं॥शोकापहानिनर्माणिप्रोद्दामचरितानिच॥चिंतयं
त्योमुकुंदस्यभीताविरहकातराः॥समेताःसंहशःप्रोचुरश्रुमुख्योऽच्युताशयाः॥१६॥गोप्यऊ ५३
चुः॥अहोविधातस्तवनक्वचिद्दयासंयोज्यमैत्र्याप्रणयेनदेहिनः॥तांश्चाकृतार्थान्वियुनंक्ष्य
पार्थकंविचेष्टितंतेर्भकचेष्टितंयथा॥१७॥यस्त्वंप्रदर्श्यासितकुंतलावृतंमुकुंदवक्त्रंसुकपो
लमुन्नसं॥शोकापनोदस्मितलेशसुंदरंकरोषिपारोक्ष्यमसाधुतेकृतम्॥१८॥

नुदतीतिशोकापनुदः॥सचासौस्मितलेशश्चगूढहासस्तेनसुंदरंमुकुंदस्यवक्त्रंसहकृत्यप्रदर्श्यपुन
स्तत्पारोक्ष्यमदृश्यतां॥करोषि॥अतस्तवकृतंकर्मअसाधुनिंद्यमित्यर्थः॥१८॥रामरामरामरामराम

भा०द०प । अहो धिगस्मज्जीवितमित्याहुः ॥ अनार्द्रीकृतेन धीर्यस्य सः ॥ तावद् एष क्रूरः रथमारूढः ॥ अस्य विनयमात्रं च
१४८ स्थविरैरप्युपेक्षितं ॥ तेन निवारितवंत इत्यर्थः ॥ किंच दैवं चेति ॥ अयं भावः ॥ यदि दैवमस्माकमनुकूलं भवेत् ॥ विप्रैः
कश्चिद् देशमध्ये प्रहन्येत ॥ अकस्माद्वा वज्रपातो भवेत् ॥ अन्यद्वा किंचिद् अरिष्टं ॥ न तु तत्किंचिद् अस्तीति ॥ २७ ॥ परस्परं
संमंत्र्य साहसमधिरुह्य आहुः ॥ निवारयाम इति ॥ अकरिष्यन् ॥ किं करिष्यंतीति ॥ निमिषार्द्धदुस्त्यजान्मुकुंदसंगाद्वि

अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयंति दुर्मदाः ॥ गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोऽद्य प्रतिकूलमीहते ॥ २७ ॥ निवारयामः समुपेत्य माधवं किं नोऽकरिष्यन् कुलवृद्धबांधवाः ॥ मुकुंदसंगान्निमिषार्द्धदुस्त्यजाद्दैवेन विध्वंसितदीनचेतसां ॥ २८ ॥ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्यां ॥ नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरंतं ॥ २९ ॥

ध्वंसितानि वियोजितानि ॥ अत एव दीनानि चेतांसि यासां तासामस्माकं न मृत्योरपि भयं इत्यर्थः ॥ २८ ॥ इतोपि
मरणाद् अपि साहसमेवावलंबनीयमित्याहुः ॥ हे गोप्यः ॥ यस्य ललितं स्मितं च वल्गुमंत्रश्च ॥ लीलावलोकपरिरंभणं
च ॥ अनुरागेण ललितानि यस्य तस्य रासगोष्ठ्यां रासक्रीडासभायां नः अस्माभिः ॥ क्षणदा रात्रयः क्षणमिव नीताः ॥ तममुं कृष्णं
विना दुरंतं तमः विरहदुःखं कथं नु अतितरेम ॥ न कथंचिदित्यर्थः ॥ २९ ॥ ॥ १४८

ननु हि श्रीशिरिदिना नितं यो भवतु नाम तथापि स्मत्स्नेहात्कष्टः पित्रादिभिश्च पुरा वर्त्तितं आगमिष्यतीत्याह ॥ हे
अवलाः तासां मधुवन्मंजुभिर्भाषितैर्वेशीकृतचित्तः ॥ तथा तासां सलज्जस्मितैर्विभ्रमैः भ्रमन पित्रादिपरतंत्रो
पि यद्व्रजे परे येवं धवः संति यस्य ॥ न था मन स्त्रीधीरोपि ग्राम्या अविदग्धा नः कथं प्रतियास्यते प्रत्येष्यति ॥ न क
थं चिदित्यर्थः ॥ २२ ॥ किंच ॥ अस्मद्दुःसंवभाजोऽन्याएवाद्य भविष्यंतीत्याहुः ॥ अद्येति ॥ तत्र पुरे दाशार्हादीनां दृशः दृष्टे

तासां मुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्यपि ॥ कथं पुनर्नः प्रतियास्यते बलाग्राम्याः
सलज्जस्मितविभ्रमैर्भ्रमन् ॥ २३ ॥ अद्य ध्रुवं तत्र दृशो भविष्यंते दाशार्हभोजांधकवृष्णिसात्वतां
महोत्सवं श्रीरमणं गुणास्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतं ॥ २४ ॥ मैतद्विधस्याकरुणस्य नाम भूद
क्रूर इत्येतदतीवदारुणं ॥ योसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः ॥ २५ ॥

महानुत्सवो भविष्यति ॥ ये देवकीसुतं द्रक्ष्यंति ॥ न था ये चान्येऽध्वनिगच्छंतं द्रक्ष्यंति तेषामपि दृशो भविष्यतीति ॥ य
द्वा दृष्टा दर्शनं द्वितीयात्तेषां दृशा नेत्राणि महोत्सवो भविष्यते प्राप्स्यति ॥ प्राप्त्यर्थस्य भवतेरात्मनेपदित्वात् ॥ २४ ॥ अक्रू
रं शापंत्य आहुः मैतद्विधस्येति ॥ एवं विधाविधानेकर्मयस्य ॥ अतएवानिष्कृपस्य ॥ अक्रूर इति शोभनं नाम माभूत् ॥ तत्र
हेतुः ॥ अतीव दारुणं इत्यादि प्रियात्प्राणादपि प्रियं कृष्णं ॥ अनः पारं ॥ अस्मद्दृष्ट्यगोचरत्वादति दूरदेशं नेष्यति ॥ २५ ॥

 अनुरंजिताः परावृत्य निरीक्षणादिभिः किंचिदानंदिताः प्रत्यादेशं प्रत्याख्यानं ॥३५॥ तप्यतीः संतप्यमानाः आयास्ये
 आगमिष्यामि इति दूतवाक्यैः ॥३६॥ कृष्णम् अनुप्रस्थापिता आत्मानो मनांसि याभिस्ताः लेख्यमयीपुत्रिका इव निश्च-

गोप्यश्च दयितं कृष्णमनुव्रज्यानुरंजिताः प्रत्यादेशं भगवतः कांक्षन्त्यश्चावतस्थिरे ॥३५॥ तास्त
थातप्यतीर्वीक्ष्य स्वप्रस्थाने यदूत्तमः सांत्वयामास सप्रेमैरायास्य इति दौत्यकैः ॥३६॥ यावदालक्ष्यते
केतुर्यावद्रेणू रथस्य च अनुप्रस्थापितात्मानो लेख्यानीवोपलक्षिताः ॥३७॥ ता निराशा निव
वृतुर्गोविंदविनिवर्तने विशोका अहनी निन्युर्गायंत्यः प्रियचेष्टितं ॥३८॥ भगवानपि संप्राप्तो
रामाक्रूरयुतो नृप रथेन वायुवेगेन कालिंदीमघनाशिनीं ॥३९॥ तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं
मणिप्रभं वृक्षषंडमुपव्रज्य सरामो रथमाविशत् ॥४०॥ अक्रूरस्तावुपामंत्र्य निवेश्य च रथो
परि कालिंद्या ह्रदमागत्य स्नानं विधिवदाचरत् ॥४१॥ निमज्ज्य तस्मिन्सलिले जपन्ब्रह्म स
नातनं तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ॥४२॥ त्वा ॥३८॥३९॥४०॥ दृष्ट्वा रागाद्यं डंसमूहमुपव्रज्य
४१ शत्रुभ्यः शंकितमनाः रथोपरि निवेश्य ॥४१॥ ब्रह्म वेदं जपन् ॥४२॥ कौ मौ वा लोकोत्तमौ स्नाविस्मितशंकितचेतसे ॥
अक्रूराय जले रूपमत्याश्चर्यं व्यदर्शयत ॥४३॥ राम राम राम राम राम राम ॥ राम ॥

किंच॥ आस्तांतावन्नमोतितरांजीवनमेवकथंस्यादित्याह॥ यइति॥ अङ्कन्तये दिनावपृष्णानेरवुररजोभिश्छुरि
ताधूसराअलकास्रग्जस्रयस्यस॥ व्रजंविशन्॥ स्मितेनयत्कटाक्षनिरीक्षणंतेननक्षिणंत्रिक्षणेतिहरातिअ
योऽस्माकं त्वयेवव्रजमनंतमखःपरीतोगोपैर्विशन्धुररजश्छुरितालकस्रक्॥ वेणुंक्वणन्स्मित
कटाक्षनिरीक्षणंभ॥ चित्तंक्षिणोत्यमुमृतेनुकथंभवेम॥ २८॥ एवंकृष्णविरहातुराः शंत्रज
स्त्रियः कुसुमविषक्तमानसाः॥ विसृज्यलज्जांरुरुदुःस्मसुस्वरंगोविंददामोदरमाधवेति॥ २९॥ स्त्री
णामेवंरुदतीनामुदितेसवितर्यथ॥ अक्रूरश्चोदयामासकृतमैत्रादिकोरथं॥ ३०॥ गोपास्तम
न्वसज्जंतनंदाद्याःशकटैस्ततः॥ आदायोपायनंभूरिकुंभान्गोरससंभृतान्॥ ३१॥
संश्रीकृसंक्रिनाकथंभवेमेति॥ २८॥ कुसुमविषक्तानिमानसानियासां॥ सुस्वरंउच्चैः॥ २९॥ अक्रूरमक्रूरत्वःप्रु
त्वीकंसकंसकंसनिषूदनः॥ गोपीमनोरभिरामःसरामःस्वपुरंययौ॥ स्त्रीणामिति॥ ताअनादृत्यकृतमैत्रादि
कः॥ मैत्रंमित्रदैवतंसंध्योपासनंतदादिकमेकंतयेनसः॥ ३०॥ अन्वसज्जंतअन्वगछन्

भा०द०पृ० कटितटं च श्रोणिश्च करभसदृशम् ऊरुद्वयं च ह्रस्वे कटितटश्रोणिकरभोरुद्वयं च तेनान्वितं ॥ यद्वा ॥ बृहच्छ्रोणिकटि
१५० तटश्रोणिभ्यां करभोरुद्वयेन चान्वितं ॥ ४ ॥ तुंगौ ईषदुन्नतौ गुल्फौ ॥ अरुणनखव्रातश्च तेषां दीधितिभिः ॥ तयान
वांगुल्यः ॥ अंगुष्ठश्च तान्येव दलानि तैश्च विलसत् ॥ शोभमानं पादपंकजं यस्य तत् ॥ ५ ॥ सुमहार्हा मणिव्राता येषु

बृहत्कटितटश्रोणिकरभोरुद्वयान्वितं ॥ चारुजानुयुगं चारुजंघायुगलसंयुतं ॥ ४ ॥ तुंगगुल्फा-
रुणनखव्रातदीधितिभिर्वृतं ॥ नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजं ॥ ५ ॥ सुमहार्हमणिव्रातकि-
रीटकटकांगदैः ॥ कटिसूत्रब्रह्मसूत्रहारनूपुरकुंडलैः ॥ भ्राजमानं पद्मकरं शंखचक्रगदाधरं ॥
श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ॥ ६ ॥ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः ॥ सुरेशै
र्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥ प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः ॥ स्तूयमानं पृथग्भा
वैर्वचोभिरमलात्मभिः ॥ ७ ॥

तैः किरीटादिभिः ॥ ६ ॥ पृथक् ॥ पृथग्भावोऽभिप्रायो येषां तैः ॥ तत्र पार्षदैः स्वामीति स्तूयमानं सनकादिभिर्ब्रह्मेति ॥ ब्र-
ह्मादिभिर्महेश्वर इति ॥ मरीच्यादिभिर्द्विजोत्तमैः परः प्रजापतिरिति वसुरूपरिचरः प्रह्लादनारदवसवः प्रमुखा येषां तैः १५०
परदेवतामिति च ॥ श्रेष्ठैर्वचोभिरिति वा ॥ ७ ॥

स्तू स्य
छ० सिद्धादिभिः स्तूयमानं ॥ ६१ ॥ सहस्रं शिरांसि यस्य तं सहस्रफणेषु मौलयो ये संतीति तत्र यातं ॥ नीलेश्वंवरं यस्य तं दि १०२
षवत्कमलकंदवत् श्वेतं शृंगैः शिखरैः श्वेतं कैलासमिव स्थितं ॥ ६२ ॥ तस्यांसे कुंडलीकृतदेहार्द्धं विलोक्य त्वं कादशेन

तोरथस्थो कथमिह सुतावानकदुंदुभे ॥ तर्हि खिन्नत्वं दनेनस्त इत्युन्मज्ज्य वाच वृष्टसः ॥ तत्रापि
च यथापूर्वमासीनो पुनरेव सः ॥ न्यमज्जद्दर्शनं यन्मे मृषा किं सलिले तयोः ॥ ६० ॥ भूयस्तत्रापि
सोऽद्राक्षीत् स्तूयमानमहीश्वरं ॥ सिद्धैर्भुजंगपतिभिरसुरैर्नतकंधरैः ॥ ६१ ॥ सहस्रशिरसं देवं स
हस्रफणमौलिनं ॥ नीलांबरं बिसश्वेतं शृंगैः श्वेतमिव स्थितं ॥ ६२ ॥ तस्योत्संगे घनश्यामं पीत
कौशेयवाससं ॥ पुरुषं चतुर्भुजं शांतं पद्मपत्रारुणेक्षणं ॥ ३ ॥ चारुप्रसन्नवदनं चारुहासनि
रीक्षणं ॥ सुभ्रून्नसं चारुकर्णं सुकपोलारुणाधरं ॥ ४ ॥ प्रलंबपीवरभुजं तुंगांसोरस्थलश्रि
यं ॥ कंबुकंठं निम्ननाभिं वलिमत्पल्लवोदरं ॥ ५ ॥

श्लोकेनान्वयः ॥ ३ ॥ शोभने भ्रुवौ यस्य उन्नता नासि
का यस्य तं च तं च ॥ शोभनौ कपोलौ यस्य ॥ अरुणे अधर ओष्ठौ यस्य तं च तं च ॥ ४ ॥ तुंगावंसौ यस्य ॥ उरस्थलश्रीर्यस्य तं च तं च हरि
वलिमत्पल्लवोदरं ॥ वलयस्त्रियभिन्ना रेखा यस्य संति मद्वलिमत् ॥ तच्चेतत्पल्लवं च अश्वत्थदलसदृशमुदरं य

अखिलहेतुहेतुत्वं प्रपंचयति ॥ भूरिति ॥ खस्यादिरहंकारः ॥ अजा माया यस्य आदिः पुरुषः ॥ एते येन जगतो हेतवस्ते सर्वे ते
तव अंगभूताः ॥ अंशात् ॥ श्रीमूर्तेर्भूता जाताः ॥ उपसर्जनभूता वा ॥ २ ॥ नन्वेतिस्तुतिः कथं क्रियते ॥ अहमेवान्यत्तत्त्वत्यन्तस्तत्त्वे
परतंत्र चेदित्याशंक्य तत्त्वैषाक्षीयान्तत्त्वतत्सामर्थ्यं तु न कोपि वेदेत्याह ॥ नेत इति ॥ एते अजाद्या आदिर्येषां ते ॥ आत्मनस्तव स्व
रूपं न विदुः ॥ अनात्मतया जडत्वेन कारणेन ॥ जडत्वे हेतुः गृहीताः प्रत्यक्षादिभिरिंद्रियैः ॥ नु ह्यजडो हि गोचर इति भावः
ननु जडा मा भाजानन्तु जीवस्तु ज्ञास्यतीत्यत आह ॥ अज इति ॥ स अजो ब्रह्मापि ॥ अजो यावद्गुणैरनुबद्धः ॥ आवृत्तः ॥ गुणानी

भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि ॥ सर्वेंद्रियार्था विबुधाश्च सर्वे ये हेतवस्ते
जगतोऽङ्गभूताः ॥ २ ॥ नैते स्वरूपं विदुरात्मनस्ते ह्यजादयो ह्यात्मतया गृहीताः ॥ अजोऽनुबद्धः स गुणैरजा
या गुणात्परं वेद न ते स्वरूपम् ॥ ३ ॥ त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् ॥ साध्यात्मं साधिभूतं च सा
धिदैवं च साधवः ॥ ४ ॥

तत्स्वरूपं न ॥ अन्यं कुतो ज्ञास्यतीति ॥ यद्वा ॥ प्रकृत्यादय आत्मनः स्वरूपं च न विदुः ॥ ३ ॥
ति २ जडत्वादेव जीवस्तु तान् ॥ आत्मानं च वेत्ति ॥ न पुनस्तत्त्वस्वरूपमिति ॥ यथा कोऽहं सगुणो देहोऽसर्वोत्तमनवोऽभ्रतमात्रा ना
त्मानमन्यं च विदुः परं यतः ॥ सर्वं पुमान्वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे इति ॥ ३ ॥ ननु यदि कोपि न जानाति क
थं तर्हि संसारनिवृत्तिर्जीवानामित्याशंक्य साक्षादगोचरत्वेपि येन केनापि मार्गेण भजतां त्वं गम्योसीत्याह ॥ त्वां योगि
न इति ॥ हैरण्यगर्भादयोऽध्यात्माधिभूताधिदैवसहितं महापुरुषं तदन्तर्यामिस्वरूपमीश्वरं नियंतारं च यज

विद्याविद्येजीवानांमुक्तिसंसृतिहेतूमायातयोःकारणंशक्तिः॥ह्लादीनीसंवित्ज्ञानं॥आभिरन्याभिश्चनिषेवितं॥दं
विलोक्यसुभृशंप्रीतः॥अस्मात्कस्मोऽसावेवंभूतःपरमेश्वरइतिज्ञात्वेति॥५७॥इतिदशमेएकोनचत्वारिंशः॥ चत्वा
रिंशोनतोऽक्रूरः॥कृष्णंममत्वेश्वरेश्वरं॥प्रणामभक्त्यातुष्टावसगुणागुणगुम्भदत्तः॥श्रीकृष्णंप्रणमति॥नतोऽस्मीति॥हेकृष्णत्वांन

श्रियापुष्ट्यागिराकांत्याकीर्त्यातुष्ट्येलयोर्जया॥विद्ययाविद्ययाशक्त्यामाययाचनिषेवितं॥दं॥वि
लोक्यसुभृशंप्रीतोभक्त्यापरमयायुतः॥हृष्यत्तनूरुहोभावपरिक्लिन्नात्मलोचनः॥गिरागद्गद
म३ यास्तौषीत्सत्त्वमालंब्यसात्वतः॥प्रणम्यमूर्ध्नावहितःकृतांजलिपुटःशनैः॥५७॥इतिश्रीमद्भाग
वतेमहापुराणेपारमहंस्यांसंहितायांवैयासिक्यांदशमस्कंधेऽक्रूराघमर्षणंनामैकोनचत्वारिंशो
ऽध्यायः॥३९॥अक्रूरउवाच॥नतोऽस्म्यहंत्वाखिलहेतुहेतुंनारायणंपुरुषमाद्यमव्ययम्॥यन्ना
भिजातादरविंदकोशाद्ब्रह्माविरासीद्यतएषलोकः॥१॥नतोऽस्मि॥ननुत्वमस्मत्पितृव्यःकुतोमांवाल
नतोस्मितत्राह॥आद्यपुरुषः॥अव्ययंच॥अनादिनिधनमित्यर्थः॥कुतएतत्॥अखिलहेतूनांहेतुः॥स
तुनारायणः॥नाहमितिचेत्॥किंनारायणइतिमांस्तौषि॥काऽत्रस्तुतिःसत्यमेवेत्याह॥यन्नाभिजातादितिय

॥ना॥ नारायणंत्वं।

भा० द० ४०
१५२

तस्मात्सर्वे मार्गास्त्वय्येव संतीति सदृष्टांतमाह यथेति ॥ अद्रेः सकाशात्सर्वतः प्रभवंति या नद्यस्ताः पुनः पर्जन्येनापूरिता वकु
तसः सत्यः सर्वतः सिंधुमेव विशंति यथा ॥ तद्वदेता गतयो मार्गाः अंततस्त्वामेव विशंती ॥१०॥ अत्र हेतुमाह सत्वमिति भवतः
शक्तिर्या प्रकृतिस्तस्याः सत्वादयो गुणाः ॥ अतः प्राकृताः प्रकृतिकार्योपाधयो ब्रह्मप्रभृत्यंताः स्थावरादयो जीवाः सोपाधयस्तेषु
तेषु गुणेषु प्रोताः प्रविष्टाः ॥ ते च प्रकृतेः सात्वत्यीति ॥ अतः क्रमेणोपाधिलयात्सर्वे पित्वामेव विशंतीति ॥ यद्वा भवतः प्रकृते

यथाद्रिप्रभवा नद्यः पर्जन्यापूरिता विभो ॥ विशंति सर्वतः सिंधुं तद्वत्त्वां गतयोंततः ॥१०॥ सत्वं रजस्तम इ
ति भवतः प्रकृतेर्गुणाः ॥ तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः ॥११॥ तुभ्यं नमस्तेस्त्वविषक्तदृष्ट
ये सर्वात्मने सर्वधियां च साक्षिणे ॥ गुणप्रवाहोयमविद्यया कृतः प्रवर्त्तते देवनृतिर्यगात्मसु ॥१२॥

॥११॥
गुणेषु प्रोताः ब्रह्मादयो भवद्व्यतिरिक्ता न संति ॥ अतस्त्वमेव सर्वदेवमय इति ॥ ननु भवतः प्रकृतेरिति वदन् ममापि प्र
कृतिसंबंधं ब्रवीषि ॥ तत्रैषां मम च को विशेषः स्यादित्याशंक्य विशेषमाह ॥ तुभ्यमिति ॥ अविषक्ते दृष्टये ॥ अलिप्तबुध
ये कुतः सर्वात्मने ॥ व्यतिरिक्ताभावादविशक्तदृष्टित्वमित्यर्थः ॥ किंच सर्वधियां साक्षिणे ॥ सर्वबुद्धिसाक्षित्वाच्च
क्वापि बुद्धिलेप इत्यर्थः ॥ इतरे तु संसरंतीत्याह ॥ गुणप्रवाह इति ॥ तव न त्वय्यपि च आत्मानो येषां तेषु देवादिशरीरा
भिमानिष्वित्यर्थः ॥ त्वदविद्यया कृतोयं गुणप्रवाहः प्रवर्त्तते ॥ अतो महान्विशेष इत्यर्थः ॥१२॥ ॥ ऽऽ ॥ १५२

तदेवं सांख्ययोगावेकीकृत्योक्तौ त्रयीमार्गकर्मज्ञानभेदेन दर्शयति त्रय्याचेति श्लोकद्वयेन॥ वैतानिकाः कर्मयोगिनः त्वं
त्वामेव यजन्ते॥ ननु ते इंद्र वरुणवाय्वादीन्यजन्ते न तु मामित्यत आह॥ नानावज्रहस्तादीनि रूपाणि येषां ते॥ येष्वात्तेषामाख्य
यानाम्ना त्वामेव यजन्त इति॥ अयं भावः॥ ऐंद्रवारुणादिसूक्तैः इंद्रादयः सर्वे प्रकाश्यन्ते न च सर्वेश्वराद्बहवः
सम्भवंति॥ अतो नामभेदेन त्वामेव यजन्त इति॥ तथा च श्रुतिः॥ सप्रथमः संस्कृतिर्विश्वकर्मा स प्रथमो मित्रावरुणोऽग्निः

त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः॥ यजन्ते विततैर्यज्ञैर्नानारूपामराख्यया॥५॥ एके त्वा
खिलकर्माणि संन्यस्योपशमं गताः॥ ज्ञानिनो ज्ञानयज्ञेन यजन्ति ज्ञानविग्रह॥६॥ अन्ये च संस्कृतात्मानो
विधिनाभिहितेन ते॥ यजन्ति त्वन्मयास्त्वां वै बहुमूर्त्त्येकमूर्तिकं॥७॥ त्वामेवान्ये शिवोक्तेन मार्गेण शि
वरूपिणं॥ बह्वाचार्यविभेदेन भगवन्समुपासते॥८॥ सर्व एव यजन्ति त्वां सर्ववेदमयेश्वर॥ येप्यन्य
देवताभक्ता यद्यप्यन्यधियः प्रभो॥९॥

सप्रथमो बृहस्पतिश्चिकित्वांस्तस्मा इंद्राय हविराजुहोतीति॥५॥ ज्ञा
नयज्ञेन समाधिना॥६॥ सांख्ययोगत्रयीमार्गा उक्ताः॥ ये संस्कृता वैदीक्षयादीक्षिताः संतः अभिहितेन पंचरात्रादिविधिना त्वन्म
यास्त्वन्मयत्वेनात्मानं चिंतयंतः॥ एकप्रधाना इति वा॥ वासुदेवसंकर्षणप्रद्युम्नानिरुद्धभेदेन बहुमूर्तिं नारायणरूपेणैकमू
र्तिकं च त्वामेव यजन्ति॥७॥ बह्वाचार्यविभेदेनेति॥ नानाभेदस्यैव पाशुपतादिमार्गेण॥८॥ ये पित्रिंद्रदेवताभक्तास्तेपि त्वामे
व यजन्तीत्याह॥ सर्व एवेति हे सर्ववेदमय॥ नन्वेते परस्परदेवताऽधिक्ये पकलहव्याकुलचित्ताः कथमेकमेव यजन्तीत्युक्ते तत्रा

ह॥ यद्यप्यन्यधियः इति बुद्धिमात्रभेदेन वस्तुभेद इत्य
र्थः॥९॥

भा० ५० १८ ततः स्वयमप्यवतारान् नमस्यति । नम इति । हयशीर्ष्णे हयग्रीवाय । मधुकैटभयोर्मृत्यवे हंत्रे ॥ १६ ॥ अकूपाराय
१५३ कूर्माय । क्षित्युद्धाराय स्वतेजसे ॥ १७ ॥ १८ च भृगूणां पतये परशुरामाय ॥ १९ ॥ चतुर्व्यूहरूपेण प्रणमति । नम इति । न

नमः कारणमत्स्याय प्रलयाब्धिचराय च । हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे ॥ १६ ॥ अकूपाराय
महते नमो मंदरधारिणे । क्षित्युद्धारविहाराय नमः शूकरमूर्तये ॥ १७ ॥ नमस्तेऽद्भुतसिंहाय साधुलो
कभयापह । वामनाय नमस्तुभ्यं क्रांतत्रिभुवनाय च ॥ १८ ॥ नमो भृगूणां पतये दृप्तक्षत्रवन
च्छिदे । नमस्ते रघुवर्याय रावणांतःकराय च ॥ १९ ॥ नमस्ते वासुदेवाय नमः संकर्षणाय च । प्र
द्युम्नायानिरुद्धाय सात्वतां पतये नमः ॥ २० ॥ नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने । म्लेच्छप्राय
क्षत्रहंत्रे नमस्ते कल्किरूपिणे ॥ २१ ॥ भगवन् जीवलोकोऽयं मोहितस्तव मायया । अहंममेत्यस
स्ते द्ग्राहो भ्राम्यते कर्मवर्त्मसु ॥ २२ ॥ अहं चात्माऽऽत्मजागारदारार्थस्वजनादिषु । भ्रमामि स्वप्नकल्पे
षु मूढः सत्यधिया विभो ॥ २३ ॥

मस्ते वासुदेवायेति ॥ २० ॥ २१ ॥ एवं स्तुत्वा वधमोक्षं प्रार्थयितुमाह । भगवन्निति । असति देहादौ ग्राह आ
ग्रहो यस्येति वा ॥ २२ ॥ न केवलमयं लोकः । अहमपि तथैवेत्याह । अहं चेति ॥ २३ ॥ राम राम राम राम रा १५३

सर्वात्मन इत्यनेनोक्तं सगुणरूपं स्तौति ॥ अग्निर्मुख इति द्वाभ्यां ॥ अग्न्यादीन् तद्देवतावयवत्वा विधीयते ॥ योऽय
मग्निः स तव मुखमित्यादि वचनव्याख्यातोऽयं द्वितीयं च स्तुतिः ॥ अवरेणेंद्रियकं सूक्ष्मप्राणं च वलं चात्र ॥ अद्रयः परस्य
तेऽस्थिनखानि ॥ १२ ॥ न केवलमेतावत् ॥ किंतु सर्वोपाधिप्रपंचस्त्वदवयवभूत एवेति वदन्नेवं सत्यपि प्रपंचस्याविकृ
तस्त्वयि न प्रसज्जत ॥ तस्य त्वयि कल्पितत्वादित्याह ॥ त्वयीति ॥ अव्ययात्मनि पुरुषे पूर्णे लोकादयः संजिहते प्रचलन्ति हे
अग्निर्मुखं तेऽवनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः ॥ द्यौः कं सुरेंद्रास्तव बाहवोऽर्ण
वाः कुक्षिर्मरुत्प्राणबलं प्रकल्पितं ॥ रोमाणि वृक्षौषधयः शिरोरुहा मेघाः परस्यास्थिनखानि तेऽद्रयः ॥
निमेषणं रात्र्यहनी प्रजापतिर्मेढ्रं तु वृष्टिस्तव वीर्यमिष्यते ॥ १३ ॥ त्वय्यव्ययात्मन्पुरुषे प्रकल्पिता लो
काः सपाला बहुजीवसंकुलाः ॥ यथा जले संजिहते जलौकसोऽप्युदुंबरे वा मशका मनोमये ॥ १४ ॥
यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि ॥ तैरामृष्टशुचो लोका मुदा गायंति ते यशः ॥ १५ ॥
अव्ययात्मन्निति निर्विकारत्वं भूते त्वयि ॥ मनोमये मनःप्रधाने ॥ मनोवृत्तिव्यंग्ये ॥ दृश्यते त्वग्र्यया बुद्ध्या मनसैवानुद्रष्ट
मं २ व्य इत्यादि श्रुतेः ॥ जले यथा जलौकसः ॥ सूक्ष्मप्राणपुंजराशयः ॥ यथा चोदुंबरेऽतके शरीरे मशकाः पुरस्य
रवान्तोऽनभिज्ञाः ॥ एवं महांतानि ब्रह्मांडान्यपि त्वयि संवर्तन्तीत्यर्थः ॥ १४ ॥ तस्मादेवंभूतं तव स्वरूपं दुरवगाहमिति
त्वद्वतारकथामृतमेव सतः सेव्यं त इत्याह ॥ यानि यानीति ॥ आमृष्टाः परिमार्जिताः शुचो येषां ते ॥ १५ ॥

भा० द० पू० पादयोः प्रपन्नः प्रार्थयति हृद्येन ॥ नमस्त इति ॥ विज्ञानमेवमात्रा मूर्तिर्यस्य तस्मै ॥ अत एव सर्वप्रत्ययहेतवे ॥ समस्तज्ञान

१५४ कारणाय ॥ किंच ॥ पुरुषेशप्रधानाय ॥ पुरुषस्य ये ईशाः ॥ सुखदुःखादिप्रापकाः ॥ कालकर्मस्वभावादयस्तेषां प्रधा

नाय नियंत्रे ॥ कुतः ॥ ब्रह्मणे परिपूर्णाय ॥ किंच ॥ अनंताः शक्तयो यस्य ॥ यद्वा ॥ अनंता मायापराख्या शक्तिर्यस्य तस्मै ॥ अथ

वा प्रधानं प्रकृतिः ॥ तत्प्रवर्तकः पुरुषः ॥ ईशः कालः ॥ एतद्रूपायात्मने ब्रह्मणे ॥ एवं स्तुतिं च भगवान् ॥ प्रकृतिर्यस्योपा

दन माधारः पुरुषः परः ॥ सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहमिति ॥ २४ ॥ सर्वप्रत्ययहेतुत्वमभिव्यज्य स्तौति

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ॥ पुरुषेशप्रधानाय ब्रह्मणेऽनंतशक्तये ॥ २५ ॥ नमस्ते वासुदेवा

य सर्वभूतक्षयाय च ॥ हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो ॥ २६ ॥ इति श्रीमद्भागवते महापुराणे द

शमस्कंधे अक्रूरयाने महापुरुषस्तवो नाम चत्वारिंशोऽध्यायः ॥ ४० ॥ श्रीशुक उवाच ॥ स्तुवतस्तस्य भगवान् दर्श

यित्वा जले वपुः ॥ भूयः समाहरत्कृष्णो नटो नाट्यमिवात्मनः ॥ १ ॥

नमस्त इति ॥ वासुदेवाय चित्ताधिष्ठात्रे सर्वभूतक्षयाय ॥ क्षयः आश्रयः ॥ अहंकारस्य प्राणिनां आश्रयः ॥ तत अ

हंकाराधिष्ठात्रे संकर्षणायेत्यर्थः ॥ हृषीकेशेति बुद्धिमनसोरधिष्ठात्रोः ॥ प्रद्युम्नानिरुद्धयोरैक्यं कृत्वा ग्रहणं ॥ श

रणागतं मां पाहीति प्रार्थना ॥ २६ ॥ इति श्रीदशमे चत्वारिंशः ॥ ४० ॥ एकचत्वारिंशे अक्रूरः प्रविशन् पुरीं

नतो वरान्दात्तुष्टः सुदाम्नो वायकस्य च ॥ तं शंकमक्रूरमनःप्रमोदं स्वधाम संदर्शनसत्कृपातः ॥ स्वराजधानीं

मह्त्वमेव प्रकटयति ॥ विपर्ययमतिरिति ॥ अनित्यकर्मफले नित्यमित्यनात्मनि देहे आत्मेति दुःखरूपे गृहादौ सु-
खमिति विपरीतमतिरित्यर्थः ॥ द्वंद्वेषु सुखदुःखादिषु आरमते क्रीडतीति तथा सः ॥ ननु दुःखे कुतो रतिस्तत्राह ॥ तमो-
विष्टः तमसा व्याप्तः ॥ तत आत्मनः प्रियं प्रेमास्पदं त्वां न जाने इत्यर्थः ॥ २५ ॥ तद्दृष्टांतमाह यथेति ॥ तस्माज्जलादुद्भ-
वंतीति तदुद्भवानि तृणादीनि तैः ॥ तथा मायाच्छन्नं त्वामहं हित्वा पराङ्मुखः ॥ देहाद्यभिमुखो वर्ते ॥ इति ॥ २६ ॥ नन्वेवं

अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहं ॥ द्वंद्वाराम तमोविष्टो न जाने त्वात्मनः प्रियं ॥ २५ ॥ यथाबुधो
जलं हित्वा प्रतिच्छन्नं तदुद्भवैः ॥ अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः ॥ २६ ॥ नोत्सहेऽहं कृपण-
धीः कामकर्महतं मनः ॥ रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः ॥ २७ ॥ सोऽहं तवांघ्र्युपगतोस्म्य-
सतां दुरापं तच्चाप्यहं भवदनुग्रह ईश मन्ये ॥ पुंसो भवेद्यर्हि संसरणापवर्गस्त्वय्यब्जनाभ सदुपासनया म-

जानतः कुतो विषयाभिमुखता तत्राह नोत्सहे इति ॥ कृपणा विषयवासनायुक्ता धीर्यस्य सः ॥ तिः स्यात् ॥ २८ ॥
अत एव कामकर्माभ्यां हतं क्षुभितमिंद्रियैश्च बलिभिर्विषयसंयुक्तैरितस्ततश्चाकृष्यमाणं मनः रोद्धुं नियंतुं न
शक्नोमीति ॥ २७ ॥ तदेवमस्वतंत्रोयः सोहं तवांघ्रिमुपगतः शरणं प्राप्तः ॥ तत्विंद्रियपरतंत्रस्य तदपि कुतस्तत्राह
तच्चापीति ॥ हे ईश अंतर्यामिन् ॥ तत् अंघ्र्युपगमनं च असतां दुरापम् ॥ अतो भवतोऽनुग्रह एवेत्यहं मन्ये अनु-
ग्रहे सतीति वा न सत्तासिद्ध्या इदं भवति ॥ किंभूतेऽनुग्रहे तत्राह ॥ पुंस इति जीवस्य संसारस्यापवर्गः समाप्तिर्यदाव

विना न सत्सेवा न ततोऽ... त्वन्मतिः ॥ न तया मुक्तिरित्यर्थः ॥ २८ ॥

त्कृपया भवेत् ॥ संभावनास्पदं भवति हे अब्जनाभ तदा
सदुपासना संपद्यते तर्ह्येव त्वयि मतिर्भवेत् ॥ यतः कृपा ॥

भा० द० पू० रामकृष्णागमनं प्रतीक्ष्यमाणाः स्थिता इत्यर्थः ॥ ८ ॥ प्रश्रितं विनीतं ॥ ९ ॥ स्वगृहं च प्रविशतां ॥ अवमुच्य उ
१५५ त्तार्य विश्राम्येत्यर्थः ॥ १० ॥ ११ ॥ साग्रजः सहगोपालैरित्यर्थः ॥ १२ ॥ यच्छौचेन यस्य पादरजसः क्षालनोद

तावद्व्रजौकसस्तत्र नंदगोपादयोग्रतः ॥ पुरोपवनमासाद्य प्रतीक्षंतोवतस्थिरे ॥ ८ ॥ तान्समेत्याह भ
गवानक्रूरं जगदीश्वरः ॥ गृहीत्वा पाणिना पाणिं प्रश्रितं प्रहसन्निव ॥ ९ ॥ भवान्प्रविशतामग्रे सह
यानः पुरीं गृहं ॥ वयं त्विहावमुच्याथ ततो द्रक्ष्यामहे पुरीम् ॥ १० ॥ अक्रूर उवाच ॥ नाहं भवद्भ्यां र
हितः प्रवेक्ष्ये मथुरां प्रभो ॥ त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ॥ ११ ॥ आगच्छ याम गेहा
न्नः सनाथान्कुर्वधोक्षज ॥ सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम ॥ १२ ॥ पुनीहि पादरजसा
गृहान्नो गृहमेधिनां ॥ यच्छौचेनानुतृप्यंति पितरः साग्नयः सुराः ॥ १३ ॥ अवनिज्यांघ्रियुगलमा
सीच्छ्लोक्यो बलिर्महान् ॥ ऐश्वर्यमतुलं लेभे गतिं चैकांतिनां तु या ॥ १४ ॥ आपस्तेंघ्र्यवनेजन्यस्त्री
ल्लोकाञ्छुचयोपुनन् ॥ शिरसाधत्त याः शर्वः स्वर्याताः सगरात्मजाः ॥ १५ ॥

केन गृहं गमन स्थितेन ॥ १३ ॥ श्लोक्यः पुण्यकीर्तिर्हि ॥ एकांतभक्तानां या गतिस्तां च लेभे ॥ १४ ॥ अपुनन् पवित्रयन्तः
याभिरद्भिः स्वः स्वर्गं प्राप्ताः ॥ १५ ॥ १५५

२ ॥ भूमौ वियति जले वा यावंत्यद्भुतानि त्वय्येव संति ॥ तं त्वां विपश्यतो मे किमद्भुतमदृष्टं अपि तु सर्वं
दृष्टमित्यर्थः ॥ ४ ॥ ननु मत्प्राप्तेः पूर्वमेव त्वं विस्मितमुखो लक्षितोऽसि अतो भूमौ वियति जले वा किमद्भु

सोपि चांतर्हितं वीक्ष्य जलादुन्मज्य सत्वरः ॥ कृत्वा चावश्यकं सर्वं विस्मितो रथमागमत् ॥ २ ॥
तमपृच्छद्धृषीकेशः किं ते दृष्टमिहाद्भुतं ॥ भूमौ वियति तोये वा तथा त्वां लक्षयामहे ॥ ३ ॥ अ
क्रूर उवाच ॥ अद्भुतानीह यावंति भूमौ वियति वा जले ॥ त्वयि विश्वात्मके तानि किं मे दृष्टं विप
श्यतः ॥ ४ ॥ यत्राद्भुतानि सर्वाणि भूमौ वियति वा जले ॥ तं त्वानुपश्यतो ब्रह्मन् किं मे दृष्टमिहाद्भुतं
॥ ५ ॥ इत्युक्त्वा चोदयामास स्यंदनं गांदिनीसुतः ॥ मथुरामनयद्रामं कृष्णं चैव दिनात्यये ॥ ६ ॥ मार्गे
ग्रामजना राजंस्तत्र तत्रोपसंगताः ॥ वसुदेवसुतौ वीक्ष्य प्रीता दृष्टिं न चाददुः ॥ ७ ॥

तदृष्टं वदेत्याह ॥ यत्राद्भुतानीति ॥ यत्र त्वयि सर्वाण्यद्भुतानि संति ॥ तं त्वामिह पश्यतो मे अन्यत्र भूम्यादौ
किमद्भुतं दृष्टं ॥ त्वां विना ॥ न तत्र किंचिदद्भुतमित्यर्थः ॥ ब्रह्मन् हे परमेश्वर इत्यर्थः ॥ ब्रह्मेति वा पाठः ॥ ५ ॥ गां
दिनीसुतोऽक्रूरः ॥ ६ ॥ दृष्टिं नाददुः ॥ पश्यंत एव स्थिता इत्यर्थः ॥ ७ ॥

भा०द०प्र० सौवर्णश्टंगारकाश्चतुष्पथाः॥ हर्म्याणि धनिनां गृहाणि च॥ निष्कुटा गृहे चिंता आरामास्तैः॥ श्रेणीना
१५६ मेकरूपशिल्पोपजीविनां सभाभिः॥ उपवेशस्थानैः॥ अन्ये च भवनैर्गृहैः॥ उपस्कृतामलंकृतां॥ अमलैः॥
स्फटिकैः॥ हरितैर्मरकतैः॥ वैदूर्यादिरत्नैर्जुष्टेषु वलभ्यादिषु॥ आविष्टैरुपविष्टैः॥ पारावतैर्वर्हिभि-
श्च नादितां॥ तत्र वलभ्यः॥ गृहपुरोभागेषु वक्रदारुच्छादनानि॥ वेदयः॥ वलभीनामधोदेशे विरचितावष्टंभवे

सौवर्णश्टंगारकहर्म्यनिष्कुटैः श्रेणीसभाभिर्भवनैरुपस्कृतां॥ वैदूर्यवज्रामलनीलविद्रु
मैर्मुक्ताहरिद्भिर्वलभीषु वेदिषु॥ जुष्टेषु जालामुखरंध्रकुट्टिमेष्वाविष्टपारावतवर्हिनादि
तां॥ संसिक्तरथ्यापणमार्गचत्वरां प्रकीर्णमाल्यांकुरलाजतंदुलां॥ आपणकुंभैर्दधिचं
त दनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः॥ सवृंदरंभाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहां स
पट्टिकैः॥२०॥

दिकाजालामुखरंध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिवद्धा भूमयः तेष्विति॥
रथ्या राजमार्गाः॥ आपणाः पण्यविषयः मार्गाः॥ अन्ये चत्वराणि॥ अंगनानि संसिक्तानि रथ्यादीनि यस्यां तां॥ प्रकी
र्णमाल्याद्या यस्यां तां॥ तथा स्वलंकृतानि द्वाराणि येषां ते गृहा यस्यां तां॥ कैः॥ आपणे॥ कुंभैः दध्ना चंदनेन च उ
क्षितैः सिक्तैः॥ प्रसूनानां दीपानां चावलयो येषु तैः॥ वृंदैः फलगुच्छैः उपलक्षिताः रंभाक्रमुका अश्वत्थसहितैः॥

प्रार्थ्यमानो नमस्करोतीति ॥ देवदेवेति ॥ अतः परमन्यत् श्रेयो नास्तीति मत्वा च कृष्णं संबोधयति ॥ १६ ॥ आदौ तत्
वत् यदुचक्रायद्रुह्यतीति ॥ यदुचक्रध्रुक् ॥ तं कंसं हत्वा सुहृदां प्रियं वितरिष्ये दास्यामि ॥ १७ ॥ रामकृष्णावानीतावि
ति स्वकृतं कर्मावेद्य समर्प्येति ॥ १८ ॥ गोपैः परिवारितः प्राविशत् ॥ १९ ॥ श्रीकृष्ण दृष्ट्वा पुरीमनुवर्णयति च चतुर्भिः ॥

देवदेव जगन्नाथ पुण्यश्रवणकीर्त्तन ॥ यदूत्तमोत्तमश्लोक नारायण नमोस्तु ते ॥ १६ ॥ श्रीभगवानु
वाच ॥ आयास्ये भवतो गेहमहमार्यसमन्वितः ॥ यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं ॥ १७ ॥ ए
वमुक्तो भगवता सोऽक्रूरो विमना इव ॥ पुरीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ ॥ १८ ॥ अथाप
राह्णे भगवान्कृष्णः संकर्षणान्वितः ॥ मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितः ॥ १९ ॥ ददर्श तां
स्फाटिकतुङ्गगोपुरद्वारां बृहद्धेमकपाटतोरणां ॥ ताम्रारकोष्ठां परिखादुरासदामुद्यानरम्योपवनो
पशोभितां ॥ २० ॥

नि

ददर्शेत्यादि ॥ स्फाटिकानि तुङ्गानि गोपुराणि पुरद्वाराणि यस्यां तां ॥ बृहन्ति हे ५२
मम्यानि कपाटानि तोरणानि च यस्यां तां ॥ ताम्रं च आरकूटं च तन्मयाः कोष्ठा धान्यागाराश्च शालादयो यस्यां
तां ॥ परिखाः परितः खातगर्त्ताः ॥ ताभिर्दुरासदां दुर्गमां ॥ उद्यानानि दूरस्थानि वनानि रम्याण्युपवनानि

च निकटानि तैरुपशोभितां ॥

भा०द०पू प्रगल्भा यास्ती लालितैर्भिर्हसितानि ईक्षणानि च तैः ॥ श्रियं रमयतीति श्रीरमणः ॥ तेनात्मना वपुषा च तासां हृ
१५८ शां उत्सवं ददन् मनोसिजहार ॥ २२ ॥ मुकुंदश्रुतत्वात् ॥ तदा तच्चेतसः सत्यः ॥ ते दृष्ट्वा तस्य प्रेक्षणं च उत्स्मितं च तदेवसु
धातपाउन्दे एणं सेचनं तेन लब्धो मनोयाभिस्ताः ॥ दृष्ट्वाउद्घाटितनेत्रद्वारेण श्रोत्रानि मनांसि लब्धं प्राप्तं परिषज्यंत

मनांसि तासामरविंदलोचनः प्रगल्भलीलाहसितावलोकनैः ॥ जहार मत्तद्विरदेंद्रविक्रमो दृ
शां ददच्छ्रीरमणात्मनोत्सवं ॥ २२ ॥ दृष्ट्वा मुकुंदः श्रुतमंगुदूतं च चेतसस्तत्र तत्प्रेक्षणोत्स्मितसुधोक्ष
णलब्धमानाः ॥ आनंदमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनंतमरिंदमाधिं ॥ २३ ॥
प्रासादशिखरारूढाः प्रीत्युत्फुल्लमुखांबुजाः ॥ अभ्यवर्षन् सौमनस्यैः प्रमदा बलकेशवौ ॥ २४ ॥
दध्यक्षतैः सोदपात्रैः स्रग्गंधैरभ्युपायनैः ॥ तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ॥ २५ ॥ ऊ
चुः पौरा अहो गोप्यस्तपः किमचरन्महत् ॥ या ह्येतावनुपश्यंति नरलोकमहोत्सवौ ॥ २६ ॥

दृशां प्राप्ति जनितमनंतमाधिं व्यथां जहुः ॥ हे अरिंदम निर्जितकामेति संबोधनं ॥ शृंगाररसे मग्नो
माभूदिति ॥ २३ ॥ सौमनस्यैः ॥ कुसुमसमूहैः ॥ सोभनमनोभावैर्वा ॥ २४ ॥ २५ ॥ पौराः पुरस्त्रियः ॥ २६ ॥ १५९

सकेतुभिः ॥ केतवो ध्वजास्तत्सहितैः ॥ पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः ॥ तत्रेयंरीति ॥ द्वारेउभयतस्तंडु
लानाम्नामुपरि कुंभास्तत्परितः प्रसूनानां तल्लयः कंठपट्टिकाः मुखे चूतादिपल्लवाः ॥ तदुपरि पात्राणि तत्र दीपावल
यः ॥ तत्सैन्निधौ रंभाक्रमुकाः ॥ केतवस्तोरणानि चेति ॥ २० ॥ नरदेवानां वर्त्मना राजमार्गेण तां पुरीं संप्रविष्टौ द्विती
यांतं ॥ औत्सुक्यमेवाह द्वयेन ॥ काश्चिदिति ॥ विपर्यक् ॥ विपरीतं धृतानि ॥ वस्त्राणि भूषणानि च याभिस्ताः ॥ युग

तां संप्रविष्टौ वसुदेवनंदनौ वृत्तौ वयस्यैर्नरदेववर्त्मना ॥ द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्या
णि चैवारुरुहुर्नृपोत्सुकाः ॥ काश्चिद्विपर्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः ॥
कृतैकपत्रश्रवणैकनूपुरा नांक्त्वा द्वितीयं त्वपरास्त्वलोचनं ॥ अश्नंत्य एकास्तदपास्य सोत्स
वा अभ्यज्यमाना अकृतोपमज्जनाः ॥ स्वपंत्य उत्थाय निशम्य निस्वनं निपाययंत्योर्भमपोह्य मा
तरः ॥ २२ ॥

लेषु धार्येषु कुंडलकंकणादिषु एकं विस्मृत्य समीयुः ॥ कृतमेकमेव पत्रं ययोस्ते ॥
श्रवणे यासां ॥ एकमेव नूपुरं चरणाभरणं यासां ताश्च ॥ नांक्त्वा ॥ अनक्त्वा ॥ एकस्मिन्नेव लोचने कज्जलं नि
धाय तद्द्वीजनं त्यक्त्वा ॥ अभ्यज्यमानाः सखीभिः क्रियमाणतैलाभ्यंगाः ॥ अकृतस्नानाः ॥ अपोह्य निरस्य ॥ २१ ॥

ना०द०पू वायकः ॥ तंतुवायकविशेषः ॥ वेषमलंकारं चैलेयैः ॥ वस्त्रमयैः ॥ आकल्पैर्भूषणैः ॥ ३५ ॥ पर्वणि तत्सवे ॥ ३६ ॥ इह
१५८ लोके परमां श्रियं च बलं च ॥ ऐश्वर्यं च स्मृतिं च इंद्रियं च तत्पाटवं ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ क्षेमाय ॥ श्रेभयाय भे

ततस्तु वायकः प्रीतस्तयोर्वेषमकल्पयत् ॥ विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ॥ ३५ ॥ ना
नालक्षणवेषाभ्यां कृस्नरामो विरेजतुः ॥ स्वलंकृतौ बालगजौ पर्वणीव सितेतरौ ॥ ३६ ॥ तस्य
प्रसन्नो भगवान्प्रादात्सारूप्यमात्मनः ॥ श्रियं च परमां लोके बलैश्वर्यस्मृतींद्रियं ॥ ३७ ॥ ततः सु
दाम्नो भवनं मालाकारस्य जग्मतुः ॥ तौ दृष्ट्वा स[मुत्थाय] ननाम शिरसा भुवि ॥ ३८ ॥ तयोरा
सनमानीय पाद्यं चार्घ्यार्हणादिभिः ॥ पूजां सानुगयोश्चक्रे स्रक्तांबूलानुलेपनैः ॥ ३९ ॥ प्राह
नः सार्थकं जन्म पावितं च कुलं प्रभो ॥ पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वां ॥ ४० ॥ भवंतौ
किल विश्वस्य जगतः कारणं परं ॥ अवतीर्णाविहांशेन क्षेमाय च भवाय च ॥ ४१ ॥ नहि वां वि
षमा दृष्टिः सुहृदोर्जगदात्मनोः ॥ समयोः सर्वभूतेषु भजंतं भजतोरपि ॥ ४२ ॥

वाय उद्भवाय ॥ ४१ ॥ रजकवधेन वायकानुग्रहेण युवयोः ॥ विषमा दृष्टिरिति या आशंका तां न शंकनीयेत्याह

नहि वामिति ॥ तत्र हेतुः समयोरिति ॥ तत्रापि हेतुद्वयं ॥ सुहृदोरिति जगदात्मनोरिति च ॥ ४२ ॥ १५८

रजको वस्त्रनिर्णेजकः ॥ स एव वस्त्राणां रंगमपि कुर्वन् रंगकारः ॥ २७ ॥ २८ ॥ रुषितः कुपितः ॥ २९ ॥ हे उद्वृत्ताः गिरिव

कं १ रजकं कंचिदायान्तं रंगकारं गदाग्रजः ॥ दृष्ट्वायाचत वासांसि धौतान्यत्युत्तमानि च ॥ २७ ॥ देह्यावयोः

ता २ समुचितान्यंग वासांसि चार्हतोः ॥ भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ॥ २८ ॥ स याचितो भगवता

परिपूर्णेन सर्वतः ॥ साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ॥ २९ ॥ ईदृशान्येव वासांसि नित्यं गि

रिवनेचराः ॥ परिधत्त किमुद्वृत्ता राजद्रव्याण्यभीप्सथ ॥ ३० ॥ यातास्तु बालिशा मैवं प्रार्थ्यं यदि जि

जीविषा ॥ वध्नंति घ्नंति लुंपंति दृप्तं राजकुलानि हि ॥ ३१ ॥ एवं विकत्थमानस्य कुपितो देवकीसुतः ॥

रजकस्य कराग्रेण शिरः कायादपाहरत् ॥ ३२ ॥ तस्यानुजीविनः सर्वे वासकोशान् विसृज्य वै ॥ दु

द्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः ॥ ३३ ॥ वसित्वात्मप्रिये वस्त्रे कृष्णः संकर्षणस्तथा ॥

शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ॥ ३४ ॥

नेचराः वने ये नित्यं ते यूयं ॥ परिधत्तेति संभावनायां लोट् ॥ अभीप्सथ प्रार्थयध्वं ॥ ३० ॥ राजकुलानि राजकीया

ः लुंपंति निःस्वं कुर्वंति ॥ ३१ ॥ ३२ ॥ वासकोशान् वस्त्रपुटकान् ॥ ३३ ॥ ३४ ॥

भा०द०पू० १५९ हे अंगने वरोरु इति सोपहासं संबोध्य पृछति ॥ त्वं का एतत् अनुलेपनं कस्य वा ॥ उ ह इति निपातो भ्रू विक्षेप युक्ते वितर्के ॥ श्रेयस्
त्सेवा .. सद्यः फलेदित्याह न चिरादिति ॥ २ ॥ तिस्रो ग्रीवोरः कटयो वक्रा इति त्रिवक्रेति नाम यस्याः सा ॥ अनुले
पकर्मणि कंसस्य वङ्कमताऽदास्यस्मि ॥ ३ ॥ रूपं च अंगसौष्ठवं पेशलं च सौष्ठवं पेशलं च शोकुमार्य्यं माधुर्यं चे

स्लो २ कात्वं वरोर्वेतदुहानुलेपनं कस्यांगने वा कथयस्व साधु नः ॥ देह्यावयोरंगविलेपमुत्तमं श्रे
यस्ततस्ते न चिराद्भविष्यति ॥ २ ॥ सैरंध्र्युवाच ॥ दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामाह्य
नुलेपकर्मणि ॥ मद्भावितं भोजपतेरतिप्रियं विना युवां कोन्यतमस्तदर्हति ॥ ३ ॥ रूपपेश
लमाधुर्यहासितालापवीक्षितैः ॥ धर्षितात्मा ददौ सांद्रमुभयोरनुलेपनं ॥ ४ ॥ ततस्तावंग
२२ रागेण स्ववर्णेतरशोभिना ॥ संप्राप्तपरभागेन सुशुभाते ऽनुरंजितौ ॥ ५ ॥ प्रसन्नो भगवान् कु
ब्जां त्रिवक्रां रुचिराननां ॥ ऋज्वीं कर्तुं मनश्चक्रे दर्शयन् दर्शने फलं ॥ ६ ॥

रसिकताहसितं च ॥ आलापश्च वीक्षितं च तैः ॥ धर्षिता आत्मा मोहितचित्ता सांद्रं घनं ॥ ४ ॥ स्ववर्णेतरशोभिना र
क्तकृष्णयोर्वर्णाभ्यामितरः पीतादिवर्णः तेन शोभितुं शीलं यस्य तेन संप्राप्तपरभागेण संप्राप्तः परभा
गः शोभातिशयो येनेति वा तेनानुरंजितौ ॥ ५ ॥ स्वदर्शने सद्यः फलं दर्शयन् ॥ ६ ॥ १५९

४३ ॥ इत्यभिप्रेत्येति ॥ एवं विज्ञापयन् ॥ अभिप्रेत्य तन्मतं ज्ञात्वा ॥ ४४ ॥ ४५ ॥ ४६ ॥ अन्वयवर्द्धिनीं वंशोत्सवमतीमित्यर्थः ॥
अपार्थितं श्रीप्रभृतिकं च वरं दत्त्वा ततो निर्जगामेति ॥ स्वैरं चरन्न् मधुपुरे रजकं निहत्य कंसप्रदाय च वरान्किल त्वा

तावाज्ञापयतं भृत्यं किमहं करवाणि वां ॥ पुंसोऽत्यनुग्रहो ह्येष भवद्भिर्यन्नियुज्यते ॥ ४३ ॥ इ
त्यभिप्रेत्य राजेन्द्र सुदामा प्रीतिमानसः ॥ शस्तैः सुगंधैः कुसुमैर्माला विरचिता ददौ ॥ ४४ ॥ ता
प्रीतो ३ भिः स्वलंकृतौ कृष्णरामौ सहानुगौ ॥ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ॥ ४५ ॥ सोऽपि वव्रे
ऽचलां भक्तिं तस्मिन्नेवाखिलात्मनि ॥ तद्भक्तेषु च सौहार्दं भूतेषु च दयां परां ॥ ४६ ॥ इति तस्मै वरं
दत्त्वा श्रियं चान्वयवर्द्धिनीम् ॥ बलमायुर्यशः कांतिं निर्जगाम सहाग्रजः ॥ ४७ ॥ इति श्रीमद्भा
गवते महापुराणे दशमस्कंधे पुरप्रवेशो नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ श्रीबादरायणिरुवाच ॥
अथ व्रजन्राजपथेन माधवः स्त्रियं गृहीतांगविलेपभाजनां ॥ विलोक्य कुब्जां युवतीं वराननां पप्र
च्छ यांतीं प्रहसन्रसप्रदः ॥ १ ॥
यकाय ॥ मालाकृतं समनुकंप्य च कारकुब्जां मुक्त्वा धनुश्च सहसा न मथन्न बभंज ॥ ४७ ॥ इति दशमे एकचत्वारिंशः ॥ ४१ ॥
द्विचत्वारिंशके कुब्जोन्नमनं धनुषो भिदा ॥ वधस्तद्रक्षिणां कंसारिष्टं गोत्सवादि च ॥ अंगविलेपार्हचंदनादयः गृही

तानिगागलिविमानितिपयातात्समुपे ॥ सःस्वकंपदः ॥ ९ ॥

भा० द० ५ लेख्याचित्रन्यस्ता इव मूर्तयो यासां ताः ॥१४॥ धनुर्मखशालां पृच्छन् ॥१५॥ प्रसह्य बलात् ॥१६॥ निमिषेणाऽतिशीघ्रं
१६० मदकरी मत्तहस्ति ॥१७॥१८॥ गृह्यतां वध्यतामिति वदन्तो जिघृक्षव आवव्रुः आवृतवंतः ॥१९॥ न केवलं क्रुद्धौ किंतु भग्न

तद्दर्शनस्मरक्षोभादात्मानं नाविदन् स्त्रियः ॥ विस्रस्तवासःकवरवलया लेख्यमूर्तयः ॥१४॥ ततः
पौरान् पृच्छमानो धनुषः स्थानमच्युतः ॥ तस्मिन् प्रविष्टो ददृशे धनुरैन्द्रमिवाद्भुतं ॥१५॥ पुरु
षैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत् ॥ वार्यमाणो नृभिः कृष्णः प्रसह्य धनुराददे ॥१६॥ करेण वामे
न सलीलमुद्धृतं सज्यं च कृत्वा निमिषेण पश्यतां ॥ नृणां विकृष्य प्रबभंज मध्यतो यथेक्षुदंडं म
दकर्युरुक्रमः ॥१७॥ धनुषो भज्यमानस्य शब्दः खं रोदसी दिशः ॥ पूरयामास यं श्रुत्वा कंसस्त्रासमुपा
गमत् ॥१८॥ तद्रक्षिणः सानुचराः कुपिता आततायिनः ॥ गृहीतुकामा आवव्रुर्गृह्यतां वध्यतामि
ति ॥१९॥ अथ तान् दुरभिप्रायान् विलोक्य बलकेशवौ ॥ क्रुद्धौ धन्वन आदाय शकले तांश्च जघ्नतुः ॥२०
बलं च कंसप्रहितं हत्वा शालामुखात्ततः ॥ निष्क्रम्य चेरतुर्हृष्टौ निरीक्ष्य पुरसंपदः ॥२१॥

स्य धनुषः शकले गृहीत्वा जघ्नतुश्चेति ॥२०॥ परतः प्रातर्गंतव्यमिति शालामुखादेव पुनर्निष्क्रम्य ॥२१॥ एम १६०

तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापीड्य हे श्रेष्ठ ल्यावुत्तानेऽत्युन्नते यस्मिन्या एणेत्तेन चिबुके मुखस्याधो भागे धृत्वा
अधःपातं देहमुन्नमयामास ॥७॥ तद्दैव ऋज्जु समानमंगं यस्याः सा ॥ वृहत्यो श्रोणिपयोधरौ च यस्याः सा मुकुंद
स्पर्शनादितिमुख्यं कारणं ॥८॥९॥१०॥११॥ आधिविकर्षणं मनःपीडाशमनं ॥ केसवधेन साधित्तः ॥ अघे:

पद्भ्यामाक्रम्य प्रपदे हस्तांगुलोत्तानपाणिना ॥ प्रगृह्य चिबुके ध्यात्मुकुंदनीनमद्दच्युतः ॥७॥ सा तद्दृज्जु
समानांगी वृहच्छ्रोणीपयोधरा ॥ मुकुंदस्पर्शनात्सद्यो बभूव प्रमादोत्तमा ॥८॥ ततो रूपगुणौदा
र्यसंपन्ना प्राह केशवं ॥ उत्तरीयांतमाकृष्य स्मयंती जातहृच्छया ॥९॥ एहि वीर गृहं यामो न त्वां
त्यक्तुमिहोत्सहे ॥ त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ ॥१०॥ एवं स्त्रिया याच्यमानः कृष्णो रामस्य
वीक्ष्या पश्यतः ॥ मुखं वीक्ष्यानुगानां च प्रहसंस्तामुवाच ह ॥११॥ एष्यामि ते गृहं सुभ्रु पुंसामाधिविकर्षणं
साधितार्थोऽगृहाणां नः पांथानां त्वं परायणं ॥१२॥ विसृज्य माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथैः ॥
नानोपायनतांबूलस्रग्गंधैः साग्रजोर्चितः ॥१३॥

सुहृदां प्रयोजनं येन सः ॥ अगृहाणां ॥ अकृतदाराणां ॥ पांथानां प्रवासिनां ॥ परमयनं ॥ आश्रयस्थं
१२ ॥ मधुरया गिरा तां प्रस्थाप्य ॥ व्रजन् वणिक्पथैः वणिग्भिरर्चितः ॥१३॥ ॥ ऽऽ ॥ ॥ रामराम राम ऽऽ ॥ ॥

भा०द०प्र
१६१

कृश्चिदुभयथा स्वप्नजागरितभेदेन प्रत्येकं मृत्योर्दौत्यकाराणि च॥ तथा च मंत्रः॥ इच्छादुत्तुकश्चापततद्दिरण्या
हो॥ यो मुखं रत्तसांद्रुत्तश्चागतद्दत्यादि॥ तथा यदेतद्भूतान्यन्वाविश्य दैवी वाचं वदसीत्यादिश्च॥ २६॥ तानि द
र्शयति श्लोकत्रयेण॥ जलादौ प्रतिरूपे दृश्यमानेपि स्वशिरसस्तत्रादर्शनं॥ असत्यपि द्वितीये च तत्तु षोडत्तस्द्धनिं गुल्या

दीर्घप्रजागरोद्भूतोद्दुर्निमित्तानि दुर्मतिः॥ बहून्यपि च पश्यन् भयथा मृत्योर्दौत्यकराणि च॥ २६॥ अदर्श
ने स्वशिरसः प्रतिरूपे च सत्यपि॥ असत्यपि द्वितीये च हृद्रूपं ज्योतिषां तथा॥ छिद्रप्रतीतिश्छाया
यां प्राणे घोषानुपश्रुतिः॥ स्वर्णप्रतीतिर्वृक्षेषु स्वपदानामदर्शनं॥ स्वप्ने प्रेतपरिष्वंगः खरयान
विषादनं॥ यायान्नलदमाल्यैकं तैलाभ्यक्तो दिगंबरः॥ २७॥ अन्यानि चैत्यंभूतानि स्वप्नजागरिता
नि च॥ पश्यन्मरणसंत्रस्तो निद्रां लेभे न चिंतया॥ २८॥

द्वे ज्योतिषां चंद्रादीनां द्वित्वं॥ छायायां प्रतिबिंबे छिद्रप्रतीति॥ पिहितकर्णद्वयस्य योऽतः श्रूयमाणो ध्वनिः स प्राण
घोषस्तस्य अश्रवणं वृक्षेषु स्वर्णप्रतीतिः॥ रजःकर्दमादिषु स्वपदानाम दर्शनम्॥ एतानि जागरितानि दुर्निमित्तानि॥ स्व
प्नान्याह॥ स्वप्न इति प्रेतैः परिष्वंगः खरमारुह्य यानं विषभक्षणं नलदमाली जवाकुसुममाली मायादिति यत
तद्प्येकम्॥ दुर्निमित्तम्॥ २७॥ २८॥ ॥ राम राम॥ ॥ ॥ ऽऽ॥ ॥ ॥ ऽऽ॥ ॥ ऽऽ॥ ॥ ॥ ऽऽ १६१

तेजःप्रभावं प्रागल्भ्यं धृष्टतां ॥ २२ ॥ शाकटं शकटावमोचनस्थानं ॥ २३ ॥ मुकुंदस्य विगमे व्रजान्निर्गमसमये यात्रा
शिषः आप्तास्ततः सुखप्रभाता रजनीयं ॥ अंघ्रियुग्मं वंतत्र द्रष्टा भविष्यथ इत्यादि यदुक्तं वत्यः ताभ्रत्ताः सत्या बभू
वुः पुरुषभूषणस्य श्रीकृष्णस्य गात्रस्थलस्त्री देहस्य शोभा ॥ कथंभूतस्य गात्रस्य तु अहो इतरान् ब्रह्मादीन् हित्वा

तयोस्तदद्भुतं वीर्यं निरीक्ष्य पुरवासिनः ॥ तेजः प्रागल्भ्यरूपं च मेनिरे विबुधोत्तमौ ॥ २२ ॥ तयोर्विचर
तोः स्वैरमादित्योऽस्तमुपेयिवान् ॥ कृष्णरामौ वृतौ गोपैः पुराच्छकटमीयतुः ॥ २३ ॥ गोप्यो मुकुंदवि
गमे विरहातुरा या आशासताशिषऽस्ता मधुपुर्यभूवन् ॥ संपश्यतां पुरुषभूषणगात्रलक्ष्मीं हि
त्वेतरान्नु भजतश्चकमेऽयनं श्रीः ॥ २४ ॥ अवनिक्ताङ्घ्रियुगलौ भुक्त्वा क्षीरोपसेचनं ॥ ऊषतुस्तां
सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितं ॥ २५ ॥ कंसस्तु धनुषो भंगं रक्षिणां स्वबलस्य च ॥ वधं निशम्य गो
विंदरामविक्रीडितं परम् ॥ ॥

यदयनं आश्रयं श्रीः कामयामास ॥ यं गात्रलक्ष्मीमिति वा ॥ २४ ॥ अवनिक्तं क्षालितमंघ्रियुगलं ययोस्तौ ॥ क्षीरे
मिश्रमन्नं भुक्त्वा सुखं न्यवसतां ॥ २५ ॥ परं केवलं गोविंदरामयोर्विक्रीडितं तत् ॥ न तु पराक्रमः ॥ ॥ राम ॥

भा० द० स० इति श्री दशमे द्विचत्वारिंशः ॥ ४२ ॥ त्रिचत्वारिंशके हत्वा गजेंद्रं रामकृष्णयोः ॥ रंगप्रवेशः सोभाग्यं चाणूरेण च भा
१६२ षणं ॥ पूर्वे ध्युरेवकृतशौचं शुद्धत्वं निरपराधत्वं याभ्यां तौ ॥ एतदुक्तं भवति ॥ धनुर्भंगादिना श्रावाभ्यां निःशेषचर्ये
सूचितेपि पितरौ न मुंचति ॥ श्रावाच पुनर्जिघांसति ॥ श्रतोऽस्य मातुलस्यापि वधे नावयोर्दोष इत्येवं कृतापराधपरि

इति श्रीमद्भागवते महापुराणे दशमस्कंधे मल्लरंगोपवर्णनं नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ श्री
शुक उवाच ॥ अथ कृष्णश्च रामश्च कृतशौचौ परंतप ॥ मल्लदुंदुभिनिर्घोषं श्रुत्वा द्रष्टुमुपेयतुः ॥
रंगद्वारं समासाद्य तस्मिन्नागमवस्थितम् ॥ अपश्यत्कुवलयापीडं कृष्णोऽम्बष्ठचोदितं ॥ २ ॥ प्र ३
बद्ध्वा परिकरं शौरिः समुह्य कुटिलालकान् ॥ उवाच हस्तिपं वाचा मेघनादगभीरया ॥ ३ ॥ अंब
ष्ठांबष्ठ मार्गं नौ देह्यपक्राम मा चिरं ॥ नो चेत्सकुंजरं त्वाद्य नयामि यमसादनं ॥ ४ ॥ एवं निर्भर्त्सि
तोऽम्बष्ठः कुपितः कोपितं गजम् ॥ चोदयामास कृष्णाय कालांतकयमोपमम् ॥ ५

हारावितिमल्लानां दुंदुभीनां च निर्घोषं मल्लतालनिर्घोषं वा ॥ १ ॥ अंबष्ठेन हस्तिपस्तेन प्रचोदितं ॥ २ ॥ परिकरं
पुरुषोचितं परिधानं कृत्वा ॥ समुह्य निबध्य ॥ ३ ॥ ४ ॥ अंतको मृत्युः कालस्तन्निमित्तं यमस्तन्नियंता तैरुपमा यस्य
१६२

कृष्णेन कथंचित्प्रभातायां पुनः सूर्ये चाद्भ्यः समुत्थित इति ॥ तथा च श्रुतिः ॥ य उदगान्महतोऽर्णवाद्विभ्राजमानः
सलिलस्य मध्यात्समा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनात्विति ॥ २९ ॥ ३० ॥ यथोपजोषं यथासुखं

व्युष्टायां निशि कौरव्य सूर्ये चाद्भ्यः समुत्थिते ॥ कारयामास वै कंसो मल्लक्रीडामहोत्सवं ॥ २९ ॥ आन
र्चुः पुरुषा रंगं तूर्यभेर्यश्च जघ्निरे ॥ मंचाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः ॥ ३० ॥ तेषु पौरा
जानपदा ब्रह्मक्षत्रपुरोगमाः ॥ यथोपजोषं विविशू राजानश्च कृतासनाः ॥ ३१ ॥ कंसः परिवृतोऽ
मात्यै राजमंच उपाविशत् ॥ मंडलेश्वरमध्यस्थो हृदयेन विदूयता ॥ ३२ ॥ वाद्यमानेषु तूर्येषु
मल्लतालोत्तरेषु च ॥ मल्लाः स्वलंकृता दृप्ताः सोपाध्यायाः समाविशन् ॥ ३३ ॥ चाणूरो मुष्टिकः कूटः
शलस्तोशल एव च ॥ त आसेदुरुपस्थानं वल्गुवाद्यप्रहर्षिताः ॥ ३४ ॥ नंदगोपादयो गोपा भो
जराजसमाहूताः ॥ निवेदितोपायनास्त एकस्मिन्मंच आविशन् ॥ ३५ ॥

३१ । ३२ ॥ मल्लतालमुत्तरमुत्कर्षः श्रूयते येषु तेषु तूर्येषु उपाध्याया मल्लाचार्याः ॥ ३३ ॥ उपस्थानं मल्लरंगं ॥ ३४ ॥
समाहूताः ॥ निवेदितानि उपायनानि यैस्ते ॥ ३५ ॥ रामराम राम राम राम ॥ ॥ ऽऽ ॥ ऽऽ ॥ ॥ ॥

भा० द० ए० ॥ १२ ॥ १३ ॥ १४ ॥ रंगं समाविशत् ॥ १५ ॥ तदा च वीरश्रिया बभौ कथंभूतः अंसे न्यस्तं विषाणं गजदंतो येन सः अस
१६३ ग्जो रक्तस्य मदस्य च विंदुभिः परितो ऽंकितः ॥ विरूढा उद्गताः स्वेदकणिकास्ताभिरुपलक्षितं वदनांबुरुहं यस्य
सः ॥ १६ ॥ न केवलं स एकः समाविशत् किंतु वृतो गोपैरिति ॥ १७ ॥ तत्र शृंगारादिसर्वरसकंदर्वमूर्त्तिर्भूवास्तत्तद्भि

स्वविक्रमे प्रतिहते कुंजरेंद्रो ऽत्यमर्षितः ॥ चोदयामास मह्यामात्रैः कृष्णमभ्यद्रवद्रुषा ॥ १२ ॥ तमापतंत
मासाद्य भगवान्मधुसूदनः ॥ निगृह्य पाणिना हस्तं पातयामास भूतले ॥ १३ ॥ पतितस्य पदाक्रम्य मृगेंद्र इ
व लीलया ॥ दंतमुत्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः ॥ १४ ॥ मृतकं द्विपमुत्सृज्य दंतपाणिः समाविशत्
१५ ॥ अंसन्यस्तविषाणो ऽसृङ्मदविंदुभिरंकितः ॥ विरूढस्वेदकणिकावदनांबुरुहो बभौ ॥ १६ ॥ वृ
तौ गोपैः कतिपयैर्बलदेवजनार्दनौ ॥ रंगं विविशतू राजन् गजदंतवरायुधौ ॥ १७ ॥ मल्लानामशनि
र्नृणां नरवरः स्त्रीणां स्मरो मूर्त्तिमान् गोपानां स्वजनो ऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ॥ मृ
त्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः ॥ १८ ॥

प्रायानुसारेण बभौ न साकल्येन ॥ सर्वेषामित्याह ॥ मल्लादीनामिति ॥ मल्लादीनां दशानां द्रष्टृणामशन्यादिरूपेण दश
धा विदितः सन् साग्रजो रंगं गत इत्यन्वयः ॥ मल्लादिष्वभिव्यक्तो रसाः क्रमेण श्लोके न निबध्यंते रौद्रो ऽद्भुतश्च शृंगा

विगलितो ऽच्युतः॥ मुष्टिना निहत्य अलीयत अदृश्यो बभूव॥ ६॥ अच तत्राणः अपश्यन्॥ घ्राणमेव घ्राणं तेन दृष्टिर्दर्शनं
यस्य सः॥ लोचनागोचरमपि द्विपस्य वो घ्राणेन जानंतीति प्रसिद्धं॥ परामृशात धृतवान्॥ पुष्करेण शुंडाग्रेण सश्रीहरिकं
प्रसह्य बलेन॥ ७॥ धनुषः धनुषां पंचविंशतिर्यावत्॥ तावंतं देशं गजो विचकर्ष आकृष्य नीतवान्॥ कं॥ कइव वृश्चिक
कीटः हस्तमन्वृत्य करेणातरसा गृहीतः॥ करादिगलितं सोऽमुं निहत्या घृष्टलीयत॥ ८॥ संक्रुद्धस्त
मुच्चघ्राणो घ्राणदृष्टिसकेशवं॥ परामृशात् पुष्करेण प्रसह्य स विनिर्गतः॥ ७॥ पुच्छे प्रगृह्याति वे
लं धनुषः पंचविंशतिं॥ विचकर्ष यथा नागं सुपर्णः द्रुवलीलया॥ ८॥ सपर्या वर्तमानेन स
व्यदक्षिणतो ऽच्युतः॥ बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः॥ ९॥ ततोभिमुखमभ्येत्य
पाणिनाहत्य वारणं॥ प्राद्रवन्पातयामास स्पृश्यमानः पदे पदे॥ १०॥ सधावत्क्रीडया
भूमौ पतित्वा सहसोत्थितः॥ तं मत्वा पतितं क्रुद्धो दंताभ्यां स हनं तेस्मिति॥ ११॥
६ यथा नागं सर्पं व हर्तमानं गजं सुपर्णः गरुड इव स्वयमिति॥ आविरासीद्यथा प्राच्यां दिशि इंदुरिव पुष्कलइतिवत्॥ पस
पर्यावर्त्तमानेनेति॥ पुच्छग्राहिणा कृष्णं॥ र हीतु यदिदक्षिणतः परिवर्त्तते॥ तदा दक्षिणेनो भ्रामयं तेन सह बभ्राम
गोवत्सेन भ्राम्यमाणेन बालकः॥ स एव कृष्णो यथा अन्यो वा बालक इवेति॥ ९॥ वारणं गजं प्राद्रवन्॥ प्रकर्षेण समंततो धाव

 विस्मितानां वाक्यान्याह ॥ एतावित्यादिभिरष्टभिः ॥ २३ ॥ किलेति सर्वत्रान्वयः ॥ २४ ॥ गुह्यकः शंखचूडः ॥ अन्ये
 चाघासुरादयः ॥ २५ ॥ २६ ॥ २७ ॥ आश्रमं ईषच्छ्रममुक्तं सुखं ॥ अश्रममुखमिति वा ॥ यद्वा ॥ आश्रमं यथा भवति त

एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि ॥ अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥ २३ ॥ एष वै किल
देवक्यां जातो नीतश्च गोकुलं ॥ कालमेतं वसन् गूढो ववृधे नंदवेश्मनि ॥ २४ ॥ पूतनानेन नीतांतं
चक्रवातश्च दानवः ॥ अर्जुनौ धेनुकः केशी गुह्यकोन्ये च तद्विधाः ॥ २५ ॥ गावः सपाला एतेन दावा
ग्नेः परिमोचिताः ॥ कालियो दमितः सर्प इंद्रश्च विमदः कृतः ॥ २६ ॥ सप्ताहमेकहस्तेन धृतोद्रिप्र
वरोमुना ॥ वर्षवाताशनिभ्यश्च परित्रातं च गोकुलं ॥ २७ ॥ गोप्योस्य नित्यमुदितहसितप्रेक्षणं मु
खं ॥ पश्यंतो विविधास्तापांस्तरंति स्माश्रमं मुदा ॥ २८ ॥ वदंत्यनेन वंशोयं यदोः सुबहुविश्रुतः
श्रियं यशो महत्वं च लप्स्यते परिरक्षितः ॥ २९ ॥ अयं चास्याग्रजः श्रीमान् रामः कमललोचनः ॥
प्रलंबो निहतो येन वत्सको धेनुकादयः ॥ ३० ॥

था तरंति स्मेति ॥ २८ ॥ अनेन परिरक्षितो यदुवंश इति ॥ सुबहुविश्रुतः सन् श्रयादि लप्स्यत इति वदंति ॥ २९ ॥ धेनु

वि १

इति तथा ॥ अनेन वीभत्स उक्तः विकत्थनं च ॥ कं वज्रसारसर्वांगावित्यादिना वक्ष्यते ॥ १५ ॥ उद्विग्नो भीतो बभूव ॥ १६ ॥ य
यानतावितिनिर्भयत्वं दर्शितं ॥ १७ ॥ प्रहर्षवेगेन उत्कलितानि उज्जृंभितानि ईक्षणानि चक्षूंषि येषां ते ॥ तयोराननं पपुः प
रितु न तृप्ताः ॥ निराकांक्षा न बभूवुरित्यर्थः ॥ १८ ॥ तदेवाह पिबंत इति ॥ श्लिष्यंतः ॥ परिष्वंगं कुर्वंत इव लक्षिता इत्यर्थः ॥ य

हते कुवलयापीडे दृष्ट्वा तावपि दुर्जयौ ॥ कंसो मनस्व्यपि तदा भृशमुद्विविजे नृप ॥ १९ ॥ तौ रेजतू रं
गगतौ महाभुजौ [illegible] विचित्रवेषाभरणस्रगंबरौ ॥ यथा नटावुत्तमवेषधारिणौ मनः
क्षिपंतौ प्रभया निरीक्षतां ॥ २० ॥ निरीक्ष्य तावुत्तमपूरुषौ जना मंचस्थिता नागरराष्ट्रका नृप ॥ प्र
हर्षवेगोत्कलितेक्षणाननाः ॥ पपुर्न तृप्ता नयनैस्तदाननं ॥ २१ ॥ पिबंत इव चक्षुर्भ्यां लिहंत
इव जिह्वया ॥ जिघ्रंत इव नासाभ्यां श्लिष्यंत इव बाहुभिः ॥ ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतं
तद्रूपगुणमाधुर्यप्रागल्भ्यस्मारिता इव ॥ २२ ॥

यथादृष्टं ॥ धनुर्भंगादि ॥ यथाश्रुतं गोवर्द्धनोद्धरणादि ॥ तत्तदनुरूपमित्यर्थः ॥ प्रत्यक्षं च तयो रूपं गजदंतादियु
क्तं ॥ गुणाः शौर्यादयः माधुर्यं हसितालापादि ॥ प्रागल्भ्यं धार्ष्ट्यं तैः स्मारिता इव स्मरणं प्रापिता इव ॥ २२ ॥ ॥ छ

मु३

भा० द० ए वलिभिर्मौष्टिकैः सह॥ नानयोऽधर्मः विक्रमं पराक्रमं कुरु॥ मुष्टिको विक्रमतादित्यनुषंगः॥ ४०॥ इतिश्रीद
१६५ शमे त्रयश्चत्वारिंशः॥ ४३॥ चतुश्चत्वारिंशके तु मल्लकंसादिमर्द्दनं॥ कंसयोषित्समाश्वास्य ताभ्यां पित्रोश्च
दर्शनम्॥ एवं श्रीनाप्रकारेणचार्चितः संकल्प एव यस्य सः॥ १॥ २॥ वाहुभ्यामध्यात्कनिष्ठांगुलिव्यतिरेकेण हु

तस्माद्भवद्भ्यां वलिभिर्योधव्यं नानयोऽत्र वै॥ मयि विक्रम वार्ष्णेय वलेन सह मुष्टिकः॥
४०॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे मल्लक्रीडायां त्रयश्चत्वारिंशोऽध्यायः॥ ४३॥
श्रीशुक उवाच॥ एवं चर्चितसंकल्पो भगवान्मधुसूदनः॥ आससादाथ चाणूरं मुष्टि
कं रौहिणीसुतः॥ १॥ हस्ताभ्यां हस्तयोर्वद्ध्वा पद्भ्यामेव च पादयोः॥ विचकर्षतुरन्योन्यं
प्रसह्य विजिगीषया॥ २॥ अरत्नी द्वे अरत्नीभ्यां जानुभ्यां चैव जानुनी॥ शिरः शीर्ष्णो
रसोरस्तावन्योन्यमभिजघ्नतुः॥ ३॥ परिभ्रामणविक्षेपपरिरंभावपातनैः॥ उत्सर्पणापस
र्पणैश्चान्योन्यं प्रत्यरुंधताम्॥ ४॥

तद्धस्तो मुष्टिर्हस्तोऽरत्नी॥ ३॥ परिभ्रामणं हस्तादिषु गृहीत्वा परितश्चालनं विक्षेपो नोदनं परिरं
भो वाहुभ्यां निष्पीडनं॥ अवपातनं मधः क्षेपः॥ उत्सर्पणमुल्लंघ्य पुरतो गमनं॥ अपसर्पणं पृष्ठ

जनेष्वेवं ब्रुवाणेषु सत्सु तदसहमानश्चाणूरोऽब्रवीदिति॥३१॥३२॥३३॥३४॥ हे कंस प्रियं करवाम इति राज्ञि

जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च॥ कृष्णरामौ समाभाष्य चाणूरो वाक्यमब्रवीत्॥३१॥ हे नं
दसूनो हे राम भवंतौ वीर्य्यसंमतौ॥ नियुद्धकुशलौ श्रुत्वा राज्ञाहूतौ दिदृक्षुणा॥३२॥ प्रियं राज्ञः
प्रकुर्वत्यः श्रेयो विंदंति वै प्रजाः॥ मनसा कर्मणा वाचा विपरीतमतोऽन्यथा॥३३॥ नित्यं प्रमुदिता
गोपा वत्सपाल यथास्फुटं॥ वनेषु मल्लयुद्धेन क्रीडंतश्चारयंति गाः॥३४॥ तस्माद्राज्ञः प्रियं यूयं
वयं ५ चकरवामहे॥ भूतानि नः प्रसीदंति सर्वभूतमयो नृपः॥३५॥ तन्निशम्याब्रवीत्कृष्णो देशको
लोचितं वचः॥ नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनंद्य च॥३६॥ प्रजा भोजपतेरस्य वयं चापि
वनेचराः॥ करवाम प्रियं नित्यं तन्नः परमनुग्रहः॥३७॥ बाला वयं तुल्यबलैः क्रीडिष्यामो यथो
चितम्॥ भवेन्नियुद्धं माधर्मः स्पृशेन्मल्लसभासदः॥३८॥ चाणूर उवाच॥ न बालो न किशोर
स्त्वं बलश्च बलिनां वरः॥ लीलयेभो हतो येन सहस्रद्विपसत्वभृत्॥३९॥

प्रीतिभूतानि प्रसीदेयुः॥३५॥३६॥३७॥ यथो
चितं नियुद्धं भवेत्॥ मल्लसभासदः मल्लसभाधिकृतान् जनान् अधर्मो मा स्पृशेदित्येतदर्थः॥ हे मल्ल

॥ तिवा॥२८॥ सहस्रद्विपानां सत्वं बलं बिभर्त्तीति॥
या॥२९॥

भा०द०प
१६६

अपराऊचुः नसभामिति ॥ अब्रुवन् ॥ ज्ञात्वापितूष्णींतिष्ठन् ॥ विब्रुवन् ॥ विपरीतंब्रुवन् ॥ अज्ञः नजानामीतिब्रुवन् ॥ अतः
प्राज्ञः सभांनाप्रविशेदिति ॥ १० ॥ वल्गतः शत्रुमभितइति ॥ शत्रोःसर्वतोधावतः ॥ कंसस्यश्रमवारिणाउप्तंव्याप्तं
वदनांबुजंदृश्यताम् ॥ ११ ॥ अन्याऊचुः ॥ किंनपश्यतेति ॥ सामर्षम् ॥ सक्रोधं ॥ हासेनसंरंभआवेशस्तेनशोभि

नसभांप्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् ॥ अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते ॥ १० ॥
वल्गतः शत्रुमभितः कंसस्यवदनांबुजम् ॥ वीक्ष्यतांश्रमवार्युप्तं पद्मकोशमिवांबुभिः ॥ ११ ॥
किंनपश्यत रामस्यमुखमाताम्रलोचनं ॥ मुष्टिकंप्रतिसामर्षं हाससंरंभशोभितम् ॥ १२ ॥ पुण्या
बतव्रजभुवोयदयंनृलिंगगूढः पुराणपुरुषोवनचित्रमाल्यः ॥ गाःपालयन्सहबलः क्वणयंश्च
वि१ वेणुंक्रीडयांचतिगिरित्ररमार्चितांघ्रिः ॥ १३ ॥

भितं ॥ १२ ॥ अन्याऊचुः ॥ पुण्याबतेति ॥ नृलिंगेनमनुष्यदेहेनगूढः ॥ वनस्यानिविचित्राणिमाल्यानियस्यसः
गिरित्रः शिवः रमाचताभ्यामर्चितौअंघ्रीयस्यसः ॥ अयंभावः ॥ धिगिमांसभां ॥ यस्यामयंपराभूयते ॥ तास्तुव्र
जभुवोधन्याः ॥ यत्रयासुअयंकृष्णोविविधक्रीडयांचति ॥ गच्छतीति ॥ १३ ॥ १६६

उत्थापनं पादौ जानुनी च पिंडीकृत्य पतितस्योच्चाटनं ॥ उन्नयनं हस्ताभ्यामुद्धृत्यनयनं ॥ चालनं कंगादिलग्नस्य
निःसारणं ॥ स्थापनं पाणिपादादिपिंडीकरणं ॥ एवं परमात्मनो देहस्यापचक्रतुः ॥ अपकारं कृतवंतौ ॥ ४ ॥ तद्युद्धं
बलाबलवत् ॥ एकतो बलमन्यतोऽबलं तद्युक्तं विषममित्यूचुरित्यर्थः ॥ ६ ॥ तदेवदर्शयंति ॥ महानिति ॥ यद्वात

उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि ॥ परस्परं जिगीषंतावपचक्रतुरात्मनः ॥ ५ ॥ तद्बलाबलवद्यु
द्धं समेताः सर्वयोषितः ॥ ऊचुः परस्परं राजन्सानुकंपा वरूथशः ॥ ६ ॥ महानयं बताधर्म एषां राज
सभासदां ॥ ये बलाबलवद्युद्धं राज्ञोन्विच्छंति पश्यतः ॥ ७ ॥ क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसन्निभौ
॥ क्व चातिसुकुमारांगौ किशोरौ नाप्तयौवनौ ॥ ८ ॥ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् ॥ यत्राध
र्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ॥ ९ ॥
बलाबलवतोर्युद्धं दृष्ट्वा महानयमधर्म इत्यूचुरित्यन्वयः ॥ बाल
योर्बलवतोश्च युद्धं राजा चेत्पश्येत् ॥ स्वयं वारणीयः ॥ एते तु राज्ञः पश्यतः स्वयमप्यन्विच्छंति ॥ अनुमन्यत इति
महानधर्म इत्यर्थः ॥ ७ ॥ बलाबलवद्युद्धं तत्प्रपंचयंति पंचभिः ॥ क्व च वज्रसाराणि वज्रवत्कठिणानि सर्वाण्यं

भा०द०पू० समयांस्त्रीणांगिरःश्रुत्वापुत्रयोःस्नेहहेनयाशुकृतयाश्रातुरौविह्वलौ॥पुत्रयोर्दुर्लमज्जानंतौपितरावकुतापंप्रा

१६७ प्राविति॥१८॥१९॥तत्रभगवतोगात्राणां॥अरत्नीजान्वादीनांनिष्पातैःप्रहारैः॥वज्रस्यनिष्पेषःतीव्रः॥प्रपा

सभयाःस्त्रीगिरःश्रुत्वापुत्रस्नेहशुचातुरौ॥पितरावन्वतप्येतांपुत्रयोरबुधौबलम्॥१८॥तैस्तैर्नि
युद्धविधिभिर्विविधैरच्युतेतरौ॥युयुधातेतथान्योन्यंतथैवबलमुष्टिकौ॥१९॥भगवद्गा
त्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः॥चाणूरोभज्यमानांगोमुहुर्ग्लानिमवापह॥२०॥सश्येनवेगउ
त्पत्यमुष्टीकृत्यकरावुभौ॥भगवंतंवासुदेवंक्रुद्धोवक्षस्यबाधत॥२१॥नाचलत्तत्प्रहारेणमा
लाहतइवद्विपः॥२२॥बाह्वोर्निगृह्यचाणूरंबहुशोभ्रामयन्हरिः॥भूपृष्ठेपोथयामासतर
सात्तीणजीवितम्॥२३॥विस्रस्ताकल्पकेशस्रगिंद्रध्वजइवापतत्॥२४॥तथैवमुष्टिकःपूर्वंस्व
मुष्ट्याभिहतेनवै॥बलभद्रेणबलिनातलेनाभिहतोभृशम्॥२५॥

तः॥तद्धन्तिष्ठैरैःभज्यमानांगःम्लानिमात्रः॥२०॥श्येनस्येववेगोयस्यसचाणूरः॥अबाधत॥अताडयत॥२१॥२२॥भू
पृष्ठेभुवउपरिपोथयामास॥आस्फालयत॥२३॥इंद्रध्वजोयन्त्रं॥यद्वाइंद्रध्वजोनामगौडेषुप्रसिद्धः॥कस्मिंश्चि

दुत्सवेमहास्तंभोध्वजपताकाद्यलंकृतःपुरुषाकृ॥
तिः॥उच्छ्रियतेसयथापतति॥२४॥२५॥

१६७

अहोकष्टं अल्पपुण्या वयं ॥ यतोऽस्माभिरनवसरे दृष्टोयं ॥ गोप्यस्तपःकिमचरन्नित्यादि त्रिभिः ॥ गोप्य इति ॥ अमुष्य श्रीकृष्ण
स्य रूपं अंगलावन्ये न सारं श्रेष्ठं ॥ किंच असमोर्द्ध्वं ॥ न विद्यते समं ऊर्द्ध्वम् अधिकं च यस्य तत् ॥ तदपि न अन्येन आभरणा
दिना सिद्धं ॥ किंतु स्वत एव ऐश्वरस्य ॥ एकांतधाम ऐश्वर्यस्य च अव्यभिचारिस्थानं ॥ पाठांतरे अमुष्य ईश्वरस्येत्यन्वयः ॥ ए
वंभूतं नितांतनित्यनवीनं रूपं या नयनैः पश्यंतीति ॥ १४ ॥ किंच ॥ या दोहनादिषु एनं गायंति ता व्रजस्त्रियो धन्याः ॥ प्रेंखेंखनं दे

गोप्यस्तपःकिमचरन्यदमुष्यरूपंलावन्यसारमसमोर्द्ध्वमनन्यसिद्धं ॥ दृग्भिःपिबंत्यनुसवाभिनवंदुरा
पमेकांतधामयशसःश्रियऐश्वरस्य ॥ १४ ॥ यादोहनेऽवहननेमथनोपलेपप्रेंखेंखनार्भरुदितोक्षण
२३ मार्जनादौ ॥ गायंतिचैनमनुरक्तधियोऽश्रुकंठ्योधन्याव्रजस्त्रियउरुक्रमचित्तयानाः ॥ १५ ॥ प्रातर्व्रजाद्व्रजतआ
विशतश्चसायंगोभिःसमंक्वणयतोऽस्यनिशम्यवेणुं ॥ निर्गम्यतूर्णमबलाःपथिभूरिपुण्याःपश्यंतिसस्मि
तमुखंसदयावलोकं ॥ १६ ॥ एवंप्रभाषमाणासुस्त्रीषुयोगेश्वरोहरिः ॥ शत्रुंहंतुंमनश्चक्रेभगवान्भरतर्षभ १७

लांदोलनं ॥ उक्षणं सेचनं ॥ कथंभूताः ॥ उरुक्रमे चित्तं तेनैव यानं सर्वविषयप्राप्तिर्यासां ताः ॥ पाठांतरे उरुक्रमं चिं
इत्य २ तयंत्यो यांति ॥ कुतः ॥ अनुरक्तधियः ॥ तत्र लिंगं अश्रुकंठ्यः ॥ १५ ॥ अपि च प्रातरिति ॥ याश्च अबला अस्य वेणुं निशम्य
अरहात्तूर्णं निर्गम्य ॥ पथि सस्मितं मुखं पश्यंति ता भूरिपुण्या इति ॥ एवं सभयं ब्रुवाणासु स्त्रीषु तासां भयनिवृत्तये

भा०द०४०३५॥ दुर्विसहमविसह्यमुग्रंतेजोयस्यसहकसः॥ ३७॥ गरिष्ठत्वायविश्वाश्रयत्वमुक्तं॥ तत्रहेतुः॥ अब्जनाभः॥ कुतस्त

१६८

तमाविशंतमालोक्यमृत्युमात्मनआसनात्॥ मनस्वीसहसोत्थायजगृहेसोऽसिचर्मणी॥ ३६॥ तंखड्गपा
णिंविचरंतमाशुश्येनंयथादक्षिणसव्यमंबरे॥ समग्रहीद्दुर्विषहोग्रतेजायथोरगंतार्क्ष्यसुतःप्रसह्य॥
३७॥ प्रगृह्यकेशेषुचलत्किरीटंनिपात्यरंगोपरितुंगमंचात्॥ तस्योपरिष्टात्स्वयमब्जनाभःपपात
विश्वाश्रयआत्मतंत्रः॥ ३८॥ तंसंपरेतंविचकर्षभूमौहरिर्यथेभंजगतोविपश्यतः॥ हाहेतिश
ब्दःसुमहांस्तदाभूदुदीरितःसर्वजनैर्नरेंद्र॥ ३९॥ सनित्यदोद्विग्नधियातमीश्वरंपिबन्वदन्वाविच
रन्स्वपन्श्वसन्॥ ददर्शचक्रायुधमग्रतोयतस्तदेवरूपंदुरवापमाप॥ ४०॥ तस्यानुजाभ्रातरोऽष्टौकंक
न्यग्रोधकादयः॥ अभ्यधावन्नतिक्रुद्धाभ्रातुर्निर्वेषकारिणः॥ ४१॥ तथातिरभसांस्तांस्तुसंयत्तान्रोहि
णीसुतः॥ अहन्परिघमुद्यम्यपशूनिवमृगाधिपः॥ ४२॥ नेदुर्दुंदुभयोव्योम्निब्रह्मेशाद्याविभूतयः॥
पुष्पैःकिरंतस्तंप्रीत्याशशंसुर्ननृतुःस्त्रियः॥ ४३॥ तेषांस्त्रियोमहाराजसुहृन्मरणदुःखिताः॥ तत्राभीयु
र्विनिघ्नंत्यःशीर्षाण्यश्रुविलोचनाः॥ ४४॥

स्योपर्येवपपातयतआत्मतंत्रः॥ ३८॥ ३९॥ ४०॥ निर्वेशोनिष्कृतिःआनृण्यमित्यर्थः॥ तत्कारिणःसंतः॥ तेऽभ्यधावन्॥ ४१॥

१६८

अर्दितः पीडितः ॥ ऊर्व्युपस्थे भूतले ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ वल्गंतौ नृत्यादि कुर्वंतौ ॥ ३० साधुसाध्विति वदंत ॥ ३१ ॥ ३२

प्रवेपितः सरुधिरमुद्वमन्मुखतोर्दितः ॥ व्यसुः पपातोर्व्युपस्थे वाताहत इवांघ्रिपः ॥ २६ ॥ ततः कूटमनु
प्राप्तं रामः प्रहरतां वरः ॥ अवधील्लीलया राजन्सावज्ञं वाममुष्टिना ॥ २७ ॥ तर्ह्येव हि शलः कृष्णपदाप
हतशीर्षकः ॥ द्विधा विदीर्णस्तोशलक उभावपि निपेततुः ॥ २८ ॥ चाणूरे मुष्टिके कूटे शले तोशलके ह
ते ॥ शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः ॥ २९ ॥ गोपान्वयस्यानाकृष्य तैः संसृज्य विजह्रतुः ॥
वाद्यमानेषु तूर्येषु वल्गंतौ रुतनूपुरौ ॥ ३० ॥ जनाः प्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ॥ ऋते कं
सं विप्रमुख्याः साधवः साधुसाध्विति ॥ ३१ ॥ हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ॥ न्यवार
यत्स्वतूर्याणि वाक्यं चेदमुवाच ह ॥ ३२ ॥ निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ॥ धनं हरत गो
पानां नंदं बध्नीत दुर्मतिं ॥ ३३ ॥ वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः ॥ उग्रसेनः पिता चापि सानुगः
परपक्षगः ॥ ३४ ॥ एवं विकत्थमाने वै कंसे प्रकुपितोऽव्ययः ॥ लघिम्नोत्पत्य तरसा मंचमुत्तुंगमारुहत् ॥ ३५ ॥

३३ ॥ ३४ ॥ अव्ययः अश्रमः ॥ लघिम्ना लाघवेन ॥ ३५ ॥ रामराममरामरा गोविंद दामोदर नारायण ॥

भा०द०पू०
१६१

पुत्रभ्रांतिं विहाय जगदीश्वराविति विज्ञातावाशंकितौ न सस्वजाते॥ नालिंगितवंतौ किंतु बद्धांजली तस्थतुरित्य
र्थः॥ प्रसह्य हत्वा॥ हस्तींद्रं मल्लेंद्रान् मल्ललीलया॥ वीभत्सचरितं कंसं सर्वाभत्सममारयत्॥४२॥ इति श्रीदशमचतु
श्चत्वारिंशः॥४४॥ पंचचत्वारिंशके च पितृनंदादिशांत्वनं॥ उग्रसेनाभिषेकश्च गुरोर्वासात्सुरागमः॥ उपलब्धा
र्थौ विदित्वेति॥ अयमर्थः॥ उपसमीपे आवयोः पुत्रबुद्ध्या सांसारिकपरमसुखभोगात् एवमेव लब्धार्थौ आवा

देवकीवसुदेवश्च विज्ञाय जगदीश्वरौ॥ कृतसंवंदनौ पुत्रौ सस्वजाते न शंकितौ॥५२॥ इति
श्रीमद्भागवते महापुराणे दशमस्कंधे कंसवधो नाम चतुश्चत्वारिंशोऽध्यायः॥४४॥ श्रीशुक उ
वाच॥ पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः॥ मा भूदिति निजां मायां ततान जनमोहिनीं॥
१॥ उवाच पितरावेत्य साग्रजः सात्वतर्षभः॥ प्रश्रयावनतः प्रीणन्नंब तातेति सादरं॥२॥ नास्म
त्तो युवयोस्तात नित्योत्कंठितयोरपि॥ बाल्यपौगंडकैशोराः पुत्राभ्यामभवन् क्वचित्॥३॥

ति मीश्वराविलब्धः प्राप्तः परमज्ञानरूपोऽर्थो याभ्यां तथाभूतौ ज्ञात्वा॥ मयि प्रसन्नेऽसत्यनयोर्ज्ञानं मा भूत्किंतु स्ने
हस्तु मयि पुत्रतया प्रेमः॥ अतस्तदज्ञानमेव तज्ज्ञानं मा भूदिति निजां स्वाधीनां मायां ततियोः प्रसारितवानिति॥१॥ त
देवदर्शयत्ति॥ उवाचेत्यादिभिरष्टभिः॥ प्रीणन्॥ प्रीणयन् सादरं ब्रुवन्॥२॥ अस्मत्तः अस्मन्निमित्तं नित्यमु
त्कंठितयोरपि युवयोः पुत्राभ्यां आवाभ्यां कृत्वा बाल्यपौगंडकैशोरास्त्ववस्था नानुभवसुखानीत्यर्थः॥ तेना

भवन्निति॥ अस्मत्तः पुत्राभ्यामिति समासानाप्रि
रामजी॥

१६१

क्रोशंत्यो विलापांश्चक्रुः ॥ शुचं अश्रूणि ॥ ४४ ॥ धर्मज्ञेत्यादीनि विलापे प्रेमसंबोधनानि नेत्वदीया वयं ४६
त्वया पत्या विरहिता पुरीयं न शोभत इति स्वदेहस्याभिधानं ४७ अनागसामिति तु परमार्थाभिधानं ४८

शयानान्वीरशय्यायां पतीनालिंग्य शोचतीः ॥ विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ॥ ४५ ॥ हा
नाथ प्रिय धर्मज्ञ करुणानाथवत्सल ॥ त्वयाहतेन निहता वयं ते सगृहप्रजाः ॥ ४६ ॥ त्वया विरहि
दृ३ ता पत्या पुरीयं पुरुषर्षभ ॥ न शोभते वयमिव निवृत्तोत्सवमंगला ॥ ४७ ॥ अनागसां त्वं भूतानां कृतवा
न्द्रोहमुल्बणं ॥ तेनेमां भो दशां नीतो भूतध्रुक् को लभेत शं ॥ ४८ ॥ सर्वेषामिह भूतानामेष हि
प्रभवाप्ययः ॥ गोप्ता च तदवध्यायी न कश्चित्सुखमेधते ॥ ४९ ॥ श्रीशुक उवाच ॥ राजयोषि
तआश्वास्य भगवाँल्लोकभावनः ॥ यामाहुर्लौकिकीं संस्थां हतानां समकारयत् ॥ ५० ॥ मा
तरं पितरं चैव मोचयित्वाथ बंधनात् ॥ कृष्णरामौ ववंदाते शिरसा स्पृश्य पादयोः ॥ ५१ ॥

दिति १
एष कृष्णः प्रभवंत्यस्मा प्रभवः ॥ अपियंत्यस्मिन्नित्यप्ययः सच स च ॥ तदवध्यानमवज्ञा तत्कर्तुं शीलं यस्य सः ॥
४९ ॥ ५० ॥ आस्पृश्य ईषत्स्पृष्ट्वा ॥ ५१ ॥

१०।११ आश्वास्य सांत्वयित्वा ॥१२॥ त्वमेवाज्ञापयेति भाव इत्याह ययातिशापादिति ॥ नवत्तु यादवत्वेपि मदाज्ञया
न दोष इति भावः ॥१३॥ ममतां हे श्रीशक्तिर्नास्तीति चेत्तत्राह मयीति ॥ मत्प्रसादेन सर्वं भविष्यतीत्यर्थः ॥१४॥ स्वा

श्रीशुक उवाच ॥ इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा ॥ मोहितावंकमारोप्य परिष्वज्यापतुर्मु
दं ॥१०॥ सिंचंतावश्रुधाराभिः स्नेहपाशेन चावृतौ ॥ न किंचिदूचतू राजन्बाष्पकंठौ विमोहितौ ॥११॥
एवमाश्वास्य पितरौ भगवान्देवकीसुतः ॥ मातामहं तूग्रसेनं यदूनामकरोन्नृपं ॥१२॥ आह
चास्मान्महाराज प्रजाश्चाज्ञप्तुमर्हसि ॥ ययातिशापाद्यदुभिर्नासितव्यं नृपासनं ॥१३॥ मयि
भृत्य उपासीने भवतो विबुधादयः ॥ बलिं हरंत्यवनताः किमुतान्ये नराधिपाः ॥१४॥ सर्वान्स्वा
न्ज्ञातिसंबंधान्दिग्भ्यः कंसभयाकुलान् ॥ यदुवृष्ण्यंधकमधुदाशार्हकुकुरादिकान् ॥ सभा
जितान्समाश्वास्य विदेशावासकर्शितान् ॥ न्यवासयत्स्वगेहेषु वित्तैः संतर्प्य विश्वकृत् ॥१५॥ कृष्ण
संकर्षणभुजैर्गुप्ता लब्धमनोरथाः ॥ गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः ॥ ॥

न्ज्ञातीन्संबंधांश्च दिग्भ्यः आनाय्येति ॥१५॥ सिद्धाः पूर्णाः ॥ कृष्णरामाभ्यां गुप्तो निवृत्तोज्वरस्तापो येषां

किंच॥ आवामेव दैवहीना वित्याह॥ नलब्धइति॥ पितृगेहस्थावालायां मुदं विंदंते साच नलब्धेति॥ ८॥ एवंता
वत्श्लोकद्वयेन॥ युवयोराववयोश्च का महाहानिर्जातेत्युक्तं॥ आवयोः पुनर्युष्मत्परिचर्यालोपेन धर्महानिरपि
जातेत्याह॥ सर्वार्थसंभवइति॥ सर्वेषां धर्मार्थकामानां संभवोयस्मिन्स देहः॥ यतः याभ्यां जनितः॥ तयोः पित्रोर्नि
नलब्धोदैवहतयोर्वांसोनौभवदंतिके॥ यांवास्ताः पितृगेहस्था विंदंते लालितामुदं॥ ८॥ सर्वार्थसं
भवोदेहो जनितः पोषितोयतः॥ नतयोर्यातिनिर्वेशं पित्रोर्मर्त्यः शतायुषा॥ ९॥ यस्तयोरात्मनः कल्प
आत्मनो वा धनेन च॥ वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयंतिहि॥ १०॥ मातरं पितरं वृद्धं साध्वीं भार्यां
सुतं शिशुं॥ गुरुं विप्रं प्रपन्नं च कल्प्योऽबिभ्रच्छ्वसन्मृतः॥ ११॥ तन्नाव कल्पयोः कंसान्नित्यमुद्विग्न
चेतसोः॥ १२॥ ततस्तं तुमर्हथस्तात मातर्नौपरतंत्रयोः॥ अकुर्वतोर्वांशुश्रूषां क्लिष्टयोर्दुर्हृदा भृशं
॥ १३॥
निर्वेशं निष्कृतिमानृण्यं मर्त्योशतसंवत्सरमात्रे शतायुषा न प्राप्नोति॥ ९॥ तन्मध्ये पितृर्यः पुत्रः कल्यः सम
र्थः सन्नपि॥ देहेन धनेन च पित्रोर्वृत्तिं॥ जीविकां न संपादयेत्॥ संप्रेत्य लोकांतरे यमदूताः स्वस्यैव मांसं खादयं
तीति॥ १०॥ किंच मात्रादिशुश्रूषामकुर्वन् विफलजीवितश्च भवतीत्याह मातरमिति अबिभ्रत्॥ अपुष्णन् श्वसन्नेव
मृततुल्य एवेति॥ ११॥ तत्तस्मात् नौ आवयोर्मोघं व्यर्थं॥ अन
मोघमेतेव्यतिक्रान्ता दिवसावामनर्चतोः॥

२३ पुरोधसा गर्गाचार्येण द्विजसंस्कृतिमुपनयनं ॥ २४ गावो गाः रुक्मस्य माला विद्यते यासां ताः ॥ क्षौमवस्त्रमा
लावती ॥ २५ ॥ या एव पूर्वं मनोदत्ता आसन् ॥ ता एवाददात् ॥ ननु ताः कंसेनापहृताः सत्यं राजगोष्ठादाच्छिद्य दत्ता
इत्याह ॥ कंसेनाधर्मेतइति ॥ २६ ॥ गा यत्र व्रतं ब्रह्मचर्यं ॥ २७ ॥ प्रकर्षेण भवत्याभ्यामिति मितिप्रभवौ ॥ अत एवस

इत्युक्तस्तोपरिषज्य नंदः प्रणयविह्वलः ॥ पूरयन्नश्रुभिर्नेत्रैः सहगोपैर्व्रजं ययौ ॥ २३ ॥ अथ स्मरसुतौ
राजन् पुत्रयोः समकारयत् ॥ पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिं ॥ २४ ॥ तेभ्योऽदाद्दक्षिणां गावो रु
क्ममाल्यस्वलंकृताः ॥ स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः ॥ २५ ॥ यां कृष्णरामजन्मर्क्षे मनो
दत्ता महामतिः ॥ ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः ॥ २६ ॥ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य सुव्र
तौ ॥ गर्गाद्यदुकुलाचार्यादिज्ञयत्रं व्रतमास्थितौ ॥ २७ ॥ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ॥ नान्यसि
द्धामलज्ञानं गूहमानौ नरेहितैः ॥ अथो गुरुकुले वासमिच्छंतावुपजग्मतुः ॥ काश्यं सांदीपनिं नाम ह्यवं
तीपुरवासिनं ॥ २८ ॥ यथोपसाद्य तौ दांतौ गुरौ वृत्तिमनिंदितां ॥ ग्राहयंतावुपेतौ स्म भक्त्या देवमिवाहतौ ॥ २९ ॥

सा१ वेज्ञौ ॥ सत्ततस्सिद्धामलंज्ञानं प्रच्छादयंतौ नरचेष्टितैः ॥ २८ ॥ यथायथावत् उपेत्य प्राप्य ॥ गुरौ वृत्तिमनिंद्यां ग्राहयंतौ ॥ गुरुमुपेतौ
ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ उपगतौ सेवितवंतौ वित्यर्थः ॥ २९ ॥ ॥ ऽऽ ॥

सदयस्मितं वीक्षणं यस्मिंस्तत् ॥ १६ ॥ प्रवयसो वृद्धा अपि अतिशयितं बलमोजश्च येषां ते ॥ १७ ॥ १८ ॥ भृशमा
त्मनोप्याधिक्येन पोषितौ ॥ न चाश्चर्यमेतदित्याह ॥ पित्रोरिति ॥ आत्मनो देहादप्यात्मजेष्वभ्यधिका हि प्रीति

वीक्षतो हरहः प्रीता मुकुंदवदनांबुजं ॥ नित्यं प्रमुदितं श्रीमत्सदयस्मितवीक्षणं ॥ १६ ॥ तत्र प्रव
यसोप्यासन्युवानो तिबलौजसः ॥ पिबंतोक्षैर्मुकुंदस्य मुखांबुजसुधां मुहुः ॥ १७ ॥ अथ नंदं स
मासाद्य भगवान्देवकीसुतः ॥ संकर्षणश्च राजेंद्र परिष्वज्येदमूचतुः ॥ १८ ॥ पितर्युवाभ्यां स्नि
ग्धाभ्यां पोषितौ लालितौ भृशं ॥ पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोपि हि ॥ १९ ॥ स पिता सा च
जननी यौ पुष्णीतां स्वपुत्रवत् ॥ शिशून्बंधुभिरुत्सृष्टानकल्पैः पोषरक्षणे ॥ २० ॥ यात यूयं व्रजं तात वयं
च स्नेहदुःखितान् ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं ॥ २१ ॥ एवं सांत्वय्य भगवान्नंदं सव्रज
मच्युतः ॥ वासोलंकारकुप्याद्यैरर्हयामास सादरं ॥ २२ ॥

रिति ॥ १९ ॥ देवकीवसुदेवयोः पुत्रौ युवां नास्मत्पुत्रा
वित्यपि न वाच्यमित्याह स पितेति ॥ २० ॥ २१ ॥ सव्रजं व्रजवासिसहितं ॥ कुप्यानि स्वर्णरजतातिरिक्तकांस्यादिपात्रादी

४५ टि॰ द॰ स्क॰

भा०द०पू० घकुक्कुटलावकयुद्धविधिः । शुकसारिकाप्रलापनं । उत्सादनं । केशमार्जनकौशलं । अक्षरमुष्टिकाक । थि
१७२ तं म्लेच्छितकविकल्पाः । देशभाषाज्ञानं । पुष्पशकटिकानिमित्तज्ञानं । यंत्रमात्रिकाधारणं । मात्रिकासंवाच्यं
मानसीकाव्यक्रिया । अविधानकोशछंदोज्ञानं । क्रियाविकल्पाः । छलितकयोगाः । वस्त्रगोपनानि । द्यू

सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्त्तकौ । सकृन्निगदमात्रेण तौ संजगृहतुर्नृप । अहोरात्रैश्च
तुःषष्ट्या संयत्तौ तावतीः कलाः ॥ ३१ ॥ गुरुदक्षिणया चार्य्यं छंदयामासतुर्नृप ॥ ३२ ॥ द्विजस्तयोस्तं
महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिं ॥ संमन्त्र्य पत्न्या स महार्णवे मृतं बालं प्रभा
२४ से वरयांबभूव ह ॥ ३३ ॥ तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरंतविक्रमौ ॥ वेलामुप
व्रज्य निषीदतुः क्षणं सिंधुर्विदित्वार्हणमाहरत्तयोः ॥ ३४ ॥

तविशेषः । आकर्षक्रीडा बालक्रीडनकानि । वैनायिकानां वैजयिकानां । वैयासिकानां च विद्यानां ज्ञा
नमिति चतुःषष्टिकलाः ॥ ३१ ॥ छंदयामासतुः । उपलोभितवंतौ ॥ ३२ ॥ प्रभासे क्षेत्रे महार्णवे मृतं बालं व
रयामास ॥ ३३ ॥ ईश्वराविति विदित्वा समुद्रस्तयोरर्हणमाजहार ॥ ३४ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ १७२

शुद्धो भावो यासु ताभिरनुवृत्तिभिः सांगोपनिषदः अंगानि शिक्षादीनि तैः उपनिषद्भिश्च सहितान् ३० सरह
स्यं मंत्रदेवताज्ञानसहितं धर्मान् मन्वादिधर्मशास्त्राणि न्यायपथान् मीमांसादीन् आन्वीक्षिकीं तर्कवि
द्यां षड्विधां संधिविग्रहयानं आसनं द्वैधं आश्रय इत्येवं षड्विधां राजनीतिं सकृच्छ्रुतिगदमात्रेण एकवारं गु
रूच्चारणमात्रेण तावतीः चतुःषष्टिकलाः ताश्च शैवतंत्रोक्ता निलिख्यन्ते यथा गीतं वाद्यं नृत्यं नाट्यं आ
लेख्यं विशेषकच्छेद्यं तंदुलकुसुमवल्लिविकाराः पुष्पास्तरणं दशनवसनांगरागाः मणिभूमिकाकर्म शा

ततो हि द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः प्रोवाच वेदानखिलान्सांगोपनिषदो गुरुः
३० सरहस्यं धनुर्वेदं धर्मान्न्यायपथांस्तथा तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधां

यनरचनं उदकवाद्यं उदकघातः चित्रयोगाः माल्यग्रंथनविकल्पाः शेखरापीडयोजनं नेपथ्ययोगाः
कर्णपत्रभंगाः गंधयुक्तिः भूषणयोजनं ऐंद्रजालं कौचुमारयोगाः हस्तलाघवं चित्रशाकापूपभक्ष्यविका
रक्रियाः पानकरसरागासवयोजनं सूचीवायकर्म सूत्रक्रीडा वीणाडमरुकवाद्यानि प्रहेलिका प्रतिमा
ला दुर्वचकयोगाः पुस्तकवाचनं नाटकाख्यायिकादर्शनं काव्यसमस्यापूरणं पट्टिकावेत्रवाणविकल्पाः त
र्ककर्माणि तक्षणं वास्तुविद्या रूप्यरत्नपरीक्षा धातुवादः मणिरागज्ञानं आकरज्ञानं वृक्षायुर्वेदयोगाः मे

भा० द० पू० वत्सेति ॥ प्राधान्येनैकस्य संबोधनं ॥ गुरोर्निष्क्रियो गुरुर्दक्षिणा ॥ युष्मद्विधयोर्गुरोर्मम कामानां मध्ये को नु त्व
१७३ वशिष्यते न कोपीति ॥ ४४ ॥ देवी रे ॥ ४५ ॥ अनिलवद्रंहो यस्य तेन ॥ पर्ज्जन्यो मेघः तद्वन्निनदो यस्य तेन ॥ ४६ ॥ नष्ट

श्रीगुरुरुवाच ॥ सम्यक्संपादितो वत्स भवद्भ्यां गुरुनिष्क्रियः कोन्नु युष्मद्विधगुरोः कामानामव
शिष्यते ॥ ४४ ॥ गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पाविनी ॥ छंदांस्ययातयामानि भवत्विह परत्र च
॥ ४५ ॥ गुरुणैवमनुज्ञातौ रथेनानिलरंहसा ॥ आयातौ स्वपुरं तात पर्ज्जन्यनिनदेन वै ॥ ४६ ॥ समानंदन्प्र
न४ जाः सर्वा दृष्ट्वा रामजनार्दनौ ॥ अपश्यंतीर्बह्वहानि नष्टलब्धधना इव ॥ ४७ ॥ इतिश्रीमद्भागवते महा
पुराणे दशमस्कंधे गुरुकुलनिवृत्तिः पंचचत्वारिंशोऽध्यायः ॥ ४५ ॥ श्रीशुक उवाच ॥ वृष्णीनां प्रवरो
मंत्री कृष्णस्य दयितः सखा ॥ शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः ॥ १ ॥ तमाह भगवान्
प्रेष्ठं भक्तमेकांतिनं क्वचित् ॥ गृहीत्वा पाणिना पाणिं प्रपन्नार्तिहरो हरिः ॥ २ ॥

मदृष्टं नत्पुनर्लब्धं धनं याभिस्ता इवेति ॥ ४७ ॥ इति दशमे पंचचत्वारिंशः ॥ ४५ ॥ षट्चत्वारिंशके घोषमुद्धवं प्रेष्य तत्र सौरि
रा ॥ यशोदानंदयोश्चक्रे कृष्णः शोकापनोदनं ॥ कामचारं द्विजातिः सन् परित्यज्याति संवृतः ॥ गुरोर्ज्ञानमनुप्राप्य
सख्या गोपीः कृपा दिशत् ॥ गोपीनां सांत्वनमतिरहस्यं सन्नंत्रिसाध्यमिति तदर्थमुद्धवं विशिनष्टि ॥ वृष्णीनामिति द्वे ॥ [illegible] १७३

३५॥ पंचजनस्त्वत्सुतोऽहार्षीत्॥ स च महान्ममासाध्य इत्यर्थः॥ ३६॥ ३७॥ ३८॥ ३९॥ सपर्य्यामर्हणां॥ ४०॥ सर्वेषांभूता

तमाह भगवानाशु गुरु पुत्रः प्रदीयतां॥ योऽसाविह त्वया ग्रस्तो बालको महतोर्मिणा॥ ३४॥ समुद्र
उवाच॥ नैवाहार्षमहं देव दैत्यः पंचजनो महान्॥ ३६॥ अंतर्जलचरः कृष्ण शंखरूपधरोऽसुरः॥
आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः॥ जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकं॥ ३७॥ तदं
गप्रभवं शंखमादाय रथमागमत्॥ ३८॥ ततः संयमनीं नाम यमस्य दयितां पुरीं॥ गत्वा जना
र्दनः शंखं प्रदध्मौ सहलायुधः॥ ३९॥ शंखनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः॥ तयोः सपर्य्यां
महतीं चक्रे भक्त्युपबृंहितां॥ ४०॥ उवाचावनतः कृष्णं सर्वभूताशयालयं॥ लीलाशरीरेह विभो
युवयोः करवाम किं॥ ४१॥ श्रीभगवानुवाच॥ गुरुपुत्रमिहानीतं निजकर्मनिबंधनं॥ आनयस्व
महाराज मच्छासनपुरस्कृतः॥ ४२॥ तथेति तेनोपानीतं गुरुपुत्रं यदूत्तमौ॥ दत्वा स्वगुरवे भूयो वृणी
ष्वेति तमूचतुः॥ ४३॥
नाम्ना शरणया॥ अंतसंक्रमणानि तान्यास्ते यो निवासो यस्य तं॥ ४१॥ निजकर्मनिबंधनं यस्य तं तथाभूतम

पि मदाज्ञापुरस्कारेणानयतस्ते न दोष इत्यर्थः॥ ४४॥ ४५॥

८५

ति

भा० द० पू० १७४ निम्लोचति ॥ अस्तं गच्छति सति ॥ छन्नं यानं यस्येति ॥ तदा गोपीभिरज्ञातत्वेन नंदसंगं लब्ध्वा निःसूचयति ॥ ४ ॥ व्रजं
वर्णयति पंचभिः ॥ वासिता धेनु इत्यादिभिः ॥ वासिता पुष्पवत्यो गावः ॥ तन्निमित्तमभितो युध्यद्भिः सुष्मिभिर्मत्तैः
गोवृषैर्नादितं ॥ वास्राभिर्धेनुभिः स्ववत्सकान् प्रति विल्लंघद्भिरुत्पतद्भिर्गोदोहशब्दैः सह अभितो रवान्मुंचासु
प्राप्तोनंदव्रजं श्रीमान्निम्लोचति विभावसौ ॥ छन्नयानः प्रविशतां पशूनां खुररेणुभिः ॥ ४ ॥ वासिता
र्थेऽभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः ॥ धावंतीभिश्च वास्राभिरुधोभारैः स्ववत्सकान् ॥ इतस्ततो विलं
घद्भिर्गोवत्सैर्मंडितं सितैः ॥ गोदोहशब्दाभिरवं वेणूनां निःस्वनेन च ॥ गायंतीभिश्च कर्माणि शुभानि
पै ३ बलकृष्णयोः ॥ स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितं ॥ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्
न्वितैः ॥ धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमं ॥ सर्वतः पुष्पितवनं द्विजालिकुलनादितम् ॥
हंसकारंडवाकीर्णैः पद्मषंडैश्च मंडितं ॥ ८ ॥
च मा मुंच ॥ नयानय देहि गृहाण इत्यादयो यस्मिंस्तत् ॥ वेणूनां निःस्वनेन च ॥
गायंतीभिः ॥ गोपीभिर्गोपैश्च सुविराजितं ॥ अग्न्याद्यर्चनान्वितैर्गोपगृहैः धूपादिभिश्च मनोरमम् ॥ ५ १७४

गोपीनां विशेषतः संदेशकारणमाह ॥ ता इति ॥ मय्येव संकल्पात्मकं मनो यासां ताः ॥ मदर्थे त्यक्ता दैहिकाः पतिपुत्रा
दयो याभिस्ताः ॥ ३ ॥ ततः किमत आह ॥ ये त्यक्तलोकधर्मा इति ॥ मन्निमित्तं त्यक्तो लोकधर्म इहामुत्र सुखं तत्साधनानि
च येस्तान् बिभर्मि ॥ संवर्द्धयामि सुखयामीत्यर्थः ॥ ४ ॥ तासां वियोगाधिं दर्शयति द्वयेन ॥ मयीति ॥ विरहौत्कण्ठ्यो

श्रीभगवानुवाच ॥ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह ॥ गोपीनां मद्वियोगाधिं मत्सं
देशैर्विमोचय ॥ ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ॥ मामेव दयितं प्रेष्ठमात्मानं
मनसा गताः ॥ ३ ॥ ये त्यक्तलोकधर्माश्च मदर्थे तान्बिभर्म्यहं ॥ ४ ॥ मयि ताः प्रेयसां प्रेष्ठे दूरस्थे
गोकुलस्त्रियः ॥ स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ॥ ५ ॥ धारयंत्यतिकृच्छ्रेण प्रायः प्रा
णान्कथंचन ॥ प्रत्यागमनसंदेशैर्वल्लव्यो मे मदात्मिकाः ॥ ६ ॥ श्रीशुक उवाच ॥ इत्युक्त उ
द्धवो राजन्संदेशं भर्तुरादृतः ॥ आदाय रथमारुह्य प्रययौ नंदगोकुलम् ॥ ७ ॥

य१ त्कंठ्यं तेन विह्वलाः परवशत्वः ॥ ५ ॥ गोकुलान्निर्गमसमये दिस्यान्तर्हि विरहतापेन दह्येते च ॥ मयि व
र्तमानत्वात्कथंचिज्जीवंतीत्यर्थः ॥ ६ ॥ संदेशं भवतीनां वियोगो मे न हि सर्वात्मना क्वचिदित्यादिकं १

मू० १
१ सरिच्छैलवनोद्देशान्मुकुंदपदभूषितान् ॥ आक्रीडानीक्षमाणानां मनो याति तदात्मतां १७ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ ॥ सुराणां महदर्थाय गर्गस्य वचनं यथा १८ ॥

भा० द० पू०
१७५

न केवलं शिथिलास्य एव किंतु शनैः स्मरंतीत्याह ॥ सरिच्छैलेति. सरितश्च शैलाश्च वनोद्देशाश्च तान् ॥ आक्रीडान्
क्रीडास्थानानि ॥ १७ सुराणां महदर्थाय महते प्रयोजनाय गर्गस्य वचनं यथा ॥ १८ न केवलं तद्वचनानुसारेणाव्यवहार
संवादादपीत्याह ॥ कंसमिति १९ ॥ इभराट् यष्टिमिव ॥ तालत्रयप्रमाणं धनुर्बभंज ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ अखिल

कं संनागायुतप्राणं मल्लौ गजपतिं तथा ॥ अवधिष्टां लीलयैव पशूनिव मृगाधिपः ॥ १९ ॥ तालत्रयं
महासारं धनुर्यष्टिमिवेभराट् ॥ बभंजैकेन हस्तेन सप्ताहमदधाद्गिरिं ॥ २० प्रलंबधेनुकारि
ष्टतृणावर्तबकादयः ॥ दैत्याः सुरासुरजितो हता येनेह लीलया २१ ॥ श्रीशुक उवाच ॥ इति सं
स्मृत्य संस्मृत्य नंदः कृष्णानुरक्तधीः ॥ अत्युत्कंठोऽभवत्तूष्णीं प्रेमप्रसरविह्वलः ॥ २२ ॥ यशोदा वर्
ण्यमानानि पुत्रस्य चरितानि च ॥ शृण्वंत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा ॥ २३ ॥ तयोरित्थं भग
वति कृष्णे नंदयशोदयोः ॥ वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा ॥ २४ ॥ उद्धव उवाच ॥ युवां श्लाघ्यतमौ
नूनं देहिनामिह मानद ॥ नारायणेऽखिलगुरौ यत्कृता मतिरीदृशी ॥ २५ ॥
गुरुत्वमेव ज्ञापकत्वेन तिर्यक्त्वेन चाह ॥ एताविति ॥ रामो मुकुंदश्चैतौ विश्वस्य बीजं योनी निमित्तोपादाने ॥ ननु पुरु
षप्रधानयोर्बीजयोनित्वं प्रसिद्धमत आह ॥ पुरुषः प्रधानमिति ॥ पुरुषोंऽशः प्रधानशक्तिः ॥ अतः प्रधानपुरुषावप्य

१७५

अर्च्चयत्पूजयामास ९ कशिपौ शय्यायां संविष्टं १० ११ साधूनामिति कर्मणि षष्ठी गावो गाः गिरिं गोवर्द्ध
नं १३ अप्यायास्यति आगमिष्यति किं १४ श्रीकृष्णोपकारस्मरणादिभिरनुपमानंदेनाभिन्न्यमान आह

तमागतं समागम्य कृष्णस्यानुचरं प्रियं नंदः प्रीतः परिष्वज्य वासुदेवधियार्च्चयत् ९ भोजि
तं परमान्नेन संविष्टो कशिपौ सुखं गतश्रमं पर्य्यपृच्छत्पादसंवाहनादिभिः १० कच्चिदंगम
हाभागसखा नः शूरनंदनः आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्व्रतः ११ दिष्ट्या कंसो हतः
पापः सानुगः स्वेन पाप्मना साधूनां धर्मशीलानां यदूनां द्वेष्टि यः सदा १२ अपि स्मरति नः कृष्णो मा
तरः सुहृदः सखीन् गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरिं १३ अप्यायास्यति गोविंदः स्वज
नान्सकृदीक्षितुं तर्हि द्रक्ष्यामस्तद्वक्त्रं सुनसं सुस्मितेक्षणं १४ दावाग्नेर्वातवर्षाच्च वृषसर्पा
च्च रक्षिताः दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना १५ स्मरतां कृष्णवीर्याणि लीलापांगनिरी
क्षणं हसितं भाषितं चांग सर्वानः शिथिलाः क्रियाः १६

दावाग्नेरित्यादिना वाताद्वर्षाच्चेति वृषात्सर्पाच्च अन्येभ्यश्च दुरतिक्रमेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षिताः
स्म १५ किंच स्मरतामिति लीलयापांगेन निरीक्षितं अंग हे उद्धव १६ रामराम राम राम राम ॥ ८८ ॥

यात यूयं व्रजं तात वयं च स्नेहदुःखितान् ॥ ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदंसुखमिति ॥ यदाह कृष्णस्तत्स
त्यं करिष्यतीति २९ ॥ कालविलंबनमसहमानौ प्रत्याह ॥ माखिद्यतमिति ॥ हे महाभागौ ॥ अंतिके इदानीमेव
समीपे वा कुत इत्यत आह ॥ अंतर्हृदीति ॥ तर्हि सर्वैः किमिति न दृश्यते तत्राह ॥ ज्योतिरिति ॥ तद्यथा मथनं विना

हत्वा कंसं रंगमध्ये प्रतीपं सर्वसात्वतां ॥ यदाह वः समागत्य कृष्णः सत्यं करोति तत् ॥ २९ ॥
भो२ मा खिद्यतं महाभागौ द्रक्ष्यथः कृष्णमंतिके ॥ अंतर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ॥ ३० ॥ न ह्य
स्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानिनः ॥ नोत्तमो नाधमो वापि समानस्यासमोपि वा
न माता न पिता तस्य न भार्या न सुतादयः ॥ नात्मीयो न परश्चापि न देहो जन्म एव च ॥ न चास्य क
र्म वा लोके सदसन्मिश्रयोनिषु ॥ क्रीडार्थः सोपि साधूनां परित्राणाय कल्पते ॥ ३१ ॥

न दृश्यते ॥ तथा भक्तिं विना कृष्णोपीति भावः ॥ आस्तामेतत्तस्य तु इहागमनं ॥ स्वस्यातिप्रियान् ॥ पित्रादीन् वि
हाय न संगच्छते इति मन्येत तत्राह ॥ न ह्यस्येति ॥ अस्य प्रियादयो न संति ॥ तत्र हेतुः ॥ अमानिनः ॥ समानस्येति
वसोपि जन्मकर्मादिरहितोपि ॥ क्रीडाप्रयोजनः सन् ॥ साधूनां परिपालनाय ॥ सदसन्मिश्रयोनिषु ॥ सात्विक
तामसराजसयोनिषु ॥ यद्वा ॥ देवादिमत्स्यादिनृसिंहादियोनिषु कल्पते ॥ आविर्भवतीत्यर्थः ॥ ३२ ॥

एवंजनकत्वमुक्तं॥ किंच॥ अन्वीयभूतेषु॥ भूते ष्वनुप्रविश्यभूतानांचतदुपहितस्यविलक्षणस्य॥ नानाभेद
स्यज्ञानस्यजीवस्यचईश्वरौनियंतारौभवतः॥ कुतः॥पुराणौ॥ अनादी॥ अनादित्वात्कारणत्वं॥ ततश्चनियंतृ
त्वमित्यर्थः॥२६॥ ननुसृष्ट्यादिकर्मावेशान्मनुष्यादिजन्मदर्शनाच्च॥ तेऽस्मान्येभ्यः कोविशेषइत्याशंक्याहयस्मि
न्निति द्वाभ्यां॥ कर्माशयं कर्मवासनां निर्हृत्य॥ त्यक्त्वा ब्रह्ममयः स्वरूपज्ञानवान्॥ अर्कवर्णः शुद्धसत्वमूर्त्तिःसन्

एतौहिविश्वस्यचबीजयोनी रामोमुकुंदः पुरुषः प्रधानं॥ अन्वीयभूतेषुविलक्षणस्यज्ञानस्य
चेशानतइमौपुराणौ॥२६॥ यस्मिन्जनः प्राणवियोगकाले क्षणंसमाविश्यमनोविशुद्धं॥ निर्हृत्य
कर्माशयमाशुयातिपरांगतिंब्रह्ममयोऽर्कवर्णः॥ तस्मिन्भवंतावखिलात्महेतौनारायणेका
रणमर्त्यमूर्तौ॥ भावंविधत्तांनितरांमहात्मन्किंवावशिष्टंयुवयोःसुकृत्यं॥२७॥ आगमिष्य
त्यदीर्घेणकालेनव्रजमच्युतः॥ प्रियंविधास्यतेपित्रोर्भगवान्सात्वतांपतिः॥२८॥

परांगतिंतत्पदं॥ याति॥ अखिलस्यात्माचहेतुश्च॥ तस्मिन्कारणेनमनुष्याकृतौ॥ महात्मन्महात्मा
निपरिपूर्णेभवतोर्भक्तिंकुरुतः॥ अतःकृतकृत्यावित्यर्थः॥२७॥ प्रस्तुतमाह॥ आगमिष्यतीति॥ पित्रोर्युवयोः ॥२४॥

भा० द० पू०
१०७

मणिभिः कांच्यादिषु स्थितैः॥ रज्जूर्विकर्षत्सु भुजेषु कंकणानां स्वनो यासां ताः॥ चलंतो नितंबाः स्तना
हाराश्च यासां॥ कुंडलैस्त्विष्यतः स्फुरन्तः कपोला यासां॥ अरुणानि कुंकुमानि येषु तानि आननानि मा
सां ताः एवंता अश्वताश्च॥३७॥ उप॥ व्रजे नौ कंसो गोप्यः॥३९॥ स क्रोधमाह॥ अक्रूर इति अर्थसाधितवानित्य

ताद्दीपदीप्तैर्मणिभिर्विरेजू रज्जूर्विकर्षद्भुजकंकणस्रजः॥ चलन्नितंबस्तनहारकुंड
लत्विषास्फुरत्कपोलारुणकुंकुमाननाः॥३७॥ उद्गायतीनामरविंदलोचनं व्रजांगना
नां दिवमस्पृशद्ध्वनिः॥ दध्नश्च निर्मन्थनशब्दमिश्रितो निरस्यते येन दिशाममंगलं॥३८॥ भ
गवत्युदिते सूर्ये व्रजद्वारि व्रजौकसः॥ दृष्ट्वा रथं सातकौंभं कस्यायमिति चाब्रुवन्॥३९॥ अ
क्रूर आगतः किं वा यः कंसस्यार्थसाधनः॥ येन नीतो मधुपुरीं कंसः कमललोचनः॥४०॥ किं सा
धयिष्यत्यस्माभिर्भर्तुः प्रीतस्य निष्कृतिं॥ इति स्त्रीणां वदंतीनामुद्धवोऽगात्कृताह्निकः॥४१॥

श्री

र्थसाधनः॥ तदाहुः येन नीत इति॥४०॥ कंसं घातयित्वा पुनः किमर्थमागत इत्याशंक्य कार्यं संभावयंति॥ किमि
ति तदा साधितेन कार्येण प्रीतस्य भर्तुः॥ पागंतरे प्रेतस्य मृतस्य कंसस्य निष्कृतिं मौर्ध्वदैहिकं॥ अस्माभिः कृत्वा सा
धयिष्यति किं॥ अस्मन्मांसैः पिंडान्नु कृत्वा दास्यतीत्य॥ एवं वदंतीनां स्त्रीणां॥ ततस्तस्मिन्नेव सरे कृतस्नानादि
र्थः

॥१०७॥

ननु जन्मकर्मादिरहितस्य कुत एतदित्याह ॥ सत्वमिति ॥ क्रीडामतीतोपि क्रीडन् तथापि मायागुणैर्घटतइत्य
र्थः ॥ ३२ ॥ अत्राविद्योपाधेर्जीवस्य कर्तृत्वं दृष्टांतिकुर्वन् ॥ तस्याप्यविद्ययैव कर्तृत्वमिति सदृष्टांतमाह ॥ यथेति
भ्रमरिकापरिभ्रमणं तयोपलक्षितया दृष्ट्या भूरपि भ्राम्यतीति यथा प्रतीयते ॥ एवं चित्ते कर्तरि सति ॥ तत्र

सत्वंरजस्तमइतिभजतेनिर्गुणोगुणान् ॥ क्रीडन्नतीतोपिगुणैःसृजत्यवतिहंत्यजः ॥ ३२ ॥
यथाभ्रमरिकादृष्ट्याभ्राम्यतीवमहीयते ॥ चित्तेकर्तरितत्रात्माकर्तेवाहंधियास्मृतः ॥ ३३ ॥
युवयोरेवनैवायमात्मजोभगवान्हरिः ॥ सर्वेषामात्मजोह्यात्मापितामातासईश्वरः ॥ ३४ ॥
दृष्टंश्रुतंभूतभवद्भविष्यत्स्थास्नुश्चरिष्णुर्महदल्पकंच ॥ विनाच्युताद्वस्तुतरांनवाच्यंसएव
सर्वंपरमार्थभूतः ॥ ३५ ॥ एवंनिशासाब्रुवतोर्व्यतीतानंदस्यकृष्णानुचरस्यराजन् ॥ गोप्यःसमु
त्थायनिरूप्यदीपान्वास्तून्समभ्यर्च्यदधीन्यमंथन् ॥ ३६ ॥

चित्ते ॥ अहंधिया आत्माध्यासेन ॥ आत्मा कर्ता स्मृतो यथा तद्वदिति ॥ ३३ ॥ किंच ॥ युवयोरेव नायमात्मजः किं
तु शत्रुमित्राद्विदृश्यरूपोपि इति सर्वात्मत्वनिरूपणेन मोहं निवर्तयति संबंधमनेकांतिकं करोति ॥ युवयो
रेवेति द्वाभ्यां ॥ ३४ ॥ अच्युतात् भिन्नात्तरां नितरां तत्त्वतो वाच्यं निर्वचनार्हं वस्तु नास्तीति ॥ ३५ ॥ दीपान्निरू

भा०द०पू० अस्येवान्या पीयूषपीनेः प्रपंचः निःस्वमित्यादिना इत्तादक्षिणायेन तं याज्यं पक्षिणो विरतफलं त्यजंति रतांत उपभुक्तामित्यर्थः ॥
१७८ इति त्यक्तलौकिकाः त्यक्तलोकव्यवहाराः ॥ ७ ॥ प्रियस्य कर्माण्यागायंत्यः ॥ तथा च तस्य बाल्यकैशोरयोर्यानि कर्माणि तानि संस्मृ
त्य संस्मृत्य गतह्रियः सत्या रुरुदुः तस्य उच्चैस्तमपृष्ट्वा अन्विति पूर्वोक्तेन एव संबंधः ॥ ७ ॥ प्रियेण श्रीकृष्णेन मंप्रसादयितुं प्रस्थापितो यं दूतः इति

निःस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः ॥ अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणं ॥ खगा वीतफलं वृ
क्षं भुक्त्वा चातिथयो गृहं ॥ दग्धं मृगास्तथारण्यं जारो भुक्त्वा रतां स्त्रियं ॥ ६ ॥ इति गोप्यो हि गोविंदे गतवाक्का
२४ यमानसाः ॥ कृष्णदूते व्रजायाते उद्धवे त्यक्तलौकिकाः ॥ ७ ॥ गायंत्यः प्रियकर्माणि रुदंत्यश्च गतह्रियः ॥
तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ॥ काचिन्मधुकरं दृष्ट्वा ध्यायंती कृष्णसंगमं ॥ प्रियप्र
स्थापितं दूतं कल्पयित्वेदमब्रवीत् ॥ ९ ॥ मधुप कितवबंधो मा स्पृशांघ्रिं सपत्न्याः कुचविलुलि
तमालाकुंकुमश्मश्रुभिर्नः ॥ वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडंब्यं यस्य दूतस्त्वमी
दृक् ॥ १० ॥

कल्पयित्वा अब्रवीत् ॥ यद्वा ॥ तस्मिन् प्रियप्रस्थापितत्वं तद्दृष्टिं कृत्वा मधुकरापदेशेनोद्धवमे
वाब्रवीदित्यर्थः ॥ हे ॥ हे मधुप हे कितवस्य धूर्तस्य बंधो नोऽस्माकमंघ्रिं मा स्पृश ॥ मानं नमस्कारेण प्रार्थयस्वेत्यर्थः ॥ त
त्किमित्यपेक्षायां कृष्णस्य वर्णस्य तस्य श्मश्रूणां लोहितत्वे कारणमुत्प्रेक्षमाणमाह ॥ सपत्न्याः कुचाभ्यां विलुलितासंमर्दि
ता या कृष्णस्य वनमाला अत एव तस्याः कुंकुमयुतैः ॥ श्मश्रुभिरुपलक्षितः ॥ किं तु मामेव मानिनीनां प्रसादं मधुप

निर्वहतु ॥ किमस्मत्प्रसादेन तस्य यदुसदसि विडंबमुपहासास्पदं ॥ कुतः यस्य दूतस्त्वमीदृक् ईदृशः ॥ १० ॥
१७८

इति दशमे षट्चत्वारिंशः ॥ ४६ ॥ सप्तचत्वारिंशके यत्र कृष्णादेशेन गोपिका । बोधयित्वोद्धवस्तत्र समनुज्ञाप्यागम
त्पुरीं ॥ अपीच्यं सुंदरं दर्शनं यस्य सः ॥ अच्युतस्येव वेषो भूषणानि च यस्य सः ॥ कोयं कुतो वा कस्य वेति वदंत्यस्तं परिवव्रुः

इति श्रीमद्भागवते महापुराणे दशमस्कंधे उद्धवयाने नंदशोकापनोदनं षट्चत्वारिंशो
ध्यायः ॥ ४६ ॥ श्रीशुक उवाच ॥ तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनं ॥ पी
तांबरं पुष्करमालिनं लसन्मुखारविंदं परिमृष्टकुंडलं ॥ शुचिस्मिताः कोयमपीच्यदर्शनः ॥ कु
तश्च कस्याच्युतवेषभूषणः ॥ इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयं ॥ १ ॥
तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहासेक्षणसूनृतादिभिः ॥ रहस्यपृच्छन्नुपविष्टमासने
विज्ञाय संदेशहरं रमापतेः ॥ २ ॥ जानीमस्त्वां यदुपतेः पार्षदं समुपागतं ॥ भर्त्रेह प्रेषितः पित्रोर्भ
वान्प्रियचिकीर्षया ॥ ३ ॥ अन्यथा गोव्रजे तस्य स्मरणीयं न चक्ष्महे ॥ स्नेहानुबंधो बंधूनां मुनेरपि सुदु
स्त्यजः ॥ ४ ॥ अन्येष्वर्थकृता मैत्री यावदर्थविडंबनं ॥ पुंभिः स्त्रीषु कृता यद्वत्सुमनःस्विव षट्पदैः ॥ ५ ॥

१ २ पार्षदं सेवकं ॥ ३ पित्रोः प्रियचिकीर्षयेत्यत्र हेतुः ॥ स्नेहानुबंध इति ॥ ४ अन्यथा गोव्रजे तस्येत्यत्र हेतुः ॥ अन्ये
ष्विति । अपेक्षिताकार्ये निमित्ताविडंबनमनुकरणमा
त्रं ॥ नतु तात्विकी मैत्री ॥ पुंभिरिति दृष्टांतो ॥ ५ ॥

पादमूले प्रविष्टं तं समाप्य विष्णुं त्वमिव मत्वाह ॥ शिरसि न्यस्तपादं विसृज ॥ तत्प्राप्य मां च तमाह ॥ वेद्मीति ॥ मुकुंदाद् अभ्येत्य ततः शि-
क्षितैरित्यर्थः ॥ कैस्तैः दूतकर्मभिः ॥ चाटुकारैः प्रियोक्तिरचनाभिः ॥ अनुनयविदुषः ॥ प्रार्थनाचतुरस्य ते सर्वं मह्यं वेद्मि मुकुंद-
वत्त्वमप्यविश्वसनीय इति भावः ॥ ननु तेन किमपराद्धं तत्राह ॥ स्वकृते इति स्वकृते तत्कृते तदर्थे येन विसृष्टाः ॥ अपत्यपत्य-
न्यलोकाः ॥ अपत्यानि पतयश्च अन्ये इह लोका कथं मे साध्य अन्या याभिः त्ता नः ॥ अकृतचेताः ॥ असंजातचित्तो यो व्यसृजत् ॥ अस्मिन्
किं नु संधातव्यम् इति ॥ १४ ॥ किंच ॥ कृष्णस्य पूर्वाणि कर्माण्यनुसंधाय न विभेम्यहम् अस्मादित्याह ॥ मृगयुरिवेति ॥ मृगयुर्लु-

विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुंदात् ॥ स्वकृत इ-
ह विसृष्टापत्यपत्यन्यलोका व्यसृजदकृतचेताः किं नु संधेयमस्मिन् ॥ १४ ॥ मृगयुरिव
कपीन्द्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानां ॥ बलिमपि बलि-
मत्त्वावेष्टयद् ध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ १५ ॥

र्व्याधः स्वयं कपीन्द्रं वालिनं विव्यधे अविध्यत् ॥ लुब्धधर्मा क्रोधीवान् ॥ अलुब्धधर्मेति वा ॥ लुब्धको हि तन्मांस-
मत्तुकामो विध्यति ॥ अयं तु न तथा किं तु निरर्थक इत्यर्थः ॥ तथा स्त्रियं च सूर्पणखां स्त्रीजितः सीतापरतंत्रः कामं एव या-
नेनाप्तिसाधनं यस्याः तां विरूपां छिन्नकर्णनासिकाम् अकरोत् ॥ दाशरथिरूपेण ॥ तथा बलिमपि तद्दत्तं बलिं अ-
त्वा भक्षयित्वा ध्वांक्षवत् काकवत् ॥ अवेष्टयत् ॥ ववंध वामनरूपेण ॥ बलिमत्वा अधोक्षिपत् ॥ विष्टपादिति पाठे बलिं पूजां

वै१

गृहीत्वा विष्टपात् स्वर्गात् अधो क्षिपत् इत्यर्थः ॥ तत्तस्मात् दास-
तस्य ख्येः अलं एवं चेत् किमिति तं नित्यं गायथ तत्राह दुस्त्यज
तस्य कथा रूपोऽर्थ इति ॥ १५ ॥

ननु किमित्येवं त्वमजानीथ॥ किंच तेनापहृतं॥ अत आह॥ सकृदिति॥ भवादृक् त्वादृशो दुर्मनाः सुमनसः कुसुमानि यथा त्य
जति तद्वत् अहो वतापि च तस्य तत्पादपद्मश्रीः कथं सेवते विदितं मयेत्याह॥ अपीति॥ वतेति खेदे उत्तमश्लोकजल्पैः मि
थ्याकथाभिः प्रायोपहृतचेताः वयं तु न लक्ष्मीवद्विचक्षणा इति भावः॥११॥ भृंकारान्व क्रुधा कुर्वंतं अस्मान्प्रसा
दयितुमायहं गायतीति मत्वाह॥ किमिहेति॥ पुराणं पुरातनं वस्तु शीनुभूतं विजयसखस्य कृष्णस्य सांप्रतं याः

सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यस्तत्यजेऽस्मान्भवादृक्॥ परिचरति कथं त
त्पादपद्मं नु पद्मा ह्यपि वत हृतचेता ह्युत्तमश्लोकजल्पैः॥११॥ किमिह बहु षडंघ्रे गायसि त्वं यदूना
मधिपतिमगृहाणामग्रतो नः पुराणं॥ विजयसखसखीनां गीयतां तत्प्रसंगः क्षपितकुचरुजस्ते
कल्पयंतीष्टमिष्टाः॥१२॥ दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृंभस्य या
ःस्युः॥ चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः॥१३॥

सखाः॥ तासामग्रतस्तत्प्रसंगो गीयतां हि कृष्णस्य प्रियास्तेन पूजिता इति वा॥ तेनालिंगितेन क्षपिता कुचरुक् यासां ताः
त एव इष्टमपेक्षितं दास्यंतीति॥१२॥ भो मानं मैवावोच॥ त्वामनुश्रुत्यानंगविक्लवस्त्वां प्रसादयितुमामादिष्टवानित्यत आह॥ दि
वीति॥ दिवि भुवि रसातले च याः स्त्रियः स्युः ताः का नाम दुरापाः न का अपीत्यर्थः॥ तस्येत्यर्थः॥ कपटेन रुचिरो हासेन भ्रू
विजृंभो यस्य तस्य हेकपवेतिवा॥ किंच यस्य चरणरजः श्रीः सेवते तत्र वयं काः॥ अपि च यद्यप्येवं तथापि कृपणपक्षे हि कृपणानु
कंपिनि दुष्टे॥ उत्तमश्लोकशब्दो भवतीति तथा कथनीयं त्वयेति भावः॥१३॥

भा०द०पू०
१८०

ह

परावृत्य गत्वा पुनरागतं प्रत्याह ॥ प्रियसखेति हे प्रियस्य सखे प्रेयसा श्रीकृष्णेन पुनः प्रेषितः किं त्वमागतोऽसि अंग हे दूत
मे माननीयः पूज्योऽसि अतो भवान्किमनुरुंधे प्रार्थुमिच्छतीत्यर्थः ॥ तद्वरय वरय त्वं समानीतं प्रत्याह ॥ नयसीति
इह सतीरस्मान् दुस्त्यजं द्वंद्वं मिथुनीभावो यस्य तस्य पार्श्वं समीपं कथं नयसि नेष्यसि ॥ तथा हि हे सौम्य श्रीर्नाम वधूः

प्रियसख पुनरागाः प्रेयसा प्रेषितः किं वरय किमनुरुंधे माननीयोऽसि मेऽङ्ग ॥ नयसि कथमिहास्मा
न्दुस्त्यजद्वंद्वपार्श्वं सततमुरसि सौम्य श्रीर्वधूः साकमास्ते ॥ १८ ॥ अपि बत मधुपुर्यामार्यपुत्रोऽ
धुनास्ते स्मरति स पितृगेहान्सौम्य बंधूंश्च गोपान् ॥ क्वचिदपि स कथा नः किंकरीणां गृणीते भुजम
गुरुसुगंधं मूर्ध्न्यधास्यत्कदा नु ॥ १९ ॥ श्रीशुक उवाच ॥ अथोद्धवो निशम्यैवं कृष्णदर्शनलालसाः ॥
सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत ॥ २० ॥ साकं सदैव सततमास्ते तत्रापि उरसि वक्षस्येव ॥ १८ ॥ तेन
संमंत्रिता सति ब्रूते ॥ अपि बतेति ॥ बतेति हर्षे हे सौम्य गुरुकुलादागत्य आर्यपुत्रः श्रीकृष्णः ॥ अधुना किं म
धुपुर्यां वर्तते ॥ कदाचिदपि नोऽस्माकं वार्तां किं ब्रूते ॥ अगुरुवत्सुगंधं भुजं नो मूर्ध्नि कदा नु धास्यतीति ॥ १९ ॥
श्रीकृष्णदर्शनोत्सुका गोपीः प्रियस्य संदेशैः सांत्वयन् ॥ प्रथमं तावदिदमभाषत ॥ २० ॥ ॥ ऽऽ ॥ ऽऽ ॥ ॥ ऽऽ १८०

अपिचजानीमएवतत्कथापित्रिवर्गलतातान्मूलोन्मूलिनीति॥ तथापिनत्यक्तुंशक्नुमः॥ किंकुर्मइत्याह॥ यदनुचरितेति
यस्यानुचरितमेवलीलातद्देवकर्णपीयूषं॥ तस्यविप्रुट्कणिकातस्याःसकृददनेतेनविधूतानिरस्ताद्वंद्वधर्मारागा
द्वेषायेषांते॥ अतएवविनष्टाअसत्तुल्याः॥ दीनंदुःखितंगृहंकुटुंबंविहायदीनाभोगहीनाविहंगाइवभिक्षुचर्यांप्राणवृत्ति
मात्रंचरंति॥ अतस्त्याज्यस्तत्कथापित्यक्तुंनशक्नुमइतिनिंदापरत्वंप्रथमंतावच्छ्रोतोऽर्थः॥ दुस्त्यजत्वेपिपारमार्थिकोयमर्थः
विधूतद्वंद्वधर्मादृत्यंतःसमासःपूर्ववत्॥ ततस्तेचतेअविनष्टाश्चेतिसमासः इतरेपुनर्द्वंद्वधर्माणोविनष्टाएव॥ सपदि

यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वंद्वधर्माविनष्टाः॥ सपदिगृहकुटुंबंदीनमुत्सृ
ज्यदीनाबहवइवविहंगाभिक्षुचर्यांचरंति॥१८॥ वयमृतमिवजिह्मव्याहृतंश्रद्दधानाःकुलिकरुतमि
वाज्ञाःकृष्णवध्वोहरिण्यः॥ ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुजउपमंत्रिन्भण्यतामन्यवार्ता॥१९॥

तत्क्षणमेवदीनंतुच्छंगृहसहितंकुटुंबंविहायदीनाइवाकिंचनाः॥ धीराइतिवापाठः बहवोविहंगाहंसाइवसारासारविवेक
चतुराःभिक्षुचर्यांपारमहंस्यंचरंति॥ तस्मादेवंपरमपुरुषार्थत्वात्॥ दुस्त्यजएवतत्कथार्थइति॥१८॥ ननुकिमेवंब्रूष॥ एवं
त्वय्येवसाकंरहसिकिमेवंनावोचदिति॥ अतआह॥ वयमिति॥ हेउपमंत्रिन्दूत॥ आस्तामियंवार्ता ततःकुलिकस्यमृगयो
र्वधिकस्यरुतंगीतं॥ अज्ञायथाऋतम्॥ सत्यमिवश्रद्दधानाः॥ कृष्णस्यहरिणस्यवध्वोभार्याःहरिण्यःशरैर्हताः सत्यो
ऽस्मोददृशुः॥ एवंजिह्मस्यकौटिल्यस्यतस्यव्याहृतंऋतमिवश्रद्दधानाः॥ स्पृहयंत्यावयंअसकृदेतद्दृष्टिमकिंतत्

तस्यनखैःस्पर्शः॥ तेनतीव्रःस्मरस्तेनरुजःपीडाःतस्मा
दन्यावार्ताभण्यतामिति॥१९॥

भा०द०ए० अतएवसर्वेषुमनआदिकार्येष्वहमनुगतत्वेनस्थितइतिसदृष्टांतमाह ॥ यथेति ॥ भूतेषुचराचरेषुमहाभू
१८१ तानियथावाय्वग्निः ॥ वायुसहितोऽग्निरित्यर्थः ॥ तथाहंचेति ॥ मनआदीनिकार्याणिगुणाःकारणं तेषामाश्रय
त्वेनानुगतइत्यर्थः ॥२८॥ ननुकारणत्वेसर्वानुगतत्वेचकार्यकारणभेदःस्यादतआह ॥ आत्मन्येवेति ॥ ननुनिर
सिद्धस्यकुतःसृज्यादिरूपताअतआह ॥ भूतेन्द्रियगुणात्मना ॥ बुद्धीन्द्रियैरितिवापाठः ॥ तद्रूपेणेति ॥ ननुनिर्विका

यथाभूतानिभूतेषुखंवाय्वग्निर्जलंमही ॥ तथाहंचमनःप्राणबुद्धीन्द्रियगुणाश्रयः ॥२८॥ आत्मन्येवात्मनात्मानंसृजेहन्म्यनुपालये ॥ आत्ममायानुभावेनभूतेन्द्रियगुणात्मना ॥२९॥ आत्माज्ञानमयःशुद्धोव्यतिरिक्तोगुणान्वयः ॥ सुषुप्तस्वप्नजाग्रद्भिर्मनोवृत्तिभिरीयते ॥३०॥

रस्यकुतस्तद्रूपतेतितत्राह ॥ आत्ममायानुभावेनेति ॥२९॥ नन्वात्मनोभूतादिरूपत्वेतद्दोषप्रसंगःस्यात्तत्राह
आत्मेति ॥ आत्मातुशुद्धः ॥ कुतः ॥ अगुणान्वयः ॥ नगुणेष्वन्वेतीतितथा ॥ तत्कुतः ॥ व्यतिरिक्तः ॥ तदपिकुतः ॥ ज्ञान
मयः ज्ञानस्वरूपः नन्वहंप्रत्ययसंवेद्यमेवात्मनोनानावस्थात्वंकुतःशुद्धतातत्राह ॥ मायाकार्यमनोवृत्तिभिर्वि
श्वतैजसप्राज्ञरूपेणप्रतीयते ॥ नस्वतइत्यर्थः ॥३०॥ १८१

तदाषड्भिः अहो इति स्मन्नूनं यूयं पूर्णार्थाः कृतार्थाः ॥२१॥ श्रेयोभिः श्रेयःसाधनैः ॥२२॥ अनुत्तमा अतिश्रेष्ठाः ॥२३॥ त्व
वृणीतवत्य ॥२४॥ सर्वात्मभावः एकांतभक्तिः अधिकृतः प्राप्तः ॥ भगवत्प्रेमसुख [illegible] प्रदर्शनेन मम एवमहान

उद्धवउवाच ॥ अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः ॥ वासुदेवे भगवति यासामित्यर्पि
तं मनः ॥२१॥ दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि
साध्यते ॥२२॥ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ॥ भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दु
र्लभा ॥२३॥ दिष्ट्या पुत्रान्पतीन्देहान्स्वजनान्भवनानि च ॥ हित्वावृणीत यूयं यत्कृष्णाख्यं पु
रुषं परं ॥२४॥ सर्वात्मभावोधिकृतो भवतीनामधोक्षजे ॥ विरहेण महाभागा महान्मेनुग्रहः
कृतः ॥२५॥ श्रूयतां प्रियसंदेशो भवतीनां सुखावहः ॥ यमादायागतो भद्रा अहं भर्तु
रहस्करः ॥२६॥ श्रीभगवानुवाच ॥ भवतीनां वियोगो मे नहि सर्वात्मना क्वचित् ॥२७॥

नुग्रहः कृत इति ॥२५॥ भर्तुः श्रीकृष्णस्य रहस्करः रहसि कार्यकर्ता ॥२६॥ भवतीनां मे मया सह वियोगो ना
स्ति कुतः सर्वात्मना सर्वस्योपादानकारणेन ॥२७॥

भा०द०पू ३५ उपेक्ष्य यद्गतिमाधूर्त्यमात्रमिदमितिचेदत आह || यादृति हे कल्याण्यः भर्तृभिरुद्धापाः वनेक्रीडास्तास्त
१८२ मां मां आपुः आप्तः || तस्य संदेशेनागता स्मृतिर्यासां ताः || प्रथमार्थे द्वितीया || ३६ || यदूनां अहितः शत्रुः अघ
कृद्दुःखदः || दिष्ट्या त्यानंदे || आप्ते हिते वसह || ३७ || अन्या ऊचुः || कच्चिदिति नोऽस्माकं करणीयां प्रीतिं कच्चित

मर्य्यावेश्य मनः कृत्स्नं विमुक्ताशेषवृत्ति यत् || अनुस्मरंत्यो मां नित्यमचिरान्मामुपेष्यथ || ३५ || या
ज२ मया क्रीडता रात्र्यां वनेऽस्मिन्व्रज आस्थिताः || अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिंतया || ३६ ||
श्रीशुक उवाच || एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः || ता ऊचुरुद्धवं प्रीतास्तत्संदेशा
गतस्मृतीः || ३७ || गोप्य ऊचुः || दिष्ट्याहितो हतः कंसो यदूनां सानुगोऽघकृत् || दिष्ट्याप्तैर्लब्ध
सर्वार्थैः कुशल्यास्तेऽच्युतोऽधुना || ३८ || कच्चिद्गदाग्रजः सौम्य करोति पुरयोषितां || प्रीतिं नः स्नि
ग्धसव्रीडहासोदारेक्षणार्चितः || ३९ || कथं रतिविशेषज्ञः प्रियश्च पुरयोषितां || नानुबध्येत तद्
वाक्यैर्विभ्रमैश्चानुभाजितः || ४० ||

पुरयोषितां करोति || स्निग्धं च तत् सव्रीडहासेनोदारमीक्षणं तेनार्चितः || ताभिरस्माभिर्वा || ३९ || अन्या
ऊचुः || कथमिति तत्तासां वाक्यैर्विभ्रमैश्चानुभाजितः पूजितः || ४० || रामराम रामराम रामराम रामराम १८२

कुतो मनोनिरोधे तदभावादिति ॥ व्यतिरेकं दर्शयितुं मनोनिरोधं विधत्ते ॥ येनेति ॥ उत्थितः पुमान् यथा मिथ्याभूत
मेव स्वप्नं ध्यायति ॥ एवं बाधितानपींद्रियार्थान् शब्दादीन् येन मनसा ध्यायेत ॥ चिंतयेत् ॥ ध्यायंश्च येन इंद्रियाणि प्रत्यप
द्यतः प्राप्नुः ॥ तन्मनः विनिद्रः ॥ अनलसः सन्निरुंध्यात् नियच्छेदिति ३१ तावता च कृतार्थो भवतीत्याह ॥ एतदंत इति
एष मनोनिरोधः ॥ अंतः समाप्तिः फलं यस्य सः समाम्नायो वेदः ॥ स तत्र पर्यवस्यतीत्यर्थः ॥ योगोऽष्टांगः सांख्यं आ

येनेंद्रियार्थान्ध्यायेत मृषा स्वप्नवदुत्थितः ॥ तन्निरुंध्यादिंद्रियाणि विनिद्रः प्रत्यपद्यत ॥ ३१ ॥
यो २ एतदंतः समाम्नायो योगः सांख्यं मनीषिणां ॥ त्यागस्तपो दमः सत्यं समुद्रांता इवापगाः ॥ ३२ ॥ यत्त्व
हं भवतीनां वै दूरे वर्ते प्रियो दृशां ॥ मनसः संनिकर्षार्थं मदनुध्यानकाम्यया ॥ ३३ ॥ यथा दूरच
रे प्रेष्ठे मन आविश्य वर्तते ॥ स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ॥ ३४ ॥

त्मानात्मविवेकः ॥ त्यागः संन्यासः ॥ तपः स्वधर्मः ॥ दमः इंद्रियदमनं ॥ मार्गभेदेप्येकत्र पर्यवसाने दृष्टांतः ॥ समुद्रांता आ
पगा नद्य इवेति ॥ ३२ ॥ ननु किमन्यानिवास्मानात्मविद्यया प्रलोभयसि वयं तु सर्वसुंदरसकलगुणगणालंकृ
तेन त्वया विरहं नैव सहामहे इति चेदत आह ॥ यत्त्वहमिति ॥ दृशां दूरे यद्वर्ते ॥ तन्मदनुध्यानार्थं ॥ तच्च ध्यानं मन
सः सन्निकर्षार्थमिति ॥ ३३ ॥ एतदुपपादयति श्लोकत्रयेण ॥ यथा दूरचर इति ॥ ३४ ॥ ॥.३५ ॥. ॥ ५५ ॥

ततोऽघटमाना कृष्णसंगतिः सैवास्मानाकुलयति ॥ अतो नैराश्यमेव परमसुखं तच्चातिदुष्करमित्याहुः ॥ परं सौख्यमिति
स्वैरिणी कामचारिणी ॥ ४६ ॥ संविदं एकांतवार्त्तां ॥ ४७ ॥ किंच तं हि स्मर्तुं नेतावद्दुःखमस्ति ॥ सापि नास्माकं भवतीत्याहुः ॥ सरि

परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिंगला ॥ तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ॥ ४६ ॥ क उत्स
हेत संत्यक्तुमुत्तमश्लोकसंविदं ॥ अनिच्छतोपि यस्य श्रीरंगान्न च्यवते क्वचित् ॥ ४७ ॥ सरिच्छैलव
नोद्देशा गावो वेणुरवा इमे ॥ संकर्षणसहायेन कृष्णेनाचरिताः प्रभो ॥ पुनः पुनः स्मारयंति
नंदगोपसुतं वत ॥ श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ॥ ४८ ॥ गत्या ललितयोदारहास
लीलावलोकनैः ॥ माध्व्या गिरा हृतधियः कथं तं विस्मरामहे ॥ ४९ ॥ हे नाथ हे रमानाथ व्रजना
थार्तिनाशन ॥ मग्नमुद्धर गोविंद गोकुलं वृजिनार्णवे ॥ ५० ॥ श्रीशुक उवाच ॥ ततस्ताः
कृष्णसंदेशैर्व्यपेतविरहज्वराः ॥ उद्धवं पूजयांचक्रुर्ज्ञात्वात्मानमधोक्षजं ॥ ५१ ॥ उवास कतिचि
न्मासान् गोपीनां विनुदन् शुचः ॥ कृष्णलीलाकथां गायन् रमयामास गोकुलं ॥ ५२ ॥

च्छैलेति त्रिभिः ॥ आचरिताः सेविताः ॥ ४८ ॥ हे उद्धव कथं विस्मरामेति ॥ ४९ ॥ ५० ॥ कृष्णमधोक्षजं ज्ञात्वा तं च स्वात्मानं
ज्ञात्वा ॥ ५१ ॥ विनुदन् अपनयन् ॥ ५२ ॥

पुनरन्याऊचुः किमनया चिंतयास्मान् ॥ कश्चित्प्रस्तुते प्रस्तावे स्मरति किं ग्राम्या अविदग्धाः ॥ ६१ ॥ अन्याऊचुः
ताः किमिति कुमुदैः कुंदैः शशांकेन च रम्ये वृंदावने क्वणंति चरणनूपुराणि यस्यां तस्यां रासगोष्ठ्यां ॥ अस्माभिः
प्रियाभिः ईडिता मनोज्ञा कथा यस्य सः ॥ तदा यासु निशासु रेमे ताः ॥ कदाचित्किं नु स्मरति वा न वेति ॥ ६२ ॥ स्वनिमित्तं

अपि स्मरति नः साधो गोविंदः प्रस्तुते क्वचित् ॥ गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः स्वैरकथांतरे ॥ ६१ ॥
ताः किं निशाः स्मरति यासु तदा प्रियाभिर्वृंदावने कुमुदकुंदशशांकरम्ये ॥ रेमे क्वणच्चरण
पुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ॥ ६२ ॥ अप्येष्यतीह दाशार्हस्तप्ताः
स्वकृतया शुचा ॥ संजीवयंस्तु नो गात्रैर्यथेंद्रो वनमंबुदैः ॥ ६३ ॥ कस्मात्कृष्ण इहायाति प्राप्तरा
ज्यो हताहितः ॥ नरेंद्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः ॥ ६४ ॥ किमस्माभिर्वनौकाभिरन्या
भिर्वा महात्मनः ॥ श्रीपतेराप्तकामस्य क्रियेतार्थः कृतात्मनः ॥ ६५ ॥

न शोकेन तप्तान् ॥ अस्मान् गात्रैः करस्पर्शादिभिः संजीवयन् किं नु इहैष्यतीति ॥ ६३ ॥ अन्याऊचुः कस्मादिति अन
न्यगतित्वेन एवमत्रावसत् ॥ संप्रति महदैश्वर्यं प्राप्तः कस्मादिहागमिष्यतीति ॥ ६४ ॥ अन्यास्तु परमार्थमूचुः किमस्माभिरिति
वनचरीभिरस्माभिरन्याभिर्वा राजकन्याभिर्महात्मनो धीरस्य ॥ किंच श्रीपतेः ॥ तदप्याप्तत्वात्तस्य तत एवाप्तकामस्य ॥ अत एवाकृ

तात्मनः ॥ पूर्णस्य किं काप्यर्थः क्रियेत न कश्चिदिति ॥ ६५ ॥

भा॰द॰पू॰ १२४ किंचईश्वरप्रसादोमहत्वेकारणं॥तस्यचनजातिराचारोज्ञानंवाकारणं॥किंतुकेवलंभजनमेवेत्या
ह॥क्वेमाइति॥साक्षाद्भजतःपुंसः॥नन्नुअहोउपयुक्तःसेवितः॥अगदराजः॥अमृतंयथेति॥५९॥अत्यंत
दुर्लभोयंगोपीषुभगवतःप्रसादइत्याह॥नायमिति॥अंगेवक्षसि उ अहो नितांतरतेः॥एकांतरतिमत्याः
श्रियोपिनायंप्रसादः॥अनुग्रहोऽस्ति॥नलिनस्येवगंधोरुक्कांतिश्चयासांतासांस्वर्गांगनानामप्सरसां

क्वेमाःस्त्रियोवनचरीर्व्यभिचारदुष्टाःकृष्णेक्वचैषपरमात्मनिरूढभावः॥नन्वीश्वरो
नुभजतोविदुषोपिसाक्षाच्छ्रेयस्तनोत्यगदराजइवोपयुक्तः॥५९॥नायंश्रियोऽ
गउनितांतरतेःप्रसादःस्वर्योषितांनलिनगंधरुचांकुतोन्याः॥रासोत्सवेऽस्यभुजदंडगृही
तकंठलब्धाशिषांयउदगाद्व्रजसुंदरीणां॥६०॥आसामहोचरणरेणुजुषामहंस्यांवृंदा
वनेकिमपिगुल्मलतौषधीनां॥यादुस्त्यजंस्वजनमार्य्यपथंचहित्वाभेजुर्मुकुंदपदवींश्रुति
भिर्विमृग्यां॥६१॥

मपिनास्ति॥अन्याःपुनर्दूरतोनिरस्ताः॥रासोत्सवेकंठस्यभुजदंडाभ्यांगृहीतःआलिंगितः॥
कंठस्तेनलब्धाआशिषोयाभिस्तासांगोपीनांयउदगादाविर्बभूव॥६०॥किंच॥आस्तांतावद्गोपिकानांभाग्यंममत्वेत
तावत्प्रार्थ्यमित्याह॥आसामितिगोपीनांचरणरेणुभाजांगुल्मादीनांमध्येयत्किमपिअहंस्यामित्याशंका॥कथंभूता १२४

श्री

५३ ५४ सरिद्वनगिरिदर्य्यादिषु प्रत्येकं कृष्णसंप्रश्नादिभिः संस्मारयन् रेमे ५४ कृष्णावेशेनात्मनो मनसो विक्ल
वं वैक्लव्यं ता गोपीर्नमस्यन् नमस्करिष्यन् उत्तमस्यात्मनो गोपस्त्रीनमस्कृतिरन्याय्यो न भवतीति दर्शयितुं तासां मह
त्वं पंचभिर्जगौ उवाच ५५ एता इत्ति एताः परं केवलं तनुभृतः सफलजन्मानः रूढभा(वाः१)परमप्रेमवत्यः यदिति यं निरू

यावंत्यहानि नंदस्य व्रजेवात्सीत्स उद्धवः व्रजौकसां क्षणप्राया ण्यासन्कृष्णस्य वार्त्तया ५३
सरिद्वनगिरिद्रोणीर्वीक्षन्कुसुमितान्द्रुमान् कृष्णंसंस्मारयन्रेमे हरिदासो व्रजौकसां ५४
दृष्ट्वैवमादिगोपीनां कृष्णावेशात्मविक्लवं उद्धवः परमप्रीतस्तान्नमस्यन्निदं जगौ ५५
एताः परं तनुभृतो भुवि गोपवध्वो गोविंद एव मखिलात्मनि रूढभावाः वांछंति यद्भवभि
यो मुनयो वयं च किं ब्रह्मजन्मभिरनंतकथारसस्य ५६ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥

ढभावं भवभियो मुमुक्षवः मुनयो मुक्ता अपि वांछंति वयं भक्ता अपि अतः अनंतस्य कथासु रसो रागो
यस्य तस्य ब्रह्मजन्मभिः विप्रसंबंधिभिः सौक्रसावित्रयाज्ञकैस्त्रिभिर्जन्मभिः किं को तिशयः यत्र तत्र
जातः स एव सर्वोत्तम इत्यर्थः यद्वा अनंतकथासु अरसो यस्य तस्य ब्रह्मजन्मभिश्च तुर्मुखजन्मभिरपि

भा०१०·प० कृष्णादिभ्योभक्त्युद्रेकमाह ॥ उपायनानि दत्वा ति ॥ ६७ ॥ इति दशमे सप्तचत्वारिंशः ॥ ४७ ॥ अष्टचत्वारिंशके यत्त
१८५ स्यं कुब्जामरीरमत् ॥ अक्रूरस्य गृहं गत्वा तं गजोद्धयमादिशत् ॥ सैरिंध्रीकाममापूर्य्य पूरयित्वा मनोरथम् ॥ अक्रूरस्य
कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसां ॥ वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ॥ ६७ ॥ इति श्री
मद्भागवते महापुराणे दशमस्कंधे उद्धवगमनं सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ श्रीशुक उवाच ॥
अथ विज्ञाय भगवान्सर्वात्मा सर्वदर्शनः ॥ सैरिंध्र्याः काम तप्तायाः प्रियमिच्छन्गृहं ययौ ॥ १ ॥
महार्होपस्करैराढ्यं कामोपायोपबृंहितं ॥ मुक्तादामपताकाभिर्वितानशयनासनैः ॥
धूपैः सुरभिभिर्दीपैः स्रग्गंधैरपि मंडितम् ॥ १ ॥ गृहं समायांतमवेक्ष्य सासनात्सद्यः समु
स २ त्थाय हि जातसंभ्रमा ॥ यथोपसंगम्य सखीभिरच्युतं सभाजयामास सदासनादिभिः ॥ २ ॥ तथो
द्धवः साधु तयाभिपूजितो न्यषीदद्दुर्व्यामभिमृश्य चासनं ॥ कृष्णोपि तूर्णं शयनं महाधनं
विवेश लोकाचरितान्यनुव्रतः ॥ ३ ॥
गतः कृष्णस्तेन पार्थान्सांत्वयत् ॥ १ ॥ महार्हैरनर्घ्यै रुपस्करैर्गृहोपकरणैराढ्यं कामोपायैस्तदुद्दीपकैः सुरत वंधाविलेख्यैकपर्यंहितं ॥ ४ ॥ पश्चायपोचितं ॥ २ ३ ॥
१८५

पुनस्ताएवविशिनष्टि ॥ याचाइति ॥ योगेश्वरैरप्यात्मन्येवार्चितं स्तनेषुन्यस्तंपरिरभ्य तापंजहुरिति ॥ ६० ॥ एवंमहत्त्वंप्र
तिपाद्यनमस्करोतिवंदइति ॥ ६१ ॥ अनुज्ञाप्य अनुज्ञांयाचित्वा ॥ आमंत्र्यपृष्ट्वा ॥ ६२ ॥ ६३ ॥ नः अस्माकम् ॥ मनसोवृत्तयः कृष्ण

यावैश्रियार्चितमजादिभिराप्तकामैर्योगेश्वरैरपियदात्मनिरासगोष्ठ्यां ॥ कृष्णस्यतद्भगवतश्चरणा
रविंदंन्यस्तंस्तनेषुविजहुःपरिरभ्यतापं ॥ ६० ॥ वंदेनंदव्रजस्त्रीणांपादरेणुमभिक्ष्णशः ॥ यासांहरि
कथोद्गीतंपुनातिभुवनत्रयं ॥ ६१ ॥ श्रीशुकउवाच ॥ अथगोपीरनुज्ञाप्ययशोदांनंदएवच ॥ गो
पानामंत्र्यदाशार्होयास्यन्नारुरुहेरथं ॥ ६२ ॥ तंनिर्गतंसमासाद्यनानोपायनपाणयः ॥ नंदाद
योनुरागेणप्रावोचन्नश्रुलोचनाः ॥ ६३ ॥ मनसोवृत्तयोनःस्युःकृष्णपादांबुजाश्रयाः ॥ वाचोभि
धायिनीर्नाम्नांकायस्तत्प्रह्वणादिषु ॥ ६४ ॥ कर्मभिर्भ्राम्यमाणानांयत्रक्वापीश्वरेच्छया ॥ मंग
लाचरितैर्दानैरतिर्नःकृष्णईश्वरे ॥ ६५ ॥ एवंसभाजितोगोपैःकृष्णभक्त्यानराधिप ॥ उद्धवःपु
नरगमन्मथुरांकृष्णपालिताम् ॥ ६६ ॥

पादांबुजाश्रयाःस्युः ॥ अभिधायिनीः ॥ अभिधायिन्यः ॥ ६४ ॥ कृष्णेरतिःस्यादिति ॥ ६५ ॥ ६६ ॥ श्रीरामरामरा

भा०द०पू० मनोग्राह्यं विषयसुखं असत्वात् तुच्छत्वात् ॥१०॥ किंचिच्चिकीर्षयन् हस्तिनापुरप्रस्थानं कारयितुमिच्छन्नि
१८६ त्यर्थः ॥ अक्रूरप्रियकाम्यया च ॥११॥ आरात् दूरत एव ॥१२॥१३॥ आत्र पदं तिष्ठेदः ॥ अप आसवेतोधारयन्नित्यन्वयः ॥१४॥

दुराराध्यं समाराध्य विष्णुं सर्ववरेश्वरं ॥ यो वृणीते मनोग्राह्यमसत्वात्कुमनीष्यसौ ॥१०॥ अक्रूर
भवनं कृष्णः सहरामोद्धवः प्रभुः ॥ किंचिच्चिकीर्षयन्प्रागादक्रूरप्रियकाम्यया ॥११॥ स तान्नरवर
श्रेष्ठानाराद्वीक्ष्य स्वबांधवान् ॥ प्रत्युत्थाय प्रमुदितः परिष्वज्याभिनंदत ॥१२॥ ननाम कृष्णं रामं
च स तैरप्यभिवादितः ॥ पूजयामास विधिवत्कृतासनपरिग्रहं ॥१३॥ पादावनेजनीरापो धार रि
यन् शिरसा नृप ॥ अर्हणेनांबरैर्दिव्यैर्गंधस्रग्भूषणोत्तमैः ॥ अर्चित्वा शिरसानम्य पादावंकग
तौ मृजन् ॥ प्रश्रयावनतोऽक्रूरः कृष्णरामावभाषत ॥१४॥ दिष्ट्या पापो हतः कंसः सानुगो वामिदं
कुलं ॥ भवद्भ्यामुद्धृतं कृच्छ्राद्दुरंताच्च समेधितं ॥१५॥ युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ
भवद्भ्यां न विना किंचित्परमस्ति न चापरं ॥१६॥

वां युवयोरिदं कुलं उद्धृतं समेधितं च ॥१५॥ वामिदं कुलमित्यादि व्यवहारदृष्ट्योक्तं परमार्थमाह युवामिति जग
न्मयौ युवां ॥ कुतः जगद्धेतू ॥ तदपि कुतः ॥ प्रधानपुरुषौ तदात्मकौ ॥ अतो भवद्भ्यां विना यत्कारणमपरं कार्यं च न

१८६

प्रसाधितोयोग्यतामापादितः॥आत्मादेहोयेनसासव्रीडयल्लीलयोत्स्मितंतेन॥येषुविभ्रमेषुतद्युक्तैरीक्षितैरुपल
क्षिता॥४॥अनुलेपार्पणादन्यत्तस्याःपुण्यंनास्तीतिदर्शयितुंपुण्यलेशयेत्युक्तं॥नतुपुण्यस्यास्यविवक्षया॥५॥कु

सामज्जनालेपदुकूलभूषणस्रग्गंधतांबूलसुधासवादिभिः॥प्रसाधितात्मोपससारमाधवंस
व्रीडलीलोत्स्मितविभ्रमेक्षितैः॥४॥आहूयकांतांनवसंगमह्रियाविशंकितांकंकणभूषितेकरे॥प्र
गृह्यशय्यामधिवेश्यरामयारेमेनुलेपार्पणपुण्यलेशया॥५॥सानंगतप्तकुचयोरुरसस्तथाक्ष्णो
र्जिघ्रंत्यनंतचरणेनरुजोमृजंती॥दोर्भ्यांस्तनांतरगतंपरिरभ्यकांतमानंदमूर्तिमजहादति
दीर्घतापं॥६॥सैवंकैवल्यनाथंतंप्राप्यदुष्प्रापमीश्वरं॥अंगरागार्पणेनाहोदुर्भगेदमयाचत
॥७॥आहोष्यतामिहप्रेष्ठदिनानिकतिचिन्मया॥रमस्वनोत्सहेत्यक्तुंसंगंतेंबुरुहेक्षण॥८॥तस्यै
कामवरंदत्वामानयित्वासमानदः॥सहोद्धवेनसर्वेशःस्वधामागमदृद्धिमत्॥९॥

वादीनोरुजोमृजंतीजिघ्रंतीचरणं॥६॥काममेवप्रकृतंदुष्प्राप्यमयाचत॥नचगोप्यइवसातन्निष्ठेतिदुर्भगे
त्युक्तं॥कृतार्थत्वेतुनस्यान्नसंदेहः॥७॥८॥कामएववरस्तंदत्वामानयित्वाचालंकारादिदानैः॥९॥ ॥९९

भा॰द॰पू॰ किंच ॥ आस्तां तावत्तव वंधशंका ॥ यतो विद्योपाधेर्जीवात्मनोपि न वस्तुतो वंधोस्तीत्याह ॥ देहाद्युपाधेरिति भवो ज
१८७ न्म तत्स्थूलाभिधा च साक्षाल्लक्षरूपोऽतो न स्यादिति ॥ ननु मम वंधाभावं वदता त्वया किं मोऽङ्गीकृतः ॥ उंमिति चे
वा३ त्तर्हि वंधाभावे मोक्षोऽसंभवादापन्नो वंधोपीत्याशंक्याह ॥ अत इति ॥ यतो नाविद्या ॥ अतो नापि वंधश्च मोक्षश्च ए
वमुभौ न स्यातामित्यर्थः ॥ ननु उलूखले मां वद्धं श्रुतं भवान् ॥ यमुनाह्रदे तु मुक्तं दृष्टवानसीति ॥ अतः कथमुभयं

देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदात्मनः स्यात् ॥ अतो न वंधस्तव नैव मोक्षः स्यातां
निकामस्त्वयि नोऽविवेकः ॥ २० ॥ त्वयोदितोयं जगतो हिताय यदा यदा वेदपथः पुराणः ॥ वाध्येत पा
षंडपथैरसद्भिस्तदा भवान्सत्वगुणं विभर्ति ॥ २१ ॥ स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भा
रमपनेतुमिहासि भूमेः ॥ अक्षौहिणीशतवधेन सुरेतरांशराज्ञाममुष्य च कुलस्य यशो वितन्वन् ॥ २२ ॥

नास्ति ॥ अत आह ॥ निकाम इति स्वाभिप्रायानुरूपस्त्वयि नोऽस्माकमविवेक एव । परमेवं भवतु इति ॥ यद्वा ॥ नोऽस्माकं विवेक एव
तवोभौ न स्यातामिति ॥ २० ॥ ननु ममावतारास्तच्चरित्राणि च शुक्तिरजतवदविद्याकल्पितान्येव किं न हि न हि ॥ इयं तु तव लीले
त्याह द्वयेन ॥ त्वयोदित इति ॥ अयं भावः यथा जीवाविद्याकल्पितान् शुक्तिरजतादीन् निर्जीव संमोहकान् ॥ नैवमवतारादिकं मा
यिकं त्वयैव भावः स्वेच्छया दर्शितत्वादिति ॥ २१ ॥ सुरेतरांशराज्ञां तेषां ॥ अक्षौहिणीशतानां वधेन भूमेर्भारमपनेतुं ॥ स्वांशेन रामे

श्रीमद्भागवतटीका॰ ४८

१८७

नत्वप्रत्यक्षादिसिद्धं ॥ विश्वं कथं नास्तीत्युच्यते ॥ अत आह ॥ आत्मसृष्टमिति ॥ ब्रह्मन् ॥ हे परमेश्वर ब्रह्मेति वा पाठः ॥ रज
आदिशक्तिभिः आत्मनैवासृजमिदं विश्वं अन्वाविश्य करणत्वादनेनु प्रविष्टोप्यनुप्रविश्यैव स्थितः ॥ श्रुतप्रत्यक्षगोच
रं यथा भवति तथा ॥ बहुधा भने व प्रतीयते ॥ १७ ॥ एकस्यैव बहुधा प्रतीतिं सदृष्टांतमाह ॥ यथा ही ॥ योनिषु स्वैर्व
पातरेणाभिव्यक्तिस्थानेषु चराचरेषु यथा महीप्रमुखानि कारणान्येव नाना भांति ॥ आत्मयोनिषु स्वकारणेषु

आत्मसृष्टमिदं विश्वमन्वाविश्य स्वशक्तिभिः ॥ ईयते बहुधा ब्रह्मन् श्रुतप्रत्यक्षगोचरं ॥ १७ ॥ यथा
हि भूतेषु चराचरेषु मह्याद्यो योनिषु भांति नाना ॥ एवं भवान् केवल आत्मयोनिष्वात्मात्मतंत्रो ब
हुधा विभाति ॥ १८ ॥ सृजस्यथो लुंपसि पासि विश्वं रजस्तमः सत्वगुणैः स्वशक्तिभिः ॥ न बध्यसे त
द्गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च बंधहेतुः ॥ १९ ॥ भूतभौतिकेषु ॥ जीवोपि नरम्रगादिशरीरेषु बालयु
वाद्यवस्थासु च तथा प्रतीयत इति ॥ तद्धाव छेदार्थमात्मतंत्र ग्रहणं ॥ १८ ॥ ननु सृष्ट्यादिकर्तृत्वेन च ममकिं
जीववद्बंध उक्तः ॥ नहीं नहीत्याह ॥ सृजसीति ॥ तद्गुणकर्मभिर्वा ॥ तेः गुणैः ॥ कर्मभिर्वेत्यर्थः ॥ यतः ॥ क्वचकदाचि
दपि बंधहेतुरविद्या तव नैवास्ति कुत इत्यत आह ॥ ज्ञानात्मन इति ॥ मायाआश्रयानावरकत्वादिति भावः ॥ सा

[illegible]

भा॰द॰पू॰
१८८

ननु नृभिर्देवाः सेव्या इति प्रसिद्धं तत्राह देवा इति । स्वार्थाः स्वकार्यसाधनपराः साधवस्तु केवलपरानुग्रह-
पराः परमार्थतस्तु साधव एव देवा इति त एव सेव्या इत्यर्थः ॥२८॥ तर्हि मृच्छिलादिमयाः किं देवादयो नैवेत्यत आह
न हीति । अम्मयानि तीर्थानि मृन्मयाः शिलामयाश्च देवा न भवन्तीति न अपि तु भवन्त्येव तथापि साधूनां तेषां च मह-

भवद्विधा महाभागा निषेव्या अर्हसत्तमाः । श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः ॥२८॥
न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः । ते पुनंत्युरुकालेन दर्शनादेव साधवः ॥२९॥ स
भवान्सुहृदां वै नः श्रेयान्श्रेयश्चिकीर्षया । जिज्ञासार्थं पांडवानां गच्छस्व गजसाह्वयं ॥३०॥ पित-
र्युपरते बालाः सह मात्रा सुदुःखिताः । आनीताः स्वपुरं राज्ञा वसंत इति शुश्रुम ॥३१॥ तेषु राजां-
बिकापुत्रो भ्रातृपुत्रेषु दीनधीः । समो न वर्त्तते नूनं दुष्पुत्रवशगोऽन्धदृक् ॥३२॥

दन्तरमित्याह ते पुनंतीति ॥२९॥ किंचिच्चिकीर्षयन्न प्रागादिति यदुक्तं तत्कार्यमादिशति स इति । नः सुहृदां मध्ये भवान्श्रे-
ष्ठः अतः पांडवानां श्रेयश्चिकीर्षया गजसाह्वयं गच्छस्व गच्छेति । यद्वा स्वेति पृथक्पदं हे स्व आत्मीयेत्यर्थः ॥३०॥ राज्ञा ध-
तराष्ट्रेणावसंतेति निवसंतीति शुश्रुम श्रुतवंतो वयं ॥३१॥ दुष्टा ये पुत्रा दुर्योधनादयस्तद्वशो न गच्छतीति तथा यतः अंधदृ-

श्रीभाग॰टी॰द॰पू॰
१८८

त्व २

अतएवंभूतस्यतवागमनेनकृतार्थोस्मीत्याहअयेत्यं ॥ अद्येति हेईश ॥ अद्यनोवसतयोगृहास्तपोवनापिवद्धपुण्याः कुतः याः
वसतीस्त्वंसाक्षात्प्रविष्टः ॥ यस्यस्तवपादसलिलमेवगंगादिस्त्रिजगत्पुनाति ॥ यश्च त्वंपंचयज्ञदेवतामूर्त्तिः ॥ सत्वंजगद्गुरुरिति २३

या २ अद्येशनोवसतयःखलुभूरिभागायःसर्वदेवपितृभूतनृदेवमूर्त्तिः ॥ यत्पादशौचसलिलंत्रिजगत्पुना
तिसत्वंजगद्गुरुरधोक्षजयाःप्रविष्टः ॥ २३ ॥ कःपंडितस्त्वदपरंशरणंसमीयाद्भक्तप्रियादृतगिरःसुहृदःकृत
ज्ञात् ॥ सर्वान्ददातिसुहृदोभजतोपिकामानात्मानमप्युपचयापचयौनयस्य ॥ २४ ॥ दिष्ट्याजना
र्दनभवानिहनःप्रतीतोयोगेश्वरैरपिदुरापगतिःसुरेशैः ॥ छिंध्याशुनःसुतकलत्रधनाप्तगेहदे
हादिमोहरसनांभवदीयमायां ॥ २५ ॥ श्रीशुकउवाच ॥ इत्यर्चितःसंस्तुतश्चभक्तेनभगवा
न्हरिः ॥ अक्रूरंसस्मितंप्राहगीर्भिःसंमोहयन्निव ॥ २६ ॥ श्रीभगवानुवाच ॥ त्वंनोगुरुःपि
तृव्यश्चश्लाघ्योबंधुश्चनित्यदा ॥ वयंतुरक्ष्याःपोष्याश्चअनुकंप्याःप्रजाहिवः ॥ २७ ॥

स्वमनोरथंपरिपूरितइतितुष्यन्नाह ॥ कःपंडितइति ॥ ऋतगिरःसत्यवाचः ॥ त्वत्तोपरंशरणंकःसमीयात् गच्छेत् य
तोभवान्भजतःसर्वान्अभितःकामांश्चददाति ॥ आत्मानमपीति ॥ २४ ॥ नःअविवेकिनां तत्रापिदेहगेहएव ॥ २५ ॥ २६

[illegible] ति ॥ १४ ॥

भा०द०पू०
१८९

इत उपरि कर्त्तुमिष्टं गरस्य विषस्य दानादि ॥ अपेशलमन्याय्यं ॥ इत्यादि सर्वं कथयामास ॥४॥ तत्कथनानन्तरं पृथा वृत्तमाह ॥ पृथात्विति
अक्रूरं कलाले शाः यस्यां ते ईक्षणे यस्याः सा ॥५॥ अपि किं ॥ यामयः कुलस्त्रियः ॥६॥ पैतृष्वसेयान् मत्पुत्रान् ॥७॥ सांत्वयिष्यति किं ॥८॥ हे
महायोगिन् ॥ महान् योगो माया ख्या ऽस्यास्तीति ॥ हे विश्वात्मन् सर्वांतर्यामिन् ॥ हे विश्वभावन ॥ विश्वपालक ॥ प्रपन्नां शरणागतां ॥

कृतं च धार्त्तराष्ट्रैर्यद्गरदानाद्यपेशलं ॥ आचख्यौ सर्वमेवास्मै पृथा विदुरमेव च ॥४॥ पृथा तु भ्रातरं प्राप्त
मक्रूरमुपसृत्य तं ॥ उवाच जन्मनिलयं स्मरंत्यश्रुकलेक्षणा ॥५॥ अपि स्मरंति नः सौम्य पितरौ भ्रातरश्च
मे ॥ भगिन्यो भ्रातृपुत्राश्च यामयः सख्य एव च ॥६॥ भ्रात्रेयो भगवान् कृष्णः शरण्यो भक्तवत्सलः ॥ पैतृष्व
सेयान् स्मरति रामश्चांबुरुहेक्षणः ॥७॥ सपत्नमध्ये शोचंतीं वृकाणां हरिणीमिव ॥ सांत्वयिष्यति मां वाक्यैः पितृ
हीनांश्च बालकान् ॥८॥ कृष्ण कृष्ण महायोगिन् विश्वात्मन् विश्वभावन ॥ प्रपन्नां पाहि गोविंद शिशुभिश्चाव
सीदतीं ॥९॥ नान्यत्तव पदांभोजात्पश्यामि शरणं नृणां ॥ बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् ॥१०॥
नमः कृष्णाय शुद्धाय ब्रह्मणे परमात्मने ॥ योगेश्वराय योगाय त्वामहं शरणं गता ॥११॥

अवसीदंतीं क्लिश्यंतीं ॥९॥ आपवर्गिकात् मोक्षप्रदात् ॥१०॥ शुद्धाय धर्मात्मने ब्रह्मणे ॥ अपरिच्छिन्नाय ॥ परमात्मने जीवा
दीयेः जीवसख्याय ॥ योगेश्वराय ॥ अणिमादियुक्ताय ॥ योगाय ॥ ज्ञानात्मने ॥११॥ ॥ ऽऽ ॥ ॥ रामराम रामराम ॥ ॥ ऽऽ १८९

॥३३॥३४॥ इति दशमेऽष्टचत्वारिंशः ॥ ४८ ॥ ऊनपंचाशत्तमे तु गत्वाक्रूरो गजाह्वयं ॥ धृतराष्ट्रात्पुत्रेषु दुष्टभावं समभ्या-
गमत् ॥ पौरवेंद्राणां यशोभिस्तत्कृतदेवब्राह्मणाय तनादिभिः ॥ किंतं ॥ वाह्लीकपुत्रः सोमदत्तः ॥ भारद्वाजो द्रोणः ॥ गौतमः कृपः

गच्छ जानीहि तद्वृत्तमधुना साध्वसाधु वा ॥ विज्ञाय तद्विधास्यामो यथा शं सुहृदां भवेत् ॥ ३३ ॥ इत्य-
क्रूरं समादिश्य भगवान्हरिरीश्वरः ॥ संकर्षणोद्धवाभ्यां वै ततः स्वभवनं ययौ ॥ ३४ ॥ इति श्रीम-
द्भागवते महापुराणे दशमस्कंधे अक्रूरप्रेषणं नाम अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ श्रीशुक उवाच ॥ स ग-
त्वा हास्तिनपुरं पौरवेंद्रयशोंऽकितं ॥ ददर्श तत्राम्बिकेयं सभीष्मं विदुरं पृथां ॥ सहपुत्रं च वाह्लीकं
पं ३ भारद्वाजं सगौतमं ॥ १ ॥ कर्णं सुयोधनं द्रौणिं पांडवान्सुहृदोऽपरान् ॥ यथावदुपसंगम्य बंधुभिर्गां-
दिनीसुतः ॥ संपृष्टस्तैः सुहृद्वार्त्तां स्वयं चापृच्छदव्ययं ॥ २ ॥ उवास कतिचिन्मासान्राज्ञो वृत्तविवि-
त्सया ॥ दुष्प्रजस्याल्पसारस्य खलच्छंदानुवर्तिनः ॥ ३ ॥ तेज ओजो बलं वीर्यं प्रश्रयादींश्च सद्गु-
णान् ॥ प्रजानुरागं पार्थेषु न सहद्भिश्चिकीर्षितं ॥ ॥

१ अव्ययं कुशलं ॥ २ दुष्प्रजस्य असत्पुत्रस्य अल्पसारस्य मंदधृतेः ॥ खलानां कर्णादीनां छंदमभिप्रायमनुवर्तितुं
शीलमस्येति तथा तस्य ॥ ३ तेजः प्रभावः ॥ ओजः सत्त्वादि नैपुण्यं वीर्यं शौर्यं न सहद्भिः सहमानैश्चिकीर्षितम् ॥ ॥

भा०द०ए०
१९०

किंच। सदाच सहस्रं वसंति। तदापि क्लेशोपार्जितवित्तापहारित्वात् पुत्रा नाम शत्रव एवेत्याशयेनाह। अधर्मेति संभोजनीयाः
पोष्याः पुत्रादय इति प्रदेशः। अल्पमेधसो मूढस्य वित्तं हरंति। जलौकसो मत्स्यस्य जीवनभूतानि जलानि यथा तत्पुत्रा हरंति
तद्वदिति। २०। किंच। यानेव पुस्माति। ते धनमादाय मृता जीवंतोपि वा तं परित्यजंतीत्याह। पुस्मातीति। स्वबुद्ध्या स्वीया इत्यभिमा

अधर्मोपचितं वित्तं हरंत्यन्येल्पमेधसः। संभोजनीयापदेशैर्जलानीव जलौकसः। २०। पुस्माति यानधर्मेण स्वबुद्ध्या तमपंडितं। ते हृतार्थं प्रहिंसंति प्राक्स्मरायस्सुता इव। २१। स्वयं किल्विषमादाय स्यात्कोनार्थको विदुः। असिद्धार्थो विशत्येधं स्वधर्मविमुखस्तमः। २२। तस्माल्लोकमिमं राजन्स्वप्नमायामनोरथं। वीक्ष्यायम्यात्मनात्मानं समः शांतो भव प्रभो। २३। धृतराष्ट्र उवाच। यथा वदसि कल्याणीं वाचं दानपते भवान्। तथानया न तृप्यामि मर्त्यः प्राप्य यथामृतं। २४। तथापि सूनृता सौम्य हृदि न स्थीयते चले। पुत्रानुरागविषमे विद्युत्सौदामनी यथा। २५।

नेनरायः अर्थाः अकृतार्थमप्राप्तभोगं। २१।
स पुनः पापैकपाथेयो नरकं विशतीत्याह। स्वयमिति। असिद्धार्थो ऽपूर्णमनोरथः। २२। स्वप्नश्च माया मनोरथश्च तैस्तैस्तुल्यं
आयम्य नियम्य शांतः सन् समो भवेति। २३। हे दानपते अक्रूर न तृप्यामि। अलमिति न मन्ये। २४। सूनृता प्रियवाक्
चले अस्थिरे हृदि न स्थीयते। न तिष्ठतीत्यर्थः। सुदामा पर्वतः तत्र भवा विद्युदिव तस्मिन् स्फटिकशिलामये सह सेवा
तिस्फुरिता विद्युद्यथा लीयते तद्वदित्यर्थः। यद्वा सुदामा माला तस्या इयं सौदामनी मालाकारेत्यर्थः। २५। १९०

प्रपितामहः पांडुः तस्य भार्या प्ररोद ॥१२॥ यया सह समं दुःखं सुखं च यस्य स ॥ तस्याः पुत्राणामुत्पत्तिहेतुभिः अ
नेकैर्धर्मानिलेंद्रादिभिः ॥ तत्कथं नैरित्यर्थः ॥१३॥ बंधुभिः रामकृष्णादिभिः सौहृदेन उदितं उक्तं यत्तत्सुहृदिति ॥१४॥ भ्रातर्युप
रते इति पांडोः पुत्रेषु सत्सु राजासनं त्वमास्थित इति कटाक्षः ॥१५॥ भवतु तथाप्येवं वर्तमानः धर्मेणेति ॥१६॥ तमः नरके इहैवमस

इत्यनुस्मृत्य स्वजनं कृष्णं च जगदीश्वरं ॥ प्रारुदद्दुःखिता राजन्भवतां प्रपितामही ॥१२॥ समदुःखसुखोऽ
क्रूरो विदुरश्च महायशाः ॥ सांत्वयामासतुः कुंतीं तत्पुत्रोत्पत्तिहेतुभिः ॥१३॥ यास्यन्राजानमभ्येत्य विषमं
पुत्रलालसं ॥ अवदत्सुहृदां मध्ये बंधुभिः सौहृदोदितं ॥१४॥ अक्रूर उवाच ॥ भो भो वैचित्रवीर्य त्वं कुरूणां
कीर्तिवर्द्धनः ॥ भ्रातर्युपरते पांडावधुनासनमास्थितः ॥१५॥ धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रंज
यन् ॥ वर्त्तमानः समः स्वेषु श्रेयः कीर्तिमवाप्स्यति ॥१६॥ अन्यथा त्वाचरंल्लोके गर्हितो यास्यसे तमः ॥ त
स्मात्समत्वे वर्त्तस्व पांडवेष्वात्मजेषु च ॥१७॥ नेह चात्यंतसंवासः कर्हिचित्केनचित्सह ॥ राजन्स्वेना
पि देहेन किमु जायात्मजादिषु ॥१८॥ एकः प्रसूयते जंतुरेक एव प्रलीयते ॥ एकोऽनुभुंक्ते सुकृतमेक
एव च दुष्कृतम् ॥१९॥

दुःखरतिभावः ॥१७॥ नन्वात्मजानात्मजादिषु कथं ममत्वं स्यात्तत्राह ॥ नेह चेति ॥ अत्यंतं नि
त्यं संवासः संवासः सम्यक् स्थितिः ॥१८॥ तत्र तावदुत्पत्तिमरणयोः सुखदुःखयोश्च केनापि साहित्यं नास्तीत्याह ॥ एक इति

२८९

भा०द०पू० नन्वेवंज्ञातोपिकथमयंमोहइतिचेदत्तआह ॥ ईश्वरस्येति ॥ विधिंविधानंमायामितियावत् ॥ २६ ॥ अतस्तमेवनमस्यति
१९१ यइति ॥ दुर्विमर्शपथयाअवितर्कमार्गया ॥ गुणान्कर्माणितत्फलानिचभजतेविविच्यददाति ॥ दुरवबोधोयोविहारस्तस्यक्रीडास
एवतंत्रं ॥ प्रधानंमुख्यंकारणंयस्यसंसारचक्रस्य ॥ अतएवतस्यगतिर्यस्मात्तस्मैनमइति ॥ २७ ॥ अभिप्रेत्यज्ञात्वा ॥ २८ ॥ २९ ॥ द

ईश्वरस्यविधिंकोनुविधुनोत्यन्यथापुमान् ॥ भूमेर्भारावताराययोऽवतीर्णोयदोःकुले ॥ २६ ॥ योदुर्वि
मर्शपथयानिजमाययेदंसृष्ट्वागुणान्विभजतेतदनुप्रविष्टः ॥ तस्मैनमोदुरवबोधविहारतंत्र
संसारचक्रगतयेपरमेश्वराय ॥ २७ ॥ श्रीशुकउवाच ॥ इत्यभिप्रेत्यनृपतेरभिप्रायंसयादवः ॥
सुहृद्भिःसमनुज्ञातःपुनर्यदुपुरीमगात् ॥ २८ ॥ शशंसरामकृष्णाभ्यांधृतराष्ट्रविचेष्टितं ॥ पांडवा
न्प्रतिकौरव्ययदर्थंप्रेषितःस्वयं ॥ २९ ॥ इतिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसंहितायांवैया
सिक्यांदशमस्कंधेएकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥

शमस्कंधपूर्वार्द्धभावार्थस्यप्रदीपिका ॥ यस्येयंपुरतोभातिनभात्यंतरतस्तमः ॥ ॥ इतिश्रीदशमस्कंधसंबोधि
न्यांभावार्थदीपिकायामेकोनपंचाशत्तमोऽध्यायः ॥ ४९ ॥ शुभमस्तु ॥ ऽऽ ॥ ॥ ॥ ॥ ॥ १९१

श्री

दशम स्कंध पूर्वार्ध

समाप्त